श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजि-
चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

तृतीयाध्यायस्य तृतीयः पादः ।

'भगवद्धर्मपरायण सद्गत श्रेष्ठि गोवर्धनदास सुन्दरदास' इत्यस्य
पुष्टिमार्गीयसंस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतो
'भृगुपुरस्थ मूलचन्द्र तुलसीदास तेलीवाला, बी. ए,
एलूएल्. बी , वकील, हाइ कोर्ट' इत्यनेन संशोध्य
'निर्णयसागर' मुद्रणालये मुद्रयित्वा
प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४४२ संवत् १९८३.

मूल्यं मुद्रिकाद्वयम् ।

श्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणाः

प्राकट्यं संवत् १७२४ भाद्र-शुक्ल-एकादशी।

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

तृतीयोऽध्यायः ।

तृतीयः पादः ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ (३-३-१.)

पूर्वपादे जडजीवधर्मनिराकरणेन शुद्धसच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितम्, इह तु ब्रह्मगता एव धर्मा विचार्यन्ते । ते चेत् एकस्मिन् वाक्य एव सर्वे

भाष्यप्रकाशः ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ अथ तृतीयपादं व्याचिख्यासवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्तः प्रस्तूयमानस्यार्थमाहुः पूर्वपादेत्यादि । उपनिषद एव ब्रह्मणि मुख्यं प्रमाणमिति तासां यथा बोधकता, स प्रकारः साधनाध्याये विचार्यः, अन्यथा ब्रह्मबोधाभावे तद्विषयकमुपासनादिसाधनं न कर्तुं शक्येत, अपराधं वा दध्यादिति, तदर्थं पूर्वस्मिन् पादे जडजीवधर्मनिराकरणेन तत्र प्रत्याय्यमानानां धर्माणां ब्राह्मत्वस्य ब्रह्मणो विरुद्धधर्माश्रयत्वस्य च व्यवस्थापनात् प्रपञ्चविलक्षणशुद्धसच्चिदानन्दविग्रहरूपत्वं ब्रह्मणो निरूपितम्, तेनैतादृशतया ता ब्रह्म बोधयन्तीति सिद्धम् । इह तु तादृशब्रह्मगता एव धर्मा उपासनादेरन्तरङ्गसाधनत्वात् तच्छेषतया उपसंहाराद्यर्थं विचार्यन्ते । तथाच पूर्वस्यास्य च पादस्योपजीव्योपजीवकभावः सङ्गतिरित्यर्थः । नन्वतीते पादे उभयलिङ्गाद्यधिकरणैर्विरुद्धसर्वधर्माधारब्रह्मस्वरूपबोधनेनोपनिषदां बोधनप्रकारावधारणे धर्मासङ्गावशङ्कानिवृत्तौ पुनः साधनशेषतयापि तद्विचारस्य किं प्रयोजनमित्याकाङ्क्षायामाहुः ते चेदित्यादि । ते चेत्तथा भवेयुः, तदा तत्तदुपासने तेषामितरेतरविरुद्धानामपि 'आसीनो दूरं व्रजती'त्यादिवत् ब्रह्मधर्मत्वेनोपादेयतया विरोधाभावात्, अथ चेद्भावनादौर्घट्यं विभाव्यते, तदापि 'स्थितं व्रजन्तमासीनं शयानं वा गुहाशय'मितिवत् कालभेदेन पर्यायभेदेन च भावने

रश्मिः ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ इह त्विति भाष्यं विवृण्वन्ति स्म इह त्विति । एवेति । जडजीवगतधर्मयोगव्यवच्छेदक एवकारः । अन्तरङ्गेति । धर्ममात्रापेक्षत्वेन स्वल्पापेक्षत्वात् । पूर्वस्यास्येति । जडजीवधर्मनिराकरणं विना सकलधर्मोपसंहारो न भवेदित्युपजीव्यो द्वितीयपादार्थः । उपजीवकस्तृतीयपादार्थः उपसंहारः इति । तथेति । एकवाक्ये पठिता भवेयुः । भावनेति । स्मरण दौर्घट्यम् । पठिता इत्यादिभाष्यं विवृण्वन्ति स्म पठि-

पठिता भवेयुः, तदा न विचारणीया भवेयुः, विरोधाभावात्। पठिताश्च तत्तदुपासनप्रकरणेषु, क्वचित् त एव, क्वचित् भिन्नाः। यथा वाजसनेयिनः पञ्चाग्निविद्यां प्रस्तुत्य षष्ठमन्यमग्निं पठन्ति। 'तस्याग्निरेवाग्नि'रिति। छन्दोगास्तु पञ्चसंख्ययैवोपसंहरन्ति।

भाष्यप्रकाशः ।

विरोधाभावान्न विचारणीया भवेयुः । पठितास्तु न सर्वे एकत्र, किन्तु तत्तत्प्रकरणे क्वचित्त एव, क्वचित्तद्भिन्नाः। यथा पञ्चाग्निविद्यायामभ्यन्तरांशे त एव, षष्ठस्त्वधिक इति भेदः। प्राणविद्यायामन्ये प्राणास्त एव, रेतस्तद्भिन्नमिति । एवं सत्यब्रह्मविद्यायां व्याहृतिशरीरांशे तौल्यं स्थानभेदेनाहरित्यहमित्युपनिषदोर्भेद इति । तथाच तान्युपासनान्युपास्यविशेषणत्वादिना ब्रह्मपदस्यानुक्तत्वात् तेषां तद्धर्माणां च ब्रह्मत्वे ब्रह्मधर्मत्वे च सन्देहाद्विचारणीयाः । पादान्ते ब्रह्मण एव सकलफलदातृत्वस्य विचारितत्वात् । पूर्वोत्तरकाण्डयोस्तु तेषु तेषु वाक्येषु तत्तत्कर्मणा तत्तद्देवप्रीत्या तेन तेन तैस्तैः फलस्य श्रावणात् कथं ब्रह्मणः फलदातृत्वमित्याकाङ्क्षायां तेन तेन साधनेन तुष्टं ब्रह्मैव तैस्तै रूपैः फलं ददातीति वक्तुं विचार्यन्त इत्यर्थः । यद्यपि प्राणादिविद्या न परविद्याः, तथापि प्राणादीनां ब्रह्मत्वेनोपासनस्य वाक्यान्तरेषूक्तत्वात् तेषु च ब्रह्मशब्दस्य 'ॐमित्येतदक्षरमुद्गीथ'मित्यत्रोद्गीथ-

रश्मिः ।

तास्त्विवति । **पञ्चाग्नीति** । **भेद इति** । विद्याभेदः । **तथेत्यारभ्य पञ्चमं पठन्तीत्यन्तं** भाष्यं विवृण्वन्ति स्म **प्राणविद्यायामित्यादि, द्रष्टव्य** इत्यन्तम् । 'प्राणविद्या वै ज्येष्ठं च श्रेष्ठं चे'त्यारभ्य छान्दोग्ये । **त एवेति** । छान्दोग्योक्ता एव । **रेतस्तद्भिन्नमिति** । प्राणभिन्नं 'रेतो होच्चक्रामे'ति पठितम् । **सत्यब्रह्मेति** । छान्दोग्ये 'अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाच, एष वै विश्वरूप आत्मा वैश्वानर' इति । स इत्युद्दालक आरुणिः उद्दालको गोत्रतः अरुणस्यापत्यमारुणिः । सत्यं यज्ञो यस्य तं सत्ययज्ञं भक्त्यभावान्न सत्यमभिव्यक्तम्, किन्तूपासनासत्त्वात्तद्विषय आदित्यस्तत्रोपासनार्थं विश्वरूप आत्मा इति ब्रह्मधर्मौ । वैश्वानर इति च । अथवा । बृहदारण्यके सत्यब्राह्मणेऽस्ति सत्यब्रह्मविद्या । 'तद्वैतदेतदेव तदास'त्यारम्भिका सत्यब्रह्मविद्या तस्याम् । तत्स्तावकेऽग्रिमब्राह्मणे 'आप एवेदमग्र आसु'रित्यारम्भके व्याहृतिशरीरांशेऽवान्तरोपनिषदोस्तौल्यमुपनिषत्त्वेन । प्रथमोपनिषदि 'य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकꣳशिरः एकमेतदक्षरम्, भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे, स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे' इति शरीरांशः । द्वितीये 'अथ योयं दक्षिणेक्षन्पुरुषस्तस्य भूरित्यादिशरीरांशस्तुल्य' इति तौल्यम् । **स्थानेति** । देशसामान्यं स्थानं तस्य भेदोऽवान्तरोपनिषद्रूपस्थानयोः परस्परं तेन । **अहरित्यादि** । 'तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेदे'ति प्रथमेऽहरिति । अहमिति द्वितीये 'तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेदे'ति । एवमुपनिषदोर्विद्याभेदः । तथा प्राणेत्यादिभाष्ये किञ्चिदाहुः **यद्यपीति** । **न परेति** । अक्षरविषयत्वाभावादिति भावः । 'अथ परा यया तदक्षरमधिगम्यते' इति मुण्डकात् । 'तथा चापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमितिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीत्यथ परा यया तदक्षरमधिगम्यते' इति श्रुतेरपरविद्याया बोधकतोक्तरीत्या ब्रह्मगतधर्मा ज्ञानभक्तिषूपासनाया युक्तत्वात्तद्विषययोरुपसंहार्याः । एवं चापराविद्याबोधिता ज्ञानभक्त्युपासना इति तासां बोधकताप्रकारः । **वाक्यान्तरेति** । 'प्राणो ब्रह्मेति व्यजाना'दित्यादिवाक्यान्तरेषु । **उद्गीथेति** । उद्गीथं 'ॐमित्येतद-

'अथ य एतानेवं पञ्चाग्नीन् वेदे'ति । तथा प्राणसंवादे मुख्यप्राणादन्याँश्चतुरः प्राणान् वाक्चक्षुःश्रोत्रमनांसि पठन्ति । वाजसनेयिनस्तु तमपि पञ्चमं पठन्ति ।

अपरं च । अथर्वोपनिषत्सु क्वचित् गोकुलवृन्दाकाननसञ्चरद्गोपरूपमनल्पकल्पद्रुमप्रसूनविरचितविचित्रस्थलीककालिन्दीसलिलकल्लोलसङ्गिमृदुतरपवनचलदलकविराजमानगण्डमण्डलद्युतिमण्डितकुण्डलप्रभानुभावितवामांसमिलन्मूर्धन्य-

भाष्यप्रकाशः ।

शब्दवत् तद्विशेषणत्वेन कार्यरूपप्राणादिव्यावर्तनार्थतायाः 'तं यथा यथोपासते तथैव भवति तद्वैतान् भूत्वावती'ति श्रुत्याध्यवसितत्वात् प्राणादीनामपि ब्रह्माङ्गत्वेन तद्धर्मा अपि ब्रह्मधर्मा एव, परं न मुख्या इति ब्रह्मधर्मत्वज्ञापनायैतदुदाहृतम् । तथाच यद्यपि ब्रह्मणि सर्वत्र सर्वे धर्माः सन्ति, तथापि तस्य तस्य संराधकस्य तत्तत्फलार्थं तांस्तानेव धर्मान् ब्रह्म प्रदर्शयति, न सर्वेषां सर्वान्, अतस्तत्तदुपासनायां ते त एव ध्यातव्याः, तत्तद्विधायकवाक्यानुरोधात् । तत्र चेदुक्तरीत्या सन्देहः, तदोपासना न कर्तुं शक्येतेति तदर्थं विचार्यन्त इति भावः । अत्र षष्ठोऽग्निर्बृहदारण्यके पञ्चमप्रपाठके पठितः । पञ्चाग्नयस्तु छान्दोग्ये सप्तमे प्रपाठके । प्राणसंवादोऽपि छान्दोग्ये तत्रैव । बृहदारण्यके तु पञ्चमे प्रपाठके द्रष्टव्यः । अत्र पादे अपरविद्योक्ता एव धर्मा विचार्यन्ते, न परविद्योक्ता अपीति शङ्कां निवारयन्त एव प्रस्तूयमानाधिकरणस्य विषयान्तरमप्याहुः अपरं चेत्यादि । अयमर्थः । गोपालपूर्वतापिन्यां 'सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे' इत्यादिना भगवतः कृष्णस्य परब्रह्मत्वमुक्त्वा, 'तदुहोवाच हैरण्यो गोपवेषमभ्राभं तरुणं कल्पद्रुमाश्रितम्, तदिह श्लोका भवन्ति । सत्पुण्डरीकनयन'मित्यारभ्य, 'चिन्तयँश्चेतसा कृष्णं मुक्तो भवति संसृते'रित्यन्तैः स्वरूपं ध्यानफलं चोक्तम् । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं

रश्मिः ।

क्षरमुपासीते'त्यन्वयादुद्गीथशब्दवत् । कार्यादीति । व्यावर्तकविशेषणं यतः । प्राणादीनामिति । प्राणवाक्चक्षुःश्रोत्रमनसाम् । ब्रह्माङ्गत्वेनेति । ब्रह्म आकाशः श्रोत्रस्यापि । वाङ्मनसोरादेशः चक्षुषः सूर्यः आनन्दवल्ल्यां अन्यत्र च । यद्वा । प्राणविद्यास्थ ब्रह्म । तत्रास्पष्टत्वेपि 'प्रजापतिं पितरमेत्योचु'रिति प्रजापतिः । तदङ्गत्वेन । तद्धर्मा अङ्गधर्माः । करपाणित्वादीनां देहधर्मत्वदर्शनादेवकारः । मुख्यास्तु देहत्वादिवद्ब्रह्मत्वादयोऽतो न मुख्या इत्येवं ब्रह्मधर्मत्वज्ञापनाय प्राणसंवादरूपं भाष्य उदाहरणविषयम् । तथाचेति । अपरविद्याया ऋग्वेदादिरूपायाः शब्दरूपत्वेनार्थस्य भाव उक्तरीत्या प्राणाद्यर्थपरत्वे विचारिते ऋग्वेदाद्युपनिषदां बोधकताप्रकारे विचारिते चेत्यर्थः । तत्र चेदित्यादि । उपासनायां चेत् उक्तरीत्या पठिताश्चेत्यारभ्य पञ्चमं पठन्तीत्यन्तभाष्येणोक्तरीत्या । अन्वयार्थं तदोपासनेत्यादिग्रन्थः । तदर्थं ब्रह्मगता एव धर्मा विचार्यन्त इति पूर्वेणान्वय आवृत्त्येत्यर्थः । एवेति । व्यवच्छेद्यं तु न परेत्याद्युक्तम् । अत्र भाष्ये । तमपीति । प्राणमपि । प्रकृते । निवारयन्त एवेति । अवधारणेन निवारयन्तः । एवेत्यत्र तृतीयालुक् । प्रस्तूयेति । ननु सर्ववेदान्तशब्दात्प्रस्तूयमानाधिकरणविषयत्वमथर्वोपनिषद्येव कुत इति चेच्छृणु । उपलक्षणत्वात् । अपरं चेत्यादीति । अपरमाथर्वणं चकारेणर्ग्वेदाद्युपनिषदः । क्वचिदिति । गोपालतापिनीये । वृन्दाकाननं वृन्दावनम् । अनल्पेत्यादिविशेषणम् । अनल्पानि कल्पद्रुमस्य प्रसूनानि तैर्विरचिता विचित्रा स्थली यस्यां कालिन्द्याम् । तस्याः सलिलं तस्य कल्लोलानां सङ्गोऽस्यास्तीति सङ्गि उक्तविशेषणैः सिद्धं मृदुतरः पवनः तेन चलैर्दलैर्विराजमानं[1] गण्डमण्डलं तस्य द्युत्या मण्डितयोः कुण्डलयोः प्रभयानुभावितं अनु पश्चात्पुटितो

१. चलैर्दलैरिति रश्मिपाठ आदर्शेषु कुत्राप्यदर्शनान्नादृत इति ।

महामणिकमुरलिकामुखावलीमिलदतितरलकरकमलयुगलाङ्गुलीवशंवदविविधस्वरमूर्छनामोहितव्रजवरनितम्बिनीकदम्बकटाक्षकुवलयार्चितम्, क्वचित् कोदण्डमण्डितभुजदण्डखण्डितप्रचण्डदशमुण्डमतिविचित्रचरित्राभिरामं रामस्वरूपम्, क्वचिदतिकरालवदनवित्रासितकमलाकमलासनवृषभासनादिकं नृकेसरिरूपम्,

भाष्यप्रकाशः ।

परं ब्रह्म कृष्ण इत्यभिधीयते' इति चोक्तम् । श्रीभागवते च 'कृष्णस्तु भगवान् स्वय'मित्युक्तम् । दशमस्कन्धसुबोधिन्यां च परब्रह्मत्वं व्युत्पादितम् । तथा रामतापनीये 'रमन्ते योगिनो यस्मिन्नित्यानन्दे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयत' इति श्रावणात् । श्रीमदाचार्यैरपि पञ्चमस्कन्धनिबन्धप्रकाशे 'कदाचिद्रामः पुरुषोत्तमावतार एवेति पद्मपुराणादवसीयते' इति कथनात् । अग्निकुमाराणां च 'व्रजे वो मनोरथः सम्पत्स्यत' इति श्रीरामेण वरदानाच्च । नवमस्कन्धे श्रीरामचरित्रे 'स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा । कोशलास्ते ययुः स्थानं यत्र गच्छन्ति योगिन' इत्यविशेषेण सर्वेषां मुक्तिदानाच्च श्रीरामस्य पुरुषोत्तमरूपत्वम् । नृसिंहस्वरूपे तु नृसिंहविद्यावत्युत्कर्षविश्रान्त्या नृसिंहस्य परत्वमवसीयते । तद्विद्याया रहस्यत्वश्रावणाच्च । उरुक्रमरूपे तु विष्णुसूक्तश्रीभागवतादिषु अनन्तवीर्यत्वकथनात्, पातिकया क्रियया सत्यलोकस्थापकत्वरूपाद्भुतकर्मकथनाच्च परत्वं निरूप्यते । आदिपदेन नारायणानुवाकसद्विद्यात्मविद्याश्वेताश्वतराद्युक्तनारायणस-

रश्मिः ।

वामांसः तेन मिलन्ती मूर्धन्या उत्तमा महामणयो यस्यां मुरलिकायां तस्या मुखानां छिद्राणामावल्यः पङ्क्तयस्ताभिर्मिलन्ती अत्यन्तं तरल कररूपस्य कमलस्य युगलं तस्याङ्गुल्यः तासां वशंवदा । अत्र मूर्छनानिष्ठो व्यापारः । ता विविधाः सप्तानां स्वराणां मूर्छना एकविंशतिः ताभिर्मोहितो व्रजस्य वरो नितम्बिनीनां भक्तानां कदम्बो यासु ताः मोहितव्रजवरनितम्बिनीकदम्बास्तासां कटाक्षाणि तानि कुवलयानि तैरर्चितमिति । श्रुतयः प्रसिद्धाः । क्वचिदिति । रामतापिनीये । कोदण्डो धनुः । क्वचिदिति । नृसिंहतापिनीये भागवतोपबृंहणे । इत्यादीति । रूपमित्यर्थः । मन्त्रे च तद्रूपम् । स च 'चरणं पवित्रं विततं पुराणमि'ति महानारायणे । तत्रेति । यजुरुपनिषदि बृहदारण्यके, सामोपनिषदि छान्दोग्य इत्यर्थः । तत्रेति । ऋग्वेदोपनिषदि मण्डूके । रूपान्तरमिति । मण्डूके तु 'अद्वैतः सर्वभूतानां देवस्तुर्यो विभुः स्मृतः' इत्यत्र देवे तुरीयत्वं विधीयते । तुर्य इति फले परोक्षवादात् । देवः क्रीडावान् । दशविधक्रीडाः । स तुर्यः तुरीय इत्यर्थः । उपबृंहितेयं तु कृष्णं वदिष्यतीति तद्रूपान्तरम् । आरम्भे तु 'ॐमित्येतदक्षर'मित्युक्तं तच्छब्दार्थयोरौत्पत्तिकसम्बन्धाद्दृह्यत उपासनायां तद्रूपं तु नात्र । ब्रह्मविद्योपनिषद्यस्ति 'ऋग्वेदो गार्हपत्यः पृथिवी ब्रह्म एव च । अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः ॥ यजुर्वेदोऽन्तरिक्षं च दक्षिणाग्निस्तथैव च । विष्णुश्च भगवान् देव उकारः परिकीर्तितः ॥ सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च । ईश्वरः परमो देवो मकारः परिकीर्तितः' इति । गार्हपत्याद्यग्नयः सोमपर्यन्ताः । तेषां रूपं [सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः । त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा । बिभ्रद्दक्षिणहस्तैस्तु भक्तिमन्नं स्रुचं स्रुवम् ॥ तोमरं व्यजनं वामैर्घृतपात्रं च धारयन् । आत्माभिमुखमासीन एवंरूपो हुताशनः] इति [1]श्लोकोक्तम् । 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।

१. मूले समग्रः श्लोको न लिखितः चिह्नान्तर्गतः [ ] ।

क्वचिदुरुक्रमादिरूपं च निरूप्यते । तथाच द्रव्यदेवताभेदात् यागभेदवद्धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्च वेद्यभेदे प्राप्ते ब्रह्मानेकत्वापत्तौ श्रुतिविरोधात् विनिगमकाभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितम् ।

भाष्यप्रकाशः ।

दात्मरूपं शिवरूपमन्यच्च तत्र तत्रोक्तं रूपान्तरं संगृह्यते । चकारेण तत्र तत्रोक्तविभूतिरूपसंग्रहः । तथाच श्रुतौ ब्रह्मणो नानारूपनिरूपणात् तेषु किं समानत्वम्, उत कस्यचिच्छीघ्रं फलदातृत्वेन सुगमोपायैः फलदत्वेन परमदयालुतया जीवापराधनिवारकत्वेनाधिक्यमिति सन्देहानपायात्तदर्थं विचार आवश्यक इत्यर्थः । एवमत्र विषय उक्तः । तथाच पूर्वत्र ब्रह्मप्राधान्येन विचारः, अत्र ब्रह्मरूपप्राधान्येनेति विशेषः ।

संशयं व्युत्पादयन्ति तथाचेत्यादि । तथा तेन धर्मभेदप्रकारेण द्रव्यदेवताभेदाद्यागभेदवत् । यथा पूर्वतन्त्र आमिक्षाधिकरणे, 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन'-मित्यत्रामिक्षावाजिनात्मकघनविरलद्रव्यद्वयरूपक एको यागः, उत यागद्वयमिति सन्देहे, द्रव्यदेवताविशिष्टयागान्तरविधौ गौरवं व्यापारान्तरकल्पनापत्तिश्चेति न यागद्वयं युक्तम्, किन्त्वामिक्षायाग एव वाजिनं गुणो विधीयते । 'वाजिभ्य' इत्यनेन च वाज आमिक्षारूपमन्नं येषामिति योगेन पूर्वोक्ता विश्वेदेवा एवोपलक्ष्यन्त इति पूर्वः पक्षः । तत्रोत्पत्तिशिष्टामिक्षाद्रव्यावरुद्धे यागे उत्पन्नशिष्टं वाजिनं गुणत्वेन प्रवेशं न लभते, निर्बलत्वात् । ततश्च तत् द्रव्यं स्वसम्बन्धिनं यागं पूर्वस्माद्भिनत्ति । वाजिपदं चाश्वे रूढत्वान्न योगेन विश्वान् देवान् उपलक्षयिष्यति । योगस्य रूढितो नैर्बल्यात् । तथा सति विधिव्यापारान्तरयोः कल्पनस्य प्रामाणिकत्वात् तत्कृतं गौरवं न दोषायेति द्रव्यदेवताभेदात् तत्र यथा यागभेदः, तद्वदत्रोपासनायां गोपालरामनृसिंहादिरूपभेदेन परस्परं तेषां भेदात् धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्च प्रापञ्चिकानां मुरलीकोदण्डधरत्वादीनामावापेन तद्वि-

रश्मिः ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेशे'ति श्रुत्युक्तं च । स्वाध्यायसूत्र उपयोक्ष्यते । भाष्यीयचकारार्थमाहुः **चकारेणे**ति । **तत्रे**ति । तैत्तिरीये । **तत्रे**ति । दुर्गागणपतिसूर्योपनिषत्सु । **विभूती**ति । अन्नमयादिविभूतयः दुर्गादिविभूतयश्च । तासां रूपाणि पक्ष्यादिरूपाणि । **तथे**ति । व्याख्येयम् । तेनामिक्षात्वेन वाजत्वेन विश्वेदेवत्वेन लक्षितविश्वेदेवत्वेनेत्यादि व्याख्यानम् । **व्यापारे**ति । यागान्तरकल्पनापत्तिः । द्रव्यदेवता आमिक्षावाजिविश्वेदेवाः तेषां भेदात् । **वाजिभ्य इती**ति । अश्वे रूढेन पदेन । **पूर्वोक्ता** इति । आमिक्षायागोक्ताः । एवकारोऽन्ययोगव्यवच्छेदकः गौरवात् । **उपलक्ष्यन्त** इति । वाजिपदमश्वे रूढम्, तेनोपलक्षणेन विश्वेदेवा बोधविषयाः क्रियन्त इत्यर्थः । यद्वा । विरलद्रव्यवाजान्नसम्बन्धिषु वर्तते । वाजान्नसम्बन्धिषु विश्वेदेवेषु वाजान्नसम्बन्धिविशेषेषु विश्वेदेवेषु लाक्षणिकम् । **द्रव्यदेवताभेदाद्यागभेदवदि**ति । व्याख्येयम् । सामान्यवाच्यस्य विशेषवाच्यस्य च सामान्यविशेषभावसम्बन्धो लक्षणा । **उत्पत्तीत्यादि** । वैश्वदेव्यामिक्षेति प्रथमज्ञप्तिशिष्टा । **उत्पन्नेति** । तप्ते पयसि दध्यानयनेनोत्पन्ने शिष्टम् । **योगेने**ति । वाजो येषामस्ति । 'अत इनिठनौ' इतियोगेन । **उपलक्षयिष्यती**ति । यथा घटपद कम्बुग्रीवादिमति रूढ न भासाकरमुपलक्षयति योगेन । **विधी**ति । द्रव्यदेवताविशिष्टयागान्तरविधिः । **व्यापारान्तरे**ति । यागान्तरेत्यर्थः । दार्ष्टान्तिके योजयन्ति स्म **अत्रोपासनायामिति** । **भेदे** इति । सति इत्यर्थः । **धर्माणामावापोद्वापाभ्यां दृष्टादृष्टफलभेदाच्चे**ति । व्याख्येयम् । **साकारे**ति । निष्कलं षोडशीकलारूपम् ।

१. भेदे इति पूर्वपाठ. रश्मौ ।

ननूपासनाविषयाणामौपाधिकत्वात् तेषां चाविद्याकल्पितत्वात् तद्विशिष्टानां तथात्वं युक्तमेव, नचैवं तन्निरूपकाणां वेदान्तानामब्रह्मपरत्वप्रसङ्गः, शुद्धस्य ब्रह्मणो दुर्ज्ञेयत्वेनोपाधिविशिष्टोपासनया चित्तशुद्धौ सत्यां स्वत एव तज्ज्ञानं भविष्यतीत्येतत्तात्पर्यकत्वादिति चेत् । मैवम् । समन्वयविरोधापत्तेः । तासां ब्रह्मविद्यात्वहानेश्च । श्रुतेः प्रतारकत्वापत्तेश्च ।

भाष्यप्रकाशः ।

लक्षणानां सदेकरसत्वास्थूलत्वादीनामुद्वापेन चेत्येवं ताभ्यां तत्तद्रूपगततत्तद्धर्मावापोद्वाभ्यां च साकारदर्शननिष्कलदर्शनादिरूपयोर्दृष्टफलयोस्तत्तत्पदप्राप्तिब्रह्मभावरूपयोरदृष्टफलयोर्भेदाच्च ज्ञानवेद्यात् सर्वफलदातृत्वेन प्रतिपादितात् परब्रह्मणोपि सकाशाच्च तत्तद्वाक्यवेद्यानां भेदे प्राप्ते, तत्तद्वाक्येषु ब्रह्मत्वेनैवोपासनस्य विहितत्वात् ब्रह्मानेकत्वापत्तौ 'एकमेवाद्वितीय'मिति श्रुतिविरोधादुपास्यरूपेषु किं ब्रह्म, किं नेति विनिगमकाभावात् सर्वेषामुपासनाविषयाणामब्रह्मत्वमापतितम् । अतः किं सर्वेषामब्रह्मत्वम्, उत यागवद्ब्रह्मभेदः, उत सर्वत्रैकमेव ब्रह्म प्रतिपाद्यमिति संशय इत्यर्थः ।

पूर्वपक्षमाहुः नन्वित्यादि । ननूपासना नाम चिन्ताभावनाद्यपरपर्याया शास्त्रप्राप्ता सविषयकज्ञानरूपा मनोवृत्तिः, ब्रह्म तु निर्विषयज्ञानैकरसम्, न तादृशनानाविधधर्मवत्तया वृत्तिविषयीभवितुमर्हतीत्युपासनाविषयाणां धर्माणामौपाधिकत्वादौपाधिकानां चाविद्याकल्पितत्वात् तद्धर्मविशिष्टानां तेषां तेषां रूपाणामब्रह्मत्वं युक्तमेवेत्यर्थः । नचेत्यारभ्य चेदित्यन्तं स्पष्टम् । एवमत्रैकः पूर्वपक्षः । तमन्यो दूषयन्नाह मैवमित्यादि । न वेदान्तानामुक्तविधतात्पर्यकत्वेन ब्रह्मपरत्वं शक्यवचनम् । समन्वयविरोधापत्तेः । 'सर्वे वेदा यत्पदमामनन्ती'त्यादयः श्रुतयो हि 'अणोरणीयान्महतो महीया'नित्यादिभिर्विरुद्धधर्माश्रयमेवाशरीरमप्राकृततनुं सर्वोत्तारं मृत्यूपसेचनकं ब्रह्म बोधयन्ति । तथा 'अदृश्यमग्राह्य'मित्यादि प्रकृत्य, 'यथोर्णनाभिः सृजते गृह्णते चे'त्यादिभिः कारणत्वसर्वज्ञत्वादिकं तत्र वदन्ति । अक्षरं 'अस्थूलमनण्वि'त्यादिना प्रपञ्चविलक्षणं प्रकृत्य, प्रशासितृत्वादिधर्मकं वदन्तीति विरुद्धधर्माश्रय एव ब्रह्मणि श्रुतीनां समन्वयात् त्वदुक्तरीत्याङ्गीकारे तद्विरोधापत्तेः । उपासनाविषयाणामब्रह्मत्वे तद्बोधकानां ब्रह्मानिरूपकतया ब्रह्मविद्यात्वहानेः । चकारेण 'परं ब्रह्म परं धामे'त्यादिस्मृतीनामपि विरोधात् । अन्यथा सतो ब्रह्मणोऽन्यथा

रश्मिः ।

'निष्कलं निरवयव'मिति विरुद्धधर्माधिकरणं वा । ब्रह्मभावः 'कृष्णोह'मिति । 'ब्रह्माहमस्मी'ति । **वेद्यभेद** इति भाष्यं विवृण्वन्ति स्म **ज्ञानवेद्यादिति** । एकरूपादेकरसाच्च । **ब्रह्मानेकत्वेति** भाष्यं विवृण्वन्ति स्म **तत्तद्वाक्येष्वित्यादि** । **विहितत्वादिति** । 'आत्मेत्येवोपासीते'ति पुरुषविधब्राह्मणश्रुत्या विहितत्वात् । **चिन्तेति** । आदिना मनोव्यापारः । **शास्त्रेति** । 'आत्मेत्येवोपासीते'त्याद्युपासना शास्त्रप्राप्ता । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'ति भावना । 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशये'दिति मनोव्यापारः । विषयो विराट् । ज्ञानमात्मत्वादिप्रकारकम् । **निर्विषयेति** । निर्विषयज्ञानं च तदेकरसम् । विषयस्याविद्यकत्वात् । **तद्धर्मेति** । औपाधिकधर्मविशिष्टानाम् । **एवेति** । अनौपाधिकत्वखण्डनयुक्त्यैवकारः । **स्पष्टमिति** । **स्वत एवेति** । चित्तशुद्धिश्चित्तलयात्मिका तद्भेदेऽहंकारे लीने (तद्भेदरूपायां बुद्धौ लीनायां) आद्यकार्यलयाज्जगल्लये स्वत एव, नतु साधनतः 'अहं ब्रह्मास्मी'त्यैक्यज्ञानं भविष्यति । एवं स्पष्टम् । **उक्तेति** । अव्यवहितपूर्वोक्तविधतात्पर्यकत्वेन । **एवेति** । उभयव्यपदेशाधिकरणादेवेति । **तद्विरोधेति** । समन्वयविरोधापत्तेः । **तासा**मितिभाष्यं विवृण्वन्ति स्म **उपासनेति** । **श्रुते**रितिभाष्यं विवृण्वन्ति स्म **अन्यथेति** । **अन्यथेति** ।

अपरश्च । 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा' इत्यन्यथाज्ञानं निन्दती श्रुतिः कथं फलसाधकत्वेन तत्तदुपासनां वदेत् । स्पष्टार्थानां श्रुतिवाक्यानां निर्णयमकृत्वा सन्दिग्धार्थानां ज्योतिराकाशादिशब्दानां तद्वाचकत्वं न निर्णीयात् भगवान् व्यासः । एवञ्च सत्युक्तरीत्या यागवत्तेषां परस्परं भेदश्चावश्यक इत्युभयतःपाशा रज्जुरिति प्राप्ते, अभिधीयते ।

सर्ववेदान्तप्रत्ययम् । अनेकरूपनिरूपकैः सर्वैः वेदान्तैः प्रत्ययो ज्ञानं यस्य तत्तथा । ब्रह्मणोऽनन्तरूपत्वेपि यानि यानि रूपाणि विविधैर्जीवैरुपासितुं

भाष्यप्रकाशः ।

कथनेन तत्तच्छ्रुतेः प्रतारकत्वापत्तेश्च । अथाप्तोक्तविषभोजनकथनवदिदं क्रममुक्तिहेतुत्वेन वदतीति न प्रतारकत्वमिति विभाव्यते, तदप्ययुक्तमित्याह अपरश्चेत्यादि । यदि तथा स्यात्, तदा 'योऽन्यथा सन्त'मित्यादिनाऽन्यथा ज्ञानं निन्दन्ती श्रुतिश्चित्तशुद्धिद्वारा क्रममुक्तिहेतुत्वेन तदुपासनां न वदेत् । आत्मापहारेण महापापापादकतया चित्ताशुद्धिजनकत्वात् । किञ्च । इदं व्यासस्यापि न सम्मतमित्याह स्पष्टार्थानामित्यादि । यदि हि तेषामब्रह्मत्वं व्यासोऽभिप्रेयात्, तदा कृष्णरामादिपदानि देवतावाचकानि ब्रह्मवाचकानि वेति सन्दिह्य, तन्निर्णयमपि किञ्चित् कुर्यात् । अतः श्रुतिविरोधो व्यासाशयविरोधश्च न वैयासदर्शनानुसारिणो युक्त इत्यर्थः । एवं तन्मतं दूषयित्वा स्वमतमाह एवञ्च सतीत्यादि । उक्तहेतुभिः सर्वासां श्रुतीनां ब्रह्मनिरूपकत्वेपि सति उक्तरीत्या यागवद्धर्मभेदकृतधर्मिभेदेनामिक्षावाजिनयागवत् तेषां तत्तद्विद्यावेद्यानां परस्परभेद आवश्यक इति । अतो हेतोरुभयतःपाशा रज्जुः । एतदङ्गीकारे भेदापत्त्या 'अयमेव स योऽय'मित्याद्यभेदश्रुतिविरोधात्, एतदनङ्गीकारे चैकदेशिमतवद्रूपाणामविद्याकल्पितत्वापत्त्या चोभयथापि दोष इति प्राप्त इत्यर्थः । अत्र सूत्रप्रतीकमुपन्यस्य समादधते अभिधीयत इत्यादि । सूत्रे व्यधिकरणपदो बहुव्रीहिः । प्रत्ययो विश्वासोत्पादकं ज्ञानम् । यद्यपि भाष्ये ज्ञानमेवोक्तम्, तथापि लोके प्रत्ययपदस्य विश्वासे प्रसिद्धत्वादत्र शब्दमहिम्ना तथा व्याख्यानेप्यदोषः । प्रतिज्ञा च ब्रह्मतदुपासनोभयविषयिणी बोध्या । नन्विदं प्रतिज्ञावाक्यमुपासनापरतयैव व्याख्यातुमुचितम्, अतीतपादे ब्रह्मज्ञानप्रकारस्योक्तत्वात्, तेन निर्णीते वस्तुतत्त्वे यथा ज्ञातस्वरूपस्य गुरुप्रभृतेरुपासनं क्रियते, तद्वद्ब्रह्मोपासनस्य कर्तव्यत्वेन विचार्यत्वात्, न तु ब्रह्मपरतयापि, तज्ज्ञानप्रकारस्य प्रागेवोक्तत्वात्,

रश्मिः ।

विरुद्धधर्माश्रयत्वेन सतः । **अन्यथेति** । उक्तशुद्धत्वमात्रेण । **आप्तोक्तेति** । वाग्भटादिकंकायनाद्याप्तोक्तौषधाङ्गविषभोजनकथनवत् । इदं विषभोजनं रोगनिवर्तकम्, नतु मारकम् । **क्रमेति** । शाखारुन्धतीन्यायेन सोपाधिकद्वारा दुर्ज्ञेये बुद्धिसिद्धिरित्येवं क्रममुक्तिहेतुत्वेन वदतीत्यर्थः । **न वदेदिति** । उपासनाया औपाधिकविषयत्वेनान्यथाप्रतिपादनरूपत्वात् न वदेदित्यर्थः । **चित्ताशुद्धीति** । उपाधिरूपबुद्ध्यशुद्धिजनकत्वात् । **स्पष्टार्थाना**मित्यादिभाष्यं विवरीतुमाहुः **किञ्चेत्यादि** । रज्जुं स्पष्टयन्ति स्म **एतदङ्गीकार** इति । **इदमिति** । सूत्रम् । **उपासनेति** । **एवेति** । ज्ञानयोगव्यवच्छेदकः । **ब्रह्मेति** । विरुद्धधर्माधारत्वस्य । **प्रागेवेति** । अतीतपादे । **अयमेवेति**[1] । प्रत्ययः । **ज्ञानो-**

१ अयमेवेति पूर्वपाठ ।

शक्यानि, तानि तानि रूपाणि तैस्तैर्वेदान्तैर्निरूप्यन्त इति तावद्रूपात्मकमेकमेव ब्रह्मेत्यर्थः। तत्र हेतुः चोदनाद्यविशेषादिति। चोद्यते कर्तव्यत्वेन बोध्यतेऽनेनेति चोदना विधिवाक्यमिति यावत्। तस्याविशेषादित्यर्थः। यथैकस्मिन्नग्निष्टोमे शाखाभेदेपि चोदना तथैव भवति, 'अग्निष्टोमेन यजेते'ति, तथेहापि सर्वेषु वेदान्तेषु ब्रह्मत्वेनैवोपासना विधीयत इति तथा। आदिपदात् साक्षात्परम्पराभेदेन मोक्ष-

भाष्यप्रकाशः।

'यदेकमव्यक्तमनन्तरूप'मित्यनन्तरूपश्रुतौ वृत्तिसङ्कोचने मानाभावादसङ्कुचितवृत्तितया गणनापरिच्छेदरहितानां रूपाणां निरूपयितुमशक्यत्वाच्चेत्याशङ्कायामाहुः ब्रह्मण इत्यादि। तथाच विरुद्धधर्माश्रयतया सामान्यतो ब्रह्मज्ञानस्योक्तत्वेपि 'फलमत उपपत्ते'रित्यत्र ब्रह्मणः फलदातृत्वस्य निर्णीतत्वात्तत्र कथं फलं ददातीत्याकाङ्क्षायां तैस्तैः रूपैस्तेन तेन साधनेन तत्तत्फलं ददातीति बोधयितुं तत्तत्फलसाधकोपासनार्थं तत्तद्रूपनिरूपणमिति प्रयोजनस्यानुक्तत्वेन तन्निरूपणस्यावश्यकत्वात् सर्वेषां निरूपणाशक्यत्वेपि कियतां निरूपणेऽनुपपत्त्यभावाच्चायमपि प्रतिज्ञार्थ इति भावः।

नन्वेवं हेतुबोधकपदासङ्गतिः, ब्रह्मणो नित्यत्वेन तज्ज्ञानस्य चाविधेयत्वेन पुरुषव्यापारविषयत्वस्य तत्र वक्तुमशक्यत्वादित्याशङ्कायां हेतुमुपन्यस्य व्याकुर्वन्ति चोद्यत इत्यादि। तथाच यद्यपि ब्रह्मत्वेन ब्रह्मणो न चोदनाविषयत्वम्, तथाप्युपासनाविषयत्वादस्त्येव तद्द्वारा विषयत्वमित्यदोषः। एतदेव बोधयितुं विभजन्ते यथेत्यादि। इहापीत्यस्यैव व्याख्यानं सर्वेषु वेदान्तेष्विति। तथेति। चोदनायामविशेषः। ननु शाखान्तराधिकरणे केवलानां रूपादीनां व्यभिचारित्वं हृदिकृत्य, 'एकं वा संयोगरूपचोदनाख्याऽविशेषा'दिति सूत्रे संयोगादिरूपहेतुचतुष्टयेनाभेदः साधित इति प्रकृते एकेन हेतुना कथमभेदसिद्धिरित्याकाङ्क्षायामाहुः आदीत्यादि। अत्र भाष्ये रूपसङ्ग्रहानुक्तिस्तु साध्यनिर्देशेनैव रूपस्यार्थादेव सिद्धिमभिप्रेत्य, सूत्रे चोदनायाः प्रथममुक्तिस्तु चोदनाविषयस्योपासनस्यापि सर्ववेदान्तप्रत्ययत्वज्ञापनेन तद्विषयस्य ब्रह्मणस्तद्द्वारा तथात्वज्ञापनार्था। तेनान्येषां त्रयाणामपि सङ्ग्रहः। अथवा। चोदना च आदी च तत्समाहारश्चोदनादि, तस्य अविशेषः समानत्वं चोदनाद्यविशेषस्तस्मादित्यर्थो बोध्यः। तथाचैवं संयोगरूपचोदनात्मकहेतुत्रयस्यापि चोदनादिपदेऽभिप्रेतत्वात् सुखेनाभेदसिद्धिरित्यर्थः। आख्याया व्यभिचारित्वं त्वग्रे प्रदर्शनीयम्।

एवञ्चात्र सूत्रे, ब्रह्म तदुपासनं च सर्ववेदान्तप्रत्ययम्, तत्तदुपासनावाक्येषु तत्तन्नानाधर्मवत्तया प्रतिपादनेपि न भिद्यते। चोदनाद्यविशेषात्। यत्र यत्र चोदनाद्यविशेषः, तदनेकवाक्येष्वनेकविधतया प्रतिपादनेऽप्यभिन्नम्। नानाशाखोक्तज्योतिष्टोमादिवदित्यनुमानं सिध्यति। तेन ब्रह्मणस्त-

रश्मिः।

पासनयोर्विलक्षणप्रतीत्यर्थं विश्वासस्य निवेशितत्वादेवकारः। शाखान्तरेति। पूर्वतन्त्र इदं द्वितीयस्य चतुर्थपादे द्वितीयाधिकरणम्। रूपादीनामिति। 'नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्या'दिति द्वितीय'मेकवे'तिसूत्रम्। तत्र रूपचोदनाख्यानां अभेदे सत्त्वेन भेदसाधने व्यभिचारित्वम्। कर्म भिन्नं रूपादिसत्त्वात्। अत्र साध्याभाववत्यभिन्ने हेतोः सत्त्वाद्व्यभिचारित्वं तद्धृदिकृत्येत्यर्थः। संयोगादीति। संयोगोऽर्थसंयोगः तस्याविशेषाच्छाखान्तरे। तदेव प्रयोजनमुद्दिश्य तदेव विधीयमानं 'ज्योतिष्टोमेन यजेते'त्येवं प्रत्यभिजानीमः। तदेवेदमिति। रूपमस्य तदेव द्रव्यदेवतम्। पुरुषप्रयत्नश्च तादृश एव चोद्यते इति चोदना।

फलकत्वकथनमप्युपासनानामविशिष्टमिति प्रयोजनसंयोगः संगृह्यते ॥ १ ॥

भेदान्नेतिचेदेकस्यामपि ॥ २ ॥

ननु द्रव्यदेवताभेदात् यागभेदवदुपास्यानां धर्मभेदेन मिथोभेदादुक्तहेत्वसिद्धिं भेदान्नेति चेदित्यनेनाशङ्क्य, तत्परिहारमाह सूत्रकारः एकस्यामपीति सूत्रावयवेन । यथैकस्यामपि गृहीतषोडशिकायामतिरात्रव्यक्तावगृहीतषोडशिकायाः सकाशात् गुणाधिक्येपि नातिरात्रभिन्नयागत्वम्, अतिरात्रलक्षणकमेवाधिकृत्य तद्ग्रहणाग्रहणयोर्विधानात्, एवमिहापि ब्रह्मैवाधिकृत्य तत्तद्धर्मवैशिष्ट्यावैशिष्ट्ययोरुक्तत्वान्न ब्रह्मोपासनाभिन्नत्वमुपासनासु । तथाच ब्रह्मधर्मत्वे-

---

भाष्यप्रकाशः ।

त्साक्षात्कारस्य च साक्षात्पुरुषव्यापारविषयत्वाभावेपि साक्षात्कारसाधनभूतप्रमाणसम्पादनद्वारा तादृशवृत्तिसम्पादनद्वारा च चोदनासम्बन्धो वर्तत एवेति तथा पुरुषव्यापारस्यापि सम्भवात् ब्रह्मपक्षकत्वेपि न हेतोः स्वरूपासिद्धत्वमिति ज्ञेयम् । नचैवं सति प्रतिज्ञापि केवलविज्ञानपरतयैव व्याख्यातुमुचितेति शङ्क्यम् । पक्षवाचकविज्ञानपदाध्याहारापेक्षया पूर्वपादान्तिमसूत्रे जैमिनिमतोपन्यासे धर्मपदेन चोदनालक्षणतयात्र विज्ञानपरामर्शवत् 'पूर्वं तु बादरायण' इति पूर्वपदोक्तब्रह्मणः सन्निहिततया तत्परामर्शस्यापि युक्तत्वात्, विद्याविचारस्य वेद्याधीनत्वाच्च तत्परतया व्याख्यानेऽप्यदोषात् ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥ २ ॥ अस्मिन् सूत्रे केचिन्नैकस्यामपीति पठन्ति । अर्थस्तु तत्रापि तुल्यः । सूत्रप्रयोजनं वदन्तो व्याकुर्वन्ति **नन्वित्यादि** । **मिथोभेदादुक्तहेत्वसिद्धिमिति**। परस्परं रूपभेदाद्धेत्वेकदेशाभावेन पूर्वसूत्रोक्तस्य हेतोः स्वरूपासिद्धिम्। **इहापीति**। उपासनावाक्येष्वपि। **नेत्यादि** । न ब्रह्मणो भिन्नत्वम्, अतस्तदुपासनास्वपि न भिन्नत्वमित्यर्थः । एवं सूत्रं

रश्मिः ।

आख्या नाम । वेद्यं चाविशिष्टम् । **वर्तत एवेति**। चोदनावर्तनायोगव्यवच्छेदक एवकारः । **तथेति** । उक्तप्रकारेण । **ब्रह्मपक्षकत्व** इति । यथा कर्म भिन्न रूपादिसत्त्वादित्यत्र ब्रह्मपक्षकत्वेपि । **न हेतोरिति** । नामरूपधर्मविशेषादिषु चोदनादेर्हेतोः ब्रह्मपक्षे सत्त्वान्न पक्षे हेत्वभावरूपस्वरूपासिद्धत्वमिति ज्ञेयम् । प्रतिज्ञा वाक्ये वेदान्तेऽग्निष्टोमविधिराचार्यस्याविशेषघटितसूत्रादभिमतेत्याचार्याणां यज्ञनारायणसोमयाजिनां पुत्रा गङ्गाधरसोमयाजिनः, तेषां पुत्रा गणपतिसोमयाजिनः, तेषां वल्लभभट्टजितः, तेषां लक्ष्मणभट्टजितः, तेषां रामकृष्णभट्टजितः, तेषां भ्रातरः श्रीवल्लभाचार्याः, तेषां सोमयागसंस्था पारम्परिकीति तदा विशेषेणोपासना युक्तेत्युक्तप्राया मङ्गलार्था ॥ १ ॥

भेदान्नेति चेदेकस्यामपि ॥ २ ॥ **तुल्य** इति । एकार्थे उभयप्रयोगात्तुल्यः । सर्ववेदान्तप्रत्ययं ब्रह्म, तदुपासनावाक्येषु तत्तन्नानाधर्मवत्तया प्रतिपादनेप्यभिन्नम्, चोदनाद्यविशेषात्, नानाशाखोक्तज्योतिष्टोमादिवदित्यत्र चोदनाद्यविशेषरूपहेतोः पक्षे ब्रह्मण्यभावात्तथा । 'परस्परं रूपभेदा'दिति 'मिथोभेदा'दितिभाष्यार्थः । **भाष्ये । तद्ग्रहणेति** । षोडशिग्रहणाग्रहणयोः 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाती'त्यनेन विधानात् लेड्विवक्षया । **प्रकृते । तयोरिति** । परस्परं

---

१. परामर्शस्य लघुत्वेन ज्यायस्त्वादिति पूर्वपाठ । २. शाबरभाष्यम् ।

नाभेदस्य विवक्षितत्वात् त्वदुक्तहेत्वसिद्धिः । एवं सति यत्रैकस्मिन्नुपास्ये रूपेऽन्यस्माद्रूपादधिका गुणा उच्यन्ते, तत्र तेषामुपसंहार उचित इति भावः ।

भाष्यप्रकाशः ।

व्याख्याय सिद्धमाहुः **तथाचेत्यादि** । षोडशिग्रहणादिवत्तयोर्ब्रह्मधर्मत्वेन वेद्याभेदस्य विवक्षितत्वात् त्वदुक्तस्य भेदरूपस्य हेतोरेव प्रत्युत स्वरूपासिद्धिः । ब्रह्म तदुपासनं च न सर्ववेदान्तप्रत्ययं रूपभेदादित्येवं प्रतिसाधने, धर्मभेदेन रूपभेदः साधनीयः, तत्र रूपभेदो धर्मभेदादामिक्षादियागवदित्यत्र, न भेदोऽतिरात्रवदिति दृष्टान्तेन हेतोः साधारण्यात् व्याप्यत्वासिद्धिरिति तेन रूपभेदासिद्धौ प्रतिपक्षहेतोरेवासिद्धिः । अत एव गोपालोपासनायां 'चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदान्वित'मिति चतुर्भुजध्यानमुक्त्वा, 'ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वे'ति द्विभुजध्यानमप्युक्तम्, अतो न धर्मभेदाद्रूपभेद इति तवैव दोषात् राद्धान्तहेतुर्निर्दुष्ट इत्यर्थः । नन्विदं पूर्वपादान्त एव साधनीयम्, ब्रह्मणः फलदातृत्वस्य तत्रैवोक्तत्वात्, पादान्तरे तत्साधनस्य किं प्रयोजनमित्याकाङ्क्षायां वक्ष्यमाणोपसंहारसूत्रविचारेण तदाहुः **एवं सतीत्यादि** । **एवं सतीति** । उक्तरीत्या वेद्यैक्ये विद्यैक्ये च सति । **तत्र तेषामिति** । न्यूनगुणकेऽधिकगुणानाम् । तथाच गुणोपसंहारः प्रयोजनमेतस्येति तदर्थमत्र विचार इत्यर्थः । ननु उपसंहारो नाम उप समीपे संहरणम्, तत्र[२] तत्रोक्तानां धर्माणां हेतुबलादावाप इति यावत्, तदत्र तत्तद्वाक्येऽनुक्तानां गुणानां तेन तेन हेतुना तद्वाक्योक्ते विषये सत्तामनुसन्धाय विशिष्टबुद्धौ विषयीकरणम् । एतच्चाग्रे 'न वा विशेषा'दिति सूत्रानन्तरं 'दर्शयति' सूत्राभासे वक्ष्यते । अत एतदर्थत्वमेतदधिकरणस्य न युज्यते । अत्र हि सर्वेषामुपासनाविषयाणां ब्रह्माभेदाद्ब्रह्मत्वेन रूपैक्यस्य, यथाकथञ्चिन्मोक्षफलकत्वाच्च प्रयोजनैक्यस्य, सर्वत्रोपासीतेत्यादिचोदनैक्यस्य, ब्रह्मत्वेनोपासनाद्ब्रह्मोपासनेत्याख्यैक्यस्य च सिद्धत्वात्

रश्मिः ।

भिन्नरूपयोः । **विवक्षितत्वादिति** । प्रकाशाश्रयसूत्रात्तथा । **त्वदुक्तस्येति** । शङ्कितुरुक्तस्य । **हेतोरेवेति** । रूपभेदरूपस्य हेतोः । एवकारश्चोदनाद्यविशेषादित्यस्य योगस्य व्यवच्छेदकः । **स्वरूपेति** । ब्रह्मणि पक्षे रूपभेदरूपहेतोरभावात्तथा । **रूपेति** । ब्रह्मणि रूपभेदो धर्मभेदात् । **आमिक्षादीति** । आमिक्षात्वं वाजिनत्वं च धर्मौ । ब्रह्मणि न रूपभेदो धर्मभेदादतिरात्रवत् । अत्र षोडशिग्रहणाग्रहणे धर्मौ । न्यूनत्वं समत्वं वा धर्मौ । धर्मभेदेन रूपभेदः सौत्रो हेतुः । तत्साधकमनुमानं भाष्यीयम् । अत्र हेतोर्धर्मभेदरूपस्य । सौत्रहेतोर्धर्मभेदेन रूपभेदस्य साधारण्यं साध्यवदन्यवृत्तित्वं तस्मात् । ब्रह्मणि साध्यं रूपभेदस्तद्वान् आमिक्षादियागस्तदन्योऽतिरात्रयागस्तद्वृत्तित्वं धर्मभेदरूपहेतोरिति । **व्याप्यत्वेति** । रूपभेदरूपहेतौ गुरुतया हेतुतानवच्छेदकरूपत्वाद्रूपस्य । हेतौ हेतुतावच्छेदकाभावो व्याप्यत्वासिद्धिः । यथा वह्निमान् नीलधूमादित्यत्र । तव शङ्कितुः रूपभेदादिति हेतौ व्याप्यत्वासिद्धिर्दोषस्तस्मात् । राद्धान्तस्य प्रतिज्ञायाः प्रतिज्ञासूत्रस्य हेतुरित्यर्थः । **प्रागेवेति** । समन्वयाधिकरणादौ । **एतत्साधनस्य** विद्यैक्यसाधनस्य । **तदाहुरिति** । विद्यैक्यसाधनप्रयोजनमाहुः **तेन तेनेति** । यथा 'ॐयो वै श्रीरामचन्द्रः स भगवान् । यश्चाखण्डैकरसात्मा भूर्भुवःस्वस्तस्मै वै नमो नमः' इत्युक्त्वाग्रे 'ॐयो वै श्री० न्ये मत्स्यकूर्माद्यवतारा भू०' इत्युपसंहारहेतुना वाक्येन । वाक्यो-

१. ननु ब्रह्मैक्यस्य प्रागेव सिद्धत्वाद्वेद्यैक्ये च विद्यैक्यस्याप्यर्थादेव सिद्धत्वात् पुनरेतत्साधनस्य किं प्रयोजनमित्याकाङ्क्षायां वक्ष्यमाणोपसंहारसूत्रविचारेण तदाहु. **एवं सतीत्यादीति** पूर्वः पाठः । २. सामान्यत. प्राप्तस्य विषयविशेषे नियमनमिति यावदिति पूर्व. पाठः ।

अत्रायं विशेषो ज्ञेयः । उपासनाविषयेष्वखिलेष्वविशिष्टं ब्रह्मत्वं ज्ञात्वा तेष्वेकतरं रूपं य उपास्ते, तस्य तत्र सर्वे गुणा उपसंहर्तुमुचिताः । यस्त्वनन्तेषु विभूतिरूपेषु ओमित्यक्षरादिषु 'ॐमित्येतदक्षरं ब्रह्मे'ति ज्ञात्वोपास्ते, तस्य शाखान्तरीया अप्येतदक्षरोपासनप्रकरणोक्ता एवोपसंहर्तव्याः, नान्ये । तद्रूपमधिकृत्यैव तेषां गुणानां कथनात् । अन्यथातिप्रसङ्गात् । इयं तूपासनामार्गीया व्यवस्थोक्ता, भक्तिमार्गीया त्वेतद्विलक्षणा, साग्रे वाच्येति ॥ २ ॥

भाष्यप्रकाशः ।

सर्वासामुपासनानामैक्ये प्राप्ते सर्वत्र सर्वधर्मोपसंहारप्राप्तेस्तत्र तत्र तत्तद्रूपतत्तत्फलकथनाच्च भेदे प्राप्ते सर्वानुपसंहारस्यापि प्राप्तेश्च तत्प्राप्त्यप्राप्तिविरोधादित्याकाङ्क्षायाम्, तथा यत्र ब्रह्मत्वेनोपासनं विधीयते, तत्रैवं वेद्यैक्यात्तद्वाक्यवेद्यस्य गुणोपसंहारनिर्णयो भवति, यत्र पुनर्ब्रह्मत्वेनोपासनं न विधीयते, यथा प्राणविद्यादौ, तत्र ब्रह्मत्वेनोपासनाया अभावेन वेद्यैक्याभावात् कथं निर्णय इत्याकाङ्क्षायां च सर्वत्रास्य न्यायस्य तौल्यादनेनैव निर्णयो विरोधाभावश्चेत्याशयेनाहुः **अत्रे**त्यादि । अत्र गुणोपसंहारे वक्ष्यमाणरूपो विशेषः प्रयोजकभेदबलाज्ज्ञेयः । उपासनाविषयेष्वखिलेष्ववताररूपेषु तुल्यं ब्रह्मत्वं वेदान्तवाक्यैरवधार्य, तेष्वेकतरं रूपं यो ब्रह्मत्वप्राधान्येनोपास्ते, तस्य तस्मिन् रूपे सर्वे गुणा उपसंहर्तुमुचिताः । उपसंहारप्रयोजकस्य विरुद्धसर्वधर्माश्रयब्रह्मस्वरूपप्राधान्यस्य तत्र तेनानुसंहितत्वाद्युक्ताः । एतदेवैतत्पादोपान्त्ये समाहारादिसूत्रद्वये स्फुटीभविष्यति । **यस्त्वनन्तेषु** विभूतिरूपेषु वर्णात्मकौङ्कारादिषु तद्रूपप्राधान्यं ब्रह्मत्वस्य गौणत्वं चानुसन्धाय उपास्ते, तस्यान्यत्रिकास्तदीया एवोपसंहर्तव्याः, नान्ये । तत्र हेतुः तद्रूपमित्यादि । अन्यथातिप्रसङ्गादिति । प्रकरणानादरे तद्विरोधप्रसङ्गात् । तथाच तत्तद्रूपानुसन्धानकृतया व्यवस्थया विषयभेदेनोपसंहारानुपसंहारप्राप्त्यप्राप्तिविरोधाभावादस्याधिकरणस्योपसंहारार्थत्वं सुखेन युज्यते । किञ्च, अन्यत्रापि तत्तद्विभूतिरूपवेद्यैक्यादन्येषां च हेतूनां तत्र सत्त्वादनेनैव न्यायेन निर्णय इत्यर्थः । अत्रोपासनामात्रनिर्णयो न क्रियते, अपि तु यद्ब्रह्मप्राप्तिसाधनत्वेन विवक्षितं तस्य सर्वस्येत्याशयेनाहुः **भक्ती**त्यादि । अग्र इति । 'न वा प्रकरणभेदात् परोवरीयस्त्वादिव'दित्यस्य द्वितीयव्याख्याने । नचोपासनातिरिक्ताया भक्तेरप्रसिद्धत्वादप्रस्तुतत्वाच्च तद्व्यवस्थास्मरणमाकस्मिकमिति वाच्यम् । गोपालतापनीये 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन् मनःकल्पनमेव, तदेव च

रश्मिः ।

क्त्वाभेदलिङ्गेन वा । **अभावेने**ति । किन्तु बाणधारकत्वेन । प्राणसंवादेऽस्ति । **अस्य न्यायस्ये**ति । व्यापकब्रह्मत्वेन वेद्यैक्याद्विद्यैकत्वन्यायस्य तौल्यम् । व्यापकविभूतित्वेन रूपेण वेद्यैक्याद्विद्यैकत्वनिर्णय इति तस्मात् । **प्रयोजके**ति । विरुद्धधर्माश्रयत्वस्य तद्रूपाधिकारस्य च प्रयोजकस्य भेदात् । भेदबलमपि अधिकारस्यानिवार्यत्वात् । **ज्ञेय** इति परे स्तोःश्चुना श्चुरित्यस्य प्राप्तिः स्मार्ता । उपासनेत्यादिभाष्यं विवृण्वन्ति स्म **उपासने**ति । **तेने**ति । उपासकेन । यस्त्वित्यादिभाष्यं विवृण्वन्ति स्म **यस्त्वि**ति । **तदीया एवे**ति । एवकारो विरुद्धधर्मरूपान्ययोगव्यवच्छेदकः । **अन्य** इति । अधिकारधर्मविरुद्धाः । **प्रकरणे**ति । अधिकारप्राप्तप्रकरणानादरे । अधिकारः प्रारम्भः । प्रकरणं देशकालौ । भाष्येऽधिकृत्येत्यत्राधिकारः स्वप्राप्तप्रकरणवाचकः । लक्षणयेति भावः । **अनेनैवे**ति । व्यापकधर्मेण वेद्यैक्याद्विद्यैकत्वनिर्णयरूपेणैव । एवकारोऽन्ययोगव्यवच्छेदकः । यदिति । साक्षात्परम्परया । **सर्वस्ये**ति । उप समीपे स्थित्वा यथायोग्यकरणमुपासनालक्षणमेकादशसुबोधिन्याम्, तस्या नवधाभक्तेः सर्वात्मभावस्य च । रामानुजमतेनाशङ्क्य परिहरन्ति स्म **न चोपे**ति । **अग्रे**ति । **भक्तिहंसे**

नन्वग्निष्टोममेवोद्दिश्य यावन्तो धर्मास्तैत्तिरीयके पठ्यन्ते, न तावन्तो वाजसनेयके, तथाच त्वदुक्तरीत्या वाजसनेयिनां तद्धर्मोपसंहारोपि न्याय्यो भवेत्, नत्वेवं सः, शिष्टाचारादिविरोधात्, तथा पञ्चाग्निविद्यामेवाधिकृत्योक्तोपि षष्ठोऽग्निर्न छन्दोगैः शक्यत उपसंहर्तुम्, तथैवाथर्वणिकैर्नैकस्मिन् रूपे रूपान्तरधर्मो

भाष्यप्रकाशः।

नैष्कर्म्य'मिति लक्षणभेदेन, समाप्तौ च 'कृष्ण एव परो देवस्तं ध्यायेत् तं रसेत् तं भजे'दिति ध्यानरूपोपासनातो भिन्नतया विधानेन चोपासनातिरिक्ताया भक्तेः प्रसिद्धत्वात् प्रस्तुतत्वाच्च तदभावात्। एकस्मिन्नेव प्रकरणे सृष्टिकर्तृत्वादिना माहात्म्यस्यात्मत्वेन प्रियत्वस्य च बोधनेन श्रुत्यन्तरेपि श्रुतीनां माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपभक्तावेव तात्पर्यावसायाच्च। ननु विहिताविहितभेदेन भक्तिमार्गद्वैविध्यादत्र कस्य व्यवस्था वाच्येति चेत्। श्रीभागवते श्रीनन्दादीनां फलकथनेनाविहितभक्तेरपि प्रामाणिकत्वसिद्धौ मन्दमध्यमयोरर्थे तद्व्यवस्थाबोधनस्याप्यावश्यकत्वादुभयोरपीति बुध्यस्व। ननु सूत्रकारेणेदं कुत्रोक्तं येनैवमुच्यत इति चेत्। उच्यते। अग्रिमसूत्रेऽधिकारस्यानुपसंहारहेतुताकथनेनात्र यथाधिकारनिर्णयसूचनात् सूचितमिति जानीहि। तस्मान्नात्र शङ्कालेशः। एवञ्चास्मिन्नधिकरणे इदं सिद्धम्। 'यो देवानां नामधा एक एव', 'एकं सद्विप्रा बहुधा वदन्ती'त्यादिश्रुतिभिः, 'येऽप्यन्यदेवताभक्ता' इत्यादिस्मृतिभिश्च भगवतः सर्वरूपत्वात् तेन तेन रूपेण भगवत एव तत्तत्फलदातृत्वं काण्डद्वये पुराणेषु चेति। तेनादित्याद्यङ्गोपासनास्वपि ब्रह्मोपासनात्वमेवेति च सिद्धम्॥ २॥ १॥

अतः परं ताः कथं कर्तव्या इत्याकाङ्क्षायामग्रिमसूत्रेषु तत्प्रकार उच्यत इत्याशयेन सूत्रमवतारयन्ति नन्वित्यादि। तथेति। वैधर्म्ये दृष्टान्तः। अयमर्थः। यथा कर्मणां वैलक्षण्येपि 'संयोगरूपचोदनाख्याविशेषा'दिति शाखान्तराधिकरणोक्तन्यायादैक्यम्, एवमुपासनानामपि तेनैव न्यायेनावान्तरैक्यमपि सिद्धम्। तथात्रास्यैव हेतोर्गुणोपसंहारप्रयोजकतयानेनैव हेतुना ज्योतिष्टोमादियागेषु शाखान्तरोक्तगुणोपसंहारोपि न्याय्यो भवेत्। तत्करणे शिष्टाचारविरोधस्तद्भिया शाखान्तरोक्तानादरे उपासनायामपि तदापत्त्या पञ्चाग्न्यादिविद्यासु षष्ठाग्न्याद्यनुपसंहारापत्तिरथर्वणाद्युक्तरूपेषु रूपान्तरधर्मानुपसंहारापत्तिश्चेति शिष्टाचारविरोधतौल्ये प्राप्ते, तत्समाधानाय गुणानुप-

रश्मिः।

'उपास्तिं मन्यन्ते मधुमथनभक्ति'मिति कारिकायास्तथा। 'भक्तिरहस्यभजन'मितिपाठे लक्ष्यलक्षणैकीभावः। 'उपाधी'त्यत्र फलनैराश्येनेति पठन्ति। **लक्षणेति**। उक्तोपासनलक्षणभेदेनेत्यर्थः। **तदभावात्** आकस्मिकत्वाभावात्। **एकस्मिन्निति**। श्वेतकेतुप्रपाठके महाप्रकरणे एकविज्ञानेन सर्वविज्ञानरूपे। **सृष्टीत्यादि**। 'सदेव सौम्ये'त्यारभ्य 'तत्तेजोऽसृजते'त्यादि। आदिना त्रिवृत्करणम्। **आत्मत्वेनेति**। 'स आत्मा तत्त्वमसि श्वेतकेतो'इत्यनया तथा। **श्रुत्यन्तर** इति। 'यतो वा इमानि भूतानी'त्यत्र 'अयमात्मा ब्रह्मे'त्यत्र च। 'भगवान्ब्रह्म कार्त्स्न्येने'ति वाक्यादेवकारः। **विहितेति** 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति श्रवणभक्तिर्विहिता। तिसृभिः प्रेम्णि जातेऽन्यासां स्वयंभवनादविहितत्वम्। 'तं रसेत्तं भजे'दिति द्वयं विहितम्। रस शब्दे। कीर्तनम्। भजेदिति 'भज सेवायाम्'। दास्यम्। 'यं मां स्मृत्वे'ति स्मरणम्। श्रवणमुक्तम्। किं पुन'र्भक्त्या जानाति चाव्यय'मिति नवधा भक्तिर्विहिता। अविहिताया ज्ञानाकरणत्वात्। **फलेति**। एकादशस्कन्धे कथनेन **मन्देति**। उत्तमस्य तु गुरूपदेशेनेति। तथाच सर्ववेदान्तप्रत्ययं नैकमिति प्राप्तम्॥ २॥

इति प्राप्ते, उत्तरं पठति ।

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

स्वाध्यायो वेदः । स एकमेव कर्म शाखाभेदेन भिन्नभिन्नप्रकारकं बोधयतीति तत्प्रयुक्तः सम्यग्भूतेऽग्निष्टोमादिलक्षण आचारे तत्तदङ्गाचारनियमोऽन्यूनानधिककरणलक्षण इत्यर्थः । तावद्भिरेवाङ्गैर्योगसम्पत्तेरधिककरणस्याप्रयोजकत्वात् तावतामेवाङ्गानां करणम् । ननूक्तं तद्धर्माणामप्युपसंहारस्त्वदुक्तरीत्या

भाष्यप्रकाशः ।

संहारहेतुकथनेनोपसंहारप्रकारं वदन्नुत्तरं पठतीति बोध्यः ।

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ अत्र शाखान्तराधिकरणोक्तहेतोः पूर्वसूत्रे परामर्शात् पूर्वतन्त्रविचार्ये पूर्वकाण्डे च स्वाध्यायशब्दस्य वेदवाचकत्वेन प्रसिद्धेरस्मिन् सूत्रे 'तथात्वेने'त्यनेन तदुक्तस्य प्रसिद्धस्य प्रकारस्य, 'तन्नियम' इति तच्छब्देन तत्प्रसिद्धाङ्गाचारस्य च ग्रहणमित्याशयेन व्याकुर्वन्ति **स्वाध्यायो वेद** इत्यादि । तावन्मात्रनिरूपणस्य यागे तावदङ्गकरणनियमने बीजं स्फुटीकुर्वन्ति **तावद्भिरि**त्यादि । तथाच निरूपणप्रकारभेदस्य बाधकस्य सत्त्वान्नोपसंहार इत्यर्थः । द्वितीयं [२]हेतुं व्याकर्तुमवतारयन्ति **नन्वि**त्यादि ।

रश्मिः ।

स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥ तद्व्यवस्थेति । उपसंहारव्यवस्थास्मरणम् । **उपेति** । उपसंहारबाधकं तु 'यस्त्वनन्तेष्वि'त्यादि पूर्वसूत्रभाष्येणाधिकारप्राप्तं प्रकरणमुक्तम् । एवं च स्वाध्यायपूर्वसूत्रं स्वाध्यायसूत्रमिति मध्यमपदलोपी समासो व्याख्यातव्यः । **एवमिति** पूर्वोक्तप्रकारेण चोदनाद्यविशेषादिति हेतुशोधनात् । **शाखान्तरेति ।** इदमधिकरण पूर्वतन्त्रे द्वितीयचतुर्थपादद्वितीयाधिकरणेऽस्ति । संयोगादिरूपहेतुचतुष्टयात्मकेन । **सिद्ध** इत्यन्तेन **तथाचे**तिभाष्यं व्याख्यातम् । अग्रे **शाखान्तरीये**त्यादि **वाजसनेयिनामि**त्यादिभाष्यव्याख्यानम् । अत्र मध्ये **त्वदुक्तरीत्ये**तिभाष्यं तद्व्याख्यानं 'विरुद्धधर्माश्रयत्वस्योपसंहारनियामकत्व'मिति त्वदुक्तरीत्येति । **नत्वेवं स** इति भाष्यं द्वेधा व्याकुर्वन्ति स्म **स चेदि**त्यादिना । आद्रियत इति क्रियाध्याहारः । **शिष्टाचारेति** । भाष्योक्तादिशब्दार्थोपलक्षकोयम् । क आदिशब्दार्थ इति चेत् । नवीनव्याख्यात्रादिस्वीकृतत्वम् । **अन्नीति** । अधिकारप्राप्तप्रकरणविरोधः । **तत्स्मारकमिति** । उपसंहारस्मारकम् । तथा 'पञ्चाग्निविद्यामेवाधिकृत्योक्तोपि षष्ठोग्निर्न छन्दोगैः शक्यत उपसंहर्तु'मिति भाष्योक्तोपसंहारस्तत्स्मारकमित्यर्थः । **भाष्ये । उक्त** इति । बृहदारण्यक उक्तः । **स्वाध्यायो वेद इत्यादीति** । भाष्ये ह्यन्तसूत्रव्याख्यानमितीत्यन्तभाष्येण । तथाच स्वाध्यायस्य तथात्वेन एककर्मणः शाखाभेदेन भिन्नभिन्नप्रकारकत्वबोधकत्वेन । हिर्हेतौ तदर्थस्तृतीयोक्तः । तत्प्रयुक्तस्तन्नियम इत्यन्वयः । क्वेत्यत उक्तं **सम्यग्भूत** इत्यादि । **अग्निष्टोमादीति ।** 'परमेष्ठिनो वा एष यज्ञोग्र आसीद्यदग्निष्टोम' इति श्रुतेरादिरग्निष्टोमः । अग्निष्टोमात्यग्निष्टोमोक्थ्याति-

१. ननूपसंहारस्याग्रे वाच्यत्वादिदानीं तत्प्रसङ्गस्याभावात्कुतस्तद्व्यवस्थास्मरणमित्याकाङ्क्षाया स्वाध्यायसूत्र उपसंहारबाधकथनात् तत्स्मरणमितिबोधनाय सूत्रमवतारयन्ति नन्वित्यादि । एवं हेतुशोधनाच्छाखान्तराधिकरणोक्तहेतुना कर्मैक्यवद्विध्यैक्ये वेदैक्ये च सिद्धे शाखान्तरीयकर्मणोपि विद्यातौल्याद्विद्यास्विव शाखान्तरीयकर्मस्वप्यनुक्तगुणोपसंहार प्राप्नोति, स चेदाद्रियते, तदा शिष्टाचारविरोधोतिप्रसङ्गश्च, यदि नाद्रियते, तदा विध्यैक्यादिसाधनव्यर्थत्वमिति शङ्काया सूत्रं वक्तीत्यर्थ. । तदेव तत्स्मारकमित्यर्थ. इति पूर्वं उत्थानिकापाठ. । २. अग्रम् ।

सम्भवतीत्यत आह अधिकारादिति । सर्वेषां शाखिनां स्वस्वशाखोक्तकर्मण्येवाधिकारः, न परशाखोक्तेपि । अतोपि तथा नियमः । चकारात् स्वशाखोक्तात् कर्मणोऽतिरिक्तत्करणे न्यूनकरणे च 'यदस्य कर्मण' इत्यादिप्रायश्चित्तश्रवणमपि तन्नियमे हेतुः समुचीयते । अत एव क्वचित् परशाखोक्तमपि व्यवस्थितवि-

भाष्यप्रकाशः ।

तथाच शाखान्तरीयप्रकारविशेषकथनस्योत्पन्नशिष्टप्रायत्वेन नैर्बल्यात् स्वल्पकर्मभिर्वाजसनेयिभिस्तैत्तिरीयाद्युक्तकरणे 'अधिकं तत्रानुप्रविष्ट'मिति न्यायेन बाधाभावाचास्याप्रयोजकत्वमाशङ्क्य हेत्वन्तरमाहेत्यर्थः । व्याकुर्वन्ति सर्वेषामित्यादि । अधिकारोपष्टम्भाय सम्मत्यन्तरमाहुः अत एवेत्यादि । यत उक्तहेत्वोरस्ति कर्मनियामकत्वम्, अत एव हेतोः क्वचित् यथा 'कुक्कुटोऽसीत्यश्मानमादत्ते कुटरुरसीति वे'त्यश्मादानमन्त्रे, यथा वा उदितानुदितकालाभ्यां विकल्पिते होमे, 'उदिते जुहोत्यनुदिते जुहोती'ति तैत्तिरीयवाक्यद्वयोक्तं व्यवस्थितविषयत्वेन तत्तत्कल्पसूत्र

रश्मिः ।

रात्रषोडश्याप्तोर्यामवाजपेयाख्याः सप्त सोमसंस्थाः । 'सोमश्चन्द्रशेखरः' ज्ञानेन भक्ता भगवन्मनस्काः, 'साधवो हृदयं मह्यं साधूनां हृदयं त्वह'मिति साधुहृदये सप्तस्वरूपाणि प्रसिद्धानि समष्टीनि । वेद व्याख्याने नवार्थ्यां स्फुटीकृतानि स्वाध्यायपदसामर्थ्यलभ्यानि । आचारो मीमांसकानां सम्यगाचारोऽस्माकम् । 'सोमेन यजेते'ति विधेः सप्तसंस्थाबोधकार्थवादमूलत्वात् । अर्थवादस्य 'विधिना त्वेकवाक्यत्वात्' । यथा 'वायव्यं श्वेतमालभेते'ति विधिः, 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावती'त्यर्थवादः । तन्नियम इत्यस्यार्थस्तत्तदङ्गेति । ननु सोमान्तर्गतषोडश्यादीनां स्वरूपनिर्माणभेदादिना नैवं सप्तस्वरूपपरत्वं सम्भवतीति चेत्, द्रव्ययागे प्रवर्तकत्वं सप्तसंस्थानाम् । तदतिरिक्तमानसीसेवादौ तथाकाराभावात् । आधिदैवाकाराणामनुष्ठान आधिभौतिकषोडश्यादिसम्बन्ध आध्यात्मिकसोमयागादिः । यथातिरात्रे मनःस्थानीयत्वेन वर्णनीये भावनायां षोडशिग्रहणाग्रहणे । 'सर्वेन्द्रियगुणाभासं'भावना षोडशिग्रहणे, षोडश्यग्रहणे तु 'सर्वेन्द्रियविवर्जित'मित्युक्तभावना । अनुष्ठाने न कोपि विकारः । यथाचारमेवाग्निष्टोमादयः । यद्यप्यत्रिवृत्कृता अग्निष्टोमादयः सन्ति, तथापि प्रेष्ठाभ्यर्हणायोग्यत्वेन 'यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया । मदर्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः' इति भावनानिषेधाद्भगवदर्चोपासनायोग्याः । तावदित्यादि । तावतामङ्गानां करणे नियमनं नियामकत्वम् । तत्र बीजं यागसम्पत्त्यादि । नन्वित्यादीति । तद्धर्माणामधिकधर्मविशिष्टस्य धर्माणां तैत्तिरीयकाग्निष्टोमधर्माणां षष्ठाग्निहोत्रधर्माणाम् । त्वदुक्तेति । विरुद्धधर्माधारत्वस्योपसंहारनियामकत्वमित्युक्तरीत्या । प्रघट्टकार्थमाहुः तथाचेति । एवंप्रकारेति । उपसंहारप्रकारविशेषकथनस्य उत्पन्नशिष्टवाजिनयागप्रायत्वेनोत्पत्तिशिष्टादतिरात्रयागसकाशान्नैर्बल्यात् । बाधेति । अधिकरणे तथा । अस्येति । यागसम्पत्त्यादेरव्यवहितपूर्वोक्तस्य । हेत्वन्तरेति । अधिकाराचेति चकारात्तथा । तथाच 'स्वाध्यायस्य हि समाचारे तथात्वेने'त्येको हेतुः, 'अधिकाराच्चे'त्यपरो नियमे हेतुः । सर्वेषामित्यादीति । तथा नियम इति । तत्तदङ्गाचारनियमः । यदस्य कर्मण इति । आदिना ....। तन्नियम इति । तत्तदङ्गाचारनियमे हेतुः । कुक्कुटोसीति अस्यन्तमन्त्रः । त्वं अश्मा, कुत् कुत्सितः, कौ वा छुटः छुट छेदे तु. प. से. छुटति पचाद्यच् । वेदभाष्येऽर्थः स्पष्टः । 'कुरुः श्रीकण्ठजाङ्गले ओदने नृपभेदे चे'ति विश्वकोशे कुरुः प्रसिद्धः । यथाह श्रीगोवर्धननाथजितं प्रति कश्चित् 'कृष्णोय'मिति । व्यवस्थितेति । यथा अवडस्फोटायनस्येत्यत्र गवाक्षोर्थविशेषे, न तु गो अक्षः गोक्ष इति ।

कल्पविषयत्वेन कल्पसूत्रे उच्यते । विकल्पे तूभयस्याशास्त्रार्थत्वम्, उपसंहारे तूभयस्यापि शास्त्रार्थत्वम् । अतोपि नात्रोपसंहारशङ्का । अत्र दृष्टान्तमाह सववदिति । यथा सवा होमाः सप्तसूर्यादयः शतौदनपर्यन्ता वेदान्तरोदितत्रेताग्न्यनभिसम्बन्धादथर्वणोदितैकाग्निसम्बन्धाच्चाथर्वणिकानामेव कार्यत्वेन नियम्यन्ते, तथा तत्तच्छाखायास्तथात्वात्तत्तदुक्त एव कर्मणि तत्तच्छाखिनामधिकाराच्च स्वस्वशाखोक्तादन्यूनानतिरिक्तकर्मकरणनियम इत्यर्थः । प्रकृतेपि यद्रूपोपासनाप्रकरणे यावन्तो धर्मा उक्ताः, तस्मिन् रूपे तावद्धर्मवत्त्वेनैवोपासना कार्या, तद्बोधकप्रमाणानुरोधात्, न तु रूपान्तरोपासनप्रकरणोक्तासाधारण-

---

भाष्यप्रकाशः ।

उच्यते, यदि प्रकारभेदोक्तेरधिकारस्य च नियामकत्वं न स्यात्, तदा तत्र तत्र व्यवस्थाप्येत, यदि तत्र न व्यवस्थाप्येत, तदा विकल्पो वा उपसंहारो वा प्राप्नुयात् । तत्राद्ये ऐच्छिकत्वेनाष्टदोषदुष्टत्वादुभयस्याशास्त्रार्थत्वम्, उपसंहारे तूभयस्यापि शास्त्रार्थत्वम्, तथापि विरुद्धत्वात् कर्तुं न शक्यमिति व्यवस्था आवश्यकी । अतो व्यवस्थावशादपि न कर्मण्युपसंहारशङ्केति न पूर्वोक्तस्याप्रयोजकत्वमित्यर्थः । ननु यदा शाखाभेदो न सिद्धः, तदा त्वधिकारस्य नियामकत्वाभावादुपसंहारः स्यादित्यत आहुः अत्रेत्यादि । ईदृशेपि स्थले दृष्टान्तमुखेन नियामकमाहेत्यर्थः । व्याकुर्वन्ति यथेत्यादि । यथा सवाः सम्बन्धिभेदान्नियम्यन्ते, तथा विभागाभावदशायामपि तत्तद्वेदे विद्यमानायास्तच्छाखाया एव नियामकत्वात् तथेत्यर्थः । एवमत्रोपसंहारहेतुः शोधितः । निरूपणप्रकारभेदादिबाधकरहित एव वेद्याभेद उपसंहारप्रयोजक इति । एवं कर्मण्युपसंहारबाधकान्युक्त्वा तेषामुपसंहारबाधकानामुपासनायामपि तुल्यत्वात् सववच्चेति चकारेण तासामप्यत्र सङ्ग्रहादे-

रश्मिः ।

तथोदिते होतुरनुदितहोमे दोषः, अनुदिते होतुरुदितहोमे दोप इति उदितहोतुरुदितहोमोऽनुदितहोतुरनुदितहोम इति व्यवस्थितविषयत्वं तेन । विकल्प इति भाष्यं विवरीतुमाहुः यदीति । प्रकारेति । प्रकारभेदः गुणभेदस्याप्रयोजकत्वरूपः । विद्यैकत्वं वेद्यैकत्वाधीनं तद्वेद्यैकत्वं गुणानां गोपरूपत्वरामत्वनृकेसरित्वानां भेदस्याप्रयोजकत्वाङ्गीकाराद्ब्रह्मत्वेनाङ्गीकृतम् । यथा घटत्वपटत्वकुड्यत्वकुसूलत्वानां गुणानां भेदस्याप्रयोजकत्वाङ्गीकारेण द्रव्यत्वेन रूपेण घटादीनां वेद्यानामभेदस्तथात्र अस्याः प्रकारभेदोक्तेरित्यर्थः । तत्र तत्रेति । तत्तत्कल्पसूत्रे तत् होमाश्मादानद्वयम् । उपसंहार इति । 'कुच्छुटोसी'ति मन्त्रयितरि 'कुरुरसी'ति मन्त्रयितृत्वोपसंहारः 'कुरुरसी'ति मन्त्रयितरि 'कुच्छुटोसी'ति मन्त्रयितृत्वोपसंहारः । उदिते होमकर्तर्यनुदिते होमकर्तृत्वोपसंहारः । अनुदिते होमकर्तर्युदिते होमकर्तृत्वोपसंहारः । भाष्यं व्याकुर्वन्ति स्म तत्राद्य इति । अष्टदोषेति । पूर्वमीमांसायां स्पष्टाः । कर्मणीति । अग्निष्टोमे । पूर्वोक्तस्येति । व्यवस्थितविषयत्वेन प्रकारभेदोक्तेरधिकारस्य च । यदेति । व्यासावतारपूर्वकाले । सम्बन्धीति । आथर्वणिकसम्बन्धिभेदात् । अस्यां फक्किकायां अथर्वणेति पदच्छेदः उदितेत्येकदेशान्वयि । न्यायेऽन्वयः प्रसिद्धः । तथेतिभाष्यविवरणं तथा विभागेति । विद्यमानाया इति । 'नासतो विद्यते भाव' इति वाक्यात् । नियामकत्वादिति । तथात्वादितिभाष्यार्थः । तथेत्यर्थ इति । तत्तदुक्त इत्यादिरित्यर्थः । उपसंहारेति । उपसंहारस्य हेतुः वेद्याभेदः । शोधनप्रकारमाहुः निरूपणेति । गुणनिरूपणं गुणरूपप्रकारभेद आदिनाधिकारः एतै-

धर्मवत्त्वेनापि। तथा सति मत्स्योपासकस्य चापशरादिकमपि भावनीयं स्यात्, पुरुषरूपोपासकस्य च लक्षयोजनायामश्रृङ्गादिकम्।

नन्वथर्वणोपनिषत्सु श्रीरामोपासनायां 'यो वै ये मत्स्यकूर्माद्यवतारा भूर्भुवःसुवस्तस्मै वै नमो नम' इति वाक्येन तदितरावताररूपत्वमुच्यते, तेन तद्धर्मवत्त्वमप्याक्षिप्यते।

सत्यमाक्षिप्यते तद्धर्मवत्त्वम्। तत्रायमभिसन्धिः। परमकाष्ठापन्नं ब्रह्मस्वरूपमिदमिति ज्ञात्वा ह्युपासना कार्या। तेनैतस्यैवान्येऽवतारा:, तत्तद्रूपेण तानि तानि कर्माण्ययमेव कृतवानिति ज्ञेयं परम्, न तु तस्मिन्नेव रूपेऽन्यावतारधर्मवत्त्वमपीति।

भाष्यप्रकाशः।

तांस्तत्रापि सङ्क्रमयन्ति प्रकृतेपीत्यादि। तथा सतीति। तद्बोधकप्रमाणमननुरुध्य रूपान्तरासाधारणधर्मोपसंहारेऽङ्गीकृते सति। तथाचैवं तद्भावने निरूपणप्रकारभेदाधिकारभेदसम्बन्धिभेदरूपस्यानुपसंहारनियामकत्रयस्यापि बाधापत्त्या अपराध आपद्येत, अतस्तथा न भावनीयमित्यर्थः। एतदेवैतत्पादान्ते 'न वा तत्सहभावाश्रुते'रिति सूत्रद्वये सेत्स्यति। अत्र वादी साम्बन्धिकनियमस्याप्रयोजकत्वं शङ्कते नन्वित्यादि। तथाचोक्तमन्त्रवर्णाच्छ्रीरामस्यावतारान्तररूपत्वे प्राप्ते तदुपासकस्य तथा भावनाधिकारस्यापि प्राप्तौ मन्त्रलिङ्गविरोधात् यो यत्सम्बन्धी, तेन तत्सम्बन्ध्येव ग्राह्यमिति साम्बन्धिकोऽनुपसंहारनियमोऽत्राप्रयोजक इत्यर्थः। अत्र तदुक्तमुपगम्य सूक्ष्मेक्षिकया समादधते सत्यमित्यादि। तत्रायमभिसन्धिरिति। आक्षेपेऽयमाशयः। कार्येति। अवताररूपोपासकेन कार्या। इति ज्ञेयं परमिति। मन्त्रेऽवताराणामेव तत्त्वविधानदर्शनात् तथा भावनीयम्। अन्यावतारधर्मवत्त्वमिति। लक्षयोजनायामत्वकिणचक्रवत्त्वादि कुतो न

रश्मिः।

बाधकै रहित एव, न तु सहितः, वेद्यानां गोपरूपरामनृकेसरिरूपाणां अभेद उपसंहारस्य प्रयोजकः। बाधकैः सहितोऽप्रयोजको यथातथा 'उपसंहारोऽर्थाभेदा'दितिसूत्रे वक्ष्यते। तत्र वेद्याभेदो रामोपासनायामेकत्रोक्तत्वेन। स च निरूपणबाधकसहितः। निरूपणमधिकारानुरोधि तत्रास्ति। भिन्नाधिकारानुरोधिनिरूपणं भिन्नाधिकारे बाधकं भवति। गुणा बाधकाः मत्स्योपासकस्य चापशरादिकाः, पुरुषोपासकस्य लक्षयोजनायामश्रृङ्गादिकाः। अधिकारो भिन्नो बाधकः। एवं बाधकसहितो वेद्याभेद उपसंहारस्याप्रयोजकः। अतो न मत्स्योपासकस्य चापशरादिका गुणा उपसंहार्याः। न पुरुषोपासकस्य लक्षयोजनायामश्रृङ्गादिका गुणा उपसंहार्याः इति। एतेषामिति। निरूपणप्रकारभेदाधिकाराणाम्। **प्रकृतेपीत्यादी**ति। असाधारणधर्माः चापशरादयः लक्षयोजनायामश्रृङ्गादयश्च। **नियामके**ति। उपसंहारनियामकत्रयं निरूपणप्रकारभेदाधिकारभेदरूपं तस्य। साम्बन्धिकशब्दार्थोऽग्रे वाच्यः। **उक्तमन्त्रे**ति। 'यो वै ये मत्स्ये'त्याद्युक्तमन्त्रलिङ्गं शब्दसामर्थ्यं यच्छब्दार्थे रामेण मत्स्यकूर्माद्यवताराणामभेदान्वयात् पुरुषमत्स्याद्यवतारत्वावच्छिन्ने। उक्तमन्त्रान्वयलिङ्गं वा तस्य विरोधात्। **यो यदि**ति। यो निरूपणादिः यत्सम्बन्धी यद्विधिसम्बन्धी तेन निरूपणादिना हेतुना **तत्सम्बन्धी** तद्विधिसम्बन्धी, नत्वन्यसम्बन्धी, अधिकारिणा ग्राह्यम्। **अनुपे**ति। उपसंहाराभावस्य नियमः। **अत्रे**ति। एकत्रानेकोपासनास्थले। **सत्यमित्य**र्धाङ्गीकारे। इत्यत आहुः **उपगम्ये**ति। **सूक्ष्मेक्षिकये**ति। अङ्गीकृते प्रतिवचनं सूक्ष्मेक्षिका। **अभावन** इति। अधिकार्याभावने। **कार्ये**ति। 'आत्मेत्येवोपासीते'ति

१. एवं कर्मणि प्रकृतेपीत्यादीस्तत्र एतेषामुपासनायामपि तुल्यत्वात्तत्रापि सगमयन्तीति पूर्वपाठ.। २. अभावने इति पूर्वपाठ।

तथाच तस्मिंस्तस्मिन्नवतारे तत्तद्धर्मवानिति श्रुत्या बोध्यते, न तु सर्वत्रेति। तत्र बाधकमुक्तमेव। प्राणाद्युपासनास्वेतावान् विशेषः, यथा कर्मण्यतिरेके प्रायश्चित्त-श्रवणं बाधकम्, श्रीरामस्वरूपाद्युपासनासु च तेनावतारेणाकृतकर्मणस्तत्र भावनेऽ-पराधो बाधकः, 'योऽन्यथा सन्तमात्मान'मित्यादिवाक्यं च। न तथा प्राणाद्युपास-नासु अधिकगुणस्येतरत्रोपसंहारे किञ्चिद्बाधकं दृश्यत इति स कर्तुं शक्यते इति।

भाष्यप्रकाशः।

भावनीयमित्याकाङ्क्षायां तत्र हेतुमाहुः **तथाचेत्यादि**। यथा तत्तच्छाखायां ज्योतिष्टोमादिस्तत्त-द्धर्मवान् बोध्यते, तथा तत्तत्तापनीयेषु तत्तदवतारे तत्तद्धर्मवानिति श्रुत्या बोध्यते, न तु सर्वत्र तद्वान्, अतस्तथा भावने शास्त्रातिक्रम इति तथा न भावनीयमित्यर्थः। नन्वाक्षेपे कथमतिक्रम इत्यत आहुः **तत्र बाधकमुक्तमेवेति**। आक्षेपे निरूपणप्रकारभेदादित्रयरूपं बाधकमुक्तमेव। तथाच तस्य यदि बाधकता नाङ्गीक्रियते, तदा शाखाकृतोऽग्निष्टोमाद्यङ्गनियमः सर्वेष्वप्याथर्वणिककार्यता-नियमश्च भज्येत, अतस्तदभावायात्रापि तथा न भावनीयमित्यर्थः। ननु पूर्वसूत्रोक्तहेतुना सर्वैक्यसिद्धौ सर्वत्र सर्वगुणोपसंहारः प्राप्तः, तत्र समाचारसूत्रे निरूपणप्रकारभेदाधिकारभेदप्राय-श्चित्तादिश्रवणसम्बन्धिभेदानामनुपसंहारनियामकत्वमादृतम्, तेन तत्तच्छाखिभिस्तत्तदधिकारिभि-स्तत्तत्सम्बन्धिनियताः स्वाधिकारानुसारेण स्वशाखोक्ता गुणा उपसंहर्तव्याः, नेतर इति सिद्धम्। तथा सति प्राणाद्युपासनायां शाखान्तरोक्तगुणोपसंहारो न स्यादित्यत आहुः **प्राणादीत्यादि**। नच निरूपणप्रकारभेदरूपमुपसंहारबाधकमस्त्येवेति कथं बाधकाभाव इति वाच्यम्। कर्मणि न्यूनाधिक्ये प्रायश्चित्तवदुपासनायां तथाभावने प्रायश्चित्ताश्रवणान्निरूपणप्रकारभेदस्य प्रायश्चित्ताद्युन्नायकत्व एव बाधकत्वम्, नान्यथेति निश्चयात्। एवं प्रकारभेदेपि 'अधिकं तत्रानुप्रविष्ट'मिति न्यायेन दोषाभावात् तत्रत्यानां पदार्थानामबाधेनाधिकसंख्यायां न्यूनसंख्याया निवेशतस्तस्या अप्यबा-धादधिकप्राणादिनिवेशेन पुरःस्फूर्त्या भेदप्रतीतावपि[1] प्राणाद्युपासनातोऽभिन्नतया तस्या बाधक-त्वाभावात्। 'योऽन्यथा सन्तमात्मान'मितिवद्दोषबोधकवाक्याभावाच्च। अतः सुष्ठूक्तं **तत्रोपसंहारे न किञ्चिद्बाधकं दृश्यत इति**। एवं प्राणादिविद्यास्पसंहारबाधकाभावेन तस्मिन् साधितेपि

रश्मिः।

श्रुतेस्तथा। **मन्त्र** इति। मन्त्रे वैदिके। स्वविषयत्वादवताराणामेव, न तु ह्यधोक्षजस्य, तत्त्वविधान-दर्शनात्। **तथेति**। अयमवतार्यैव कृतवानिति विभावनीयमित्यर्थः। अवतार्यवतारयोरभेदमर्शनेनाय-मिति प्रत्यक्षगे रूपं यत्तदुक्तम्। **किणेति**। कूर्मचिह्नम्। आदिना करालवदनत्वादि। **तत्तदिति**। नृकेसरिरामगोपालतापिनीयेषु। **अत्रापीति**। एकत्रानेकोपासनास्थले। **निरूपणेति**। गुणनिरू-पणम्। निरूपणं च प्रकारभेदश्चाधिकारभेदश्च प्रायश्चित्तश्रवणं च सम्बन्धिभेदश्च द्वन्द्वः तेषाम्। **अनुपसंहारेति**। उपसंहाराभावस्य नियामकत्वम्। **प्राणादीति**। इयं प्राणसंवादेऽस्ति। पूर्व-सूत्रोक्तायाम्। **शाखान्तरेति**। वाजसनेयिशाखोक्तपञ्चमप्राणरूपगुणोपसंहारः। **प्राणादीत्यादीति**। **अधिकगुणस्य** पञ्चमप्राणरूपस्य। **इतरत्र** वाजसनेयीतरत्र शाखायाम्। **स** इति। अधिकगुणो-पसंहारः। **नच नीति**। निरूपणं च प्रकारभेदरूपश्च तयोः समाहारः। 'स नपुंसक'मिति पाणिनीयेन नपुंसकत्वम्। **अस्त्येवेति**। बाधकायोगव्यवच्छेदकैवकारः। **एवमिति**। पूर्वसूत्रे वाजसनेय्युक्तपञ्चम-प्राणरूपगुणनिरूपणेन प्रकारस्य गुणरूपस्य भेदेपि। **तत्रत्यानां** बृहदारण्यकोक्तानां वाक्चक्षुःश्रोत्र-

१. भेदेन प्रतीतावपीति पाठ।

ननु पुरुषादिरूपस्य विग्रहस्यैव शुद्धब्रह्मत्वादयमेवावतारान्तरेष्वपि लीला-कर्तेति ज्ञानमनुपपन्नमिति चेत्। मैवम्। धर्मिग्राहकमानेनैकस्यैव शुद्धस्यैवानन्त-रूपत्वेन सिद्धत्वात्। वस्तुन एव तथात्वान्न काचिच्छङ्का। यथैकस्यैवान्योन्या-भावस्यानन्तभावप्रतियोगिकतद्रूपत्वं तावत्प्रतियोगिकात्यन्ताभावरूपत्वं चाभा-

---

भाष्यप्रकाशः।

परविद्यासु रूपान्तरे पूर्वोक्तरीतिकरूपान्तरगुणोपसंहारानुपपत्तिं शङ्कते **नन्वित्यादि,** **इति ज्ञानमनुपपन्नमिति।** रूपान्तरविग्रहस्यापि शुद्धब्रह्मत्वादयमेव तथेत्यंशेऽनुपपन्नमित्यर्थः। तत्र समादधते **मैवमित्यादि।** धर्मिग्राहकं मानं हि 'यदेकमव्यक्तमनन्तरूप'मिति वक्ष्यमाणश्रुतिरूपं तेन। **वस्तुन एव तथात्वात्।** ब्रह्मण एकत्वादत्र प्रकरणिनः श्रीरामचन्द्रस्यैव भगवत्त्वेन श्रावणात् तस्य विरुद्धधर्माश्रयत्वेन सर्वाकारत्वात् तस्यैव रूपान्तरेण तत्करणसम्भवेन न कापि शङ्केत्यर्थः। एतस्य बुद्ध्यारोहार्थं दृष्टान्तेनोपपादयन्ति **यथेत्यादि।** नियतपदार्थवादिमते भावभिन्नो निषेधमुखप्रतीतिगोचरो य एकोऽभावभेदरूपोऽन्योन्याभावपदार्थस्तस्यैव तादृशतादृश-

रश्मिः।

मनसां पदार्थानामबाधेनाधिकसंख्या पञ्चसंख्या तस्यां न्यूनसंख्या चतुःसंख्यायाः। **अबाधेनेति।** शते पञ्चाशदितिरीत्या तथा। पुरःस्फूर्त्या शाखाभेदस्फूर्त्या विद्याभेदस्फूर्त्या। **तस्येति।** एवं प्रकार-भेदस्येत्यर्थः। **इतिवदिति।** इत्यदोषबोधकवाक्यवत्। शाखान्तरोक्तगुणोपसंहारेण प्राणविद्यास्वरूपस्य प्राग्भिर्दर्शनात्। व्यतिरेके दृष्टान्तः। **अत्रेति।** अवयव्यनवयविपक्षयोरित्यर्थः। **उद्भाव्येति।** अनवयविपक्षमाश्रित्योद्भाव्य। **नन्वित्यादीति। विग्रहस्यैवेति।** एवकारः शुद्धब्रह्मरूपावयवियोगं व्यवच्छिनत्ति। अयं विग्रहः। एवकारः पूर्ववद्व्याख्येयः। शुद्धब्रह्मत्वादेवकारो वा। **अनुपेति।** देवदत्तोपि विष्णुमित्रे क्रीडाकर्ता स्यात्। अतोऽनुपपन्नम्। **तथाचेत्यादि।** अवयव्यनङ्गीकारेण शङ्का-याम्। आकाराणां परस्पर सन्निवेशविरोधेन। **वाक्यमेवेति।** आकाररूपेण प्रवेशाङ्गीकारेऽन्यथा-काररूपेणाप्रवेष्टृत्वेन सन्तमन्यथाकाररूपेण प्रवेष्टृत्वप्रतिपदनं निषिद्धं तस्य निषिद्धस्यार्थस्य बाधकम्। एवकारोऽन्ययोगव्यवच्छेदकः। **समादधत इति।** अवयविपक्षमाश्रित्य तथा। **मैवमित्यादीति। एकस्यैवेति।** अवयविन एव। एवकारोऽवयवमात्रयोगव्यवच्छेदकः। **शुद्धस्यैवेति।** अक्षरमात्रस्य। **तेनेति।** सिद्धेनानन्तरूपत्वेन। **तथात्वादित्यस्य** व्याख्यानं **तस्यैवेत्यादि। तस्यैवेति।** अवयविन एव। **तत्करणेति।** अवतारान्तरेष्वपि कर्तृत्वेन। **कापीति।** अवयवावयविनोरपि जन्मप्रकरणे द्विभुजे चतुर्भुजप्रवेशेपि शङ्का। **एतस्येति।** दार्ष्टान्तिकस्य। **दृष्टान्तेनेति।** तथाचोपक्रमस्य संजात-विरोधित्वेन छान्दोग्यीयनवमोपदेशार्थे दार्ष्टान्तिके प्रसिद्धपञ्चमं 'न्यग्रोधफलमत आहरेती'त्याद्युक्तं 'यं वै सौम्यैतमणिमानं न निभालयसे, एतस्य वै सौम्यैषोऽणिमा, एवं महान्यग्रोधस्तिष्ठती'त्यनञ्प्रयोगाद-भावदृष्टान्तेनेत्यर्थः। यद्यप्यणिमत्वेनाभावो विशेषितो न भावयितुं शक्य इत्यभावपदार्थः, तथाप्यन्यापे-क्षयायमेव दृष्टान्तो युक्त इत्याशयवन्त आहुः **नियतेति।** सप्तपदार्थवादिनैयायिकमते। **निषेधेति।** घटः पटो नेत्येवम्। **तस्यैवेति।** अत्र विशेषणविभक्तेः साधुत्वार्थत्वापेक्षया प्रतीयमानाभेदार्थकत्वस्य ज्यायस्त्वेन विशेषणैक्यादन्योन्याभावपदार्थविशेष्यान्वय्येवकारः कृतः। एकस्यैवेत्यर्थः। अभेदात्। तदुक्तं मुक्तावल्यां 'अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावा'दिति। **तादृशेति।** वक्ष्यमाणेत्यर्थः। **इत्याद्युक्तेति।** इत्यादिभाष्योक्तेत्यर्थः। तद्यथा। **भाष्ये।** घटः पटो नेत्यत्र पटो घटो न, कुड्यं कुसूलं न, कुसूलं कुड्यं नेत्येवमनेन भावप्रतियोगिकान्योन्याभावरूपत्वम्। **तावदिति।** अयं भावः।

वप्रतियोगिकान्योन्याभावात्यन्ताभावरूपत्वं चाभावाभावरूपत्वेऽप्यभावरूपत्वमेव चाङ्गीक्रियते, तथेहाप्यस्तु । अभावत्वस्याप्रयोजकत्वात् । धर्मिग्राहकमानस्यैव तथात्वात् । तच्च तैत्तिरीयोपनिषत्सु 'अतः परं नान्यदणीयसꣳ हि परात् परं यन्महतो महान्तम् । यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दित्यादिश्रुतिरूपं प्रसिद्धमेव ।

अपरञ्च । सर्वासामुपासनानां हि ब्रह्मविज्ञानसाधनत्वेन श्रुतौ निरूपणं क्रियते । यत्प्रकारिकोपासना विज्ञानहेतुः, स प्रकारश्च निरूप्यते । एवं सत्येकस्यां

भाष्यप्रकाशः ।

प्रतीतिबलेन अनन्तभावप्रतियोगिकेत्याद्युक्तप्रकारकतावद्रूपत्वं स्वीक्रियते, न तु निरूपकभेदमादाय स्वरूपनानात्वम्, तद्वदत्र ब्रह्मण औपनिषदत्वेन तद्वाक्यस्यैव नियामकत्वात् स्वरूपैक्येऽप्यनन्तरूपतया तत्तल्लीलाकर्तृत्वज्ञानं स्वरूपैक्यं चोपपद्यत इत्यर्थः । ननु यद्येवं तत्तल्लीलाकर्तृत्वेन ज्ञानं

रश्मिः ।

अभावत्वेनैक्यादत्यन्ताभावस्य । तदुक्तं संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वमिति यत्किञ्चिद्भेदवत्त्वम् । तावत्प्रतियोगिकात्यन्ताभावेन रूप्यते व्यवह्रियत इति तावत्प्रतियोगिकात्यन्ताभावरूपत्वम् । अत्रापि भावः । नित्यसंसर्गाभावत्वमत्यन्ताभावत्वमिति ध्वंसादिकालावच्छेदेनात्यन्ताभावो वर्तत इति नव्यमतम् । ध्वंसप्रागभावाधिकरणेनात्यन्ताभाव इति प्राचां मतम् । श्यामे घटे रक्तं नास्ति, रक्ते घटे श्यामं नास्तीति प्रागभावं ध्वंसं चावगाहते, नतु तदत्यन्ताभावम् । अभावप्रतीति । घटः पटाभावो नेत्यादि । अभावाभावेति । अन्योन्याभावाभावाभाव इत्येवं द्वितीयाभावस्य प्रतियोगिस्वरूपत्वात् । अत एवाभावप्रतियोगिकान्योन्याभावत्वं नित्यत्वात्तद्भेदत्वाच्चाप्रतीयमानात्यन्ताभावरूपत्वं च । तथाचाभावप्रतियोगिकावन्योन्याभावात्यन्ताभावौ ताभ्यां रूप्यते व्यवह्रियत इत्यभावप्रतियोगिकान्योन्याभावात्यन्ताभावरूपत्वम् । अभावेति । अन्योन्याभावाभावाभाव इत्यत्रान्योन्याभावत्वं शक्यतावच्छेदकमुक्तप्रायम्, अभावत्वं शक्यतावच्छेदकमभिप्रेत्याहुः । अन्योन्याभावाभावाभावरूपत्वेऽभावरूपत्वमभावत्वं शक्यतावच्छेदकमित्यर्थः । निरूपकेति । प्रतियोगिभेदमादाय । तथेहाप्यस्त्विति भाष्यं विवृण्वन्ति स्म तद्वदित्यादि । तद्वाक्यस्येति । 'यदेकमव्यक्तमनन्तरूप'मित्यस्य महानारायणवाक्यस्य । उपपद्यत इति । इत्यस्त्वित्यर्थः । भाष्ये । ननु दृष्टान्तेनाभावत्वमपि स्यात्, तत्राहुः अभावत्वस्येति । अणिमत्वेनाभावस्य विशेषितत्वात्तथा । 'न केनापि भावयितुं शक्यमतोऽभावं वदन्त्येन'मिति व्युत्पत्तिः स्मार्ता । प्रागेवेति । गतपादे उभयलिङ्गाधिकरणे । अपरं चेत्यादीति । सर्वेषामिति । गोपरूपरामस्वरूपनृकेसरिरूपोरुक्रमादिरूपसर्वोपासनानां चित्तशुद्धिद्वारा भक्त्या शुद्धचित्ते । आविर्भूते उपासाविषयातिरिक्ते पुरुषोत्तमे ब्रह्मविशेषज्ञानं तत्साधनत्वेन श्रुतौ 'स वा एष पुरुषोऽन्नरसमयः, तस्येदमेव शिरः, अयं दक्षिणः पक्षः, अयमुत्तरः पक्षः, अयमात्मा, इदं पुच्छं प्रतिष्ठे'त्युक्त्वा 'अन्नं ब्रह्मेति व्यजाना'दित्यादिश्रुतौ निरूपणं क्रियते । यत्प्रकारिकेति । गोपरूपत्वादिप्रकारिकोपासना आदिपदार्थान्नरसमयत्वादिप्रकारिकोपासना गोपरूपाद्यन्नादिब्रह्मविज्ञानहेतुः । विशिष्टं ज्ञानं भक्तिफलरूपं ज्ञानम् । स प्रकार इति । 'एको वशी सर्वगः कृष्ण' इत्याद्युक्तैकत्वादिः प्रकारः । तथा रामरूपे 'सो विमुक्त उपास्यो य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित' इत्युक्तानन्तत्वाव्यक्तत्वात्मत्वानि प्रकाराः । नृकेसरिरूपे 'ससागरां ससप्तद्वीपां वसुन्धरां तत्साम्नः

शाखायां कतिपयगुणनिरूपणम्, तदितरस्यां शाखायां तदतिरिक्तानामपि गुणानामित्यत्र को हेतुरिति पृच्छामः। उपसंहारेण प्राप्तिमनिरूपणे हेतुं चेत् ब्रवीषि, तत्र वदामः। एवं सति न्यूनगुणनिरूपिका श्रुतिः स्वोक्तानपि गुणान्न वदेत्। तथाहि। उपासनानां ब्रह्मविज्ञानफलकत्वस्य निर्णीतत्वात् तस्य चैकजातीयत्वात्

भाष्यप्रकाशः।

स्वरूपैक्यं चोपपन्नम्, तर्हि रूपान्तरेणापि रूपान्तरलीलाकर्ता रूपान्तरेपि रूपान्तरधर्मवानिति भावने को दोषः, सर्वत्रोभयलिङ्गत्वाविरोधस्य प्रागेव निर्णीतत्वादित्याशङ्कायां तथाभावने श्रुतितात्पर्यविरोधरूपं दोषं स्फुटीकर्तुं प्रतिवादिनमनुयुञ्जते अपरं चेत्यादि। तत्रोत्तरमुद्भाव्य दूषयन्ति उपसंहारेत्यादि, तत्र वदाम इति। तादृश उत्तरे तवानिष्टापत्तिमुद्घाटयामः। 'न वदे'दित्यनेन गृहीतं विभजन्ते तथाहीत्यादि। तस्य चेत्यादि। तस्यैव ब्रह्मज्ञानस्य त्वन्मते

रश्मिः।

प्रथमं पादं जानीया'दित्याद्युक्तचतुष्पात्त्वम्। 'तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छती'त्युक्तसाङ्गत्वं च प्रकारः। विष्णुसूक्ते 'विष्णोर्नु क'मित्याद्युक्तविष्णुत्वादिः प्रकारः। मन्त्रे च 'चरणं पवित्रं विततं पुराण'मिति मन्त्रोक्तचरणविततत्वपुराणत्वपावकत्वदुष्कृततारकत्वानि प्रकाराः। नारायणानुवाके महानारायणे 'सहस्रशीर्षं देव'मिति सद्विद्याब्रह्मास्तित्वात्। 'आत्मविद्या ह्येषा विश्वात्मानं परायण'मित्यत्र विश्वात्मत्वोक्तेः सहस्रशीर्षत्वादिः विश्वात्मत्वादिः प्रकारः। श्वेताश्वतरस्थादयोन्या उपनिषदः। तासु पूर्वा वासुदेवोपनिषत्। तत्र 'यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इत्युक्तजगद्व्यापकत्वं प्रकारः। नारायणास्तित्वात्सत्। सज्जगत्तदात्मरूपं वा। कालाग्निरुद्रोपनिषदि शिवरूपम्। 'तिर्यक् तिस्रो रेखाः प्रकुर्वीते'त्युक्त्वा 'यास्य प्रथमा रेखा गार्हपत्यश्चाकारो रजोभूर्लोकश्चात्मा क्रियाशक्तिर्ऋग्वेदः प्रातःसवनं महेश्वरो यास्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा च शक्तिर्यजुर्वेदो माध्यंदिनं सवनं सदाशिवो यास्य तृतीया रेखा साहवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयं सवनं शिवो देवते'त्युक्तमहेश्वरत्वसदाशिवत्वशिवत्वरेखात्रयदेवतात्वानि प्रकाराः। तथा यजुरुपनिषदि षडग्नित्वं प्रकारः। छान्दोग्ये पञ्चाग्नित्वम्। 'य एतान्पञ्चाग्नीन्वेदे'ति श्रुतेः। मण्डूके 'अद्वैतः सर्वभूताना'मित्युक्ताद्वैतत्वदेवत्वतुर्यत्वविभुत्वस्मृतत्वानि प्रकाराः। ॐमित्येतदक्षरोपासनायामृग्वेदादिशरीरत्वान्युक्तानि प्रकाराः। चतुःश्रृङ्गत्वादिकं प्रकारः। तैत्तिरीयविभूत्युपासनेऽन्नमयत्वादिः प्रकारः। दुर्गासूर्यगणपत्युपनिषदुक्तविभूत्युपासनायां दुर्गात्वादिः प्रकारः। देव्या अथर्वशीर्षे देवैः पृष्टा 'साब्रवीदहं ब्रह्मस्वरूपिणी, ततः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च, अहमानन्दानानन्दौ, एवमुक्तसर्वत्व प्रकारः। सूर्योपनिषदि 'षट्स्वरारूढं बीजेन षडङ्गं रक्ताम्बुजेन संस्थित सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजम्। पद्मद्वयाभयवरदहस्तं कालचक्रप्रमेतार श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मण'इत्युक्तषट्स्वरारूढत्वानि प्रकाराः। गणपत्यथर्वशीर्षे 'नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासी'त्युक्तत्तत्त्वत्वादिः प्रकारः। एव स प्रकारश्च निरूप्यत इत्यर्थः। **एकस्यामिति**। छन्दोगशाखायां पञ्चाग्निविद्यायां तथा। **तदितरस्यां** वाजिशाखायाम्। **गुणानामिति**। षष्ठाग्निगुणानाम्। **उद्घाटेति**। उद्घाटनं कुर्मः वदनेन। **गृहीतमिति**। अर्थम्। **तथाहीत्यादीति**। **निर्णीतत्वादिति**। 'अपरं चे'त्यादिभाष्येण निर्णीतत्वात्। **तस्यैवेति**। भाष्ये **च** एवकारार्थ इति भावः।

घटवत् कृत्स्नाशेषसाधनसाध्यत्वादशेषतन्निरूपिकैव श्रुतिर्निरूपयेत्। अन्या तूपासनाया नामोक्त्वोपासीतेत्येतावदेव वदेत्। गुणानाक्षेपलभ्यत्वान्न वदेत्। उपसंहार्यानपि वा वदेत्। निरूपयति च गुणान्नोपसंहार्यान्। नच स्वस्वशाखामात्राध्येतॄणामुपासनासिद्ध्यर्थं सर्वशाखासूपासनप्रकारोक्तिरिति वाच्यम्। परशाखाऽज्ञानेन तदुक्तगुणोपसंहारस्याप्यसम्भवेनोपासनाया एवासम्भवापातात्। तस्मात् स्वस्वशाखोक्तप्रकारिकोपासनायामेव सर्वेषामधिकारात्तयैव ब्रह्मविज्ञानं भवति। तैत्तिरीयाणां वाजसनेयिप्रभृतीनां चाग्निष्टोमसम्पत्त्या स्वर्ग इव। प्रकृते ब्रह्मैक्यात्तत्तद्विज्ञानं ब्रह्मविज्ञानमेव। न हि रूपरसग-

भाष्यप्रकाशः।

सर्वगुणोपसंहारेणैकजातीयत्वात् घटवत्कृत्स्नाशेषसाधनसाध्यत्वात् यथा हि घटः कारणसमुदायेनैव जन्यते, न त्वेकेन, तद्वत् तव मते उपासनाया अप्यशेषगुणानुसन्धानरूपसाधनसाध्यत्वादशेषगुणनिरूपिकैव श्रुतिस्तामुपासनां निरूपयेत्, अन्या तूक्तरीत्या वदेत्, गुणाँस्तु न वदेदेव। उपसंहार्यानपि वा वदेत्। तैर्विना उपासनाया असिद्धेः। निरूपयति च कतिपयानेव, न त्वशेषान्। तथाचोपासनाश्रुतौ कतिपयगुणकथनमन्यथानुपपद्यमानं सत् रूपान्तरे रूपान्तरीयगुणोपसंहारो दोषायेति कल्पयति, अतः श्रुतितात्पर्यविरोध एव दोष इत्यर्थः। तत्कथनस्य तात्पर्यान्तरमाशङ्क्य निषेधन्ति नचेत्यादि। तथाचोपासनाया नाममात्रोक्तौ प्रकाराज्ञानात् तत्तच्छाखिनामुपासनाया असिद्धेस्तदुपकाराय तथोक्तिरिति तु न वक्तुं शक्यमित्यर्थः। तत्र हेतुः परेत्यादि। तथाचैवं तात्पर्यकल्पनेपि तावन्मात्रकथनानर्थक्यस्य त्वन्मते तादवस्थ्यमपरिहार्यमेवेत्यर्थः। तर्हि किं तथा कथनस्य तात्पर्यमित्याकाङ्क्षायां मन्दाधिकारिणां तावतैव फलसिद्ध्यर्थं तथा वदतीत्याशयं हृदिकृत्य तेन विवक्षितं साधयन्ति तस्मादित्यादि। तस्मादिति। त्वदुक्तस्य तथाकथनाशयस्यानुपपन्नत्वात्। ब्रह्मविज्ञानं भवतीति। तावद्धर्मविशिष्टब्रह्मसाक्षात्कारो भवति। तत्र दृष्टान्तः तैत्तिरीयेत्यादि। तथाच ब्रह्मणि सर्वत्र सर्वधर्मसत्त्वेपि कतिपयगुणोक्तिबलेन तत्र तत्रोक्तैरेव गुणैरुपासनायाश्चारितार्थ्यनिश्चयान्न रूपान्तरे रूपान्तरधर्मोपसंहारो युक्त इत्यर्थः। ननु तादृशस्य स्वल्पधर्मवत्ताज्ञानस्य कथं ब्रह्मज्ञानत्वमित्यत आहुः प्रकृते इत्यादि। तथाच 'अविज्ञातं विजानता'मिति श्रुतेर्ज्ञानकृतपरिच्छेदो ब्रह्मणि नास्तीति यस्य भूयो धर्मवत्त्वेन ज्ञानम्, तस्यापि न

रश्मिः।

उपासनरूपस्य ब्रह्मज्ञानस्य। उक्तरीत्येति। उपसंहारेणेत्यादिभाष्योक्तरीत्योद्देशेनोपासना वदेदित्यर्थः। उपसमितिभाष्यं विवृण्वन्ति स्म उपसमिति। तदुक्तेति। स्वशाखोक्तगुणोपसंहारस्य। एवं तात्पर्येति। तत्तदुपकाराय तथोक्तिरित्येव तात्पर्यकल्पने। उपसंहारेण सिद्धौ तावन्मात्रकथनानर्थक्यस्येत्यर्थः। मन्देत्यादि। मीमांसाया मन्दमध्यमार्थत्वस्यारम्भे उक्तत्वादिति भावः। तत्र मध्यमस्य बुद्धिदोषात्सन्देहसम्भवेप्येतावता ग्रन्थेन बुद्धिदोषनिवृत्तिसम्भवान्नोक्तिः। त्वदुक्तस्येति। तत उपकाराय तथोक्तिरित्येवमुक्तस्य। मन्देऽभावादनुपपन्नत्वात्। भवतीति। मनसा भवति। 'यद्बुद्धिये'ति वाक्यात्। शुद्धे चित्ते च भवति, 'स मानसीन आत्मा जनाना'मिति श्रुतेः। ज्ञानकृतेति। यथा घटादिकृत आकाशपरिच्छेदः, तथा तत्तदुपसंहृतधर्मवत्त्वेन सकलधर्मवत्त्वेन प्रसिद्धस्य ब्रह्मणः परिच्छेदः तन्मात्रज्ञानविषयत्वं न। 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पने'ति रामतापिनीयश्रुतेः कल्पितत्वात्तेषाम्। इमानि रूपाणि परिणतघटादिरूपव्यतिरिक्तानि। द्वाविति। स्वल्प-

१. आक्षेपलभ्यानिति पाठ.।

न्धादिमत्यां भुवि पुरुषभेदेनैकस्यैव वैकैकप्रकारकं यद्ब्रह्मज्ञानं न तद्ब्रह्मज्ञानम्। एतेनानन्तधर्मवत्त्वं ब्रह्मणि ज्ञापितम्। तदुक्तम्। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे'ति। अत्र 'स्वाभाविकी'ति विशेषणादविद्याकल्पितत्वं शक्तीनां निरस्तम्।

केचित्त्वाथर्वणिकानां विद्यां प्रति शिरोव्रतापेक्षणादन्येषां तदनपेक्षणात्

भाष्यप्रकाशः।

पूर्ण ज्ञानम्, अतोऽस्मिञ्ज्ञाने द्वावपि तुल्यावित्यर्थः। तेन सिद्धमाहुः एतेनेत्यादि। एतेनेति। स्वल्पगुणज्ञानतोपि फलार्थं तत्र तत्र तत्तद्गुणकथनेन। अनन्तगुणवत्त्वे श्रुतिमपि प्रमाणयन्ति तदुक्तमित्यादि। तथाच ब्रह्मणोऽनन्तधर्मवत्त्वेपि तत्तद्रूपोपासनया तत्तत्फलदानार्थं तत्र तत्र तांस्तानेव धर्मान् प्रकटयतीति बोधनार्थं तथाकथनं युक्तमेवेत्यर्थः। ननु यदि स्वस्वशाखोक्तप्रकारिकायामेवोपासनायामधिकारः, न परशाखोक्तप्रकारिकायामिति चेत्, तदा तैत्तिरीयाणां गोपालाद्युपासने, आथर्वणिकानामानन्दमयाद्युपासने वाधिकाराभावात् ततः फलं न स्यात्, न चेष्टापत्तिः, अन्यशाखीयानामपि नृसिंहगोपालाद्युपासने भगवदनुभावप्रसादादेर्दर्शनादिति चेत्। मैवम्। अत्र मन्दानामर्थे स्वशाखोक्तकरणाधिकारस्य कथनात्। तत उत्तमानामधिकगुणोपसंहारे स्वस्वरुचिगोचररूपोपासने च बाधकाभावस्य ब्रह्मणः सर्ववेदान्तप्रत्ययत्वेनैव सिद्धत्वात् तैः स्वस्वशाखोक्तादधिकमपि कर्तव्यमिति बोधितम्। किञ्च। सर्वस्य स्वस्वशाखोक्तोपासनकरणे हि बीजं तत्तच्छाखायां तत्तदुपनिषन्निबन्धनम्। तच्च यादृशयागात्मकस्वरूपं यच्छिरो भवितुं युक्तम्, तत्र तादृशब्रह्मस्वरूपबोधनार्थं तन्निबन्धनमिति निबन्धे 'कर्मवत् ब्रह्मभेदाश्चे'त्यस्य प्रकाशे श्रीमदाचार्यैर्निरूपितम्। एवं सति यः स्वशाखाविहितकर्मप्राधान्येन स्वकामितफलसिद्ध्ये उपास्ते, तस्य स्वशाखोक्तमेव कर्तव्यम्। कर्मणां कामाधिकारकत्वात्। यस्तूत्तरतन्त्रोक्तरीत्या नित्यकर्मणां सहकारित्वमवधार्य ब्रह्मप्राधान्येन तत्तद्रूपप्राधान्येन वोपास्ते, स तु तत्तदनुरूपं परशाखोक्तमुपसंहरताम्। इयमुपासनामार्गीया व्यवस्था। भक्तिमार्गे तु स्नेहस्यैव प्राधान्येन विहितत्वादेर्गौणत्वान्न चाशङ्का, नचोत्तरम्। एवञ्च मन्दाधिकारिणां स्वस्वशाखोक्तब्रह्मज्ञानसिद्धावपि तावज्ज्ञानस्याल्पत्वेन फले विलम्बः। अधिकज्ञानेनाधिकाधिकगुणोपसंहारेण विलम्बनिवृत्तिरिति सिध्यति।

ननु स्वाध्यायसूत्रस्य तथार्थवत्त्वे हि कर्मादिस्मरणेन तादृशोपसंहारानुपसंहारचिन्ता, तदेव दुर्घटम्, अन्यैस्तथा तदर्थानङ्गीकारादित्याकाङ्क्षायां स्वोक्तं सूत्रव्याख्यानं दृढीकर्तु शङ्करभास्कररामानुजाचार्याद्युक्तमेतत्सूत्रव्याख्यानमप्यसमञ्जसमिति बोधनाय तदनुवदन्ति केचित्त्वित्यादि। यद्यपीदं तेषां सूत्रविवरणं शाखान्तराधिकरणस्थस्य 'विद्यायां धर्मशास्त्र'मिति

रश्मिः।

धर्मवानधिकधर्मवांश्च। तद्व्यवस्थेति[1]। स्वल्पाधिकधर्मवत्त्वकृतोपासनाभेदेन धर्मव्यवस्थास्मरणम्। भाष्ये। स्वाभाविकीति। स्वभावस्य परिणामहेतुत्वरूपत्वात्स्वभावस्य श्रौतत्वात्परिणामवादसम्भवेऽविद्याकल्पितत्वं न युक्तमिति तथा। प्रकृते। तथेति। भाष्योक्तार्थवत्त्वे। तदर्थेति। सूत्रार्थानङ्गीकारात्। आदिना शैवाचार्यः। तदिति। तदीयं व्याख्यानम्। शाखेति। पूर्वतन्त्रे द्वितीयस्य चतुर्थचरणे द्वितीयाधिकरणम्। तस्यायमिति। अध्ययनस्यायं भूमौ भोजनाचरणादिः। सूत्रेति। अनुशयोऽनुबन्धः। 'स्यादनुशयो द्वेषे पश्चात्तापानुबन्धयो'रिति विश्वः। केचित्त्वित्या-

१. तद्व्यवस्थास्मरण युक्तमिति पाठः।

विद्याभेद इति प्राप्ते, उच्यते, स्वाध्यायस्यैष धर्मः, न विद्यायाः, कथमिदमवगम्यते, यतस्तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशनपरे ग्रन्थे आथर्वणिका इदमपि वेदव्रतत्वेन समामनन्ति, 'नैतदचीर्णव्रतोऽधीते' इति चाधिकृतविषयादेतच्छब्दादध्ययनशब्दाच्च स्वोपनिषदध्ययनधर्म एवैष इति निर्धार्यते, तस्मादनवद्यं विद्यैकत्वमिति सूत्रार्थं वदन्ति ।

स चिन्त्यते । न ह्यस्य विद्याधर्मत्वं विद्याभेदकम् । उक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात् । नचानुपसंहारार्थमेवातद्धर्मत्वं बोध्यत इति

भाष्यप्रकाशः ।

सूत्रस्य यच्छाबरभाष्यं तच्छायामनुसरति, तत्र हि कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति, नेतरे, तथैकेऽग्निमधीयाना उपाध्यायस्योदकुम्भमाहरन्ति, नेतरे, तथैकेऽश्वमेधमधीयाना अश्वस्य घासमाहरन्ति, नेतरे इति धर्मभेदात् कर्मभेद आशङ्किते, 'विद्यायां धर्मशास्त्र'मिति सूत्रेण विद्या वेदनमध्ययनमिति यावत्, तस्यायं धर्मः, न तु कर्मणः । तेनान्यधर्मस्यान्यभेदकत्वाभावान्न कर्मभेदकत्वमिति स्थितम्, तेन प्रामाणिकम् । तथापि सोऽर्थः सूत्रकाराशयविरुद्ध इति तं स्फुटीकुर्वन्ति स चिन्त्यत इत्यादि । चिन्त्यत इति । युक्तोऽयुक्तो वेति विचार्यते । हि यतो हेतोः । अस्य शिरोव्रतस्य विद्याधर्मत्वं निवार्य यदध्ययनधर्मत्वं व्यवस्थाप्यते, तद्विद्याभेदकत्वाभावाय । तदस्य विद्याधर्मत्वं तु न विद्याभेदकम्, चोदनाद्यविशेषेण सिद्धे सर्वासां ब्रह्मविद्यानामैक्ये, प्राणाद्युपासनासु रेतःप्रभृतेरिव ब्रह्मविद्यास्वेतस्याधिकस्यानुप्रवेशेपि दोषो न भवतीत्युक्तन्यायेनान्यत्रापि तदुपसंहारस्य वक्तुं शक्यत्वात् । सिद्धे च तस्य तथात्वे विद्याभेदकत्वस्याभावात् । नचानुपसंहारार्थमेवास्य विद्याधर्मत्वाभावो

रश्मिः ।

द्यीति । अयमर्थः । विद्यां प्रति मुण्डकादारम्भान्मुण्डकोक्तब्रह्मविद्यां प्रति शिरस्यङ्गारपात्रधारणरूपं व्रतं कर्तव्यत्वेनोपदिश्यते । यथा गोदानं वेदाध्ययनाङ्गम् । इतरोपनिषदध्ययनकाले तु शिरोव्रतं नापेक्षते । तदाहुः **शिरोव्रतेति** । वेदव्रतापेक्षणात् । **एष धर्म** इति । शिरोव्रतलक्षणः । **समामनन्तीति** । 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवत् यैस्तु चीर्ण'मित्येवम् । **नैतदिति** । ब्रह्म । ब्रह्मविद्यामित्यर्थः । अचीर्णव्रतः अननुष्ठितशिरोव्रतः । **अधीति** । अधिकृतश्चीर्णव्रतः । **अधीत** इत्यध्ययनशब्दः अध्ययनं कुरुत इत्यर्थात् । तस्मात् । **स्वोपेति** । चीर्णव्रतकर्तृकमध्ययनमित्यर्थात् । नीलो घट इत्यत्रेव अन्यैरङ्गीकारादेवकारः । **तस्मादिति** । शिरोव्रतस्य भेदकस्य स्वाध्यायधर्मत्वेन विद्याधर्मत्वाभावात् । **नह्यस्येति**भाष्यं विवृण्वन्ति स्म **तदस्येत्यादि** । **उक्तन्यायेनेत्यादि**भाष्यं विवरीतुमाहुः **चोदनादी**-त्यादि । **सिद्ध** इति । सर्ववेदान्तप्रत्ययसूत्रे सिद्धे । **प्राणादी**ति । 'यो ह वै ज्येष्ठं च'ेति ब्राह्मणेस्ति प्राणाद्युपासना । आदिना वाक्चक्षुःश्रोत्रमनांसि । **रेत** इति । 'यो ह वै प्रजापतिं वेद, प्रजायते प्रजया पशुभी रेतो वै प्रजापतिः प्रजायते प्रजया पशुभिर्य एवं वेदे'ति वाक्चक्षुःश्रोत्रमनोन्तानि निरूप्योच्यत इति रेतःप्रवेशः । प्रभृतिशब्देन पूर्वसूत्रभाष्योक्तं वाजसनेयिनां पञ्चमं प्राणम् । **एतस्येति** । शिरोव्रतस्य । भाष्यं विवृण्वन्ति स्म **उक्तेति** । वाजसनेयिपञ्चमप्राणप्रवेशन्यायेन । **अन्यत्रापि** आथर्वणिकेभ्योऽन्यत्र याजुषादिष्वपि । तस्य शिरोव्रतस्योपसंहारस्य । **तस्य तथात्व** इति । शिरोव्रतस्योपसंहार्यत्वे **अभावादिति** । विलक्षणविशेषणस्य भेदकत्वात्तथा । न चेति भाष्यं विवृण्वन्ति स्म **नचेति** । **एवेति**

वाच्यम्। उपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव दृश्यमानत्वादुपेक्ष्य इव भाति। ननु तदुक्तिर्यथा तथास्तु, अतद्धर्मत्वबोधनस्यानुपसंहारार्थकत्वे कानुपपत्तिरिति चेत्। उच्यते। सूत्रस्य तदुक्तार्थत्वे हि तत्तात्पर्यकल्पना। स एव च न साधीयान्। तथाहि। 'स्वाध्यायोऽध्येतव्य' इत्यादिषु स्वाध्यायशब्दस्य वेदवाचकत्वं प्रसिद्धम्। समाचारशब्दस्य विहितक्रियावाचकत्वं च। तत्रोभयोरपि मुख्योऽर्थो बाध्यते। तस्मिन् सम्भवति तद्बाधस्त्वयुक्तः। किञ्च, एवं 'नन्वग्निष्टोममेवोद्दिश्ये'त्यादिनोक्ताशङ्काया अनिवृत्तिरिति।

भाष्यप्रकाशः।

बोध्यत इति वाच्यम्, भवन्मतेऽधिकरणोपक्रमोपसंहाराभ्यां विद्यैकत्वनिर्णयस्यैव सूत्रकारानुशयगोचरतया दृश्यमानत्वादेतद्विचारस्याकस्मिकत्वापातात्, अतोऽस्य भेदकत्वमापाद्य ततोऽन्यधर्मत्वसाधनेन तदसाधकत्वकथनमनर्थकमिति तद्व्याख्यातः सूत्रार्थ उपेक्ष्य इव प्रतिभातीत्यर्थः। उक्तार्थस्य शाबरभाष्यानुसारित्वेन प्रामाणिकतया तस्योपेक्ष्यत्वमसहमानश्चोदयति नन्वित्यादि। अतद्धर्मत्वोक्तिः कथमप्यस्तु, तथापि तस्य तथात्वे कानुपपत्तिरित्यर्थः। तत्रोपेक्ष्यत्वबीजभूतामनुपपत्तिमुद्घाटयन्ति सूत्रस्येत्यादि। सूत्रस्य तदुक्तार्थत्वे हि शिरोव्रतोपदेशतात्पर्यकल्पना, सूत्रार्थ एव तदुक्तो न युक्तः। तदुपपादयन्ति तथाहीत्यादि। तस्मिन्निति। मुख्यार्थे। ननु सत्यमस्ति मुख्यार्थबाधः, तथापि फलमुखो न दोषायेत्यतो दूषणान्तरमाहुः किञ्चेत्यादि। तथाच तर्हि विद्यैकत्वसाधनायेदं सूत्रमेवं व्याख्यातम्। तथा सति शिरोव्रतस्य प्रकृतोपनिषद्विशेषसंयोगेनासङ्कीर्णतया पूर्वसूत्रोक्तहेतोर्दृढत्वे सम्पन्ने, 'तेषामेवैतां ब्रह्मविद्यां वदेते'त्येतच्छब्दो यथास्यान्यत्रोपसंहारबाधकः, तथा यत्रैतच्छब्दो नास्ति, यथा 'प्रागतिथिभ्योऽश्नीया'दित्यादौ,

रश्मिः।

विद्याभेदविचारस्येत्यर्थः। ननु नाकस्मिकत्वापातः ब्रह्मविद्यानामैक्याय भेदावतरणस्याक्षेप्यसूत्रार्थत्वेन सूत्रकारानुशयगोचरताया इत्याशङ्क्य समाधानमाहुः अत इति। अस्येति। शिरोव्रतस्य। विशेषणविधया भेदकत्वमापाद्य ततोऽन्यस्य स्वाध्यायस्य धर्मत्वसाधनेन तदसाधकत्वं विद्याभेदासाधकत्वकथनं निरर्थकम्। तथाचाक्षेप्यसूत्रार्थत्वेन सूत्रकारानुशयगोचरता तदा स्याद्यदि विशेषणस्य वैलक्षण्येन भेदकत्वं स्यात्, नत्वेवमित्याक्षेप्यसूत्रार्थत्वेन सूत्रकारानुशयगोचरताया अभावात्तन्निषेधनिबन्धनस्तद्व्याख्यातः सूत्रार्थः उपेक्ष्य इव प्रतिभातीत्यर्थः। अतद्धर्मत्वेति। न तस्या विद्याया धर्मत्वोक्तिः। अतद्धर्मत्वोक्तिः शिरोव्रतस्य ज्ञेया। तदुक्तिरितिभाष्यस्यार्थः यथातथाप्रतिपादितोस्तु। तस्यार्थः कथमप्यस्त्विति। तस्य तथात्वे अतद्धर्मत्वबोधनस्यानुपसंहारार्थकत्वे। शिरोव्रतेति। शिरोव्रतस्याक्षेप्यसूत्रार्थत्वेन सूत्रकारानुशयगोचरतोपदेशे व्यासतात्पर्यकल्पना भवति। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यम्। वक्तुरिति वा। स एवेति भाष्यविवरणं सूत्रार्थ एवेति। तथा चातः सूत्रस्य न तदुक्तार्थत्वमिति भावः। फलमुख इति। प्राचीनव्याख्याफलं तदुपायकः। प्रकृतेति। स्वाध्यायपदेन प्रकृता या उपनिषत्। वेदत्वात्। तद्विशेष आथर्वणत्वं तत्संयोगेनेत्यर्थः। सम्यग्योगः संयोगः स्वरूपसम्बन्धस्तेनेत्यर्थः। वेदत्रय्या आथर्वणसङ्कीर्णतया। पूर्वेति। चोदनाद्यविशेषादिति हेतोः। दृढत्व इति। एकत्र चोदनाद्यविशेषे आथर्वणे विशेषे वेदान्तप्रत्यये हेतुत्वेपि सर्ववेदान्तप्रत्ययहेतुत्वमदृढमित्याथर्वणासङ्कीर्णतया हेतुत्वे दृढत्वं तस्मिन्सम्पन्ने। एतच्छब्द इति। सदाचारादिविरोध उपसंहारे बाधक उक्तः, तद्वदेतच्छब्दोपि ब्रह्मविद्याविशेषणं इतरब्रह्मविद्याभेदकः उपसहारबाधकः। उपसंहारे तेषां शिरोव्र-

नन्वाथर्वणोपनिषत्सु पठ्यते, 'स होवाचाब्जयोनिर्योऽवताराणां मध्ये श्रेष्ठोऽवतारः को भविता, येन लोकास्तुष्टा देवास्तुष्टा भवन्ति, यं स्मृत्वा मुक्ता अस्मात् संसाराद्भवन्ति, कथं चास्यावतारस्य ब्रह्मता भवति, स होवाच तं[१] हि नारायणो देव' इत्युपक्रम्य, मथुरास्वरूपं निरूप्य, निगद्यते 'यत्रासौ संस्थितः कृष्णः स्त्रीभिः शक्त्या समाहित' इति, तेनास्यावतारस्याशेषावताराणां मध्ये श्रैष्ठ्यं निरूप्यते, श्रीभागवतेपि च 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वय'मिति गीयते । पूर्वोक्तरीत्या तु सर्वतुल्यता प्रतीयत इति नैकतरनिर्धारः सम्भवति । किञ्च । ब्रह्मणो निरवयवत्वेनैकस्यांशित्वम्, अन्येषां तदंशत्वञ्चेत्यपि वक्तुमशक्यमिति प्राप्ते,

भाष्यप्रकाशः ।

तादृशां धर्माणां त्वन्यत्रोपसंहारस्य प्राप्तावसरत्वाच्छाखान्तरीये कर्मणि विद्यायां च शाखान्तरीयतद्धर्मस्य रूपान्तरे रूपान्तरधर्मस्य च प्राप्तिरित्यस्या आशङ्काया अनिवृत्तिः, तस्मान्मतान्तरीयव्याख्यानमुपेक्ष्यमेवेत्यस्य सूत्रस्योक्तरीत्योपसंहारनियमबोधनेन विध्यैकत्वबाधकनिरासार्थतयैव व्याख्यानमुचितमित्यर्थः ।

एवं मतान्तरं परिहृत्य पूर्वं रूपान्तरे रूपान्तरगुणानुपसंहारे रूपभेदस्य नियामकताया उक्तत्वात् तं रूपभेदं स्फुटीकर्तुं चिन्तान्तरमारभन्ते नन्वाथर्वणेत्यादि । इयं श्रुतिरुत्तरतापनीस्था । तत्र हि दुर्वासाः स्वस्य भगवज्ज्ञानं वक्तुं ब्रह्मनारायणसंवादमुपचिक्षेप । तत्र नाभिकमलाज्जातोऽब्जयोनिर्ब्रह्मा एवं प्रश्नमुक्तवान् । अत्र यत्तदोर्नित्यसम्बन्धात् 'स को भविते'ति तच्छब्दोऽध्याह्रियते । तत्र श्रैष्ठ्याभिज्ञापकं वाक्यं 'येने'त्यादि, 'ब्रह्मता भवती'त्यन्तम् । तथाच लोकानां देवानां तोषजनकः स्मरणेन मुक्तिदाता यः स एव श्रेष्ठः । तस्य ब्रह्मता च केन प्रकारेणेति प्रश्नद्वयं सिध्यति । 'तं होवाचे'त्यादिना नारायणेनोत्तरमुच्यते । तत्र मथुरास्वरूपनिरूपणं भूम्यामवतारज्ञापनार्थम् । 'कथं च ब्रह्मते'त्यस्योत्तरं 'यत्रासौ संस्थित'इत्यादिभिः शक्तिसहितचतुर्व्यूहरूपेणेति सिध्यति । तेनैवमस्य श्रीकृष्णावतारस्य पूर्वोक्तं श्रैष्ठ्यं निरूप्यत इति सिध्यति । श्रीभागवते तु पुरुषांशावतारमध्ये 'रामकृष्णाविति भुवो भगवानहरद्भर'मिति भूभारहारकयो रामकृष्णयोः पुरुषांशावतारत्वमुक्त्वा, 'एते चांशकलाः पुंस' इत्यनेन सर्वसाम्यं चोक्त्वा, 'कृष्णस्तु भगवान् स्वय'मिति केवलस्य कृष्णस्य परब्रह्मत्वमुच्यते । 'यदेकमव्यक्तमनन्तरूप'मिति श्रुत्युक्तप्रकारिकया पूर्वोक्तरीत्या तु तथा प्रतीयत इत्येकः सन्देहः । किञ्चेत्या-

रश्मिः ।

तित्वे एतच्छब्दवाच्येतरविद्याबाधापत्त्यास्येति शिरोव्रतस्यान्यत्राथर्वणिकादन्यत्र याजुषादौ उपसंहारस्य बाधकः । संनियोगशिष्टन्यायं प्रापयित्वेत्यर्थः । एतच्छब्द इति । संनियोगशिष्टन्यायप्रापकः । उक्तरीत्येति । भाष्योक्तरीत्या । मतान्तरमिति । शङ्करभास्कररामानुजाचार्याद्युक्तं मतान्तरम् । उक्तत्वादिति । 'भेदान्नेति चेन्ने'ति सूत्रे भाष्ये चोक्तत्वात् । भाष्ये । उक्तशङ्काया[२] इति । सदाचारादिविरोधेनोपसहाराभावे कर्मभेदशङ्कायाः । प्रकृते । शेषमिति । नैकतरेति । उक्तब्रह्मतासर्वतुल्यतयोरेकतरनिर्धारः ।

१. इयमित्यारभ्य प्राप्तमित्यन्त इत्यत्र श्रीहस्ताक्षरेषु पाठोयम्–ब्रह्मतेति, मूलरूपता । तापनीयश्रुत्युपबृंहणाय निःसदिग्ध श्रीभागवतवाक्यमुदाहृतम् । पूर्वोक्तरीत्येति । 'यदेकमव्यक्तमनन्तरूप'मिति श्रुत्युक्तप्रकारेण । शेषं विशदव्याख्यातम्–इति । २. प्रकाशे आशङ्का, रश्मौ शङ्केति भाष्यपाठ ।

अभिधीयते । 'सत्त्वं यस्य प्रिया मूर्तिः' 'विशुद्धसत्त्वं तव धाम शान्त'मित्यादिवाक्यैरप्राकृतो भगवत्स्थानभूतः सत्त्वनामा भगवद्धर्मरूप एव कश्चनास्ति । यादृशेन रूपेण भगवान् कार्यं कर्तुमिच्छति, तादृग्रूपं तं प्रकटीकृत्य तस्मिन्

भाष्यप्रकाशः ।

दिनोक्तस्तु द्वितीयः । एवं प्राप्तम् । तथाच तापनीयानन्तरूपश्रुत्योरितरेतरविरोधान्निरवयवत्वबोधकनिष्कलश्रुतिविरोधाच्च श्रैष्ठ्यादिनिर्धारासम्भवे धर्माणां मायिकत्वस्यैव शरणीकरणीयत्वात् स्वरूपपराणां अवतारान्तरे अवतारान्तरधर्मोपसंहारानुपसंहारचिन्ताया अनुपयोगात् पूर्वोक्ताशङ्काया अनिवृत्तावप्यदोष इति मतान्तरीयव्याख्यानं साध्वेवेति पूर्वपक्षाशयः ।

तत्र समादधते **अभिधीयत** इत्यादि । अत्र 'सत्त्वं यस्ये'त्यादिवाक्यद्वये यथायथं 'प्रिये'ति 'विशुद्धे'ति विशेषणाभ्यां विवक्षितस्य सत्त्वस्य प्राकृतात् सत्त्वात् व्यावृत्तिः क्रियते, 'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षक'मिति, 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुये'ति वाक्याभ्यां तस्या गुणानामप्रियत्वस्याविशुद्धत्वस्य बोधनात् । नच प्राकृतगुणातिरिक्तसत्त्वस्याप्रसिद्धत्वं शङ्क्यम् । 'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रय' इति द्वितीयस्कन्धे प्राकृतव्यतिरिक्तानां गुणानां सिद्धत्वात् । 'यथा कार्पासे न हि सूत्रम्, तदेव पुनः पौर्वापर्यमापद्यमानं सूत्रतामापद्यते, तथा भगवान्निर्गुणस्ते पुनर्गुणा' इति तत्र विवरणात् । स च द्रव्यरूपः । अन्यथा तस्य मूर्तित्वधामत्वयोरनुपपत्तेः ।

रामानुजास्तु । शुद्धसत्त्वं नाम रजस्तमोमिश्रप्राकृतसत्त्वविलक्षणसत्त्वगुणाश्रयो द्रव्यविशेष इत्यङ्गीकृत्य, 'स्वसत्ताभासकं द्रव्यं त्रिगुणात्तद्विलक्षण'मिति वाक्यं च तस्मिन् प्रमाणत्वेनाहुः । तस्यातिरिक्तत्वमेव, न त्वेतद्रूपत्वम् ।

एवमेतस्योपाधित्वं साधयित्वा तेनांशान् साधयन्ति **यादृशेनेत्यादि** । **स स** इति । अव-

रश्मिः ।

एवं शेषं निगदव्याख्यातम् । संशयस्य पूर्वपक्षोक्त्या बोधात्पूर्वपक्षमाहुः **तथाचेत्यादिना** । **इतरेतरेति** । तापिनीये ब्रह्मता अनन्तरूपश्रुतौ सर्वतुल्यतेति तथा । अवतारे कोटिद्वयमुक्त्वावतारिण्यनन्तरूपश्रुतिकोट्या द्वितीयकोटिमाहुः **निरवयवत्वेति** । **श्रैष्ठ्यादीति** । श्रैष्ठ्यं ब्रह्मता आदिना सर्वतुल्यता तयोरेकतरस्य निर्धारासम्भवे । तथाचावतारस्य ब्रह्मता वा सर्वतुल्यता वेति सन्देहः, अवतारिणोऽनन्तरूपता वा निष्कलता निष्क्रियता वेति सन्देहः । इति पूर्वपक्षे सन्देहबोधः । **स्वरूपेति** । अवतारिपराणाम् । **पूर्वोक्तेति** । 'नन्वग्निष्टोममेवोद्दिश्ये'त्यादिना 'भेदान्नेतिचे'दिति सूत्रोक्तशङ्काया अवतारिपरायाः अवतारविषयेऽनिवृत्तावपि । **अप्रियत्वस्येति** । 'मां भजन्ति गुणा' इत्यत्र प्रियत्वार्थं भजनात् । 'विलज्जमानये'त्यत्र अविशुद्धत्वात्कापट्यात् विलज्जेति तथा । **ते पुनर्गुणा** इति । निषेधयोग्याः प्रतियोगिन इत्यर्थः । गुणप्राप्तिर्गुणनिषेधश्च पूर्वापरव्यवस्था । **तत्रेति** । द्वितीयसुबोधिन्याम् । **स चेति** । सत्त्वगुणः । **अन्यथेति** । नैयायिकगुणत्वे । मूर्तित्व परिच्छिन्नपरिमाणवत्त्वम्, तस्यानुपपत्तिः, गुणे गुणानङ्गीकारात् । धामत्वमयोगोलकवत् । **स्वसत्तेति** । आत्मसत्ता जातिः, सत्त्वं न गुणः, तां भासयति तत्स्वसत्ताभासकम् । गुणकर्मान्यद्रव्यम् । विलक्षणं शुद्धत्वेन । ननु गुणविलक्षणत्वं गुणसलक्षणत्वप्राप्तौ भवति, गुणसलक्षणाभावत्वात् गुणविलक्षणत्वस्य, अतो न जातिः सत्त्वमितिचेत् । न । चतुर्थगुणकल्पने गौरवात् सतो भावः सत्त्वं सत्ता चेत्येकार्थात् । **तस्मिन्निति** । शुद्ध-

स्वयमाविर्भूयायःपिण्डे वह्निवत्तत्कार्याणि करोति, यस्मिन् यस्मिन्नवतारे, स सोंऽश इत्युच्यते । तत्र हि विग्रहस्तत्राविर्भूतं ब्रह्मस्वरूपं च प्रतीयते । विग्रहस्य सत्त्वात्मकत्वेन धर्मरूपत्वात् तत्राविर्भूतस्यैव ब्रह्मत्वात् समुदितस्यावतारत्वेन गणनात् तत्रैकस्यैवांशस्य तद्रूपत्वं यत् तदेवांशत्वम् । यत्राधिष्ठानमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्माविर्भवति भक्तार्थम्, स स्वयं पूर्णो भगवान् उच्यते । एतदेव च श्रैष्ठ्यम् । अत एव सर्वतः पाणिपादान्तत्वं स्वस्मिन् स्फुटं ज्ञापयितुं

तारः। नन्वयःपिण्ड आविर्भूतस्य वह्नेर्वह्नित्वमेवोच्यते, न त्वंशत्वम्, अतः कथमेवमित्याशङ्कायामाहुः तत्र हीत्यादि । एकस्यैवांशस्य तद्रूपत्वमिति । आविष्टस्यांशस्य ब्रह्मरूपत्वम् । तथाच विरुद्धधर्माश्रये ब्रह्मण्याकारानाकारत्वयोरुभयोः सत्त्वाद्यत्रानाकारेण तेजोरूपेण प्रविशति, सोंऽशावतारः । इदमेव निबन्धे प्रथमस्कन्धतृतीयाध्यायार्थविचारेपि 'सत्त्वात्मके शरीरे अलौकिकतेजसः सर्वदा संक्रमोऽवतारः, कार्यकाले संक्रम आवेश' इति तद्भेदकथनमुखेन बोधितम् । अतः परं श्रैष्ठ्यबोधनाय मूलस्वरूपं विवृण्वन्ति यत्राधिष्ठानेत्यादि । अधिष्ठानं सत्त्वाद्यात्मकं शरीरमनपेक्ष्य स्वयमेव शुद्धं साकारं ब्रह्म आविर्भवतीत्यादिप्रकारेण पूर्णो भगवानुच्यते । एतदेव पूर्णभगवत्त्वमेव श्रैष्ठ्यम् । तापनीयवाक्येषु रामादीनां त्रयाणां प्रणवमात्रात्रयप्रतिपाद्यत्वमुक्त्वा, तेन सत्त्वरजस्तमोधिष्ठानत्वं प्रतिपाद्य, अग्रे अहंग्रहोपासनायां 'ॐतत्सत् सोऽहं परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूप' इत्यादिना निरधिष्ठानस्य केवलनित्यानन्दैकस्वरूपस्य कृष्णात्मकस्यैव श्रावणादेतदेव श्रैष्ठ्यमित्यर्थः । यद्यप्येतादृशत्वं रामनृसिंहतापिन्योस्तत्तत्स्वरूपे उच्यते, कल्पभेदेन च तथा सिध्यति, तथाप्युरुक्रमावतारे देवमात्रकार्यार्थतायाः स्फुटत्वात् तेनावतारेण बलेरेव मुक्तेः स्फुटत्वाच्च स्वल्पं मोक्षदातृत्वम्, श्रीनृसिंहस्वरूपे तु 'यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृत'मिति कम्पनाधिकरणविषयवाक्योक्तन्यायेन मुक्तिदातृत्वं नृसिंहराजमन्त्रे स्फुटति, न तु सौम्यरूपतया सुगमोपायेन वा । श्रीरामस्वरूपे तु बहूनां स्वल्पसाधनेनैव मोक्षदातृत्वेपि सौम्यरूपत्वेपि भूयान् मर्यादानुरोधः । पुष्टिकार्यं तु स्वल्पम् । श्रीकृष्णावतारे तु 'गोप्यः कामात् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहात् यूयं भक्त्या वयं विभो' इत्यादिवाक्याद्बहुभिः प्रकारैर्मोक्षदत्वम् । तेन मर्यादाननुरोधश्चेत्याद्यनुसंधाय

रश्मिः ।

सत्त्वस्य द्रव्यत्वे । आहुरित्यस्वरसस्तु ह्याश्चर्यरसाभावेपि बुद्ध्यारोहाज्ज्ञेयः । सिद्धमाहुः तस्येति । शुद्धसत्त्वस्य । प्राकृतगुणातिरिक्तत्वमेव, न तु प्राकृतगुणरूपत्वम् । एतस्येति । द्रव्यस्य । तेनेति । द्रव्यत्वेन । उच्यत इति । लोकदृष्ट्योच्यते । कथमेवमिति । केन प्रकारेण दृष्टान्तत्वम् । आहुरिति । शास्त्रदृष्ट्या समाधानमाहुरित्यर्थः । तत्र हीत्यादीति । तत्र शास्त्रदृष्ट्या सूर्याग्नी दृष्टान्ते । दार्ष्टान्तिके भगवति । सर्वदेति । यथा वराहादौ । आवेश इति । यथा बलभद्रे । 'हलधर ईषदत्रस'दिति त्रासबोधनात् । यत्राधिष्ठानेत्यादीति । स्वयमेवेत्यादि । मायाजवनिकां दूरीकृत्य साकारमानन्दमयवैश्वानराधिकरणयोरुक्तम् । श्रीमद्भागवते मतेऽधोक्षजत्वेपि साकारत्वं साकारकार्यानुरोधात् । कारणगुणाः

---

१. अधिष्ठानमित्यारभ्य अत एवेत्यन्तमित्यत्र श्रीहस्ताक्षरेषु एवमाविर्भूतत्वे साकारब्रह्मत्वे गमकमाहु अत एवेत्यादि ।

तोकादिभावेनाविर्बभूव । तेन यादृग्यादृग्लीलाविशिष्टं यद्यद्बाल्यपौगण्डाद्यवस्थाविशिष्टं तत्तद्रूपं नित्यमेवेति वयं जानीमः । नचैवं सच्चिदानन्दविग्रहोक्तिः सर्वत्र विरुद्धा भवेदिति वाच्यम् । सत्त्वस्यापि भगवद्धर्मत्वेन सच्चिदानन्दरूपत्वादविरोधात् । मत्र्याद्यधिष्ठातृरूपाणि तु विभूतिरूपाणि । एतच्च यथा तथा भक्तिहंसे प्रपञ्चितम्। तत्त्वं च 'प्रकाशाश्रयवद्वा तेजस्त्वा'दितिन्यायेन भगवद्धर्माणामपि सच्चिदानन्दरूपत्वाद्धीनाधिकारिणामप्युपासकानां फलप्रेप्सूनां तत्तत्फलदानार्थमैश्वर्यादिरूपेण तत्र तत्र स्थितत्वमेव ।

भाष्यप्रकाशः ।

विशेषान्तरमाहुः अत एवेत्यादि । एवमाविर्भूतशुद्धसाकारब्रह्मत्वादेव एवंरूपत्वं स्वस्मिन् स्फुटं ज्ञापयितुं वत्साहरणे रासे एकमौहूर्तिकनानास्त्रीविवाहे नारदपरीक्षायां यथायथं तोकप्रौढराजभावेन बहुधा प्रकटो जातः । यदि हि तथा न स्यात्, अवतारान्तर इवात्राप्येवं न ज्ञापयेत्, नाप्येवं प्रकटो भवेत्, अतस्तथा प्राकट्यमेव मूलरूपत्वमहामाहात्म्यादिगमकमित्यर्थः। **तेन सिद्धमाहुः तेन यादृगित्यादि । तेनेति ।** तोकादिभावेपि जृम्भाव्यादानदामोदरलीलासु सर्वात्मकत्वव्यापकत्वविरुद्धधर्माश्रयत्वप्रदर्शनेन । तथाचैवं निरवयवत्वेऽप्युपाधौ प्रवेशतो वह्न्ययोगोलकघटाकाशादिवदंशांशिभावाविरोधान्न प्रमाणयोर्विरोधः, न वा कृष्णावतारश्रैष्ठ्यविरोध इत्यर्थः । **पुनः किञ्चिदाशङ्क्य परिहरन्ति नचैवमित्यादि । एवमिति ।** सत्त्वस्याधिष्ठानत्वे । **सर्वत्रेति ।** कल्पान्तरीयेष्ववतारेषु। एवं मूलरूपव्यवस्थामुक्त्वा विभूतिरूपव्यवस्थामाहुः **मत्र्येत्यादि। भक्तिहंसे प्रपञ्चितमिति ।** तद्यथा तथा भक्तिहंसविवरणे तदाशयो मया स्फुटीकृत इति ताभ्यामवगन्तव्यम् । विभूतिरूपस्वरूपमाहुः **तत्त्वमित्यादि । तत्र तत्रेति ।** उद्गीथादिरूपेषु ।

रश्मिः ।

कार्यगुणानारभन्त इति । **एवं रूपत्वमिति ।** आश्चर्यवत् सार्वविभक्तिकतसिलन्तसर्वतः पाणिपादान्तरूपत्वम् । व्यवस्थितावयवत्वबोधकतोकादिभावेनेति भाष्यविवरणम् । **वत्साहरण इत्यादि ।** प्रक्षिप्तत्वेपि 'ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च । उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषाम्बरम् । यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभा'विति विषयस्य स्पष्टत्वात्तदर्थ उक्तः, कृष्णक्रीडात्वाच्च । यावत्तावत्परिमाणे वत्साहरणे । रासे 'कृत्वा तावन्तमात्मान'मिति । एकेत्यादिरुत्तरार्धे । **बहुधेति ।** तावतीं मायां दूरीकृत्य । **तथेति ।** बहुधा । **अत्राप्येवमिति ।** कृष्णावतारेप्येवमुक्तप्रकारेण स्वस्मिन्सर्वतः पाणिपादान्तत्व न ज्ञापयेदित्यर्थः । **प्रमाणयोरिति ।** 'यदेकमव्यक्तमनन्तरूप'मित्यस्य 'निष्कलं निष्क्रियं शान्त'मित्यस्य च विरोधः । **तेन यादृगित्यादीति ।** तेनेत्यस्यार्थ उक्तः । **आविरिति ।** 'अचलत्वं चापेक्ष्ये'ति सूत्राद्भक्तमनोरथेनाविर्बभूव । **तेनेति ।** भक्तार्थं लीलाविर्भावनेन । **नित्यमेवेति ।** नित्यानित्यसयोगापत्तेरेवकारः । **वयमिति ।** 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति वाक्यात् । **भाष्ये । सच्चिदानन्दरूपत्वादिति ।** 'प्रकाशाश्रयवद्वे'ति सूत्रेण तथा । **प्रकृते । तत्त्वमित्यादीति ।** तत्त्वं विभूतित्वम् । **उद्गीथादीति।** छान्दोग्ये सन्ति। आदिना 'पृथिवी रसः आपो रसः ओषधयो रसः पुरुषो रसः वाग्रसः ऋग्रसः साम रसः उद्गीथो रसः। उद्गीथस्यादय उद्गीथादयः पृथिवीरसादयः । तेषु

नन्वेकस्यैव शुद्धस्यैवानन्तरूपत्वं भवतैवोक्तम्, अतो मत्स्यादिरूपेष्वपि नाधिष्ठानत्वेन सत्त्वं वक्तुं शक्यम्, किञ्च, एवं निराकारस्वभावत्वं ब्रह्मणः सिध्यतीति सत्त्वाव्यवहितप्राकट्योक्तिरप्यनुपपन्नेति चेत् । मैवम् । सत्त्वाधिष्ठानत्वस्य प्रमाणसिद्धत्वेनानपनोद्यत्वात् । तच्चोक्तं 'यदेकमव्यक्तमनन्तरूप'मित्यादि । प्राकट्यं हि भक्तिनिमित्तिकम् । सा तु बहुविधेति तदनुरूपं प्राकट्यमपि तथा ।

भाष्यप्रकाशः ।

एवं रूपत्रयविभागस्याप्रयोजकत्वं मन्वानश्चोदयति नन्वित्यादि । एवमिति । सत्त्वस्याधिष्ठानत्वेनाकारसमर्पकत्वे । तथाच न्यायसिद्धत्वाद्विभूतिरूपं तथास्तु । मूलावताररूपे तु न तथा । वदतो व्याघातादित्यर्थः । तत्र समादधते मैवमित्यादि । तच्चेति । स्वतोऽनन्तरूपत्वे प्रमाणं च । आदिपदेन 'क्षयन्तमस्य रजसः पराके' इत्यादीनां सङ्ग्रहः । तथाच 'यदेक'मित्यादिश्रुतिषु 'तमसः परस्ता'दित्यादिब्रह्मविशेषणाद्ब्रह्मसम्बन्धिरूपादौ प्रकृतिसंसर्गराहित्यसिद्ध्या 'आनन्दरूपममृतं यद्विभाति' 'आनन्दामृतरूपं प्रणवं षोडशान्ते' इत्यादिभिः सच्चिदानन्दरूपताया ब्रह्मणः स्वतोऽनन्तरूपतायाश्च प्रमाणसिद्धत्वात् प्रकारत्रयमपि प्रमाणसिद्धमिति न व्याघात इत्यर्थः । ननु भवतु त्रयाणां प्रामाणिकत्वम्, तथापि कुत्र कथं प्रकटीभवतीति न ज्ञातुं शक्यते इति विशेषानवधारणात् वृथैवायं विचार इत्याशङ्कायां तदवधारणहेतुबोधनेन तां निवारयन्ति प्राकट्यं हीत्यादि । प्राकट्यमपि तथेति । 'ये यथा मां प्रपद्यन्ते' इति भगवद्वाक्यात्तथा । तथाचैवं भक्तिभेदा-

रश्मिः ।

रूपेषु । अष्टमस्य समष्टित्वात् । रसः सारः । गन्ध(पुष्प)चन्द्रपुष्पसोमवल्लीषु पुरुषत्वाग्निवायुविष्णुरूपः । गन्धः पृथिव्या. स्पष्टः । 'अपां पुष्पं वदे' त्यारणश्रुतेश्चन्द्रः । ओषधिरसः द्वौ स्पष्टौ । 'पुष्पमूर्ध्वमेव गृह्णन्ती'ति श्रुतेश्च । सोमवल्ली यज्ञाङ्गम् । पुरुषस्य पुरुषत्वमाकाशः । 'आकाशो ह वै नाम नामरूपयोर्निर्वहिते'ति श्रुतेः । वाचोग्निः ऋग्रूपः । ऋचामग्निप्रतिपादकत्वात् । 'अग्निर्वाग्भूत्वा मुखं प्राविश'दिति श्रुतेः । ऋचो वायुः सामरूपः । 'वायुः शब्दतामापद्यत' इति प्राचां प्रवादात् । साम्नो विष्णुरुद्गीथः । पूजाप्रतिपादकत्वात्साम्नः विष्णोश्चाधोक्षजसेवायाः स्वगुणद्वारा ज्ञापकत्वात् कार्यैक्यम् । एवं रूपत्रयेति । अवतारिणं विनावतारपूर्णविभूतिरूपत्रयविभागस्य । नन्वित्यादीति । एकस्यैवेति । द्वितीययोगव्यवच्छेदकः । शुद्धस्यैवेति । शुद्धसत्त्वयोगव्यवच्छेदकः । भवतैवेति । अस्मिन्नेव सूत्रे भवता सिद्धान्तिनैव । क्षयन्तमिति । अत्र विद्यैक्यार्थं वेद्यैक्योपदेशः । अस्य जगतः रजसः ब्रह्मकार्यस्य स्वल्पभेददर्शनं क्षयन्तं यो वेद सोऽमृतो भवति । क्वेति चेन्न । पराके खड्गे भेदद्रष्टुर्भयजनके सति । आदिना 'महद्भयं वज्रमुद्यन्तं य एतद्विदुरमृतास्ते भवन्ती'ति काठके । 'यस्त्वेवमेतं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त' इति विद्यैक्यमुक्तमत्र । 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवती'ति तैत्तिरीयकभेददर्शननिन्दायै परामर्शो दृश्यतेत्र । 'तत्त्वेव भयं विदुषोऽमन्वानस्ये'ति श्रुतेरन्यत्राप्यभेदममन्वानस्य भय संसाराभिनिवेशलक्षणं भवतीति । ब्रह्मसम्बन्धीत्यादि । आदिना मूलरूपम् । आनन्दरूपमिति । कृष्णावतारः । प्रणवम् । गायत्र्यर्थकारिकाभिर्विवृतम् । षोडशान्त इति । लिङ्गशरीरान्तः, आदिनानन्दमयस्य । 'को ह्येवान्या'दित्यादिश्रुतिः । स्वत इति । मूलरूपात् अनन्तावतारादयः, चकाराद्विभूतिरूपाणि अन्नमयादीनि । प्रमाणेति । प्रमाणपदेन 'यदेकमव्यक्तमनन्तरूप'मिति श्रुतिरपि । कुत्र कथमिति । त्रिषु पूर्णावताराविभूतिषु कुत्र सत्त्वाद्युपाधौ कथं केन प्रकारेण । प्रकारविशेषानवधारणात् । तदवेति । प्रकारावधारणहेतुभूतभक्तिबोधनेन तां शङ्काम् । प्राकट्यं हीत्यादीति ।

सर्गादिकार्येष्वधिकृतानां भक्तानामितरासक्तिरप्यस्तीत्युपाध्यन्तरितस्नेहवत्त्वा-च्चानन्तरूपत्वेन मत्स्यादिरूपोपि तदर्थं तद्व्यवहित एव प्रकटीभवति । ये तु भगवत्स्वरूपमात्रासक्ताः, तदर्थं स्वयमेवातद्व्यवधानेन प्रादुर्भवति । एतेनैव निराकारत्वशङ्कापि निरस्ता । एतेन सोपधिस्नेहवदर्थमेव मत्स्यादिरूपप्राकट्यस्य प्रमाणसिद्धत्वान्निरुपधितद्वदर्थमेव श्रीव्रजनाथप्राकट्यस्यापि तथात्वात् सोपाधि-स्नेहवत्स्वपि पुरुषार्थदानस्यानुषङ्गिकत्वात् 'पुरुषविध' इति श्रुतेश्चैतदेव रूपं 'रसो वै

भाष्यप्रकाशः ।

द्रूपभेदोपि सुखेनावधारयितुं शक्य इत्यर्थः । तर्हि भक्तिभेदस्य कथमवधारणमित्यत आहुः सर्गेत्यादि प्रादुर्भवतीत्यन्तेन ।

एवं प्राकट्यप्रकारव्यवस्थापनेन निराकारत्वशङ्काया अपि निवृत्तिमाहुः एतेनैवेत्यादि । भगवति प्रपञ्चवैलक्षण्यस्य पूर्वपादान्त एव प्रतिपादिततया लौकिकाकारराहित्यमेव तत्र निरा-करता, न तु यावदाकारराहित्यम् । उपाधिव्यवधानं तु शुद्धदर्शनयोग्यताभावेन हेतुभेदात्, अतः प्राकट्यप्रकारव्यवस्थापनेनैव यावदाकारशून्यत्वशङ्काप्यपास्तेत्यर्थः । एवं रूपविभागं रूपाणां स्वरूपं च विशदीकृत्य भगवति श्रीकृष्णरूपे यच्छ्रैष्ठ्यम्, अन्यत्र यत् तद्राहित्यम्, तदुभयं व्यक्तीकुर्वन्ति एतेन सोपधीत्यादि । एतेनेत्यस्याध्यवसीयत इत्यनेन सम्बन्धः । तथात्वादिति । गोपालतापनीयबृहद्वामनीयसन्दर्भे 'ता नाविद'न्नित्यादिप्रमाणसिद्धत्वात् । सोपाधिस्नेहवत्सु मथुराद्वार(का)वतीप्रभृतिस्थेष्वपि तत्तत्पुरुषार्थदानस्य तत्तद्व्यूहेन कृततया आनुष-ङ्गिकत्वात् । आनन्दमयनिरूपणे 'स वा एष पुरुषविध एवे'ति पुरुषविधश्रुतेश्च । एतदेवानन्दमयं

रश्मिः ।

'भक्त्या जानाति चाव्यय'मिति श्रुत्यां भक्तेः करणत्वं ज्ञाने ज्ञानं प्राकट्ये सति भवतीति भक्तः भक्त्या भगवतः प्राकट्यं कुर्वन् ज्ञानविषयं करोतीत्यर्थः । परेषां ज्ञानाश्रयो भक्तः । एवं प्राकट्यं भक्तिनिमि-त्तकम् । **बहुविधेति** । भक्तिजन्या 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिः प्रसाध्यते' इति तत्तत्कारणजन्या बहुविधेति तदनुरूपं भक्त्यनुरूपं स्वस्वकारणजभक्तियोग्यम् । **सर्गादीति** । **भक्तानामिति** । ब्रह्मा-दीनाम् । **इतरेति** । सर्गादिकारणासक्तिः । **इति** हेतौ । हेत्वन्तरं **उपाधीति** । सत्त्वान्तरेत्यर्थः । **एवेति** । 'सत्त्वमस्य प्रिया मूर्ति'रिति वाक्यादेवकारः । आधिभौतिकभक्त्या सत्त्वोपाधौ प्राकट्यप्रका-रमुक्त्वाध्यात्मिकभक्त्या निरावरण आकाशे प्राकट्यप्रकारमाहुः **ये त्विति** । आसक्तिराध्यात्मिकी भक्तिः । **स्वयमेवेति** । 'कृष्णो वै परमं दैवत'मिति श्रुतेरेवकारः । अतद्व्यवधानेन किन्तु आकाशव्यवधानेन । **तत्रेति** । अधोक्षजे । **हेतुभेदादिति** । भक्तिरूपहेतोः सोपाधिनिरुपाधिरूपभेदात् । **यावदिति** । सोपाधिके औपाधिकत्वेपि निरुपाधिके उपाध्यभावात्तथा । **अन्यत्रेति** । मत्स्यादिषु । **गोपालेति** । 'तदुहोवाच ब्राह्मणोसावनारतं मेध्यातः स्तुतः परार्धान्ते सोऽबुध्यत गोपवेषो मे पुरुषस्तदाविर्बभूवे'ति । **बृहदिति** । 'चिरं स्तुत्वा ततस्तुष्टः परोक्षं प्राह तान् गिरे'ति । **ता नाविदन्निति** । अत्र वाक्ये 'मय्यनुषङ्गबद्धधिय' इत्यनेनात्मना भक्तवश्यत्वेनाविर्भूते मय्यनुषङ्गबद्धधिय इत्यर्थान्निरुपधितद्वदर्थत्वम् । सोपाधीति भाष्यं विवृण्वन्ति स्म **सोपाधीत्यादिना** । त्रयस्त्रिंशाध्याये 'पुत्रं त्वौपाधिकस्नेहवति वसुदेवे मथुरास्थे तस्य कंसेनाधर्षितत्वस्य पुरुषार्थस्य दानं तस्य तेन प्रद्युम्नव्यूहेन कृतता यथा तया । सम्बधो-

१. तद्व्यवधानेनेति पाठः । २. निरुपधितत्तदर्थमिति पाठः ।

स' इत्यादिश्रुतिप्रतिपाद्यं निरुपधिस्नेहवतां विषयः । इदमेव च श्रैष्ठ्यम् । मत्स्यादिरूपं तु सोपाधिनद्भुतामेव तथा । तादृक्तद्भूतमर्थ एव प्राकट्यादित्यध्यवसीयते । एवं सति गुणभेदस्याप्रयोजकत्वात् सर्ववेदान्तप्रत्ययत्वं ब्रह्मणो निष्प्रत्यूहम् ॥३॥

भाष्यप्रकाशः ।

रूपं 'रसो वै स'इत्याद्यानन्दश्लोकविवरणश्रुत्या प्रतिपाद्यं निरुपधिस्नेहवतां व्रजस्थानां विषयः । इदमेव अधिष्ठानाव्यवहितकेवलानन्दमयतया मुख्याधिकारिप्रमाविषयत्वमेव तस्मिन्नवतारे श्रैष्ठ्यम्, परमं निष्कृष्टम् । मत्स्यादिरूपं तु सोपधिस्नेहवतामेव विषयः । सोपधिस्नेहवतां कार्यायैव प्राकट्यात् । अतो न तेषु पूर्वोक्तरूपं श्रैष्ठ्यमित्येतत् सर्वं तत्तद्रूपभेदतत्तत्प्राकट्यहेतुभेदबोधकप्रमाणगणेनावधार्यते । अतो न कोपि शङ्कालेशः । तथाच यदि यावद्विशेषशून्यं ब्रह्म स्यात्, तदा तथा स्यादपि । तत्तु प्रागेव निरस्तम् । तथा सति विरुद्धधर्माधारस्यैवैवं स्वरूपनिर्धारसिद्धौ धर्माणाममायिकत्वेन वास्तवत्वात् तदुपसंहारादिचिन्ताया अप्यावश्यकत्वादुक्ताशङ्का निवर्तनीयैवेत्यतो मतान्तरीयमेतत्सूत्रव्याख्यानमुपेक्ष्यमेवेत्यर्थः । सिद्धमाहुः **एवं सती**त्यादि । पूर्वोक्तरीत्या तत्तद्धेतुकस्य गुणानुपसंहारस्य रूपभेदस्य चाबाधकत्वेऽनेकरूपतायामपि स्वरूपैक्ये निर्बाधे सति तत्तद्रूपगुणभेदस्य वेद्यभेदाप्रयोजकत्वात् ब्रह्मणः सर्ववेदान्तप्रत्ययत्वं निष्प्रत्यूहम् । मायावादिमते तु धर्माणामौपाधिकत्वादुपाधीनां च भिन्नत्वादुपास्यरूपाणां चाब्रह्मरूपत्वान्न विध्यैक्यं स्वारस्येन प्रयोजयति, अत्र तु ब्रह्मणः सर्वरूपत्वात् स्वारस्येन, अतोपि तथेत्यर्थः ॥ ३ ॥

रश्मिः ।

पधिकस्नेहवत्सु द्वारवतीस्थेषु ज्ञातिबन्धुषु तत्रापि सुधर्मा देवसभा तत्स्थेषु तस्य मर्त्यधर्मायोगस्य पुरुषार्थस्य दानं तस्य तेन प्रद्युम्नव्यूहेन कृततया । प्रभृतिशब्देन सुदाम्यवन्तीस्थे मैत्र्योपाधिकं स्नेहवति तस्य धैर्यस्य पुरुषार्थस्य दानं तस्य तेन प्रद्युम्नव्यूहेन कृततया । **पुरुषविध** इति भाष्यं विवृण्वन्तिस्म **आनन्दमये**ति । तैत्तिरीये । **रस** इति । रस आस्वादने । इदमेवेति भाष्यं विवृण्वन्ति स्म **इदमेवे**ति । मत्स्यादीति भाष्यं विवृण्वन्ति स्म **मत्स्यादी**ति । एवेति । स्वयंत्वाभावान्मुख्यभक्त्यविषयत्वमित्येवकारः । **सोपधी**ति । श्राद्धदेवमनुरासुरहिरण्यगर्भप्रभृतीनां मनुत्वार्पणस्वार्थसृज्योपादानज्ञानोपाधिकस्नेहवताम् । मत्स्यकच्छपस्नेहोऽष्टमस्कन्धे, वराहस्नेहस्तृतीयस्कन्धे । एवकारव्यवच्छेद्या निरुपधिस्नेहवन्तः । तथेति भाष्यार्थमाहुः **सोपाधिस्नेहवतां कार्याये**ति । एवकारार्थः पूर्ववत् । **एत**दिति । कृष्णावतारविभूतिरूपं द्विविधभक्तिरूपं च । प्राकट्यहेतुर्भक्तिः । भेदबोधकत्वं संज्ञाशब्दार्थबोधकत्वेन । संज्ञाया भेदकत्वं पूर्वतन्त्रसिद्धम् । भक्तिभेदो विशेषणात् । सन्दर्भसिद्धनिरुपधिसोपधिविशेषणे । उपासनाभेदः संज्ञाभेदात् । **कोपी**ति । दुरूहत्वेन साङ्कर्यरूपः । **तदा तथे**ति । यावद्विशेष्यशून्यत्वकाले तथा निराकारत्वं स्यात् । **प्रागेवे**ति । गतपादे 'अरूपव'त्सूत्रे । **उक्ते**ति । 'किञ्चैवं निराकारे'त्यादिभाष्योक्ता शङ्का निवर्तनीया । अत इति शङ्काया निवर्तनीयत्वात् । **पूर्वोक्तरीत्ये**ति । 'नन्वग्निष्टोममेवोद्दिश्ये'त्यादिनोक्तरीत्या । तत्रापि 'मैवम्, धर्मिग्राहकमानेने'त्याद्युक्तरीत्या । **तत्तद्धेतुकस्ये**ति । शिष्टाचारप्रकरणहेतुकस्य । रूपभेदस्य वेद्यभेदस्य । **अनेके**ति । यथा घटानां नीलपीतरक्तशुक्लानां सतां नीलो घटो घटो नेत्यप्रत्ययादनेकनीलादिरूपतायामपि घटत्वेन घटस्वरूपैक्यस्य निराबाधो यथा तथा सति । **तत्त**दिति । **तत्तद्रूपे**ति । यथा घटे नीलादितत्तद्रूपगुणभेदस्य घटाभेदाप्रयोजकत्ववत्तत्तद्रूपेत्यादिः । **स्वारस्येने**ति । उपासनाभावेन तदैक्यरूपविध्यैक्ये स्वारस्येन तथा । **तथे**ति । सर्ववेदान्तप्रत्ययत्वं

१ सुधार्थं ।

दर्शयति च ॥ ४ ॥

वेद्यैकत्वेन विद्यानामेकत्वं श्रुतिर्दर्शयति 'सर्वे वेदा यत्पदमामनन्ती'त्यादिना। उपासनाप्रकारभेदेनोपास्यभेददर्शने दोषं च दर्शयति । 'यदा ह्येवैष एतस्मिन्नु-

भाष्यप्रकाशः ।

दर्शयति च ॥ ४ ॥ अस्मिन्नधिकरणे सर्वफलदातुः परब्रह्मणो वेद्यस्य तद्विषयकतया सर्वासां विद्यानामैक्यमवान्तरविद्यानामवान्तरैक्यं च प्रतिपादितमिति निगमयितुं सूत्रं विवृण्वन्ति वेद्यैकत्वेनेत्यादि । इत्यादिनेति । आदिपदेन मुण्डके ब्रह्मविद्यां प्रक्रम्य, तस्यामेव परापरविभागमुक्त्वा, ऋग्वेदादिरूपा अपरा, 'अथ परा यया तदक्षरमधिगम्यत' इति तयोर्लक्षणकथनेन सर्वासां ब्रह्मविद्यात्वं यद्बोधितं तस्य सङ्ग्रहः । तथान्यैरुपन्यस्तानां 'एतमेव बह्वृचा महत्युक्थ्ये मीमांसत एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा' इत्यादीनां च सङ्ग्रहः । तथाच श्रुतिरपि प्रत्यक्षा वेद्यैकत्वेन विद्यैकत्वं दर्शयति, उपास्यभेददर्शने च दोषम्, अतोपि निष्प्रत्यूहं ब्रह्मणस्तद्विद्यानां च सर्ववेदान्तप्रत्ययत्वमित्यर्थः । अत्र आद्या श्रुतिः काठकेऽस्ति । 'अन्यत्र धर्मादन्यत्राधर्मा'दिति प्रश्नमुपक्रम्य, तदुत्तरत्वेनोक्ता । तत्र च सर्ववेदबीजभूतो य ओङ्कारः, तस्य तथात्वमुक्तम् । स च 'स्वधाम्नो ब्रह्मणः साक्षाद्वाचक' इति प्रश्नोत्तरसिद्धिः । तथाचोङ्कारस्य सर्ववेदबीजत्वात् तदर्थस्यैव सर्वत्र प्रस्तुतत्वात् सर्वस्यापि वेदस्य तद्वाचकत्वमिति वेद्यैक्येन विद्यैक्यं सिद्धम् । द्वितीया तैत्तिरीयाणां ब्रह्मवित्प्रपाठकेऽस्ति । तत्र हि 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' इति विशेषणचतुष्टयविशिष्टं ब्रह्म 'एतस्मि'न्निति पदेन परामृश्यते । तथाच यच्छास्त्रीयसाधनमन्तरेणादृश्यम्, यस्य चात्मान्यो नास्ति, किन्तु तदेव सर्वासामात्मभूतमित्यनात्म्यम् । यत् पुनरेतदग्रे 'तत्त्वेव भयं विदुषोऽमन्वानस्ये'त्यनेन यः पूर्वोक्तरूपं ब्रह्म युक्तिभिर्नानुचिन्तयति, तस्यापि

रश्मिः ।

ब्रह्मणो निष्प्रत्यूहमित्यर्थः । न च 'अनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्य'मिति काठके श्रावणान्न स्वारस्यं नेति वाच्यम् । 'नास्ति श्रुतिषु तद्वार्ते'ति मायानिषेधात् । 'स ईक्षां चक्र' इतीक्षामात्रश्रावणात् । न च 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मिति 'मायया सन्निरुद्धः' 'विष्णुर्नाम महायोगी महामायो महातपाः' इत्यादिश्रुतिभिर्मायोक्तेति शङ्क्यम् । 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिन' इति गोपालतापिनीयात् प्रकृतिः 'प्रकर्षेण नवीनभावजनक' इत्यादिगायत्र्यर्थविवरणकारिकोक्तलक्षणा इन्द्रियभावजनिका तया विशिष्टं मायिनं महेश्वरम् । महामायो महेन्द्रियावी विष्णुः । मायया संनिरुद्धो जीव इत्यर्थान्तराभावात् । गोविन्द इत्यर्थः ॥ ३ ॥

दर्शयति च ॥ ४ ॥ पूर्वं चोदनाद्यविशेषहेतुं शोधयित्वा द्वितीयेन तृतीये शिष्टाचारप्रकरणे 'योऽन्यथा सन्त'मिति श्रुतीनामुपसंहारबाधकत्वमाशक्य समाहितम् । अर्थभेदस्योपसंहारसाधकत्वं वक्ष्यते । एवच साधकस्य विद्यमानत्वाद्वेद्यैकत्वेनेत्यादिर्भाष्ये । बाधकानि तु गुणभेदस्याप्रयोजनकत्वान्न सन्ति । आदिपदार्थमाहुः आदिपदेनेति । परापरेति । 'द्वे विद्ये वेदितव्ये इति ह स्म य इह ब्रह्मविदो वदन्ति । परा चैवापरा चे'ति श्रुत्या परापरविभागमुक्त्वा । सङ्ग्रह इति । श्रुत्यर्थस्तु एतं सर्ववेदान्तप्रत्ययत्वेन विहितम् । बह्वृचशाखिनः उक्थे शस्त्रविशेषे । विचारयन्ति । एवमग्रेपि । छन्दोगा सामशाखा । आदिना वैश्वानरविद्या । वाजसनेयके प्रादेशमात्रसम्पादितस्य वैश्वानरस्य छान्दोग्ये सिद्धवदुपादानम् । 'यस्त्वेवमेतं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त' इति । प्रत्यक्षा वेद्येति ।

द्रमन्तरं कुरुते, अथ तस्य भयं भवती'ति। 'उ'दित्यव्ययमप्यर्थकम्। तथाच, अरमल्पमप्यन्तरं कुरुत इत्यर्थः ॥ ४ ॥

भाष्यप्रकाशः।

तद्वयमुक्तम्। तादृशत्वं च मूलरूप एवेति, तदवतारेषु यो भेदं कुरुते, तस्य भयं भवतीति सिध्यति। तेन सर्वासां विद्यानां सर्वेषामुपास्यानां चैक्यं सिद्धम्।

अत्रैतद्बोध्यम्। अन्ये हि शाखान्तराधिकरणोक्तहेतुभिः तत्तदुपासनानामैक्यं साधयित्वा, तस्यैक्यस्य तेषु तेषु गुणोपसंहारप्रयोजकत्वं वदन्ति। तदप्रयोजकम्। यासूपासनासु न कश्चिद्विशेषः, तास्वैक्यसाधनमनर्थकम्। यथा ज्यैष्ठ्यश्रैष्ठ्यगुणकप्राणोपासनायाम्। यत्र च विशेषगुण उपसंहर्तव्यः, यथा पञ्चाग्निविद्यादिषु, तत्राधिकगुणोपसंहारप्रयोजकत्वात् सार्थकम्। गुणोपसंहारश्चेत् समाचारसूत्रोक्तहेतुभिरेव सिध्यति, तदा पूर्वसूत्रे तत्साधनमनर्थकम्। उक्तरीत्या सर्वासामैक्ये प्राप्ते सर्वत्र सर्वगुणोपसंहारप्राप्तेर्दुर्वारत्वात्। अतो ये ज्ञानमार्गीया ब्रह्मत्वप्राधान्येनोपासकाः, तेषामेव तथोपसंहार इति पूर्वसूत्रतात्पर्यबोधनार्थमिदं सूत्रम्। ये पुनः सर्वत्र ब्रह्मत्वमनुसन्दधाना अपि तत्तद्रूपप्रधानाः, तत्तत्फलाकाङ्क्षिणो वा, तेषां तु समाचारसूत्रोक्तैरुपसंहारनियमहेतुभिरवान्तरैक्यमवधार्य, तत्तदुपयोगिन एव गुणा उपसंहर्तव्या भवन्ति। एवं सति यदैक्यमन्यैः पूर्वसूत्रे विचार्यते, तदस्माकं समाचारसूत्रे सिध्यतीति भिन्नभिन्नाधिकारसूचनार्थमेतत्सूत्रचतुष्टयमिति ज्ञेयम्।

शङ्कराचार्यास्तु। परस्य ब्रह्मणः पूर्वापरादिभेदरहितत्वात् सैन्धवघनवदेकरसत्वाद्विज्ञानानां न तद्विषयत्वम्, अतो ब्रह्मविज्ञानस्य प्रतिवेदान्तं भेदः शङ्कितुं न शक्यते, नापि ब्रह्मविज्ञानस्य चोदनाद्यविषयत्वादभेदः सिद्धान्तयितुम्। अविधिप्रधानैर्वस्तुपर्यवसायिभिर्हि वाक्यैर्ब्रह्मविज्ञानं जन्यत इति 'तत्तु समन्वया'दित्यत्र प्रतिपादितत्वात्। तत्कथमिमां भेदाभेदचिन्तामाचार्य आरभत इत्याशङ्क्य, सगुणब्रह्मविषया प्राणादिविषया वेद्यविज्ञानभेदाभेदचिन्तेत्यदोषः। सगुणे हि ब्रह्मणि कर्मवदुपासनानां भेदाभेदसम्भवात्, कर्मवदेव चोपासनानां दृष्टादृष्टफलार्थचोदनाया अपि सम्भवात्, सम्यग्ज्ञानोत्पत्तिद्वारेण केषाञ्चिदुपासनानां क्रममुक्तिफलत्वस्यापि सम्भवाच्च। तस्मात्तेष्वेवैषा चिन्तेत्याहुः।

रश्मिः।

'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुत्योपनिषन्मात्रवेद्यं विरुद्धधर्माश्रयत्वेन 'यदेक'मितिश्रुत्युक्तमेकत्वानेकत्व भवति, एकत्वावच्छिन्नाभिन्नमनन्तरूपत्वावच्छिन्नमिति बोधः कार्यकारणवस्त्वैक्यमर्षणे सम्भवति। 'तमसः परस्ता'दितिविशेषणबलात्तु कारणकोटिराश्चर्यरस इति सिद्धं तद्द्रढयितुमाहुः **शङ्कराचार्या** इति। पादारम्भे आहुरित्यन्वयः। **प्रतिवेदान्त**मिति। आथर्वणिकवेदान्तं लक्षीकृत्य। **चोदनादी**ति। ज्ञानस्य कृत्यविषयत्वादिति भावः। न शक्यत इति सम्बन्धः। 'एकमेवाद्वितीय'मित्यादौ विधिः कल्प्यते। 'प्रज्ञां कुर्वीते'ति विधिर्वा। **तत्कथ**मिति। अभेदसिद्धान्तात्केन प्रकारेण हेतुना। **प्राणादी**ति। आदिना चतुर्वागादिप्राणविषया। **कर्मव**दिति। पूर्वतन्त्रे द्वितीयाध्याये 'संज्ञाभेदाद्यागभेदः दर्शपूर्णमासाख्यकर्म न भिद्यत' इत्युक्तं तद्वत्। **कर्मव**दिति। 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र दृष्टं स्वर्गः अदृष्टमात्मसुखं तत्फलार्थं चोदनाया उक्तायाः सम्भवात् तादृशकर्मवत्। तथाच ज्योतिष्टोमादिकर्मवत्। षष्ठ्यन्ताद्वतिः। 'आत्मेत्येवोपासीते'ति। अत्र चित्तशुद्धिरदृष्टं फलम्। बृहदारण्यके प्राणसंवादे प्राणादिविषया उपासनाः सन्ति। प्राणानां देहधारणं दृष्टं फलम्। **तेष्वेवे**ति।

भाष्यप्रकाशः।

तदिदं प्रथमसूत्रपूर्वपक्षभाष्ये एव **समन्वयविरोधापत्ते**रित्यादिना निराकृतम्।

यत्पुनर्भामत्यां तद्भाष्यतात्पर्यमुक्तम्, सावयवस्य ह्यवयवानां भेदात्तत्तदवयवविशिष्टब्रह्मगोचराणि विज्ञानानि भिद्येरन्नित्यवयवा ब्रह्मणो निराकृताः 'पूर्वापरादी'त्यनेन। नच नानास्वभावं ब्रह्म यतः स्वभावभेदाद्विज्ञानानि भिद्येरन्नित्यत उक्त'मेकरस'मितीति।

तदप्युभयलिङ्गाद्यधिकरणविचारे 'अनुच्छित्तिधर्मा' 'य इह नानेव पश्यती'त्यादिश्रुतीनां विचारेण विरुद्धधर्माधारत्वसाधनादेव निरस्तं ज्ञेयम्।

भास्कराचार्यास्तु। यदि विज्ञेयं ब्रह्म सर्वत्रैकम्, तदा तद्विषयकं ज्ञानमुत्पद्यते, कथं भिद्येत, नच बहूनि ब्रह्माणि सन्ति, येन तज्ज्ञानानि भिद्येरन्, अतः प्रतिवेदान्तं विज्ञानभेद इत्याशङ्कानुपपन्ना, नापि 'चोदनाद्यविशेषा'दिति समर्थनं कर्तव्यम्, अचोदनालक्षणत्वाज्ज्ञानस्येत्याशङ्क्य, विज्ञानमिहोपासनमभिप्रेतम्, प्रथमं तावत् वाक्याद्ब्रह्मस्वरूपविषयकं ज्ञानमुत्पद्यते, तच्च प्रमेयरूपावच्छेदकम्, घटादिविषयकप्रत्यक्षादिज्ञानवत्, उपासनं तु निर्णीते वस्तुतत्त्वे पश्चात् क्रियते, यथा गुरुमुपास्ते, राजानमुपास्त इति ज्ञातस्वरूपस्य गुर्वादेरुपासनं भवति, तच्च विधिगम्यम्, यथा च तस्यावश्यकत्वम्, तथा चतुर्थस्याद्ये वक्ष्यते, तस्मादुपपन्नेयं चिन्तेत्याहुः।

इदं च सिद्धान्तेपि सम्मतम्।

माध्वा रामानुजास्तत्रैवोरश्रैतचिन्तायामुपपत्तिमविचारयन्तोऽवसरसङ्गत्या विद्याभेदाभेदावेव विचारयन्ति।

रश्मिः।

सगुणप्राणादिषु। **समन्वयेति**। सगुणे भिन्ने प्राणादौ च निर्गुणसमन्वयविरोधापत्तेः। **निराकृत**मिति। तेनाणुभाष्योक्तमेव साधीय इति भावः। 'नैषा तर्केण मतिरापनेये'ति काठकात्। 'अनन्यप्रोक्ते गतिरन्यत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात्। नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठे'ति श्रुतिः। **सावयवस्येति**। एकस्य सगुणस्य। **पूर्वापरेति**। भाष्येण। **एकरसमिति**। एकरसत्वादित्यत्रत्यमेकरसमिति भाष्यीयं बोध्यम्। **अनुच्छित्तीति**। निराकृतावयवरूपसगुणधर्माः न विद्यते उच्छित्तिर्येषां तादृशाः अनुच्छित्तयो धर्मा यस्येत्यनुच्छित्तिधर्मा आत्मा। आत्माविनाशित्वस्य 'अविनाशी वारेऽयमात्मे'त्यविनाशिपदेन प्राप्तेः। **नाना पश्यति** अवयवभेदं पश्यति। **विरुद्धेति**। सावयवत्वनिरवयवत्वरूपविरुद्धेत्यर्थः। 'निष्कल'मिति निरवयवत्वम्। 'आत्मैवेदमग्र आसी'दिति सावयवत्वम्। **भास्कराचार्या** इति। आरम्भ इत्येव। **प्रतिवेदान्त**मिति पूर्ववत्। **कर्तव्यमिति**। 'न भेदा'दिति द्वितीयसूत्रेण कर्तव्यम्। **अचोदनेति**। चोदनालक्षणोऽर्थो हि धर्मः। कृत्यविषयत्वात् ज्ञानस्य तथा। **तच्चेति**। ज्ञानं ज्ञाताज्ञातप्रमेययोर्ज्ञातप्रमेयमवच्छिनत्तीति तथा। **घटादीति**। घटविषयकं ज्ञानं भिन्नं पटविषयकं भिन्नं पटविषयकाद्भिद्यते घटविषयकत्वात् इति प्रत्यक्षानुमाने। अयं घटविषयकज्ञानभिन्नपदवाच्यः इदं घटविषयकज्ञानभिन्नम्। **शाब्दोय**मिति। **तच्चेति**। वस्तुतत्त्वं स्वरूपरूपम्। **विधीति**। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण' इति निर्णीतवस्तुतत्त्वब्रह्मोपासनविधिः। 'स समित्पाणिर्गुरुमेवाभिगच्छेच्छ्रोत्रियं ब्रह्मनिष्ठ'मिति गुरूपासनविधिः। 'प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वर'मिति राजोपासनम्। **तस्येति**। विधेः। चतुर्थस्य फलाध्यायस्याद्ये पादे। चतुर्थपादे आद्याधिकरणे वा। **तस्मादिति**। अभिन्नज्ञानस्य विषयभेदाद्भिन्नत्वाङ्गीकारात्। **इयमिति**। भेदाभेदसिद्धान्तविषयिणी। एकमभिन्नं ज्ञानं प्रमेयरूपावच्छेदकमिति भिन्नम्। **सम्मत**मिति। भेदांश इवार्थं

भाष्यप्रकाशः ।

तत्रापि माध्वमते, उपासना नाम ब्रह्मजिज्ञासा समस्तसच्छास्त्राभ्यासरूपा, श्रवणमनने इति यावत्, सा च भक्तिसाध्यत्वाज्ज्ञानसाधनत्वाद्भक्त्यनन्तरं ज्ञानात् पूर्वं विचार्यते, ध्यानाङ्गत्वात् । सैव प्रथमाधिकरणे विचार्यते, समस्तसच्छास्त्रश्रवणमननाभ्यां दूरोत्सारिताज्ञानसंशयविपर्ययस्य ध्यानाधिकारित्वादिति । तत्र वेदोदितं ब्रह्म विषयः । तत्किमेकैकेन सर्वशाखोक्तं ज्ञातव्यम्, स्वशाखोक्तं वेति सन्देहः । सर्वशाखोक्तं ज्ञातव्यमिति सिद्धान्तः । तेन वेद्याभेदाद्विद्याया अभेदसिद्धिः ।

तत्र सर्वशाखानामिदानीमप्रसिद्धत्वात् सर्वपदे सङ्कोचस्त्वावश्यकः । 'अविज्ञातं विजानता'मिति श्रुत्या ब्रह्मणो ज्ञानापरिच्छेद्यत्वं च श्राव्यते । अतो यथाधिकारं यत् सम्यक् ज्ञानम्, तदेव युक्तम् । अन्यथा अशक्योपदेशापत्तिरित्यवधेयम् ।

रामानुजास्त्वत्र वैश्वानरविद्यां विषयत्वेनोदाहरन्ति ।

शैवस्तु दहरविद्याम् । सा प्रतिशाखं भिन्ना, अभिन्ना वेति संशयः । शाखान्तराधिकरणन्यायेन पूर्वोत्तरौ पक्षावित्याह ।

भिक्षुस्तु । ब्रह्मणि निरूपितेऽर्थतस्तद्विद्यापि निरूपितैव, ज्ञानस्य विषयमात्राधीनविशेषत्वात्, तत् किमर्थं विद्यायाः पृथग्विचार इत्याशङ्क्य, गुणोपसंहारानुपसंहारादिभिरेकस्मिन्नपि ब्रह्मणि प्रकारतो विद्यायां संशयसम्भवाद्विचार इत्युक्त्वा, तत्रादौ ब्रह्मविद्याङ्गभूतानां गुणादीनां विचारार्थम्, तथा वेदविहितत्वं विना वक्ष्यमाणसर्वपापक्षयहेतुत्ववैधकर्माङ्गत्वादीनामनुपपत्तेश्च साक्षात्कारसाधारण्येन सकलब्रह्मविद्यासु विध्यादिकमस्तीति सर्ववेदान्तप्रत्ययसूत्रे विचार्यते, तथाच 'सर्वगृहमश्वा' इतिवदत्र व्याप्यकर्मणि द्वितीयाः, अतः सर्ववेदान्तस्थं प्रत्ययं विद्यां व्याप्य, चोदनादि, वक्ष्यमाणविधिफलादिकं प्रत्येतव्यम्, अथवा, सर्वे वेदान्तप्रत्ययाः विषयत्वेनास्य

रश्मिः ।

कृत्वा संमतम् । 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति गीतावाक्यात् । उपपत्तिमिति । भेदसिद्धान्तेऽभेदोपपत्तिम् । इतरे तु विशिष्टाद्वैते शरीरशरीरिणोरभेदोपपत्तिम् । अन्तर्यामिब्राह्मणोक्तः शरीरशरीरिभावः । उपासनेत्यादि । नामेत्यव्ययम् । भक्त्यनन्तरमिति । 'यथा भक्त्येश्वरे मन' इति वाक्यात् । मनोव्यापारविशेष उपासना । ज्ञानादिति । 'तं यथा यथोपासते' इत्यादिश्रुत्या । ध्यानेति । श्रवणमननकालयोर्जायमानम् । दूरेति । दूरोत्सारिता अज्ञानं संशयो विपर्ययो भ्रमश्च येन तस्य । संदेह इति । पूर्वपक्षस्तु स्वशाखोक्तं ज्ञातव्यमिति । दूषणमाहुः तत्रेत्यादि । सम्यगिति । उक्तश्रुत्युक्तत्वे सति विरुद्धधर्माधारत्वं सम्यक्त्वम् । पूर्वोत्तरपक्षाविति । विद्याभेदः पूर्वपक्षः, विद्याऽभेदः सिद्धान्तः । शाखान्तराधिकरणे यथा कर्मभेदः पूर्वपक्षः, कर्मैक्यं सिद्धान्तः । न्यायस्तु पूर्वतन्त्रे द्वितीयाध्याये चतुर्थपादेस्तीत्युक्तम् । पृथगिति । अविभागाद्वैते विषयपृथग्विचारेपि विद्याया अद्वैतरूपत्वात् । गुणेति । आदिना अविभागाद्वैतेपि शास्त्रदृष्ट्या विभागदर्शनं गृह्यते । उपपादनं तत्काले विभागाङ्गीकारश्च तैः । गुणादीनामिति । आदिना जातिधर्मौ । तथेति । गुणत्वादिप्रकारैर्विद्याया वेदविहितत्वम् । सर्वपापेति । आदिना शिष्टादृष्टत्वम् । सर्वेति । 'सर्वगृहमश्वास्तिष्ठन्ती'त्यत्र सर्वगृहं कर्म चतुर्विधकर्मसु व्याप्यं सम्भवति । अत्रेति । सूत्रे । विद्यां साक्षात्काररूपाम् । व्याप्य (व्याप्य)कर्मभूतां इति हेतोस्तां व्याप्य चोदनादि । अस्यार्थमाह भगवान् भिक्ष्वाचार्यः । वक्ष्यमाणेत्यादि । चोदना विधिः । आदिना फलादिकम् । आदिना अपूर्वम् । साक्षात्कारमात्रप्रत्ययवाचकत्वापत्त्या

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥

ननु पूर्वसूत्रोक्तरीत्या गुणोपसंहारो न क्वचिदपि प्राप्तावसर इति सिद्धम् । दृश्यते चोपसंहारः । श्रीरामोपनिषत्सु 'यो वै ये मत्स्यकूर्माद्यवतारा' इत्यादिनोक्तावताररूपत्वस्य श्रीरामे, 'नमस्ते रघुवर्याय रावणान्तकराय चे'त्यादिषु 'ते'

भाष्यप्रकाशः ।

सन्तीति सर्ववेदान्तप्रत्ययम्, तथाच चोदनादिकं सर्ववेदान्तप्रत्ययविषयकमिति प्रतिज्ञा, यत्र यत्र विधिफलादिकं न श्रूयते, तत्रापि कल्पनीयमिति यावत्, कुत एतत्, अविशेषात्, चोदनादिमत्या वेदान्तान्तरोक्तविद्यायाः सकाशादवैलक्षण्यात्, सम्भवत्येकवाक्यत्वे वाक्यभेदानौचित्यादित्येवं व्याख्याय, सूत्रान्तराण्यप्येतस्मिन्नेवार्थे योजयित्वा, सर्वस्मिन् वेदान्ते चोदनादिसाधनार्थमिदमधिकरणमित्याह ।

तत्र साक्षात्कारसाधारण्येन विध्यङ्गीकारस्तु न युक्तः । 'नायमात्मा प्रवचनेन' 'श्रवणायापि बहुभिर्यो न लभ्य' इत्यादिषु दर्शनात्मकस्य लाभस्य जीवकृतसाधनासाध्यताया वरणैकसाध्यतायाश्च श्रावणेन तच्छाब्दज्ञानस्यापि दुर्लभत्वश्रावणेन च तत्साक्षात्कारस्य विधिविषयताया वक्तुमशक्यत्वात्, दर्शनस्य प्रमाणवस्तुपरतन्त्रत्वाच्च । नच द्रष्टव्यश्रुतिविरोधः । दर्शनानुकूलव्यापारे दृशिधातोर्लक्षणया तत्र विधेश्चारितार्थ्येनाविरोधात् । सूत्रव्याख्यानमप्यत एवायुक्तम् । साक्षात्कारवाक्येषूक्तरीत्या विध्ययोगेन प्रतिज्ञाया बाधात् । विद्यासु वैलक्षण्यस्यापि तत्तदंशेन स्फुटतया हेतोरप्यभावाच्चेति दिक् ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥ एवमुपासनानां द्विविधमैक्यमधिकारभेदेनोपसंहारं च संक्षेपेणोक्त्वा तत् प्रपञ्चयितुमुपसंहारप्रयोजनं च वक्तुं सूत्रमवतारयन्ति नन्वित्यादि । ननु वेद्यैक्येन प्राप्ते सर्वत्र सर्वगुणानामुपसंहारे समाचारसूत्रोक्तैर्निरूपणप्रकारभेदाधिकारभेदासाधारणसम्बन्धिभेदैस्तन्निवारणं कर्मोपासनासाधारण्येन कृतम्, परन्त्वेतावान्

रश्मिः ।

पक्षान्तरमाह **अथवेति** । **अस्येति** । विधेः । अधिकारवत्प्रतिज्ञा । उत्तरत्रानुवृत्तिमाह **यत्र यत्रेति** । **वेदान्तान्तरेति** । वेदान्तान्तरमाथर्वण तदुक्तविद्यायाः । **द्रष्टव्येति** । विधौ तव्याङ्गीकारात् । तव्यतो वा । साक्षात्कारानुकूलव्यापारे विधिविषयत्वमित्याहुः **दर्शनानुकूलेति** । **तत्र विधेरिति** । दर्शनानुकूलव्यापारानुकूलव्यापार इत्यर्थात् । लक्षणाशब्दस्तु दर्शनार्थकधातुप्रयोगे फले धात्वर्थत्वान्मिश्रमतेन 'फलव्यापारयोर्धातोराश्रये तु तिङः स्मृत' इति भूषणे लाक्षणिकार्थात् । **सूत्रेति** । 'सर्ववेदान्तप्रत्ययं चोदनादि अविशेषा'दिति त्रिपदमिदं सूत्रमङ्गीकृत्य व्याख्यानम् । **अत एवेति** । साक्षात्कारे विध्यभावादेव । **उक्तेति** । अव्यवहितपूर्वोक्तरीत्या । **तत्तदंशेनेति** । विद्यायां प्रकारतः संशयस्योक्तत्वात्तत्प्रकारांशेन । **हेतोरिति** । अविशेषरूपस्य ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥ नन्वित्यादीति । न इतीति । तुभ्यमित्यर्थः । **वेद्यैक्येनेति** । उपसंहारसाधकेन अर्थाभेदरूपेणेति नोक्तं वक्ष्यमाणत्वात् । **निरूपणेत्यादि** । निरूपणेन प्रकारः प्रकरणं देशकालौ प्रकरणं तस्य भेदस्याधिकारः शिरोव्रतकृतः तस्य भेदः असाधारणसम्बन्धी शिष्टः तस्य भेदः । शिष्टाचारो 'योऽन्यथासन्तमात्मान'मिति श्रुत्युक्तो भेदः तैः । **कर्मोपेति** । कर्म च उपासना च कर्मोपासना तत्साधारण्येन । **निरूपणेति** । 'नामरूपधर्मविशेष-

इति युष्मच्छब्दविषये श्रीव्रजनाथे रघुवर्यत्वादेरित्याशङ्क्य, तत्प्रयोजकं रूपमाह उपसंहार इत्यादिना । उक्तस्थलादिषु यः उपसंहारः, स त्वर्थस्य पदार्थस्य भगवल्लक्षणस्योभयत्राप्यभेदादित्यर्थः । नन्वेवं सति मत्स्ये शरचापादिकं पुरुषे च

भाष्यप्रकाशः ।

विशेषो यत् कर्मणि निरूपणप्रकारभेदो निवारकः, उपासनायां तु रूपप्रकारभेदः, तथा तत्र दैह्योऽधिकारः, इह त्वान्तरः, तत्र सम्बन्धी बाह्यः, इह तु ध्येयत्वेनेष्ट आन्तरः, तथापि तेषां गुणान्तरोपसंहारबाधकता त्वविशिष्टेति तद्रीत्या यस्य कस्यचन बाधकस्य यत्र क्वापि सम्भवाद्गुणोपसंहारो न क्वचिदपि प्राप्तावकाश इति सिद्धम्, तद्विरुद्धश्च श्रीरामतापनीयेऽवतारान्तरत्वस्य दशमस्कन्धीयाक्रूरस्तुतौ च रघुवर्यत्वादेरुपसंहारो दृश्यते, अतो न पूर्वसूत्रोक्तं साधीय इत्याशङ्क्य, तन्निवृत्त्यर्थमस्मिन् सूत्रे वैधर्म्यनिरूपणप्रयोजनं सूचयन्नुपसंहारप्रयोजकं रूपमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति उक्तस्थल इत्यादि । तत्तत्तापनीये 'इति रामपदेनासौ परं ब्रह्माभिधीयते', 'तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इति श्रावणादक्रूरस्यापि भगवति परब्रह्मत्वज्ञानस्य तत्स्तुत्यारम्भे उक्तत्वात् तत्र योऽवतारान्तरत्वोपसंहारः, स भगवल्लक्षणस्य वस्तुन उभयत्राप्यभेदमनुसन्धाय । अन्यथा तत्र 'परं ब्रह्मे'ति न वदेत् । प्रयोजनाभावात् । तथाच येन ब्रह्माभेदस्तत्रानुसंहितः, तेनोपसंहारः कार्य इत्येतदर्थमित्यर्थः । अत्र पूर्वसूत्रोक्तनियमभङ्गं शङ्कते नन्वित्यादि । एवं सतीति । ब्रह्मत्वेऽनुसंहिते सति । तथाचैवं मत्स्यादिषु विरुद्धधर्मभावने प्राप्ते स्वाध्यायसूत्रोक्तनियमस्य भग्नत्वादग्निहोत्रादिष्वपि सर्वशाखोक्तधर्मकरणापत्तिः स्यादित्यर्थः । एतत् समाधातुं सूत्रांशं व्याकुर्वन्ति यथेत्यादि । विधिशेषाणामित्यत्र बहुव्रीहिः । आम्नायस्य क्रियार्थत्वात् । समान इति । तुल्ये । चोऽप्यर्थे । एवञ्च अर्थाभेदात् समानेप्युपसंहारो

रश्मिः ।

पुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्या'दित्यत्र नामादयः कर्मभेदकाः श्रुताः । तत्र कर्मणि निरूपणप्रकारभेदः धर्मविशेषशब्दोक्तः । 'कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति । अपरे शाखिनो नाचरन्ति । तथाग्निमधीयानाः केचिदुपाध्यायस्योदकुम्भमाहरन्ति अपरे ने'त्येवम् । दैह्य इति । अशक्तिः अभेदे सर्वशाखाप्रत्ययमुपसंहर्तुमशक्तेर्न शक्नुवन्तीति दैह्यः । आन्तर इति । सद्धीरूपः । 'यद्वद्विये'तिवाक्यात् । बाह्य इति । रूपम् । एकस्यां शाखायामग्नीषोमीयमेकादशकपालमामनन्ति । एकस्यां द्वादशकपालम्, एव भिन्नं रूपं कथमिव न कर्मभिन्न भविष्यति । ध्येयत्वेनेति । 'योऽन्यथा सन्तमात्मान'मिति श्रुतेः । तद्रीत्येति । सूत्रोक्तरीत्या । यस्यकस्यचनेति । पूर्वपक्षत्वान्नामरूपसूत्रोक्तसमाहारद्वन्द्वार्थो न स्वीकृत इति भावः । गुणोपेति । तेन पूर्वसूत्रोक्तरीत्येत्यस्य न 'दर्शयति चे'ति सूत्रोक्तरीत्येत्यर्थः । किन्तूक्त एवार्थ इत्युक्तप्रायम् । दृश्यत इति भाष्यं विवृण्वन्तिस्म तद्विरुद्ध इति । उपसंहारेति । 'तत्प्रयोजक रूपमाहे'ति भाष्यार्थ उक्तः । तत्तापिनीय इति । रामतापिनीये गोपालतापिनीये च । येनेति । अधिकारिणा । विधेः शेषाणामिति षष्ठीतत्पुरुषाशङ्कानिवृत्त्यर्थमाहुः विधीति । विधिराज्ञाप्रतिपादकः सद्धर्मत्वाच्छेषो येषामग्निहोत्रादीनाम्, 'यज्ञो वै विष्णु'रिति श्रुतेर्धर्मिणामिति बहुव्रीहिरित्यर्थः । आम्नायस्येति । वेदस्य विधिसहितस्य व्यतिरिक्तस्य । क्रिया यागादिः । चोप्यर्थ इति । तत्पुस्तके समाने चेति पाठो

१. चो नास्ति ।

शृङ्गादिकं भावनीयं स्यादिति चेत्, तत्राह विधिशेषवदिति । यथा विधिशेषाणामग्निहोत्रादीनामग्निहोत्रत्वादिलक्षणे धर्मे समानेपि सति स्वस्वशाखोक्तप्रकारकस्यैव करणम्, नान्यशाखोक्तधर्मोपसंहारः, एवमिहापि तत्तदवतारोपासकस्य तत्तदसाधारणधर्मवत्त्वेनैवोपासनम्, नान्यावतारधर्मवत्त्वेनापीत्यर्थः ।

यद्वा । मत्वर्थीयो वत्प्रत्ययोऽत्र । तथाच विधिशेषोर्थवादः, तद्वत्सत्समानं[1] च भवति यत्, तत्र चोपसंहार इत्यर्थः ।

अत्रैवं ज्ञेयम् । एकस्यां श्रुतौ यस्य कर्मणो यत् फलमुच्यते, तदितरस्यां तस्यां तस्यैव कर्मणस्तदितरत् फलमुच्यते । एवं सति द्वितीयश्रुत्युक्तफलकामनयापि तदेव कर्म कर्तव्यं भवतीति तत्फलसाधकत्वस्योपसंहारः । यथा

भाष्यप्रकाशः ।

विधिशेषवदिति सूत्रयोजना । तथाचात्र श्रीरामादिष्ववतारान्तरत्वं तेन तेन रूपेण तत्तत्कर्मकर्तृत्वमित्येवमुपसंहृतम्, न तु अस्मिन् रूपे तद्रूपत्वमनेन रूपेण तत्तत्कर्मकर्तृत्वं वा, तदप्यधिकारभेदात्, ब्रह्मत्वानुसन्धानस्यैव मुख्यत्वेन तत्र ज्ञानमार्गीयाधिकारात् । भक्तिमार्गीयाधिकारे तु मत्स्यादिरूपस्यैव प्राधान्येन सम्बन्धिप्राधान्यान्नोपसंहारः । अतः पूर्वसूत्रोक्तनियमस्याभङ्गान्न त्वदुक्तरीत्या तद्भावनप्राप्तिः, न वाग्निहोत्रादिषु शाखान्तरीयधर्मप्राप्तिरित्यर्थः ।

अस्मिन् पक्षे गुणोपसंहारप्रयोजनं न स्फुटं भवतीत्यतस्तदर्थं 'तस्मात् भारत सर्वात्मे'त्यस्य सुबोधिनीमनुसृत्य व्याख्यानान्तरमाहुः यद्वेत्यादि । मत्वर्थीयो वत्प्रत्ययोऽत्रेति । वत्सदृशः प्रत्ययो वत्प्रत्ययः । सोऽत्र मत्वर्थीय इत्यर्थः । अस्मिन् पक्षे विधिशेष इत्यत्र षष्ठीतत्पुरुषः । समानपदमेकार्थकम् । चः समुच्चये । एतमर्थं तथाचेत्यादिना गृहीत्वा विभजन्ते अत्रैवमित्यादि । तत्फलसाधकत्वस्येति । श्रुत्यन्तरोक्तफलान्तरसाधकत्वस्य । उदाहरणमाहुः यथा

रश्मिः ।

भविष्यति । समानेपि सतीति पाठः । अग्निहोत्रादीनामग्निहोत्रत्वादिलक्षणे धर्मे समानेपीत्यर्थः । अत इत्यादि । नामरूपसूत्रोक्तनामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्त्यादीनां समाहारद्वन्द्वार्थस्योपसंहारप्रतिबन्धकस्यात्र सत्त्वात्पूर्वसूत्रेत्यादिः । यत्किञ्चिन्नामत्वादेः प्रतिबन्धकत्वस्यानङ्गीकारात् । त्वदुक्तरीत्येति । मत्स्यादिषु विरुद्धधर्मभावने प्राप्त इत्युक्तरीत्या । विरुद्धधर्मभावनस्याव्यवहितपूर्वोक्त 'तथाचे'त्यादिप्रकाशेनोक्तत्वात् । तद्भावनप्राप्तिर्विरुद्धधर्माधारत्वभावनप्राप्तिः । गुणोपेति । गुणोपसंहारः प्रयुज्यतेऽनेन । 'करणाधिकरणयोश्चे'ति ल्युट् । न स्फुटमिति । कर्मरूपे भगवति शाख्यधिकारैर्भिन्नभिन्नाग्निहोत्रेऽग्निहोत्रत्वस्य जातिरूपस्य सत्त्वादभेदेत्र नियामकेऽनिष्ट उपसंहारः प्राप्नोति, एवं दार्ष्टान्तिके रघुवर्यस्य मत्स्यादेश्चावतारत्वेनाभेदेऽनिष्ट उपसंहारः स्यादतो न स्फुटमतोऽभेदादुपसंहार इत्यन्वयमकृत्वाऽभेदात् समानत्वेऽर्थवादवत्त्वे च नियामके च सत्युपसंहार इत्येवं स्फुटगुणोपसंहारप्रयोजकार्थम् । सुबोधिनीमिति । (अतो धर्मचतुष्टययुक्तत्वेन गुणोपसंहारन्यायेन तादृशः श्रोतव्यः) । वत्सदृश इति । मतुपो मस्य वकारे कृते वतिसदृशो मतुर्भवति सौत्रः । मध्यमपदलोपी समासः । निरवकाशं बाहुलकं वा क्वचिदन्यदेवेति । षष्ठीति । विधेरर्थवादः शेष इति । 'विधिना त्वेकवाक्यत्वा'दिति जैमिनिसूत्रादिति भावः । समुच्चय इति । यथा 'यद्वैश्वदेवेने'-

१. तद्वत्समानमिति पाठः ।

'यद्वैश्वदेवेन यजते, प्रजा एव तद्यजमानः सृजते' इत्येका श्रुतिरस्य यागस्य प्रजाफलकत्वमाह । 'यद्वैश्वदेवेन यजते, अग्निमेव तत्संवत्सरमाप्नोति, तस्माद्वैश्वदेवेन यजमानः संवत्सरीणाᳬं स्वस्तिमाशास्त इत्याशासीते'ति द्वितीया श्रुतिराह । तत्रोक्तरीतिरिति ।

भाष्यप्रकाशः ।

यदित्यादि । एते श्रुती तु तैत्तिरीयब्राह्मणप्रथमकाण्डस्थे चातुर्मास्यप्रथमपर्वभूतवैश्वदेवयागस्य फलद्वयबोधिके । तत्र प्रथमा स्फुटार्था । द्वितीयस्यां तु वैश्वदेवाख्यपर्वणः संवत्सराभिमान्यग्निप्राप्तिहेतुत्वात् तद्यागकाले तदीयसूक्तवाकमध्ये 'संवत्सरीणा'मितिमन्त्रसूक्तवाकाशीष्षु होता आशासीतेत्यर्थः । **तत्रोक्तरीतिरिति** । एकस्य कर्मणो वाक्यद्वयेन फलद्वयश्रावणात् फलद्वयसाधकत्वस्योपसंहारः । तथाच यथा तत्र, तथा यस्यामुपासनायां फलद्वयं श्रुतम्, यथा गोपालतापनीये 'यं मां स्मृत्वा निष्कामः सकामो भवति, अगाधा गाधा भवती'त्यादि, 'यो ध्यायति सोऽमृतो भवती'ति च, तत्र 'तं यथा यथोपासते तदेव भवति तद्धैतान् भूत्वावती'ति वाजसनेयिश्रुतेस्तत्तत्फलदत्वस्योपसंहारः, तेन 'फलं वा कर्मसन्निधा'विति पूर्वतन्त्रीयाधिकरण-

रश्मिः ।

त्यादिदृष्टान्तसमुच्चये । **तथाचेत्यादिनेति** । **भाष्यार्थस्तु तद्वदिति** । सूत्रे सप्तम्यालुक् । **तत्रेति** । तत्र अर्थवादवति चकारात्समाने । **श्रुत्यन्तरेति** । बृहदारण्यकस्थ 'तस्या आहुतेः पुरुषो भास्वरवर्णः सम्भवती'ति श्रुत्यन्तरोक्तं फलान्तरं छान्दोग्योक्तफलादन्यत् । तस्य साधकत्वं तस्य । **उदेति** । पूर्वोक्तदृष्टान्तोप्ययम् । तदा छान्दोग्यीयपञ्चाग्निविद्यास्थायामेकस्यां 'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती'ति फलं बृहदारण्यके तदितरस्यां 'तस्या आहुतेः पुरुषो भास्वरवर्णः सम्भवती'त्यस्यां तस्यां षष्ठाग्निसमाप्तिस्थत्वे तत्सदृश्याम् । **द्वितीयेति** । बृहदारण्यकश्रुत्युक्तभास्वरवर्णफलकामनया । **तदेवेति** । छान्दोग्यीयदेवैर्होमकर्म कर्तव्यमित्येवमेकस्यां श्रुतावित्यादिभाष्यार्थः कर्तव्यः । **चातुर्मास्येति** । अस्य चत्वारि पर्वाणि, वैश्वदेव-साकमेध-वरुणप्रघास-शुनासीरसंज्ञानि । **स्फुटार्थेति** । तत्र तत्तस्माद्यागात् । स्वीयं किञ्चिदाहुः **तथाचेति** । 'उपसंहारोर्थाभेदा'दित्यत्र हेतोरुत्तरान्वयित्वेपि । **यथा तत्र** । यथा तत्रोत्तरान्वये तथा तेन प्रकारेण हेतोः पूर्वान्वयेपि यस्यामुपासनायामित्यादिः । **स्मृत्वेति** । उपासनेयम् । **वेदनमुपासनमिति** । अत्र उपासनान्तरं वा ब्रह्मविषयकं फलविषयकं वेतिसंदेहे उपासनाप्रकरणान्तराभावात्फलविषयकं प्रतीयमानत्वादिति प्राप्ते, 'फल वा कर्मसंनिधा'विति न्यायेन निष्कामसकामत्वे फले । तयोरनित्यत्वान्नोपासनाविषयत्वम् । नित्यानित्यसंयोगप्रसङ्गात् । असन्निधेरुपासनान्तरम् । तस्मादुपासनान्तरम् । ब्रह्मविषयकं वेति उपासनभेदे प्राप्ते । निरूपणप्रकारभेदादिबाधकचतुष्टयनिवर्तकसूत्रम् । **उपसंहार इति** । अर्थयोर्ब्रह्मनिरूपणाभेदबाधकचतुष्टयनिवृत्त्योरभेदादभावस्याधिकरणात्मकत्वात् उपसंहारस्तत्तत्फलदत्वस्योपासनाविषये ब्रह्मणि । एवं 'अगाधा भवती'त्यत्र आदिना गाधा भवतीतिसंगृह्य फलद्वयं ज्ञेयम् । 'यं मां स्मृत्वे'त्यन्वेति तेन पूर्ववत् । तथा 'यो ध्यायती'त्यत्र ध्यानं फलममृतं च फलद्वयम् । एतदर्थं 'यो ध्यायति रसति भजति सोऽमृतो भवति सोऽमृतो भवती'त्यत्र वाक्यद्वयत्वेन तावती श्रुतिरुपात्ता । अत्रैतद्विषयकं शाब्दवेदनमुपासनम् । अन्यत्पूर्ववत् । **तत्रेत्यादि** । वाक्यत्रये उपासनाविषये च । **तत्तत्फलेति** । 'यं मा'मित्यर्थाभेदान्निष्कामसकामत्वफलदातार अगाधागाधाफलदातृत्वभाजं उपसंहारेणार्थयेत् । एव विपरीतम् । तथा 'यो ध्यायती'त्यत्र यत्तदोर्नित्यसम्बन्धादेकविभक्तिकत्वाच्चाभेदे आध्यात्मिकादित्रितयवेत्तरि ध्यातरि । **अमृतत्वोप-**

यत्तु विधिशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादिकर्म सर्वत्रे-त्यर्थाभेदादुपसंहार इति। तन्न साधु। अग्निहोत्रादेस्तत्तच्छाखिनां स्वस्वशाखोक्त-प्रकारकस्यैव करणादतिरेके प्रायश्चित्तश्रवणान्नान्यशाखोक्तधर्मोपसंहारः शक्य-

भाष्यप्रकाशः।

सिद्धप्रयोगभेदबाधनार्थमेतत्कथनमिति मम प्रतिभाति। एवञ्चास्मिन् पक्षे 'उपसंहारोऽर्थाभे-दा'दिति भिन्नं वाक्यम्। तत्र च पूर्वोक्ताशङ्कानिरासाय अर्थयोरभेदोऽर्थाभेद इति विग्रहः। तथाच अर्थो ब्रह्मरूपं वस्तु, निरूपणप्रकारभेदादिरूपबाधकचतुष्टयनिवृत्तिश्च तयोरभेदमनुसन्धा-येत्यर्थः। तेन वस्त्वभेदेऽप्युक्तप्रकारातिरिक्तप्रकारेण भावने पूर्वोक्तबाधकचतुष्टयापत्तेरुक्तरीत्या भावने च तन्निवृत्तेः सुखेनोक्तशङ्कानिरास इत्यर्थः। नन्वत्र परोक्तव्याख्यानं कुतो नाद्रियत इत्याकाङ्क्षायां यत्त्वित्यादिना तदनूद्य दूषयन्ति तन्न साध्वित्यादि। तथाच शिष्टाचारविरो-धादिभ्यस्तन्नाद्रियत इत्यर्थः। नन्वयं दोषस्तवापि तुल्यः, प्राणादिविद्यासु पञ्चमस्य रेतसः

रश्मिः।

संहारः सत्तानुकूलव्यापारवत्त्वस्य भवतेरर्थस्योपसंहारः। ध्यानविषयेऽमृतत्वसम्पादकत्वोपसंहारः। विपरीत च। तेनेत्यादि। तेनेति। शाबरभाष्योक्तरीत्योदाहरणत्रयेणाभेदबाधकचतुष्टयनिवृत्त्या अभेदेनो-पसंहारहेतुभूतेन सिद्धेन। 'फलं चे'त्येकसूत्रमधिकरणं द्वितीयस्य तृतीयचरणेऽस्ति। अर्थस्तु, अनारभ्य श्रूयते। 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः। अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामः। ऐन्द्राग्न-मेकादशकपालं निर्वपेत्प्रजाकाम' इति। अत्र संदेहः, किं प्राकृतेष्वाग्नेयादिषु फलं विधीयते, उत प्राकृते-ऽन्यत्, कर्मान्तराण्येतानि। किं प्राप्तम्, प्राकृतेषु फलविधिरिति। कुतः। विहिताग्नेयादयः प्रत्यभि-ज्ञायन्ते। तस्मात्तेषामनुवादः फलसम्बन्धार्थ इति। एवं प्राप्ते ब्रूमः। फलं वा कर्मसन्निधौ। फल च भेदककर्मसन्निधौ श्रूयमाणं कथं अनुवादे सति न शक्यते फलं विधातुम्। विधायकस्याभावात्। नह्यविधी-यमानोभ्युपायोतु(वादको)भवतीति गम्यते। अपिच। रुक्कामेत्र विधीयमाने कामस्यानित्यत्वादाग्नेयादीनां च नित्यत्वात्सम्बन्धो नावकल्पते। एवं सर्वत्र, कस्मान्न कर्मान्तराणीति। तथाचैवं पूर्वतन्त्रीयाधिकरणसिद्धः प्रयोगस्य भेदः। तद्बाधनार्थं एतस्य सूत्रस्य कथनम्। प्रतिभातीति। सन्देहसूचकार्थेनाभेदे दोषचतु-ष्टयवारकोर्थं इति निरूपणभेदादिदोषत्रयेपि 'योऽन्यथासन्तमात्मान'मित्युक्तो दोषश्चतुर्थो ज्ञेयः। रश्मौ नामरूपादिसमाहारो भेदसाधकः, चतुष्टयमात्रं नेत्युक्तम्। पूर्वतन्त्र एकसूत्र उक्ताधिकरणेऽसन्निधिर्भेदक उक्तः। एवं चेत्यादि। विषयवाक्यस्य दोषचतुष्टयवारकस्य त्रित्वे च। पूर्वोक्तेति। पूर्वतन्त्रीयप्रयोग-भेदरीत्या प्रयोगभेदशङ्कानिरासाय। अनुसमिति। निवृत्तिरभावोऽभावो धिकरणात्मेति परोक्तमभेदमा-श्रयेण ब्रह्मरूपवस्तुनानुसन्धायेति। ल्यब्लोपे पञ्चमीमाश्रित्य सूत्रीयोक्तवाक्यार्थः। पक्षान्तरप्रयोजनमाहुः तेनेति। पक्षान्तरेण। श्रीरामोपनिषत्सु 'यो वै ये मत्स्यकूर्माद्यवतारा' इत्याद्युदाहरणे वस्त्वभेदेऽर्थाभेदे हेतावपि। उक्तप्रकारः सकलसूत्रभाष्योक्तप्रकारस्तदतिरिक्तप्रकारेणोपसंहारं कृत्वा भावने। पूर्वोक्तस्य अत्रैव प्रकाशोक्तस्य बाधकचतुष्टयस्यापत्तेः। चतुष्टयत्वमुक्तप्रकारेण। उक्तरीत्येति। तथाचात्र श्रीरा-मादिष्वित्यादिप्रकाशोक्तरीत्या भावने दोषचतुष्टयनिवृत्तेः। सुखेन उक्तायाः पूर्वतन्त्रीयप्रयोगभेदरीत्या प्रयोगभेदशङ्कायाः निरास इत्यर्थ इति प्रयोजनम्। दोषचतुष्टयनिवृत्तिप्रकारस्तु श्रीरामादिषु मत्स्यावता-रत्वं मत्स्यरूपेण तत्कर्म, वैवस्वतमनो रक्षणं द्वादशस्कन्धोक्तं तत्कर्तृत्वम्, अष्टमस्कन्धे सत्यव्रतस्य तत्त्वोपदेशेन रक्षाकरणं वेदाहरणं च इत्येवमुपसंहारे न निरूपणप्रकारभेदः, नाप्यधिकारभेदः। एका-

१ प्रकारस्य।

वचनः । प्राणाद्युपासनास्वधिकगुणस्येतरत्रोपसंहारे न किञ्चिद्बाधकं दृश्यते इति तत्र स कर्तुं शक्यत इति चकारेण तदादयः संगृह्यन्ते । वस्तुतस्तु पूर्वसमुच्चयार्थश्चकारः । शाखान्तरोक्तधर्मोपसंहारप्रयोजनाभावस्य 'स्वाध्यायस्य तथात्वेने'त्यत्र निरूपितत्वात् । उपसंहारबीजमनेन सूत्रेणोक्तम् ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

ननूपासनासूक्तन्यायेन गुणोपसंहारो ह्युपास्यानां ब्रह्मत्वेनैक्ये सति भवति । मिथोविरुद्धानां गुणानां शान्तत्वक्रूरत्वतपोभोगादीनामुपसंहारे क्रियमाणे स्वरूपाणामन्यथात्वमब्रह्मत्वं स्यादित्यर्थः । तत्र हेतुः । शब्दादिति । एकत्वैकरसत्वादिधर्मनिरूपकश्रुतेरित्यर्थः । समाधत्ते नाविशेषादिति । एकरसत्वं यथा

भाष्यप्रकाशः ।

षष्ठस्याग्नेश्च भिन्नशाखीयत्वेनोपसंहारनिवृत्त्यापत्तेरित्यत आहुः प्राणादीत्यादि । तदादय इति । प्राणविद्यादयः । तथाच तत्र तदुपसंहारेऽधिकानुप्रवेशेन संख्याया अबाधे निरूपणप्रकारभेदस्याबाधकत्वात् कर्मवन्न्यूनातिरेके प्रायश्चित्तस्य तत्राश्रवणात् सम्बन्ध्यभेदाच्च न किञ्चिद्बाधकमिति ता विद्या अनुक्तसमुच्चायकेन चेन संगृह्यन्त इति नास्मन्मते स दोषः । वस्तुतस्त्वस्याः शङ्कायाः समाचारसूत्रविचारादेवानुदयात् पूर्वोक्तस्यार्थभेदस्यैव समुच्चयार्थश्चकार इत्यर्थः । ननु ब्रह्माभेदस्यातीतपादे सिद्धत्वेऽप्यत्रारम्भे पुनस्तत्साधनप्रयोजनभूतस्योपसंहारस्यार्थादेव सिद्धेः प्राणादिविद्यासंग्रहस्यापि सिद्धेरेतत्सूत्रं व्यर्थमिति शङ्कायामाहुः शाखेत्यादि । उपसंहारबीजमिति । उपसंहारहेतोर्बाधकाभाववैशिष्ट्यरूपं तत्तत्फलार्थत्वरूपं च बीजम् । तथाच न वैयर्थ्यमित्यर्थः ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ ज्ञानमार्गीयोपासनायां सर्वगुणोपसंहारे बाधकमाशङ्क्य परिहरतीत्याशयेनाहुः नन्वित्यादि । तथाच विरुद्धगुणोपसंहारे एकरसता-

रश्मिः ।

धिकारित्वात् । असाधारणसम्बन्धिभेदोपि नास्ति । शिष्टादृतत्वात् । चतुर्थः श्रुतिविरोधरूपः । सोपि नास्ति । आश्चर्ये रसेऽन्यथारूपत्वस्य श्रुत्यमीमांसितरूपत्वादिति । एवं कूर्मावतारेपि बोध्यम् । प्रकृतमनुसरन्ति स्म **नन्वत्रेति** । **प्राणविद्येति** । आदिना वाक्चक्षुःश्रोत्रमनसां विद्याः । **अग्निहोत्रादेरि**त्यादिभाष्यसिद्धार्थमाहुः **तथाचेत्यादिना** । **तत्रेति** । छान्दोग्यीयपञ्चाग्नौ बृहदारण्यकोक्तषष्ठाग्निरूपाधिकानुप्रवेशेन संख्याया अबाधः, न तु तद्धानिरिति न्यायांशेन तस्मिन् सति । **अबाधकत्वादिति** । अभेदाबाधकत्वात् । संख्याबाधस्योत्तेजकस्य सत्त्वादिति भावः । **सम्बन्धीति** शिष्टः । **स** इति । विद्याभेदरूपो दोषः । वस्तुतस्त्वित्यादिभाष्यार्थो **वस्तुतस्त्वित्यादिः** । **अस्या** इति । नन्वयं दोषस्तवापीत्यादिग्रन्थेनोक्तायाः । **समाचारेति** । समाचारसूत्रस्य विचारो येन भाष्येण तस्मात् । **पूर्वोक्तस्येति** । अतीतपादोक्तस्य ब्रह्माभेदस्य हेतुपञ्चमीलुप्तस्य । **ब्रह्माभेदस्येति** । केनेति चेत् । न । 'कार्येण स्वधर्मैश्चे'ति तत्रैव स्फुटम् । **अतीतेति** । 'न भेदादिति चेन्न प्रत्येकमतद्वचना'दित्यादिसूत्रेषु । **शाखेत्यादीति** । उत्तरत्राप्ययं हेतुरिति भावः । **उपेति** । अधिकाररूपस्य । भाष्य उपसंहारशब्दो लाक्षणिक इति भावः । यद्वा । उपसंहारः स्वाध्यायसूत्र उक्तः । तत्र हेतुरर्थादभेदरूपः । 'ससारमहीरुहस्य बीजाये'त्यत्र बीजपदं हेतुरिति व्याख्यानम् । सूत्रार्थस्तु **एवं चेत्यादिना** योजनेत्यन्तेनोक्तः ॥ ५ ॥

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ **भाष्ये । उक्तेति** । उक्तसूत्रेणो-

श्रुतिबलान्निर्णीयते, तथा विरुद्धधर्मवत्त्वमपि तत एव तथेत्यर्थः । तेन वस्त्वेव तत्ताद्दङ्मन्तव्यमिति भावः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

पूर्वसूत्रोक्ताशङ्कानिराकरणं वा विकल्पेन पूर्वोक्तात् प्रकारान्तरेण कर्तव्यमित्याह न वेति । तमेवाह प्रकरणभेदादिति । अत्रायं भावः । श्रुतिप्रामाण्यात् यावत्तदुक्तधर्मवद्ब्रह्मेति मन्तव्यम् । एवं सति यादृशोऽधिकारिणो यादृग्वेद्यं रूपम्, तादृशस्य तस्य तादृक् तन्निरूपयति प्रकरणभेदेन । तथाच ज्ञानप्रकरणे ज्ञानाधिकारिणो यादृग्रूपं ज्ञेयम्, तादृक् तस्मै निरूपयति 'अदृश्यमग्राह्य'मित्यादिरूपा श्रुतिः । भक्तिप्रकरणे तु भक्तेर्बहुविधत्वात् यादृग्यादृग्भक्तानां यादृग्यादृक्तदनुभवविषयः, तादृक्तादृक् तन्निरूपयति अथर्वणोपनिषदिति । अत्र दृष्टान्तमाह परोवरीयस्त्वादिवदिति । 'अस्मिन् मे लोकेऽर्धुकश्स्या'दिति कामवत आराग्रावान्तरदीक्षा पूर्वमुक्ता । तदग्रे 'परोवरीयसीमवान्तरदीक्षामु-

---

भाष्यप्रकाशः ।

निवृत्त्या अपेते ब्रह्मत्वेऽर्थभेदरूपहेतोस्ततो निवृत्तत्वादुपसंहार एव न स्यादिति भावः । समाधिं व्याचक्षते एकेत्यादि । सिद्धमाहुः तेनेत्यादि । तथाच शब्दबलकृतनिर्णयस्योभयत्रापि तुल्यत्वात् सिद्धे ब्रह्मत्वेनाभेदे 'एकोऽहं बहु स्या'मिति श्रुत्या ब्रह्मैव स्वेच्छया 'विज्ञानमेकमुरुधेव विभाती'ति न्यायेन जीवप्रज्ञापराधात् तथा भातीति ब्रह्मत्वप्राधान्येनोपासनायां नोपसंहारबाध इत्यर्थः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥ पूर्वसूत्रे 'अन्यथात्वं शब्दा'दित्यंशेन यदाशङ्कितम्, तस्यैवास्मिन् सूत्रे प्रकारान्तरेण परिहारमाहेत्याशयेन व्याकुर्वन्ति पूर्वसूत्रेत्यादि । विकल्पेनेत्यस्यैव विवरणं पूर्वोक्तादित्यादि । तथाच अन्यथात्वं प्रकरणभेदाद्वा नेति सूत्रयोजना । हेतुं विवृण्वन्ति अत्रायमित्यादि । उपनिषदितीत्यन्तम् । तथाच ब्रह्मणि सर्वत्र सर्वगुणसत्त्वेपि न सर्वत्र सर्वं प्रकटयतीति प्रकरणभेदेन तत्तद्रूपतदीयतत्तद्गुणकथनादवगम्यते, तथा सति तत्तदधिकारिणातत्तद्गुणा एव तत्र भावनीया इति स्वरूपाणामन्यथात्वाभावात् तस्मिंस्तस्मिन्नुपास्ये रूपे तदेकत्वतदेकरसत्वयोरनपायान्नाब्रह्मत्वम् । अत एव 'अपि संराधन'सूत्रे 'ज्ञानप्रसादेने'ति श्रुत्या ज्ञानाधिकारिणो निष्कलदर्शनम्, भक्त्यधिकारिणोऽर्जुनस्य 'अनेकबाहूदरे'ति स्मृत्या तद्दर्शनमुक्तमिति सङ्गच्छते । तस्मान्नात्र शङ्केत्यर्थः । अत्र दृष्टान्तमाहेति । एवं श्रुत्याशये विनिगमकं दृष्टान्तमाहेत्यर्थः । विषयवाक्योदाहरणेन दृष्टान्तं

रश्मिः ।

पसंहारबीजबोधकेन । मन्तव्यमिति । मननयोग्यमित्यर्थः ॥ ६ ॥

न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥ इत्यन्तमिति । भाष्ये । बहुविधत्वादिति । ननु सगुणमार्गे 'भक्तिमार्गो बहुविध' इति वाक्यमिति चेत् । न । 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इति वाक्याद्यदा भक्तिसाधनत्वम्, तदा सगुणभक्तिमार्गस्याप्यदुष्टत्वमिति ज्ञापनार्थत्वात् । नेति । क्रीडार्थं न प्रकटयतीत्यर्थः । अपीति । अतीतपादेस्ति

पेयात्, यः कामयेतामुष्मिन् मे लोकेऽर्धुकः स्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षे'ति पठितम् । अस्य दीक्षाप्रकरणे पठितत्वात् दीक्षां विनोक्तरीत्या व्रते तु न परोवरीयस्त्वम्, एवं भक्तिप्रकरणीयानामथर्वणोपनिषदाद्युक्तरूपाणां न भक्तिरहितोपास्यत्वम् । ज्ञानसाधनत्वेन विष्णुस्मरणादावपि क्रियमाणे भक्तित्वं नेति ।

भाष्यप्रकाशः ।

विवृण्वन्ति अस्मिन्नित्यादि । इदं वाक्यं तैत्तिरीयसंहिताषष्ठकाण्डद्वितीयाध्यायस्थम् । अर्थस्तु, अहीनाख्ये सोमयागे अहीनसत्रे च उपसद्दिनसंख्यां पूर्वं विधाय तेषु दिनेष्ववान्तरदीक्षाङ्गव्रतपानस्तनसंख्यां विधत्ते, तत्रावान्तरदीक्षा द्विविधा, योऽस्मिन् लोके समृद्धिशीलं फलं कामयते, तस्याराग्रावान्तरदीक्षा, सोमक्रयदिने सायमेकस्तनम्, अपरेद्युः प्रातर्द्वौ स्तनौ, सायं त्रीन् स्तनान्, परेद्युः प्रातश्चतुरः स्तनान्, एवं पाने आराग्रावान्तरदीक्षा सिध्यति । सा पूर्वमुक्ता । आरं बलीवर्दप्रतोदनलोहम्, तद्वदग्रं मुखं यस्याः सा आराग्रा । तदग्रे परोवरीयसीवाक्येऽन्या । तत्र विपरीतं व्रतम्, सोमक्रयणदिने चतुरः स्तनान् दुह्युः, अपरेद्युः प्रातस्त्रीन्, सायं द्वौ, परेद्युः प्रातरेकमित्येवं दिनत्रय इति । तेन सिद्धमाहुः अस्येत्यादि । तथाच तत्तद्भक्तिमतां तथा तथोपासनापरिपाके तत्र ब्रह्मत्वस्यानुभवान्नाब्रह्मत्वशङ्कोदयः । अभक्तशङ्कामात्रेण तु न तत्र तद्बाध इति तेषां ब्रह्मत्वं निर्विघ्नमित्यर्थः । ननु ज्ञानार्थमपि विष्णुस्मरणादेः क्रियमाणत्वात् कथं न तेषां रूपाणां भक्तिरहितोपास्यत्वमित्यत आहुः ज्ञानेत्यादि । इदं भक्तिहंसे प्रपञ्चितम्, अतो नात्र व्युत्पाद्यते ।

रश्मिः ।

सूत्रम् । विषयेति । परोवरीयस्त्वं विशेषेण सिनोति बध्नातीति विषयस्तत्प्रतिपादकवाक्यस्योदाहरणेन । तैत्तिरीयेति । क्वचिदध्यायशब्दः यथा महीधर्यां शाखाभेदेन । उपसद्दिनेति । .... । अवान्तरेति । अवान्तरा दीक्षा तस्या अङ्गव्रते पाने स्तनानां संख्यां एकत्वद्वित्वत्रित्वचतुष्ट्वरूपां संख्याम् । समृद्धीति । अर्धुकपदार्थः । सोमेति । 'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति' तद्दिने । यस्या इति । दीक्षायाः । तेन दीक्षारूपदृष्टमिति ज्ञायते । अस्येत्यादीति । अस्य परोवरीयसः । परोवरीयो व्रतम्, दीक्षान्तःपातित्वात् । उक्तरीत्येति । स्तनपानोक्तरीत्या । व्रते तु नेति । यतः परोवरीयसी दीक्षेति भावः । भक्तीति । भक्तिप्रकरणं 'किं भजन'मिति प्रश्ने, 'भक्तिरस्य भजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन्मनःकल्पनमेतदेव च नैष्कर्म्य'मिति श्रुतेः । भक्तिप्रकरणीयानां गोपालकृष्णगोविन्दानाम् । आदिना यजुराद्युक्तरूपाणाम् । अथर्वणशब्दः स्वार्थेऽण्प्रत्ययान्तः । ह्रस्वश्छान्दसः । न भक्तीति । उपासनाशेषरूपा भक्तिः । श्रीभागवते 'यद्यनीशो धारयितु'मित्यादिनैकादशस्कन्ध एकादशेऽध्याये । एवमुपासनायाः विभूतिविषयकत्वं यत्तद्वारयन्ति, परिपक्वोपासनायाः मनःकल्पनरूपभक्तित्वोक्त्या । तथाचेति । भक्त्या मनोव्यापारविशेषोपासनापरिपाके मनःकल्पनरूपत्वाद्भक्तित्वमिति तत्र भक्तिविषये ब्रह्मत्वस्य पुरुषोत्तमत्वस्यानुभवाद्विषये न अब्रह्मत्वशङ्कोदयः ब्रह्मभिन्नविभूतित्वशङ्कोदयः । विषये ब्रह्मत्ववत् उपासकेपि भक्तत्वं प्राप्तमित्याशयेनाहुः अभक्तेति । तत्र तदिति । उपासनाविषयेऽब्रह्मत्वबोधः । उपासनाङ्गभक्तावुक्त्वा ज्ञानाङ्गभक्तावाहुः नन्विति । 'यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्त'मितिवाक्याज्ज्ञानार्थमित्यादिः । तेषामिति । ज्ञानविषयाणां रूपाणाम् । ज्ञानेत्यादीति । भक्तित्वं नेति । किन्तूपासनाशे-

अथवा। पूर्वसूत्रेण सर्वरूपेषु मिथः सर्वधर्माणामुपसंहारः प्राप्तः। स चैकान्तिकभक्तानुभवविरुद्ध इत्यत्र व्यवस्थितविकल्पमाह न वेत्यादिना। सर्वेष्ववतारेषु भगवदवतारत्वेन साधारणी भक्तिर्यस्य, स सर्वत्रोपसंहारं करोतु नाम। यस्त्वेकान्ती, तस्य स्नेहोत्कर्षेणान्तःकरणमेकस्मिन्नेव रूपे पर्यवसितमिति रूपान्तरमन्तःकरणारूढं न भवत्येवेति नोपसंहारसम्भावनापीति। तदेतदुच्यते न वेत्यनेन। तत्र हेतुः। प्रकरणभेदादिति। श्रुत्यादिषु तत्तदधिकारिणमुद्दिश्य तत्तत्प्रकरणमुक्तम्। तेनात्र प्रकरण[1]पदेन अधिकार उच्यते। एवं सत्युपासकादिभ्य उक्तरीत्योत्कृष्टाधिकारादित्यर्थः सम्पद्यते। परोवरीयस्त्वादिवदिति। परस्मात्परश्च, वराच्च वरीयानिति परोवरीयानुद्गीथः। तथाचाक्ष्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोपासनाया अप्युद्गीथोपासनत्वेन साम्येपि सर्वोत्कृष्ट-

भाष्यप्रकाशः।

अथ पूर्वसूत्रेणैवोक्ताशङ्कानिवृत्तावस्य न तथावश्यकत्वमित्यरुच्या प्रकारान्तरेण सूत्रं व्याचक्षते अथवेत्यादि। पूर्वसूत्रेणेति। उपसंहारसूत्रेण। इत्यत्र व्यवस्थितविकल्पमाहेति। इति हेतोरस्मिन् सूत्रे तथाहेत्यर्थः। व्यवस्थास्वरूपं स्फुटीकुर्वन्ति सर्वेष्वित्यादि। तदेतदिति। व्यवस्थितं विकल्पनम्। तत्र हेतुरिति। व्यवस्थायां हेतुः। नन्वस्तु व्यवस्थायामधिकारभेदस्य हेतुत्वम्, तथाप्यनुपसंहार उत्कृष्टाधिकारो हेतुरिति कथं गम्यते इत्याकाङ्क्षायां दृष्टान्तेन गम्यते इति बोधनाय दृष्टान्तमुपन्यस्य व्याकुर्वन्ति परस्मादित्यादि। छान्दोग्ये प्रथमप्रपाठके प्रवाहणेनोद्गीथकुशलतमेनोद्गीथविद्यासमाप्तावुक्तम्। 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्, स एष परोवरीयानुद्गीथः, स एषोऽनन्त' इति तद्विद्यायामेवाक्ष्यादित्यादिप्रतीकोपा-

रश्मिः।

षभक्तित्वम्। पूर्वसूत्रेणेति। उपसंहारसूत्रेण। उक्ताशङ्का अर्थभेदे रघुवर्ये शृङ्गादिभावनाशङ्का तस्याः विरुद्धधर्माश्रयत्वमन्तरापि 'विधिशेषव'दितिदृष्टान्तबलेन निवृत्तौ। न तथेति। न मुख्यत्वेन प्रकारेण। दृष्टान्तबलेन शङ्कानिवृत्तावपि प्रकरणभेदस्य सत्त्वादिति भावः। नचाग्निहोत्रप्रकरणत्वेन भेदाभाव इति शङ्क्यम्। अस्तु, परन्तु तथावश्यकत्वं नेति। किञ्च, सौत्रादिशब्दार्थौ नेत्यरुच्यापि। उपसंहारेति। अन्यथात्वसूत्रेणेति नोक्तम्। तत्र विरुद्धधर्माश्रयत्वेन शङ्कानिवर्तनात्। ननु तत्र प्रकरणप्राप्तिर्यथाकथञ्चिदिति। तेनोपसंहारसूत्रेऽर्थभेदेप्युक्ताशङ्का दृष्टान्तबलेन निवृत्ता। अन्यथात्वसूत्रे साशङ्का विरुद्धधर्माश्रयत्वेन निवृत्ता। अत्र प्रकरणभेदेन निवृत्ता। पक्षान्तरे दृष्टान्तबलेन निवृत्तिपक्षे यथाकथञ्चित्प्रकरणभेदेन निवृत्तिमाश्रित्याधिकारभेदेन शङ्का निवर्त्यत इति। पूर्वसूत्रे 'अन्यथात्वं शब्दा'दित्यंशेनेत्यादिप्रकाशस्त्वविरुद्धः। भाष्ये। ननु प्रकरणस्य उपसंहारसूत्रे 'स्वस्वशाखोक्तप्रकारकस्यैवे'त्यत्र सन्निवेशेन पुनरुक्तिरित्याशङ्क्याहुः श्रुत्यादिष्विति। उच्यत इति। हेतुतासम्बन्धरूपलक्षणयोच्यते। उद्गीथेति। इदं विशेषणमुद्गीथविद्यावक्तृत्वेन। 'शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिः'। अत्रेतरे श्रोतार इति। तथाचेति भाष्यं विवृण्वन्ति स्म तद्विद्यायामिति। 'ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायती'त्यादिनोक्तोद्गीथविद्यायाम्। अक्ष्यादित्यादीति। आदित्यश्च अक्षि च अक्ष्या-

1. भेदेन।

स्त्वेनैवोद्गीथो भासत इति न हिरण्यश्मश्रुत्वादिगुणोपसंहारः परोवरीयस्त्व गुणविशिष्टोद्गीथोपासनायाम्, एवं प्रकृतेपीति ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

एकान्त्यनेकान्तिनोरपि श्रीरामोपासकत्वादिसंज्ञा त्वविशिष्टेत्येकान्तिनोप्युपसंहारो युक्त इत्याशङ्कोत्तरं तु 'न वा प्रकरणभेदा'दित्यनेनैवोक्तम् । संज्ञा

भाष्यप्रकाशः ।

सनाप्युक्ता, अतस्तत्र हिरण्यश्मश्रुत्वादिगुणसत्त्वेपि सामगतिपरंपराविश्रान्तिस्थानभूतपरोवरीयस्त्वगुणविशिष्टोपासकस्य ते गुणा नैतस्मादुत्कृष्टत्वेन भान्तीति न तदुपसंहारः, तथा तत्तदेकान्तिन उपास्ये रूपे गुणान्तरसत्त्वेपि तेषामुत्कृष्टत्वेन भानाभावान्नोपसंहार इत्यर्थः ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥ पूर्वसूत्रेऽधिकारभेदेनोपसंहारानुपसंहारौ व्यवस्थापितौ, तां व्यवस्थामेव दृढयितुं किञ्चिदाशङ्क्य परिहरतीत्याशयेन पठित्वा व्याकुर्वन्ति एकान्तीत्यादि । उक्तमिति । रूपप्राधान्यवानेकान्ती, ब्रह्मत्वप्राधान्यवाननेकान्ती, तयोरुक्तसं-

रश्मिः ।

दित्यौ अक्ष्यादित्यौ आदी यस्य 'य एषोऽक्षिणि पुरुषो दृश्यत' इति श्रुत्युक्तस्याक्षिपुरुषस्य सोक्ष्यादित्यादिः सप्रतीकः तस्योपासनाः । प्युक्ता इत्यत्र 'वष्टिभागुरिरल्लोप'मित्यल्लोपः । अतस्तत्रेति । उक्तत्वात् तत्र आदित्यरूपप्रतीके । आदिना हिरण्यकेशत्वसर्वसुवर्णत्वोदितिनामत्वानि । सामगतीति । 'त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति, ते होचुरुद्गीथे वै कुशलाः स्मो, हन्तोद्गीथे कथां वदाम इति । तथेति ह समुपविविशुः । स ह प्रवाहणो जैवलिरुवाच, भगवन्तावग्रे वदेताम्, ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति, स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यं उवाच, हन्त त्वा पृच्छानीति, पृच्छेति होवाच, का साम्नो गतिरिति, स्वर इति होवाच, स्वरस्य का गतिरिति, प्राण इति होवाच, प्राणस्य का गतिरिति, अन्नमिति होवाच, अन्नस्य का गतिरिति, आप इति होवाच, अपां का गतिरिति, असौ लोक इति होवाच, अमुष्य लोकस्य का गतिरिति, न स्वर्गं लोकमतिनयेदिति होवाच, स्वर्गं वयं लोकꣳ सामाभिसꣳस्थापयाम' इति सामगतिपरम्परा तस्या विश्रान्तिस्थानभूतः । 'अस्य लोकस्य का गतिरिति, आकाश इति होवाच, सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त' इत्यादिनोक्ताकाशः । अग्रे गतिवचनाभावात् । स एव परोवरीयस्त्वविशिष्टः । 'स एष परोवरीयानुद्गीथ' इति श्रुतेः । तस्योपासकस्य । श्रुतौ शिलकः नामतः शालावत्यः शलावतोऽपत्यं छान्दसो ण्यः गर्गादिभ्यो यञ् । चैकितायनः चिकितायनस्यापत्य छान्दसः प्रत्ययोण् क्वचिदुत्सर्गोपि विशेषस्य बाधक इतीञं बाधित्वाण्वा । दाल्भ्यो नामतः गोत्रतो वा । प्रवाहणो नामतः । जिवलस्यापत्यं जैवलिः अत इञ् । वदतां वदेतामित्यर्थः । द्विवचनस्थाने एकवचनं छान्दसम् । गतिः कारणम् । प्राणो बलम् । असौ लोकः स्वर्लोकः । न सर्गं लोकमतिनयेदिति । स्वर्लोकमतीत्याश्रयान्तरं न प्रापयेत् । स्वर्गमित्यादि । अतो वयमपि स्वर्लोकं प्रति साम अभिसंस्थापयामः । स्वर्गलोकप्रतिष्ठितं साम जानीम इति । त इति । हिरण्यश्मश्रुत्वादयः । एतस्मात् परोवरीयस्त्वगुणात् । तदुपेति । तेषां अनधिकारोपाधिकानुत्कृष्टत्वेन भातानां धर्माणामुपसंहारः ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥ भाष्ये । श्रीरामोपासकत्वादिसंज्ञेति ।

१. अत्रोद्गीथ इति पाठ । २. उक्तमिति, अधिकारस्यानुपसंहारनियामकतासमर्थनादुक्तमिति श्रीहस्ताक्षरेषु पूर्वपाठः ।

तु लौकिकी, अधिकारस्त्वान्तरः। स एव बलीयानिति। संज्ञैकत्वस्य हेतोरन्वयव्यभिचारमाह अस्ति तु तदपीति। प्रमितभेदेष्वप्युपासनेषु परोवरीयस्त्वादिषु संज्ञैकत्वमुद्गीथोपासनेत्यस्तीत्यर्थः ॥ ८ ॥

भाष्यप्रकाशः।

ज्ञैकत्वेनोपसंहारप्रयोजनकहेतुचतुष्टयसिद्धौ रूपप्राधान्यकृताधिकारमात्रस्याप्रयोजकत्वात्तथेत्याशङ्कोत्तरं त्वतिप्रसङ्गवारकतयावश्यकत्वेन अधिकारस्योपसंहारनियामकतासमर्थनादुक्तम्। संज्ञैकत्वस्येत्यादि। अधिकारस्यान्तरत्वेपि प्रमाणेष्वगणनान्न संज्ञातो बलीयस्त्वमित्याशङ्क्य तस्य तथात्वमाहेत्यर्थः। प्रमितभेदेष्वित्यादि। छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीते'त्युद्गीथावयवं प्रणवं प्रस्तुत्य, तस्य रसतमत्वादिगुणोपव्याख्यानपूर्वकं 'देवासुराः संयतिर' इत्यादिना, 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिर' इत्युद्गीथावयवप्रणवविषयमुपासनमुच्यते। तथा आदित्याक्षिपुरुषप्रतीककम्, तथा आकाशमुपक्रम्य परोवरीयस्त्वगुणकम्। वाजसनेयके तु 'हन्तासुरान् यज्ञ उद्गीथेनात्ययामे'ति कृत्स्नमुद्गीथं प्रस्तुत्य, 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गाये'त्यादिना कृत्स्नोद्गीथविषयमासन्योपासनमुच्यत इति प्रकरणभेदविषयभेदाभ्यां प्रमितभेदेष्वपि तेषु सा संज्ञास्ति, उपसंहारहेतुर्विद्यावेद्ययोरभेदस्तु नास्तीति न संज्ञामात्रेणोपसंहारः

रश्मिः।

देवदत्तेतिसंज्ञा इत्यादिप्रयोगे योगे रूढौ च संज्ञाशब्ददर्शनात्समुदायशक्तिरवयवशक्तिर्वा संज्ञेति तथा। धर्माणां जात्यतिरिक्तानां स्वरूपत्वमतः संज्ञात्वमपीति। शब्देन्तर्भावोपि संज्ञाशब्द इति प्रयोगात्। प्रकृते संज्ञात इति। प्रमाणभूतशब्दरूपातः। तस्येत्यादि। अधिकारस्य बलीयस्त्वं सद्धेतुत्वेनाहुः। भाष्यार्थस्तु संज्ञास्त्वविशिष्टेत्युक्तभाष्यसिद्धस्य संज्ञैकत्वस्य हेतोः उपसंहारकर्ता व्यवस्थाभाववान् संज्ञैकत्वादस्योक्तरामोपासके साध्याभाववद्वृत्तित्वलक्षणं व्यभिचारमाहेति। भाष्ये। प्रमितेत्यादि। प्रमिताः प्रकारा येषामुपासनानां तेषु। यत्परोवरीयस्त्वं गुणः परोवरीयस्त्वादिगुणेषु। आदिनाक्ष्यादित्यप्रतीके गता हिरण्यश्मश्रुत्वादयो गुणाः। सौत्रत्वात्परोवरीयस्त्वस्यादित्वम्। तत्र साध्याभाववति हेतुः संज्ञैकत्वं किं साध्याभाववदित्यत आहुः उद्गीथेति। उद्गीथोपासने उद्गीथोपासकत्वरूपे साध्याभाववतीत्यर्थः। अत्यस्ति अत्यन्तमस्त्यन्यापेक्षया। अप्यस्तीति वा पाठः। तत् सूत्रीयं सिद्धं संज्ञैकत्वं हेत्वाभासरूपं तु अस्त्यपि। अपिरुद्गीथोपासनरूपपदार्थसम्भावने। प्रकृते। तदेतदाहुः छान्दोग्ये ओमित्यादि। उद्गीथावयवमिति। उद्गीथोऽष्टमो रसतमः तस्यातिशयरसस्य रसा अवयवा इति। प्रणवपदं अष्टरूपाभिप्रायेण। अन्यथाष्टमपदं निरर्थकं स्यात्। पञ्चाध्याय्या'मष्टकृष्णा भवन्ती'ति सुबोधिन्यामिति प्रतिभाति। सर्वभावेपि सारसर्वभाव इत्यपि। तस्येत्यादि। तस्य प्रणवस्य। 'तस्योपव्याख्यानमेषां भूतानां पृथिवी रस' इत्यादिश्रुतेः रसतमत्वादिगुणैरुपव्याख्यानं तत्पूर्वकम्। अत्ययामेति। अतिपूर्वः अय गतौ पदव्यत्ययः। प्रमितेति। प्रमिता भेदाः प्रकारा येषामुपासनानां तेषु। तेष्विति उपासनेषु। परोवरीयस्त्वादिगुणेषु च। ते च ते च ते तेष्विति विग्रहात्। तत्रापि उद्गीथोपासन उक्तरूपे साध्याभाववति एकत्वमेकवचनलभ्यं संज्ञैकत्वस्येत्यत्रेत्याशयेनाहुः सा संज्ञेति। एकत्वं विवक्षितम्। प्रकृत्यर्थः प्रत्ययार्थे सामानाधिकरण्यसम्बन्धेनान्वेति। 'एकं रूपं रसात्पृथ'गित्यत्रेव। संज्ञाशब्दाधिकर-

१. मर्यादा।

भाष्यप्रकाशः ।

प्रयोक्तुं शक्यते, अतो न पूर्वोक्तव्यवस्थाभङ्ग इत्यर्थः । एवमन्यथात्वसूत्रेण परोवरीयःसूत्रप्रथमवर्णकेन च वेद्यैक्यबाधकं परिहृतम्, तद्द्वितीयवर्णकेन संज्ञासूत्रेण च समाचारसूत्रोक्ता अधिकारस्योपसंहारनियमहेतुता प्रपञ्चितेति चतुःसूत्र्यां परापरविद्यासाधारण्येन तौ निर्णीतौ । एवमत्र स्वाध्यायसूत्रमारभ्य षड्भिः सूत्रैरुपसंहारप्रकारो विचारितः । तेनात्र गुणोपसंहारो विषयः । स च सर्वैः सर्वेषूपास्येषु पुरुषेषु सर्वेषां गुणानां कर्तव्यः, उत तैस्तैस्तेषु तेषु तेषां तेषामिति संशयः । तत्राद्यः पूर्वः पक्षः । मार्गभेदेन यथाधिकारं कर्तव्य इति सिद्धान्तः फलति । एवञ्चात्र सामान्यतः स्वभावरूपा गुणास्तत्तत्कार्यकर्तृत्वादयश्च यथाधिकारमुपसंहार्यत्वेनानुपसंहार्यत्वेन विचारिताः ।

अन्ये तु, एतत्रिसूत्र्यां छान्दोग्यवाजसनेयकोक्तयोरुद्गीथविद्ययोरभेदो भेदो वेति संशयमापाद्य, पूर्वसूत्रे अभेदं पूर्वपक्षीकृत्य, सूत्रद्वयेन प्रक्रमभेदकृतरूपभेदात् संज्ञाया लौकिकत्वात् व्यभिचारित्वाच्च विद्याभेदं सिद्धान्तयन्ति ।

तत्तु तादृशसिद्धान्तस्य प्रथमसूत्रोक्तचोदनाद्यविशेषरूपहेत्वेकदेशभूतरूपाभावे पूर्वोक्तहेत्वभावादेव सिद्धत्वान्नात्यावश्यकमिति प्रतिभाति ॥ ८ ॥ २ ॥

रश्मिः ।

णवृत्तिरेकत्वम् । संज्ञैकत्वमिति यावत् । तथाच सा संज्ञैकत्वरूपा संज्ञास्तीत्यर्थः । हेतुत्वेनान्वये व्यभिचारमित्यर्थेऽन्वयशब्दो नातिप्रयोजनोऽतो यत्रयत्र संज्ञैकत्वम्, तत्रतत्र व्यवस्थाभाववत्त्वमित्यन्वयस्य व्यभिचारः । **उपसंहारेति** । उपासनेषु नास्ति । 'उपसंहारोर्थाभेदा'दिति सूत्रोक्तः । अत उद्गीथोपासन उक्तरूपेपि नास्तीति भावः । **इतिर्हेतौ** । स न पूर्वोक्तव्यवस्थाभङ्ग इत्यनेनान्वयी । संज्ञामात्रेण संज्ञैकत्वेतराकरणके सति संज्ञैकत्वकरणेन । पूर्वोक्तव्यवस्थाभङ्ग उक्तस्तं निवारयन्ति स्म **न संज्ञामात्रेणे**ति । संज्ञामात्रेण उपसंहार उपसंहारानुपसंहारव्यवस्था न प्रयोक्तुं शक्यते, संज्ञया उपसंहारहेतुना विद्यावेद्ययोरभेदेन तु उक्तव्यवस्था प्रयोक्तुं शक्यतेऽतः हेतुद्वयाभावात् । संज्ञामात्रेण न पूर्वोक्तव्यवस्थाभङ्ग इत्यर्थः । पूर्वोक्ता व्यवस्था एकान्तिनोऽनुपसंहारो विरुद्धधर्माणामनेकान्तिन उपसंहार इति पूर्वोक्ता व्यवस्था तस्या भङ्ग इत्यर्थः । निष्कृष्टार्थमाहुः **एवमन्यथात्वेति** । **वेद्यैक्येति** । वेद्यैकत्वे बाधकमब्रह्मत्वापादनं प्रकरणभेदश्च । **परापरेति** । परविद्याऽक्षराधिगमः तत्साधारण्येन तौ उपसंहारानुपसंहारौ वेद्यैक्यबाधकपरिहारेण निर्णीतौ । **वस्त्वेव तादृक्त्वन्तव्यमि**ति भाष्येण 'इदं भक्तिहंसे प्रपञ्चितमतो नात्र व्युत्पाद्यत' इति प्रकाशेन च निर्णीतौ । अपरविद्या 'ऋग्वेदो यजुर्वेद' इत्याद्युक्तऋग्वेदादिः तत्साधारण्येन तावुपसंहारानुपसहारौ अधिकारस्यानुपसंहारहेतुताप्रपञ्चनेन निर्णीतौ । समाचारसूत्रे स्वाध्यायपदस्य वेदवाचकत्वेनापरविद्यात्र । **आपाद्येति** । अभेदापादनं यदि संज्ञैकत्वं न स्यात्, तदा विद्यैकत्वं न स्यादिति संज्ञात इति सूत्रे भेदापादनं यदि विद्यैकत्वं स्यात्, प्रक्रमभेदो न स्यादिति ग्रन्थपर्यालोचनेनापाद्य । प्रक्रमस्तु अन्यथा प्रक्रमन्ते वाजसनेयिनः । अन्यथा छन्दोगाः । 'त्वं न उद्गाये'ति वाजसनेयिनः । उद्गीथस्य कर्तृत्वेन प्राणमामनन्ति । छान्दोगा'स्तूद्गीथत्वेन तमुद्गीथमुपासांचक्रिर'इति । **संज्ञाया** इति । **संज्ञातश्चे**दिति सूत्रोक्तायाः । **व्यभिचारित्वादि**ति । वाजसनेयिछान्दोगोक्तः विद्यैकत्ववान्, संज्ञैकत्वात्, रामतापिनीयोक्तार्थवदित्यत्र संज्ञैकत्वस्य हेतोः प्रकरणभिन्न उपासने साध्याभाववति उद्गीथविद्येत्युभयत्राप्येका संज्ञेति हेतुसत्त्वेन व्यभिचारित्वात् ॥ ८ ॥

१. मर्यादा ।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

अथेदं विचार्यते । उपास्येषु रूपेषु बाल्यपौगण्डादिकमप्युच्यते । तथा सति विग्रहे न्यूनाधिकभाव आपततीति तत्रोक्तं सच्चिदानन्दत्वमनुपपन्नं स्यात् । तेषां सदैकरूपत्वात् । प्राकृतत्वे च सर्वमसमञ्जसं स्यादिति प्राप्ते, आह व्याप्तेरिति । 'सर्वतः पाणिपादान्त'मित्यादिश्रुतेः साकारमेव व्यापकमिति । चकारात् 'सर्वरस' इति श्रुत्या रसात्मकत्वेन भक्तानां यादृग्रूपेण लीलारसानुभवः,

भाष्यप्रकाशः ।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ अतः परं पुनर्ब्रह्मगतानेवान्यान् धर्मान् अवस्थारूपान् विचारयतीत्याशयेन सूत्रमवतारयन्ति अथेत्यादि । तथा सतीति । अवस्थावत्त्वे सति । तत्रोक्तमिति । तेषु रूपेषु श्रुत्योक्तम् । तेषामिति । ब्राह्मणां सच्चिदानन्दानाम् । सर्वमिति । उपास्यरूपेषु साधितं ब्रह्मत्वं तेषां ब्रह्मत्वेनोपासने श्रुतिविरोधपरिहारादिकं च । इति प्राप्ते, आहेति । एवमवतारेष्ववस्थाविशेषदर्शनेन पूर्वसाधितस्य वैयर्थ्ये तत्परिहारमाहेत्यर्थः । व्याकुर्वन्ति सर्वत इत्यादि । क्रमेणेति । कालोपाधिक्रमेण । तथाचासामञ्जस्यं तदा स्यात्, यदि विग्रहस्य प्राकृतत्वं तस्मिन् विग्रहे न्यूनाधिकपरिमाणवत्त्वं च कालोपाधिजन्यं स्यात्, तत्तु नास्ति, किन्त्वावरणापसारण आकाशस्येव व्यापकत्वसच्चिदानन्दविग्रहस्यावरणभूताया योगमायायाः

रश्मिः ।

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ ब्रह्मगतानिति । 'श्रीकृष्णो ह वै परमं दैवत'मिति श्रुतेः । 'कृष्णस्तु भगवान् स्वय'मिति स्मृतेश्च । अथेत्यादीति । अवतारस्यावतार्यैक्येप्यवतारत्वेन भिन्नप्रक्रम आनन्तर्यं वाथशब्दार्थः । भाष्ये । उच्यत इति । श्रीभागवते कृष्णस्य 'कौमारं जहतुर्व्रजे' 'ततश्च पौगण्डवयःश्रितौ व्रजे' इत्यादिभिः । गोपालतापिनीये 'ते होचुरुपासनमेतस्य परमात्मनो गोविन्दस्याखिलधारिणो ब्रूही'ति मुनिपृष्टो ब्राह्मणः 'एतस्यैव यजनेन चन्द्रध्वज' इत्याद्याह । यजनमवतारस्य तन्मूर्तेर्वा । बाल्यपौगण्डाद्यवस्थावतो मूर्तेरयुक्तत्वमित्याशयः । अवतारभजनं नन्दादेर्वायकस्य च । कृष्णमूर्तेर्भजनं मरुताम् । 'चतुर्थी मरुतो यजन्ती'ति श्रुतेः । श्रुत्योक्तमिति । श्रुतिस्तु 'सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिण' इति । रामरूपे वाल्मीकिरामायणे बाल्यपौगण्डादयोऽवस्थाः । श्रुतिस्तु 'यो वै श्रीरामचन्द्रः स भगवान्यः सच्चिदानन्दैकरसात्मा भूर्भुवःस्वस्तस्मै नमो नम' इति । तद्भजनं वृषध्वजस्य । तथाच श्रुतिः 'श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः । मन्वन्तरसहस्रैस्तु जपहोमार्चनादिभि'रिति । वामनरूपे वामनपुराणे बाल्यपौगण्डादयः । श्रुतिस्तु 'चरण पवित्रं विततं पुराण'मिति । तद्भजनं बलेः श्रीभागवते प्रसिद्धम् । श्रीनृसिंहरूपे नृसिंहोपपुराणे नृसिंहतापिनीये 'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरिविग्रह'मिति बाल्यपौगण्डाद्यवस्थाः । श्रुतिस्तु 'यो वै नृसिंहो देवो भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः । ॐ योऽन्यश्च विष्णुस्तस्मै योऽन्यश्च महेश्वरस्तस्मै' इति । अणुविषयेऽन्या । 'सच्चिदानन्दपूर्णात्मानं परमात्मानं परमं ब्रह्म सम्भाव्याहमित्यात्मानमादाय मनसा ब्रह्मणैकीकुर्या'दिति । तद्भजनं पञ्चमस्कन्धेऽष्टादशे प्रह्लादः करोति । एवं श्रुत्योक्तमित्यर्थः । ब्राह्मणामिति । जीवीयव्यावृत्त्यर्थं विशेषणम् । साधितमिति । 'उपसंहारोऽर्थाभेदा'दित्यत्रार्थभेदरूपहेतुना साधितम् । श्रुतीति । 'योऽन्यथा सन्तमात्मान'मिति श्रुतिविरोधः, आदिनान्यथात्वसूत्रोक्तमब्रह्मत्वम् । पूर्वेति । पूर्वं उपसंहारसूत्रे साधितस्य ब्रह्मत्वस्य । तदिति । वैयर्थ्यपरिहारमाह कालोपाधीति । कालचेष्टा भगवत्क्रीडा स उपाधिर्यस्मिन् क्रमे स क्रमस्तु योगमायापसारणहेतुः । कालोपाधीति । यथा कालेन पच्यते सर्वं तथा

१. स्मृते· ।

तादृग्रूपं क्रमेण योगमायापसारणेन प्रकटीकरोतीति बाल्यादिभावोपपत्तेः सर्वमुपपन्नमित्यर्थः । तेन यावदुक्तधर्मवद्ब्रह्मेति सिद्धम् ॥ ९ ॥

भाष्यप्रकाशः ।

क्रमादपसारणेन भक्तानां तल्लीलारसानुभावनार्थमिच्छया कृपया तादृशपरिमाणकं तद्रूपं प्रकटीकरोतीति यथा व्यापकस्याकाशस्य वृद्धिह्रासभाक्त्वमुपपन्नम्, तथा ब्रह्मणो रूपेष्वपि सर्वं बाल्यादिभानमुपपन्नमित्यर्थः । इदमत्र भगवता व्यासेन समञ्जसपदकथनाद्वृद्धिह्रासमूत्रोक्तमुभयसामञ्जस्यं स्मारयता, चकारेण 'लोकवत्तु लीलाकैवल्य'मिति च स्मारयता बोधितं ज्ञेयम् । भगवतो योगमायावरणं च गीतायां 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः । मूढोऽयं नाभिजानाति लोको मामजमव्यय'मिति स्वयमेवोक्तमिति नात्र शङ्कालेशः । सिद्धमाहुः तेनेत्यादि । एवं व्याप्त्यादिना सामञ्जस्यसाधनेन यावदुक्तधर्मयुक्तं तत्सदृशं वा शुद्धं केवलं ब्रह्मैवेति सिद्धम् । तथाचोपास्यरूपेषु प्रतीयमानानां नित्यानामेव बाल्यपौगण्डादिधर्माणां परिमाणानां तत्तल्लीलानां चावरणतद्भङ्गजन्यप्रतीतिविषयत्वेनाविरोधमवधार्य भक्तिमार्गीयेण तेऽप्युपसंहार्या इत्यर्थः । तथाच बाल्यादिभावो विषयः । उपपद्यते, न वेति संशयः । पूर्वपक्षसिद्धान्तौ स्फुटौ ।

रामानुजानां मते इदं पूर्वस्यैव शेषः ।

शाङ्करे भास्करे च मते तु 'ॐमित्येतदक्षरमुद्गीथ'मित्यत्र श्रूयमाणे सामानाधिकरण्येऽध्यासापवादपर्यायविशेषणपक्षाणां मध्ये को वा युक्त इति संशये, अध्यासपक्ष एकस्मिन् शब्दे लक्षणापत्त्या, द्वितीये च एकस्य निवृत्तेरदृष्टायाः कल्पनापत्त्या, तृतीयस्य चाप्रसिद्ध्या असंगतत्वं त्रयाणाम् । अतो विशेषणपक्षो युक्त इति सिद्धान्तितम् ।

तदकाण्डताण्डवं प्रतिभाति । तन्मते प्राणादीनां यथायथमब्रह्मत्वेन ब्रह्मकार्यत्वेन च तत्र ब्रह्मदृष्टिवत् प्राणादिदृष्टेरप्यध्यस्तत्वेन ॐङ्कारे उद्गीथदृष्टेरपि तथात्वे विशेषाभावादिति ॥ ९ ॥

रश्मिः ।

यादृग्यादृग्रूपं कालेन स्यादित्येवं कालोपाधिजन्यम् । **उपपन्नमिति** । करकादिप्रवेशादनुपपन्नम् । **ब्रह्मण इति** । व्यापकस्य रूपेषु प्रवेशादित्यर्थः । **तत्सदृशमिति** । यावदुक्तधर्मयुक्ताकाशसदृशं वेत्यर्थः । **इदं पूर्वस्येति** । इदं सूत्रं पूर्वस्य सर्ववेदान्तप्रत्ययाधिकरणस्य । **सामानाधीति** । अक्षरोद्गीथशब्दयोः । **लक्षणेति** । प्रतिमादिषु विष्ण्वादिबुद्ध्यध्यासः, एवमिहाप्यक्षरे उद्गीथबुद्धिरध्यस्यते, उद्गीथे वाक्षरबुद्धिरिति । तत्राध्यासे तावत् या बुद्धिरितरत्राध्यस्यते तच्छब्दस्य लक्षणावृत्तित्वं प्रसज्येतेत्येवं लक्षणापत्त्या । **द्वितीय इति** । अपवादपक्षेऽपवादो नाम यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां मिथ्याबुद्धौ निश्चितायां पश्चादुपजायमाना यथार्था बुद्धिः पूर्वनिविष्टाया मिथ्याबुद्धेर्निवर्तिका भवति । यथा दिग्भ्रान्तिबुद्धिर्दिग्याथार्थ्यबुद्ध्या निवर्तते, एवमिहाक्षरबुद्ध्योद्गीथबुद्धिर्निवर्तते, उद्गीथबुद्ध्या वाक्षरबुद्धिरिति । अत्र फलाभावः । मिथ्याज्ञाननिवृत्तिः फलमिति चेत् । न । पुरुषार्थोपयोगानवगमात् । न कदाचिदप्योङ्कारादोङ्कारबुद्धिर्निवर्तेत, उद्गीथाच्चोद्गीथबुद्धिरित्येवमेकस्या बुद्धेर्निवृत्तेरदृष्टायाः अदृष्टप्राप्ताया बुद्धेः कल्पनापत्त्येत्यर्थः । **तृतीयस्येति** । पर्यायपक्षस्य अक्षरोद्गीथशब्दयोरेकत्वमनतिरिक्तार्थवृत्तित्वम् । यथा द्विजोत्तमो ब्राह्मणो भूदेव इति । तदा शब्दयोरुच्चारणं न स्यात् । एकेनैव विवक्षितार्थसमर्पणात् । नच हौत्रविषये चाध्वर्यवविषयेऽक्षरे ओङ्कारशब्दवाच्ये उद्गीथप्रसिद्धिरस्ति येनानतिरिक्तार्थं न स्यादित्येवमप्रसिद्ध्या । **विशेषणेति** । व्याप्तेरिति सूत्रोक्तहेतोः । सर्ववेदसाधारण्यात् ।

ननु ब्रह्मधर्मत्वेन ते सर्वे नित्या वाच्याः, ते च तत्तद्भक्तविशिष्टाः, तत्र चैकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं श्रूयते, तथाच पूर्वलीलाया नित्यत्वेन तत्सम्बन्धिभक्तस्यापि तथात्वं वाच्यम्, एवं सति तस्यैवाग्रिमलीलासम्बन्धोऽशक्यवचनः, तथा वचने तु पूर्वलीलाया नित्यत्वं भज्येत, नित्यत्वे त्वग्रिमलीलासम्बन्धिनो भिन्नत्वं स्यात्, तच्चानुभवतदावेदकमानविरुद्धमित्यत उत्तरं पठति ।

सर्वाभेदादन्यत्रेमे ॥ १० ॥

लीलामध्यपातिनां सर्वेषां पदार्थानां ब्रह्मणा सहाभेदात् ब्रह्मणश्चैकत्वात्

भाष्यप्रकाशः ।

अग्रिमसूत्रमवतारयन्ति नन्वित्यादि । 'अनुच्छित्तिधर्मे'तिश्रुत्या ब्रह्मधर्माणामनुच्छेदश्रावणाद्ब्रह्मधर्मत्वेन ते सर्वे बाल्यादयो नित्या ध्वंसाप्रतियोगिनो वाच्याः, ते च लीलानां तत्तद्भक्तानुभावनार्थत्वात्तत्तत्क्रीडोपयोगिभक्तविशिष्टाः, तत्र कृष्णोपनिषद्येकस्यैव भक्तस्य पौर्वापर्येणानेकलीलासम्बन्धित्वं 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'त्यादिना श्रीनन्दादिवृन्दापर्यन्तानां स्वरूपकथनानन्तरं 'सोऽवतीर्णो महीतले, वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति तैः सह क्रीडाकथनाच्छ्रूयते, लीलासम्बन्धित्वे चोक्तरीत्या भक्तस्यापि नित्यत्वं वाच्यम्, एवं पूर्वलीलातत्सम्बन्धिभक्तयोर्नित्यत्वेन पूर्वलीलावैशिष्ट्यस्यापि नित्यत्वे सति तस्यैवाग्रिमलीलासम्बन्धोऽशक्यवचनः । तस्यैवाग्रिमलीलासम्बन्धवचने त्वेकस्य युगपद्विरुद्धलीलाद्वयानुभवस्याशक्यवचनतयाग्रिमानुरोधे पूर्वलीलानित्यत्वं भज्येत, पूर्वनित्यत्वे चैकस्य युगपदनेकलीलासम्बन्धस्याशक्यवचनतया अग्रिमलीलासम्बन्धिनो भक्तस्य पूर्वलीलानुभवकर्तुः सकाशाद्भिन्नत्वं स्यात्, तच्च भिन्नत्वं लीलास्थानुभवविरुद्धम्, लीलानुभवितृभक्तैक्यावेदकप्रमाणभूता या कृष्णोपनिषत्स्थश्रुतिस्तद्विरुद्धं चेति लीलानित्यत्वे भक्तभेदप्रसङ्गादुक्तश्रुतिविरोधः, भक्ताभेदे च लीलानित्यत्वभङ्गादनुच्छित्तिधर्मश्रुतिविरोध इत्युभयतःपाशा रज्जुरित्याशङ्कायामुपसंहारदौर्घट्ये प्राप्ते तन्निवृत्त्यर्थमुत्तरं सूत्रं पठतीत्यर्थः ।

सर्वाभेदादन्यत्रेमे ॥ १० ॥ व्याकुर्वन्ति लीलेत्यादि । ब्रह्मणा सहाभेदादिति । 'तस्मान्न भिन्ना एतास्तु आभिर्भिन्नो न वै प्रभुः । भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिन'मिति

रश्मिः ।

सर्ववेद्व्याप्यक्षरमिह मा प्रसज्जीत्यत उद्गीथशब्देनाक्षरं विशेष्यते । अकाण्डेति । काण्डं रहः तद्भिन्नं ताण्डवं व्यापारविशेषः । विशेषेति । अध्यस्तत्वपक्षे विशेषणपक्षे च तथा ॥ ९ ॥

अनुच्छित्तीति । न उच्छित्तिर्येषां धर्माणां तेऽनुच्छित्तयः अनुच्छित्तयो धर्मा यस्येति विग्रहात्तथा । तथाचेति भाष्यं विवृण्वन्ति स्म लीलासम्बन्धित्व इति । एवं सतीति भाष्यं विवृण्वन्ति स्म एवं पूर्वेति । तथा वचन इति भाष्यं विवृण्वन्ति स्म तस्यैवेत्यादि । विरुद्धेति । अधिकारियोग्यायोग्यत्वाभ्यां विरुद्धा लीलास्तासां द्वयं तस्यानुभवस्तस्येत्यर्थः । नित्यत्व इति भाष्यं विवृण्वन्ति स्म पूर्वेत्यादि । तच्चेत्यादिभाष्यं विवण्वन्ति स्म तच्चेत्यादि । लीलास्थेति । भक्त्युपमर्ददशायामक्षरे लीनतयाऽभेदमनुभवितॄणां लीलास्थानामनुभवविरुद्धम् । कृष्णोपेति । सा पूर्वोक्ता । उक्तेति । साप्येषा ।

सर्वाभेदादन्यत्रेमे ॥ १० ॥ तस्मादिति । एता भक्ताः । तत्र श्रीराधाजित्स्वरूपम् ।

---

१. धर्मवत्त्वेन ।

पूर्वलीलातोऽन्यत्रोत्तरलीलायामपीमे पूर्वलीलासम्बन्धिन एव त इत्यर्थः ।

अत्रेदमाकूतम् । 'रसो वै स' इति श्रुत्या 'सर्वरस' इति श्रुत्या च सर्वरसात्म-

भाष्यप्रकाशः ।

कृष्णोपनिषच्छ्रुतौ सर्वासां ब्रह्माभेदश्रावणेन तन्न्यायेनान्येषामपि पदार्थानां तथात्वात् । नन्वस्तु भक्तानां ब्रह्माभेदः, तथापि पूर्वोक्ताशङ्कायाः कथं निवृत्तिरित्याकाङ्क्षायामभेदस्वरूपं व्याकुर्वन्ति अत्रेदमित्यादि । प्रकाशाश्रयाधिकरणे स्वरूपधर्माणां ब्रह्माभेदस्तादात्म्यरूपो भेदविरुद्धसम्प-न्निर्णीतः, तत्र परिच्छिन्नकार्यकर्तृत्वस्य भेदनिर्णायकत्वेन सच्चिदानन्दरूपत्वस्य चाभेदनिर्णायकत्वेन भेदात्यन्ताभावरूपस्याभेदस्याभावात् । तस्यां च सम्पदि स्वाश्रयाविनाभूतत्वं प्रविष्टमिति ब्रह्मा-विनाभूता ब्रह्मात्मकाः सच्चिदानन्दरूपाः स्वरूपधर्मा इति सिद्धम् । 'असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानꣳ स्वयमकुरुत, तस्मात् तत् सुकृतमुच्यत इति, यद्वैतत् सुकृतम्, रसो वै स' इति श्रुतौ च 'सोऽकामयते'त्यादिना पूर्वानुवाक उक्ता या सृष्टिस्तां 'असद्वे'त्यादिना असाधुत्वेन प्रदर्श्य, 'ततो वै सदजायते'त्यनेन विवक्षितस्य प्रकटितस्य साधुत्वमुक्त्वा, तत्र हेत्वाकाङ्क्षायां 'तदात्मान'मित्यादिना ततो विशेषमाह । तत्र हि 'प्रजायेये'ति द्वितीयाकारादुच्च-नीचभावः, अत्र तु स्वयमेव परिणत इत्ययं परिणामः सुकृतरूप इति । ननु तत्रापि 'बहु स्या'मिति पूर्वाकारात् स्वस्यैव परिणामे कथमस्यैव सुकृतत्वम्, न तस्येत्याकाङ्क्षायामेतस्य सुकृत-त्वहेतुमाह 'यद्वै तत् सुकृतम्, रसो वै स' इति । वैशब्द उक्तशङ्कानिवृत्त्यर्थः । एवकारार्थो वा । तथाच यदेतत्सुकृतं स वै निश्चयेन रसः सर्वसारभूत आनन्दः । तदेवाग्रे परिचाययति 'रसꣳ

रश्मिः ।

श्रीयमुनाजित् तुरीयं तत्त्वम् । श्रुतिरूपाः आत्मत्वेन प्रतिपादकत्वेन च । ऋषिरूपाः सायुज्यमुक्त्येति चतुर्यूथविभागः । अक्षरविषय आहुः भूमाविति । वैकुण्ठं सच्चिदानन्दात्मकम् । भक्तानामिति । पूर्वोक्तयूथचतुष्टयवदक्षरस्यापि क्रीडायां भक्तत्वमिति । अक्षरानन्दो लक्ष्मीः । भक्तत्वेन सर्वोपादानम् । भक्तिमार्ग इति । ब्रह्माभेदः कार्यकारणवस्त्वैक्यमर्षणेन । पूर्वोक्तेति । आभासोक्ताशङ्कायाः । प्रकाशेति । गतपादे इदमधिकरणम् । भेदविरुद्धेति । तेनाभेद इत्यत्र विरोधे नञर्थ उक्तः । प्रत्ययोच्च् अजन्तोऽभेदशब्दः । भेदविरुद्धेत्यत्र भेदो विरुध्यते यया कर्त्र्या । कर्मणि क्तः । नश्यत इति नञ् कर्मणि क्तोऽन्वयार्थः । तेन योगरूढः शब्दः । भेदविरुद्धा संपत् तादात्म्यमर्थः । स्वाश्रयेति । तादात्म्यरूपं रूढ्या प्रविष्टम् । ब्रह्मात्मका इति । अभेदो ब्रह्मणा भेदविरुद्धसम्पद्रूप इति ब्रह्मा-त्मकाः । असाधुत्वेनेति । असच्छब्दं समाकर्षाधिकरणोक्तरीत्या स्वार्थात्प्रच्याव्यासाधुजन्यां ताम-साधुत्वेन प्रदर्श्य । तत इति । असाधुसृष्टेः । तत्रेति । असाधुसृष्टौ । द्वितीयेति । 'बहु स्या'मि-तीच्छाकाराद्द्वितीयाकारात् । उच्चेति प्रशब्दार्थः । तत्रापीति । असाधुसृष्टौ । भाष्यस्थां श्रुतिं व्याकु-र्वन्ति स्म वैशब्द इति । 'रस शब्दे', 'रस आस्वादने' तयोरास्वादनार्थस्याग्रिमग्रन्थानुरोधाद्ग्रहणम् । तदाहुः सर्वसारेति । 'सर्वरस' इति द्वयमुक्तम् । द्वयं समुदितं दशरससरूपम् । रसो जलं 'ऊर्जे त्वे'-त्युक्तम् । 'पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः' । रसः शुक्रम्, तदात्मकत्वेनेत्यर्थः । तदुक्तं 'रसो गन्धरसे स्वादे तिक्तादौ रसरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे' इति । रसः सारः । यथा छान्दोग्ये 'एषां भूतानां पृथिवी रसः । पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो

१. लीलायाः समीपे । २. सर्वेषाम् ।

कत्वं ब्रह्मणो निर्णीतम् । तथाच यस्य रसस्य ये विभावानुभावादिरूपाः, तैः स रसः सम्पद्यते । आतानवितानात्मकतन्तुभिः पट इव । अतस्तत्तादात्म्यं रसस्येति सर्वाभेदो निष्प्रत्यूह इति ।

ननु विरुद्धदिक्कयोरेकजातीयभाववतोर्भक्तयतिशयेन युगपदेकजातीयलीलासहितभगवत्प्रादुर्भावे भगवतो व्यापकत्वेनैवं प्रादुर्भावस्योपपन्नत्वेपि लीलापदार्थानामव्यापकत्वाद्युगपदाविर्भावोऽनुपपन्नः । भक्तयोः समानत्वाद्भक्तिमार्ग-

भाष्यप्रकाशः ।

द्वेवाय'मित्यारभ्यानुवाकसमाप्तिपर्यन्तम् । तथाच पूर्वसृष्टौ सचितोरेव प्राधान्यम्, नानन्दस्य, इह त्वानन्द एव तत्तद्रूप इति तस्याः सकाशादस्मिन्नयं विशेष इत्यर्थः सिद्धः । एवं 'सर्वरस' इति श्रुतौ च सर्वरसात्मकत्वेन । तेनैताभ्यां ब्रह्मणो रसात्मकत्वं निर्णीतम् । तेन यत् सिद्धं तदाहुः तथाचेत्यादि । विभावानुभावरूपा[1] इति । आलम्बनविभावरूपा भक्ताः, उद्दीपनविभावरूपा ऋत्वादयः, अनुभावाः कटाक्षवेणुवादनादयः, तेषां सर्वेषामेवं तादात्म्यरूपे अभेदे निर्विघ्ने लीलास्थानां भक्तानां ब्रह्मात्मकत्वेन नित्यत्वात् पूर्वोत्तरलीलासम्बन्धित्वं निर्विघ्नम्, लीलानां च ब्रह्मधर्मत्वान्नित्यत्वम्, एवं सर्वेषां नित्यत्वे युगपत्सर्वलीलानुभव आपतति, स च 'अङ्गसङ्गं करिष्यामी'त्यादिश्रौतप्रयोगान्यथानुपपत्त्यवगतभगवदिच्छामहिम्ना तत्सामर्थ्यमहिम्ना च निवारणीयः, न तु भक्तानुभवादेरनित्यत्वं स्वयं कल्पनीयम्, ब्रह्मणो मनोवागगोचरत्वस्यानिरुक्तादिश्रुतिसिद्धत्वात् । इदमत्र बोधसौकर्यार्थमुक्तम् । उत्पत्तिपक्षस्याप्येकदेशत्वेनादरणात् । वस्तुतस्तु, यथा लीला सम्पद्यते, तत्प्रकारकं सर्वं ब्रह्मैव । तथैव लीलापि । 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति श्रुतेः । 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्व'दित्येकादशे भगवद्वाक्याच्च उपपत्तिपक्षस्यैव मुख्यत्वात् । तच्च प्रागेवोपपादितमिति न किञ्चिदनुपपन्नमित्यर्थः । अत्रैव किञ्चिदाशङ्क्य परिहरन्ति नन्वित्यादि । सामञ्जस्यादित्यन्तम् । प्रादुर्भाव इति । विचार्यमाण इति शेषः ।

रश्मिः ।

रसः पुरुषस्य वाग्रसो वाच ऋग्रसः ऋचः सामरसः साम्न उद्गीथो रसः स एष रसाना९ रसतमः परमः परार्ध्योऽष्टमोयमुद्गीथ' इति । तेनेत्यादि । सर्वरसत्वेन यत् उपष्टब्धं दशरसरूपं सिद्धम् । यत्तु 'सर्वरसः स्मृतो वाद्यभाण्डभेदेऽवधूलक' इति विश्वः । तत्तु लौकिकरूढिमात्रात् । सिद्धान्ते योगयोगरूढिमात्रसत्त्वात् । 'मल्लानामशनि'रिति वाक्योपष्टब्धो दशविधरसस्तदात्मात्मा । सर्वेषु रसेषु । वस्तुतस्तु दशविधरसातिरिक्तं न जगत्, किं तरामन्ये रसा इत्याशयेन व्याकुर्वन्ति स्म ये विभावेत्यादिना । अत्र स्वगतपरगतरसः पुष्टिमार्गे भक्तिसंवलितो भगवान्फलमिति अधोक्षजस्यालम्बनत्वेपि भक्ता आलम्बनविभावरूपत्वेनोक्ताः । तस्याविषयत्वात् । उद्दीपनेति । कारणरूपाः । ऋत्वादयः समानाः । आदिना चेष्टा देशश्च । अनुभावाः कार्यरूपाः । कटाक्षेति । आदिना युगलगीतोक्ता हारहासादयः । अङ्गसङ्गमिति । भविष्यत्प्रयोगोत्र । भाष्ये । निःप्रत्यूह इति । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिण' इति वाक्यं ब्रह्मस्वरूपनिविष्ट इवार्थभेदेपि द्रष्टव्यम् । 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति गीतावाक्यात् । विरुद्धदिक्कयोरिति । प्राचीप्रतीचीदक्षिणोत्तरा विरुद्धा दिक् सहानवस्थानात् ।

१. विभावानुभावरूपा इति प्रकाशपाठः ।

विरोधापाताद्विनिगमकाभावाच्चैकत्र मायया प्रदर्शयतीति च न वक्तुं श शङ्काप्येताभ्यां सूत्राभ्यां निरस्तेति ज्ञेयम् । ब्रह्मणो व्यापकत्वाल्लीलायाः सहाभेदात्तथात्वादेकस्मै भक्ताय यथा ब्रह्मणा सह लीलापदार्था आविः तथैव तदैवान्यत्रापि भक्तसमानदेश आविर्भवन्तीति सर्वसामञ्जस्यात् ॥ १० ।

ननु व्यापकत्ववत् पूर्णानन्दैश्वर्यवीर्यादयोपि धर्मास्तेषु प्रतीता भवेयुः नचैवमस्ति, दुःखसम्भावनायां प्रभुमेव प्रार्थयन्ति यतः, एवं सति व्यापकत्वमपि न वक्तुं शक्यम्, तुल्यत्वात्, अत उत्तरं पठति ।

भाष्यप्रकाशः ।

इति शङ्केति । लीलासम्बन्धिपदार्थव्यापकत्वकृता शङ्का । तथात्वादिति । व्यापकत्वात् । तथाच तेपि व्यापका एव । परिच्छिन्नत्वप्रतीतिस्तु तेन तेन प्रकारेण ततस्ततो मायापसारणाद्विरुद्धधर्माश्रयत्वस्य साधितत्वाच्चेति न किमप्यनुपपन्नमित्यर्थः । तेन स्वरूपप्रधानस्य भक्तिमार्गीयस्य तत्तल्लीलासम्बन्धिनां भक्तादयो गुणाः सर्वेऽप्युपसंहरणीया इति बोधितम् ।

अन्ये त्वत्र छान्दोग्यवाजसनेयिकौशीतकिनां ज्यैष्ठ्यश्रैष्ठ्यादिगुणका प्राणविद्यैका, भिन्ना वेति संशये, भिन्नेत्याशङ्क्य, छान्दोग्यवाजसनेयिनोर्गुणाधिक्येपि रूपाभेदाद्विद्यैक्ये कौशीतकिनामपि वशिष्ठत्वादिगुणोपसंहारं सिद्धान्तयन्ति ।

तदस्मन्मते समाचारसूत्रे निरूपणप्रकारभेदस्य प्रायश्चित्ताद्यनुन्नायकत्वे उपसंहारानुगुण्यस्थापनादुपसंहारसूत्रेऽर्थाभेदकथनाच्च सिध्यतीत्युपेक्षितं बोध्यम् ॥ १० ॥

रश्मिः ।

विरुद्धा दिक् ययोर्भक्तयोः । भक्तिमार्गेति । भगवति मायाङ्गीकारो न भक्तिमार्गे । 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रम' इति द्वितीयस्कन्धनवमाध्यायवाक्यात्, मायाङ्गीकारे भक्तिमार्गविरोधापातात् उभयोरन्यतरस्य मायया प्रदर्शने विनिगमकस्य प्रमाणस्याभावाच्चैकत्र माययेत्यादि । ब्रह्मणो व्यापकत्वादिति । सूत्राभ्यामित्युक्तम् । तत्र प्रथमसूत्रीयो निरासप्रकारः । अभेदादिति द्वितीयसूत्रीयो निरासप्रकारः । प्रकृते । तेन तेनेति । देशत्वेन कालत्वेन । उपलक्षणमेतत् । ततस्तत इति । आश्रयात् । भाष्ये । आविरिति । देशे इति योजनीयम् । आधुनिकभक्ते तु देशेन सहाविर्भवन्तीति ज्ञेयम् । 'अक्षरात्मकत्वे हृदयस्य जात' इति 'लीला च हृदये सदे'तिवाक्याभ्याम् । सर्वेति । सर्वशब्दान्नित्यलीलावादसुवर्णसूत्रोक्ता अष्टाविंशतिदोषास्तत्परिहाराश्च मत्कृतभक्तिमार्तण्डफलप्रकरणे योजिता अत्र ज्ञेयाः । 'अनागत'मिति वाक्यात् । प्रकृते । ज्यैष्ठ्येति । 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्चे'त्येवं ज्यैष्ठ्यश्रैष्ठ्यादिगुणका प्राणविद्या । गुणेति । वशिष्ठत्वादिगुणाधिक्ये । वशिष्ठत्वादीति । वाजसनेयकानां 'यो ह वै वशिष्ठं वेद वशिष्ठः स्वानां भवति'इति श्रुतिरत्र । आदिना 'यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति स मे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा । यो ह वै सम्पदं वेद स८स्मै पद्यते यं कामं कामयते श्रोत्रं वै सम्प'दिति । एवं वशिष्ठत्वादिगुणोपसंहारम् ॥ १० ॥

नन्वित्यादीति । तेषु भक्तेषु । प्रार्थयन्तीति । यथा श्रीगोवर्धनप्रसङ्गे आसारपीडिताः प्रार्थयन्ति स्म ।

---

१. नेति नास्ति ।

आनन्दादयः प्रधानस्य ॥ ११ ॥

पूर्णानन्दैश्वर्यादयः प्रधानस्य धर्मिणो ब्रह्मण एव धर्माः । लीलापदार्थास्तु ब्रह्मधर्मत्वेन व्यापका उच्यन्ते । व्यापकस्य धर्मिणोऽनागन्तुकधर्मस्य व्यापकत्वनियमात् । न हि धर्मेषु पूर्णानन्दत्वादयः सम्भवन्ति । धर्मित्वापत्त्या धर्मत्वव्याहतेः । अत एवात्र प्रधानपदमुपात्तम्, गुणभावेन लीलापदार्थानामाविर्भाव इति ज्ञापयितुम् ॥ ११ ॥

भाष्यप्रकाशः ।

आनन्दादय प्रधानस्य ॥ ११ ॥ अग्रिमसूत्रमवतारयन्ति नन्वित्यादि । व्याकुर्वन्ति पूर्णेत्यादि । व्यापकत्वनियमादिति । अयं नियम आकाशपरिमाण आत्मचेतनायां च स्फुटः । नच पूर्णानन्दैश्वर्याद्यभावे तेषु ब्रह्मत्वस्यौपचारिकत्वापत्तिरिति शङ्क्यम् । तत्र तदनाविर्भावेनैवोपपत्तेः । नच तत्र को हेतुरिति शङ्क्यम्, लीलेच्छाया एव तथात्वात् । नच तर्हि विशेषतो निर्वाच्यमिति वाच्यम् । विदिताविदितान्यत्वानिरुक्तत्वादिश्रुतिभिरेव तन्निवारणात् । ननु तथापि संशयो न निवर्तते इति चेत्, न निवर्ततां नाम, तथापि 'भिद्यते हृदयग्रन्थि'रिति श्रुतेर्भगवद्दर्शनानन्तरमेव तन्निवृत्तेरिति यथाश्रुतमिति मन्तव्यमिति दिक् । स्वव्याख्यातस्यार्थस्य व्यासाशयगोचरत्वायाहुः अत एवेत्यादि । एतेन तेषु स्वरूपानन्दांशभूतजैवानन्दसत्त्वेपि भगवद्दानेन तद्धर्मांशभूतानां भजनानन्दैश्वर्यादीनां तेषु प्राकट्येपि न गुणभावनिवृत्तिरित्यपि ज्ञापितम् । अयमेवार्थः पुष्टिप्रवाहमर्यादायां 'स्वरूपेणावतारेणे'त्यादिकारिकासूक्त इति बोध्यम् । तेन भगवदसाधारणनिरङ्कुशजगत्कर्तृत्वादयः सर्वेशितृत्वादयश्च भक्तेषु नोपसंहर्तव्या इति बोधितम् । एवं त्रिसूत्र्या भक्तिप्रकरणीया भगवद्धर्मा विचारिताः ॥ ११ ॥

रश्मिः ।

आनन्दादयः प्रधानस्य ॥ ११ ॥ पूर्णेत्यादीति । धर्मिण इति । प्रधानादिशब्दाः परवाचकाः । प्रस्थानरत्नाकरे व्युत्पादितम् । अतो न योगरूढ्या त्रिगुणवाचकत्वम् । आकाशेति । आकाशो व्यापकः । अनागन्तुको धर्मः परममहत्परिमाणम् । एवं आत्मा व्यापकः । चेतनानागन्तुको धर्मः । 'सोऽश्नुत' इति श्रुतौ भक्तप्राधान्यमुक्तं तत्समाधानायाहुः एतेनेति । तेष्विति । भक्तेषु । स्वरूपेति । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुतेः । जैवानन्दे सर्वात्मभावोपि निविष्ट इति तमनुसन्धायाहुः भगवद्दानेनेति । तद्धर्मेति । स्वानन्दधर्मांशभूतानाम् । सर्वात्मभावव्यापारकेण भगवद्दानेन प्रकटानां भजनानन्दैश्वर्यवीर्यादीनां तेषु प्राकट्येपि 'युक्तं भगैः स्वैरितरत्र चाध्रुवै'रिति वाक्यात्प्राकट्यम् । अपिशब्दात् 'सोऽश्नुत' इत्युक्तस्वातन्त्र्ये स्वाभाविकगौणभावनिवृत्तिर्नेत्यर्थः । भक्तीति । भक्तिमार्गस्य स्वप्राप्त्यर्थं कृतत्वात्तद्वैयर्थ्यपरिहाराय प्रकटितेषु बाल्यपौगण्डादिषु नवधाभक्तिसूपयोगिषु तिरोहितेषु च विश्वरूपप्रदर्शनाध्यायोक्तधर्मेषु । पूर्वसूत्रे सच्चिदानन्दत्वं समर्थितम् । द्वितीयसूत्रे लीलापदार्थानां व्यापकत्वसमर्थनेन 'नैश्चिन्त्यं वाचि पूर्वव'दिति सुबोधिनीकारिकाया माहात्म्यज्ञानप्राकट्याचृतीयसूत्रे लीलानां गौणभावेनाविर्भाव इति भक्तिप्रकरणीया इत्यर्थः । प्रकरणं तामसम् । तत्रापि प्रमाणप्रकरणे टिप्पण्यां 'रक्षां चक्रुः सशकृते'त्यस्य सुबोधिन्याः ॥ ११ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

ननूपासकस्य प्रियत्वादिप्रकारकज्ञानक्रममादाय प्रियत्वादिधर्माणां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे निरूपितमिति लीलास्थानामपि प्रियत्वादिज्ञानस्य सत्त्वादत्रापि स्वरूपोपासकस्य प्रियशिरस्त्वादिधर्माणामुपसंहारः कार्य इत्याशङ्क्य परिहरति प्रियशिरस्त्वाद्यप्राप्तिरिति । चित्तशुद्धितारतम्यहेतुकं प्रियत्वादिज्ञानं लीलास्थानां चित्तशुद्ध्यपेक्षाऽभावान्न सम्भवतीति न तेषामत्रोपसंहारः कार्य इत्यर्थः ।

भाष्यप्रकाशः ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ आनन्दमयविद्यायामानन्दादयो धर्मा ब्रह्मासाधारणा इति सिद्धम्, तत्प्रसङ्गेन तद्विशेषणानि विचारयतीत्याशयेन सूत्रमवतारयन्ति **ननूपासकस्येत्यादि** । उक्तत्रिसूत्र्यां साकारत्वव्यापकत्वादयो भक्तसाधारणाः, पूर्णानन्दैश्वर्यादयस्तु भगवदसाधारणा इति भगवद्धर्मरूपेषु भक्तेषु न त इति स्थितम् । तथा सत्यानन्दादय इव प्रियशिरस्त्वादयोपि तत्र पठितत्वात् तदसाधारणा इति प्रियादीनां शिरस्त्वादिरूपत्वमानन्दमयाधिकरणे अन्नमयादिषूपासनाकथनेनोपासकस्य ज्ञानक्रममादाय निरूपितम् । तेन लीलास्थानां भगवति प्रियत्वादिज्ञानस्य सत्त्वात्, भक्तिमार्गीयोपासने तेषां पुरुषविरुद्धत्वभानेऽप्यसाधारणत्वात् प्रियत्वादिषु शिरस्त्वादिके अधिके श्रौतत्वाद्भाविते दोषाभावात् तेषामुपसंहारः कार्य इत्याशङ्क्य परिहरतीत्यर्थः । सूत्रं तात्पर्यकथनमुखेन व्याकुर्वन्ति **चित्तशुद्धीत्यादि** । अत्र प्रधानस्येतिपदं पूर्वसूत्रादनुवर्तते । तथा च चित्तशुद्धितारतम्येन भासमाने प्रधानस्य भेदे, हि यस्माद्धेतोः, उपचयापचयौ प्रमोदमोदरूपावानन्दोपचयापचयावुपासकस्य भासेते, लीलास्थानां तु ब्रह्मतादात्म्यस्य पूर्वाधिकरण उक्तत्वात् तादृशां चित्ते तारतम्यभानस्य कुत्राप्यनुक्तत्वात्तदभावेन भगवति तदवयवेषु च यत् प्रियत्वादिज्ञानम्, तन्निरुपधिस्नेहहेतुकम् । न चित्तशुद्धितारतम्यहेतुकम् । अत उपासकज्ञानक्रममादाय श्रुतौ निरूपितानां प्रियशिरस्त्वादीनामप्राप्तिः, प्राप्तिरेव न सम्भवतीति भक्तिमार्गे तदनुसारिणा स्वरूपोपासकेन तेषामुपसंहारो न कार्य इत्यर्थः ।

रश्मिः ।

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥ भक्तेति । भक्तेष्वपीति भक्तसाधारणाः । **भगवदिति** । भक्तेष्वदानदशायामसत्त्वादसाधारणाः । सांकर्याभावायोक्तम् । **तदसाधारणा** भगवदसाधारणाः । **प्रियत्वादीति** । भाष्ये प्रियत्वादिप्रकारकज्ञानस्येत्यत्र ज्ञाने प्रियत्वादेः प्रकारस्य प्रियद्वारकत्वेन साक्षाज्ज्ञानं प्रियत्वादेरुक्तम् । आशङ्काग्रन्थत्वाद्वा । **भक्तिमार्गीयेति** । एकादशसुबोधिन्या'मुप समीपे स्थित्वा यथायोग्यकरणस्योपासनालक्षणत्वम्', अत्र तु मनोव्यापारविशेष उपासना । **चित्तेति** । उपासनानां चित्तशुद्धिहेतुत्वं पूर्वमुक्तम् । तारतम्यं संशयभ्रमप्रमाजनकत्वेन । प्रधानस्य स्वावयवैस्तामसचित्तेन भेदे भासमान इत्यर्थः । **पूर्वेति** । आनन्दमयाधिकरणे । तारतम्याभावेपि नित्यक्रीडास्थानां सात्त्विकतामसज्ञानं फलप्रकरणस्थानामिवाहुः **भगवति तदवयवेषु चेति** । भगवत्त्वेन ज्ञानं सात्त्विकम्, एकत्वेन ज्ञानात् । अवयवित्वेनावयवज्ञानं तामसम् । अस्यावयवा इति भेदवत्त्वेन ज्ञानात् । **प्रियत्वादिज्ञानमिति** । सिद्धान्त-

१. तेषामिति मूले पाठः ।

अथवा । नन्वानन्दमयोपासनामथर्वणोपनिषदुक्तपञ्चरात्राद्यागमोक्तप्रकारेण कुर्वतः पुरुषरूपे पक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयाधिकरणे तद्रूपस्यैवोक्तत्वात् पुरुषरूपः कथमानन्दमयः । तथात्वे वा कथं नोक्तोपसंहारः । अपरं च । मोदप्रमोदयोरुपचितानुपचितानन्दरूपयोर्युगपत्सत्त्वेन देशभेदेनापि भिन्नत्वान्नित्यानन्दैकरसे ब्रह्मणि तादृशरूपकथनमनुपपन्नमित्याशङ्क्य परिहरन्ति प्रियशिरस्त्वादीति । यद्यथर्वणोपास्यात् प्रियशिरस्त्वादिविशिष्टस्य भेदः स्यात्, तदा तदप्राप्तिः स्यात्, नच तथेति प्रियशिरस्त्वादिकमुपासनामार्गीयस्याथर्वणिकादेरुपसंहार्यमेवेत्यर्थः । चित्तशुद्धितारतम्यहेतुकं प्रियत्वादिज्ञानमिति पक्षे

भाष्यप्रकाशः ।

अस्मिन् पक्षे उपासनामार्गीयस्य तदुपसंहारपक्षोऽर्थादेवायाति, तथाप्यानन्दमयवाक्येऽथर्वणोपनिषदि च सदानन्दत्वस्योक्तत्वादुभयप्राधान्येनोपासकस्य निर्णयो न सिध्यतीत्यतः सूत्रं प्रकारान्तरेण व्याख्यातुमवतारयन्ति अथवेत्यादि । उक्तविधस्योपासकस्य पुरुषरूपविरुद्धपक्षाद्युपसंहारस्यायुक्तत्वादानन्दमयवाक्ये च पुरुषस्य विधामात्रमेव गृहीतम् । तच्च स्त्रीत्वव्यवच्छेदार्थत्वेनापि युज्यते इति पक्षिरूपस्यैवोक्तत्वात् पुरुषरूपः कथं सः । अतः सोपासना एतदुपनिषदुक्तरूपेण न युक्ता । अथ ब्रह्मत्वस्याविशिष्टत्वादेतदुपनिषदुक्तस्याप्यानन्दमयत्वेऽत्रापि पक्षिरूपस्य सत्त्वात् कथं न पक्षाद्युपसंहार इत्येका शङ्का । अपरं चेत्यादिनोक्ता मिथ्यावादिकृता द्वितीया । देशभेदेनेति । दक्षिणोत्तरभेदेन । तादृशरूपकथनमिति । भेदयुक्तरूपकथनमानन्दमयवाक्येऽनुपपन्नमित्यर्थः । सूत्रं व्याकुर्वन्ति यदीत्यादि । तथाचास्य सूत्रस्य तर्कगर्भत्वेनापि व्याख्यातुं शक्यत्वात्, वाक्यद्वयेप्युक्तस्य ब्रह्मण ऐक्येन विरुद्धधर्माश्रयत्वेन च पूर्वाशङ्कोक्तस्योभयरूपत्वस्य पक्षिरूपत्वस्य वा अदुष्टत्वादुपासकस्यात्र तदुपसंहारो न दुष्ट इति भावः । ननु

रश्मिः ।

रीत्यात्रैव पूर्वमुपपादितम् । उपासकेति । ज्ञानक्रममत्र प्रियत्वादिमात्रविषयकज्ञानक्रमम् । विभूतित्वादन्येषाम् । प्राप्तिरेवेति । प्राप्तिर्नैव संभवतीत्यन्वयः । भाष्ये एवकारार्थस्य प्रतियोगित्वाभावात् । निर्णय इति । नच निषेधमुखेन निर्णय इति शङ्क्यम् । पक्षिरूपेणोपासनामार्गीयो निर्णयो नेत्याशयात् । उक्तविधस्येति । नन्वित्यादिभाष्योक्तविधस्य । आनन्दमयाधिकरण इत्यादिभाष्यविवरणं आनन्दमयवाक्ये इति । सामान्यप्रकारकजिज्ञासाया विशेषप्रकारकजिज्ञासाजनकत्वाद्व्याख्यानम् । 'आत्मैवेदमग्र आसीत्पुरुषविध' इति वाक्ये 'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्या'दिति विषयवाक्ये । विधा तु 'अन्वयं पुरुषविध' इति श्रुतौ । अय प्रकाशः पक्षिरूपस्यैवेति भाष्यीयैवकारव्यवच्छेद्यार्थः । पक्षिरूपस्यैवेति तद्रूपस्यैवेतिभाष्यव्याख्यानम् । एतदिति । तैत्तिरीयोपनिषदुक्तानन्दमयरूपेण । अविशिष्टेति । अथर्वणोपनिषदि मुण्डके 'आनन्दरूपममृतं यद्विभाति' । पञ्चरात्रागमे 'आनन्दमात्रकरपादमुखोदरादिः' । आदिना मन्त्रशास्त्रागमः तत्रत्यानन्दः । अत्र स्तुत्या मयडर्थत्वं बोध्यम् । एवं तैत्तिरीयानन्दमयादवशिष्टत्वात् । अत्रोक्त इति । आथर्वणपञ्चरात्रोक्तः । अत्रापीति । आथर्वणपञ्चरात्राद्युक्तेषु पुरुषविधानन्दमयेषु पक्षिरूपस्य निषेधाभावेन सत्त्वात् । तर्केति । अन्यथाज्ञानं तर्कः । वाक्येति । आथर्वणे पञ्चरात्राद्युक्ते च । उक्तस्येति ।

१. यद्यपि । अथर्वणोक्तोपास्यात् । २. उपासनामार्गीयस्यापीतिपाठः ।

परोक्षवादपक्षेपि तत्र भेदाभावान्मोदप्रमोदयोर्न त्वदुक्तरूपत्वमित्यर्थः । ब्रह्मधर्मा एव भिन्ना इत्युपासनार्थं तानादाय शिरःपाण्यादि निरूप्यत इति तत्रैव निरूपितमस्माभिः । यद्यप्यानन्दमयाधिकरण एवास्यार्थस्योक्तत्वान्नेयं शङ्का सम्भवति,

भाष्यप्रकाशः ।

मोदप्रमोदयोरुक्तरूपत्वे भेदस्तु सिद्ध एवेति कथं तदभाव इत्यत आहुः चित्तेत्यादि । अपिः समुच्चये । तथाच मान्त्रवर्णिकसूत्रव्याख्याते मोदप्रमोदयोः परिनिष्ठितापरिनिष्ठितानन्दपक्षे । तयोस्तादृशत्वज्ञानस्य चित्तशुद्धितारतम्यहेतुकत्वेन स्वरूपाभेदकतया ब्रह्मणि भेदाभावात्तथा । 'वस्तुतस्तु परोक्षवादोऽय'मिति प्रतिज्ञाय, 'तत्र निरुपधिप्रीतिरेव मुख्ये'त्यादिना व्युत्पादिते परोक्षवादपक्षे च रसात्मके स्वरूपे तदात्मका एव भावा भक्तानां हृदि तथा स्फुरन्तीति तादृशप्रतीतेस्तद्भावहेतुकत्वेन रसरूपे ब्रह्मणि भेदाभावान्मोदप्रमोदयोर्नोपचयापचयरूपत्वमिति । अयं अर्थः सूत्रतात्पर्यम् । तथाच भेदाभावाद्यथा सङ्कर्षणस्वरूपोपवर्णने 'किरीटसाहस्रमणिप्रवेकप्रोद्योतितोद्दामफणासहस्र'मितिवदुचित उपासनामार्गीयस्य तदुपसंहारः, भक्तिमार्गीयस्य तु परोक्षवादोक्तरीत्या प्रियत्वादेरेवोपसंहार इति भावः । ननु मा भूतामानन्दोपचयापचयौ स्वरूपनिष्ठौ, तथापि प्रियादीनां शिरस्त्वादिभावनं तु विरुद्धमेवेति कथं तदुपसंहार्यमित्यत आहुः ब्रह्मेत्यादि । तत्रैव निरूपितमिति । तस्मिन्नेव वर्णके 'पुरश्चक्रे द्विपद' इति श्रुतिविचारे 'भक्तानामलौकिकदेहस्थित्यर्थमन्नमयादिरूपस्तत्र तत्र प्रविशति, जीवे त्वानन्दमय' इति निरूपितम् । तथाच जीवे पक्षिरूपेण प्रविशतोऽवयवा भिन्ना एव, ते जीवस्य यथाधिकारं प्रियादिरूपेण भासन्त इत्युपासनायां त

रश्मिः ।

तैत्तिरीयोक्तस्यान्वयपुरुषविधस्य पक्षिरूपस्य ब्रह्मणः पूर्वतन्त्रद्वितीयाध्यायोक्तदर्शपूर्णमासाभेदवदैक्येन । पूर्वेति । भाष्ये पूर्वाशङ्कोक्तस्य । तदभाव इति । भेदाभावो ब्रह्मण उभयत्र । परिनिष्ठितेति । ब्रह्म विपश्चित् । 'मान्त्रवर्णिकसूत्रव्याख्यात' इत्युक्तत्वात् । 'मोदः पक्षः प्रमोदः पक्षः' । अत्र विपश्चित्त्वं विविधभोगचतुरत्वम् । इत्थं च पुरुष आनन्दमय इति मोदप्रमोदाभ्यां भोगः । पक्षी आनन्दमयः । इति पक्षाभ्यां भोग इति उभयपक्षे । तयोरित्यादि । मोदप्रमोदयोः तादृशत्वं तौ पक्षाविवेमौ मोदप्रमोदौ पश्यन्ति जनाः इति व्युत्पत्त्या सिद्धं महाभाष्ये । रूढोयं शब्द इति मनोरमायाम् । तस्य ज्ञानं तस्य 'मनसैवानुद्रष्टव्य'मिति श्रुतेश्चित्तस्य शुद्धिः सात्त्विकत्वादिः तत्तारतम्यं तद्धेतुकत्वेन ब्रह्मणि सात्त्विकचित्तेन गृहीते भेदाभावात् । तदुक्तं गीतायामष्टादशाध्याये 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विक'मिति । अधुना परोक्षवादे तत्रानन्दमये भेदाभावात् इति भाष्यं विवृण्वन्ति स्म वस्तुतस्त्विति । विपश्चित्सूर्यः सूर्यविपश्चित्त्वकारणं विपश्चित्त्वस्याधोक्षजेऽनिश्चयाद्वस्तुतः पक्षः । 'परोक्षवादो वेदोय परोक्षं च मम प्रिय'मिति वाक्यात् । व्युत्पादित इति । आनन्दमयाधिकारणे व्युत्पादिते । परोक्षवादपक्षे चेत्यत्र चकाराध्याहारः, अपेः पूर्वं व्याख्यानात् । रसात्मक इति । दशरसात्मके । उपबृंहणसिद्धत्वात् । तथेति । अभिन्नत्वेन । तदर्थ इति । परोक्षवादे च तत्र भेदाभावादिति भाष्यार्थः । सूत्रस्य तात्पर्यं तत्प्रतीतीच्छयोच्चरितत्वम् । तेनेति शेषः । अयमर्थ इति पाठः तदर्थ इत्यत्र मूलपुस्तके । सङ्कर्षणेति । तृतीयाष्टमाध्यायेस्ति । स्वरूप 'य वासुदेवाभिधमामनन्ती'त्युक्तम् । तदुपेति । पक्षिरूपत्वोपसंहारः । ब्रह्मेत्यादीति । एवकारोऽवयवयोगव्यवच्छेदकः । तानिति । भिन्नान् शिरस्त्वादिधर्मान् । तस्मिन्नेवेति । आनन्दमया-

तथापि गुणोपसंहारप्रसङ्गे मिथ्यावादिन आपाततः शङ्का सम्भवतीत्याचार्येणोक्त्वा निरस्ता ॥ १२ ॥

ननूपास्यरूपस्याविरुद्धा एव गुणा उपसंहर्तव्याः, न तु विरुद्धाः, तथाच पुरुषरूपे पक्षादि विरुद्धमिति न तदुपसंहार्यमित्याशङ्क्याह।

इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे पुरुषरूपे विरुद्धत्वेन ये भासमाना धर्मास्तेऽप्युपसंहर्तव्याः, तत्र विरोधव्यवच्छेदज्ञापनाय तुशब्दः। तत्र हेतुरर्थसामान्यादिति। अर्थः पदार्थ आनन्दमयत्वलक्षणस्तस्य समानत्वादेकत्वादित्यर्थः ॥ १३ ॥

भाष्यप्रकाशः।

उपसंहार्याः। भक्तिमार्गीयस्य तु तेषु भेदभानात् तेन तत्र नोपसंहार्या इति पूर्वोक्ताधिकारनियता वर्णकद्वयसिद्धा व्यवस्थेत्यर्थः। ननु यद्यानन्दमयाधिकरणे अयमर्थः सूत्रकारेण सूचितः स्यात्, पुनरत्र किमिति वदेदित्याशङ्कायामाहुः यद्यपीत्यादि। इयमिति। मोदप्रमोदविषयिणी। तथाचैतदर्थं पुनः कथनम्। अतो न दोष इत्यर्थः ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥ नन्वेवं पक्षद्वयस्वीकारे को हेतुरित्याकाङ्क्षायां इतरादिसूत्रत्रयप्रणयनमेव हेतुरिति सूचयन्तः पूर्वमुपसंहारपक्षे हेतुं वदतीत्याशयेनावतारयन्ति ननूपास्येत्यादि। व्याकुर्वन्ति इतर इत्यादि। ननूपसंहारसूत्रे एवायं हेतुः सिद्ध इति पुनः कथनस्य किं प्रयोजनमत आहुः तत्रेत्यादि। तत्रेति। परस्वरूपे। तत्रेति। उपसंहारे। तथाच ब्रह्मत्वप्राधान्येनोपासने सम्बन्धि ब्रह्मैव। सदानन्दप्राधान्येनोपासनेपि 'तयोरैक्यं परं ब्रह्मे'ति वाक्याद्भक्तेर्गौणत्वाच्च सम्बन्धि ब्रह्मैव, पुरुषत्वादिकं तु न प्रधानम्, अतस्तन्नोपसंहारनियामकमित्येतत्स्मारणाय तदुक्तिरित्यर्थः ॥ १३ ॥

रश्मिः।

धिकरणे तस्मिन्नेव वर्णक इत्यर्थः। अवयवेति। अवयवाश्च तेऽभिन्नाः। एवकारः शिरस्त्वादिधर्मव्यवच्छेदकः। यथाधीति। सात्त्विकादिचित्तकत्वाद्यनतिक्रम्य। अव्ययीभावः। त इति। भिन्नाः शिरस्त्वादिधर्माः। भेदभानादिति। 'अन्तरा भूतग्रामव'दिति सूत्रे वक्ष्यमाणभेदभानात्। 'भक्त्या जानाति चाव्यय'मिति श्रुत्येवार्थो भेदः। 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति ब्रह्मस्वरूपपरगीतायाः। तेनेति। तेन भक्तेन। तत्र पुरुषोत्तमे। पूर्वोक्तेति। 'नवे'ति सूत्रवर्णकोक्ताधिकारनियता। न दोष इति। पुनरुक्तिदोषो न ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ १३ ॥ पक्षद्वयेति। पुरुषरूपे पक्षिरूपोपसंहारानुपसंहारपक्षद्वयस्वीकारे। 'स वयाꣳस्यसृजते'ति तृतीयाष्टके पुरुषविधान्वयस्य पक्षिस्रष्टृत्वोक्तेरेकरूपस्य हयग्रीवावतारवदविरुद्धत्वात्। अर्थाभेदस्य भेदप्रतिबध्यत्वादस्य हेतोर्भेदरूपप्रतिबन्धकप्रतिबन्धकत्वेनोत्तेजकत्वाद्धेत्वन्तरमित्याहुः। तथाचेति। अस्ति पुरुषान्वयपक्ष्येकत्वम्, परन्तु तत्र पुरुषो ब्रह्मा तृतीयाष्टके 'प्रजापतिरकामयते'त्युपक्रम्य 'स वयाꣳस्यसृजते'त्युक्तेः। तथाच ब्रह्मस्वे ब्रह्मा स्वं आत्मा यस्य पक्षिणस्तस्मिन् पक्षिणि लीलानां गौणभावेन धर्मिणः प्राधान्येनोपासने सम्बन्धी अन्वयी ब्रह्मा प्रजापतिरेव, नतु अन्यः। पुरुषत्वादिकं लीलारूपमप्रधान'मानन्दादयः प्रधानस्ये'ति सूत्रभाष्यादतः ब्रह्मप्रजापत्योरभेदात्। 'ब्रह्मन्पुंसि चे'ति सूत्रात्। तत् अव्ययम्। सः अर्थाभेदो न उपसं-

अथानन्दमयाधिकरण उक्तप्रकारेण ये प्रियत्वादिधर्माः, तेषामेवोपसंहारः कार्यः, न तु पुरुषरूपे पक्षादीनामपीत्यग्रिमं पठति।

आध्यानाय प्रयोजनाभावात्॥ १४॥

आनन्दस्वरूपस्य यावन्तो धर्मा भक्तिमार्गीयाः परोक्षवादेन उच्यन्ते प्रियत्वप्राधान्यादयः, तेषां सर्वेषां ध्यानमासमन्तात् ध्यानम्, तदर्थं ये धर्मा उपयुक्ताः, त एवोपसंहर्तव्याः, नान्ये। तत्र हेतुः। प्रयोजनाभावादिति। ध्यानपदार्थस्य तावद्भिरेव सिद्धेरधिकोपसंहारे तथात्वादित्यर्थः॥ १४॥

भाष्यप्रकाशः।

आध्यानाय प्रयोजनाभावात्॥ १४॥ तर्हि भक्तिमार्गेपि परस्यैवोपास्यत्वात् तत्र कुतो नोपसंहार इत्याकाङ्क्षायामनुपसंहारपक्षे हेतुं वदतीत्याशयेनावतारयन्ति अथेत्यादि। उक्तप्रकारेणेति। परोक्षवादोक्तरीतिकरसात्मकतया। एतस्य पदस्य उपसंहारः कार्य इत्यनेनान्वयः। सूत्रं व्याकुर्वन्ति आनन्देत्यादि। ध्यानपदार्थस्येति। भक्तिमार्गीयस्य तस्य। शेषस्तु निगदव्याख्यातः॥ १४॥

रश्मिः।

हारनियामकः। अर्थाभेदस्य हेतोर्नामरूपसूत्रोक्तप्रकरणाधिकारकृतभेदप्रतिबध्यत्वादस्य हेतोर्भेदरूपप्रतिबन्धकस्य प्रतिबन्धकत्वेनोत्तेजकत्वात्। तदुक्तिरिति। अर्थाभेदभिन्नस्यार्थसामान्यरूपस्य हेतोरुक्तिः। यथा घटपटकुड्यकुसूलानि अर्थसामान्यहेतुशून्यानि तत्र द्रव्यत्वेनाभेदात् परस्परमुपसंहारः प्राप्तः नामरूपादिभेदेन प्रतिबद्धो न भवति। यत्र तु नीलो घटो द्रव्यमित्यत्राप्यर्थाभेदोभेदप्रतिबध्योऽर्थसामान्यरूपोत्तेजकहेतुमति। परस्परमुपसंहारः नामरूपादिभेदकेन न प्रतिबद्धो भवति। तथा रामोपनिषदि राममत्स्यकच्छपा अर्थसामान्यरूपहेतुशून्यास्तत्र नामरूपादिभेदेन प्रतिबद्ध उपसंहारो न भवति। यत्र तु वासुदेवसङ्कर्षणपक्षिपुरुषहयग्रीवेष्वर्थसामान्यहेतुमस्तु अर्थाभेदः भेदप्रतिबध्यः उत्तेजकविशिष्ट इति सिद्धम्। भाष्ये। आनन्देति। पूर्वतन्त्रे आकृतौ शक्तेः॥ १३॥

आध्यानाय प्रयोजनाभावात्॥१४॥ तर्हीति। अन्यथात्वसूत्रे उपासनाप्रसङ्गे विरुद्धधर्माश्रयत्वस्योक्तत्वादुपासनाकाले। **अथेत्यादीति**। भिन्नप्रक्रमेऽथशब्दः पुरुषोत्तमविचारात्। तेन बाध्यबाधकभावोत्तेजकमपीयदवधि। **कार्य इति**। वेदत्वात्कार्यः। **इत्यग्रिममिति**। इति हेतोरनुपसंहारार्थमग्रिमं सूत्रं पठतीत्यर्थः। **एतस्येति**। नच वक्ष्यमाणभाष्यविरोधः। उपसंहारेपीदं करणमिति करणान्तरनिषेधपरत्वात्। **आनन्देत्यादीति**। 'आनन्दादयः प्रधानस्ये'ति सूत्रमनुवर्तते। आनन्दादय इत्यस्य विभक्तिविपरिणामेनान्वयः। **आनन्दादीना**मिति। प्रधानस्येत्यस्यार्थः आनन्दस्वरूपस्येति। रसरूपत्वस्य मोदप्रमोदाभ्यां सिद्धेः किमिति प्रश्नः। **प्रियविषयकेत्यादीति**। सर्वेषामित्यन्तेन भाष्येणानन्दादीनामित्यस्यार्थः। **उपसंहर्तव्या इति**। उपसंहारसूत्रादुपसंहारोप्यनुवर्तते इति भावः। यथासम्भवमन्वयः। **भक्तिमार्गीयस्येति**। ज्ञानमार्गे सर्वतः पाणिपादादीनां ध्याने प्रकृतोपयोगाभावेन विशेषणम्। अङ्गोपासनाप्रक्रमाद्ध्यानमुक्तम्। एकैकाङ्गेषु मनोनिवेशनस्य ध्यानत्वात्। द्वितीयस्कन्धेऽवताराणामप्यङ्गत्वोक्तेः। यथा हास्यं राम इति॥ १४॥

अन्येषामनुपसंहारे हेत्वन्तरमप्याह ।

आत्मशब्दाच्च ॥ १५ ॥

'प्रियमेवे'त्यादिना परोक्षवादेनोक्तानां प्रियप्राधान्यादीनामेव भावना कार्या, न तु यथाश्रुतानां शिरःपक्षादीनाम् । तेषामविवक्षितत्वात् । तत्र हेतुरात्मशब्दादिति । 'आनन्द आत्मे'त्यनेन पूर्वोक्तानां प्रियप्राधान्यादीनां रसात्मकानामात्मा स्वरूपमानन्द इत्युक्तम् । अग्रे 'रसो वै स' इति वक्ष्यमाणत्वात् तस्य च स्थायिभा-

---

भाष्यप्रकाशः ।

आत्मशब्दाच्च ॥ १५ ॥ सूत्रमवतारयन्ति **अन्येषामित्यादि** । ननु प्रयोजनाभावेपि ब्रह्मस्वरूपपरताया अविशिष्टत्वात् पक्षाद्युपसंहारे को दोष इत्याकाङ्क्षायां हेत्वन्तरमप्याहेत्यर्थः । व्याकुर्वन्ति **प्रियमेवेत्यादि** । **तत्र हेतुरिति** । अविवक्षितत्वे हेतुः इत्युक्तमिति । तस्मादिति शेषः । तथाच यथान्नमये इदमा परिदृश्यमानबोधनाल्लौकिकदृष्टौ पक्षादीनामविवक्षितत्वम्, तथात्र आनन्दपदसमभिव्याहृतेनात्मपदेन प्रियादिस्वरूपस्यानन्दत्वेन बोधनाद्भक्तिदृष्टौ पक्षादीनामविवक्षितत्वमेव दोष इत्यर्थः । न च समाचारसूत्रे अधिकारभेदस्यानुपसंहारनियामकत्वेन सिद्धत्वात् तेनैव तत्सिद्धावेतयोः सूत्रयोः किं प्रयोजनमिति शङ्क्यम् । समाचारसूत्रोक्तानां निरूपणप्रकाराधिकारसम्बन्धिनामानन्दमयविद्यायामैक्यात् तद्भेदकृतानुपसंहारस्य भक्तिमार्गीयोपासने वक्तुमशक्यत्वात् तदर्थमेतयोर्हेत्वोः सूत्रकृता निर्देशात् । नन्वाकारपूरकावयवप्रायपाठे प्रविष्ट आत्मशब्द आकारे तात्पर्यरहित इत्यत्र किं मानमित्यत आहुः **अग्र इत्यादि** । आनन्दमयविवरणे 'आत्मानं स्वयमकुरुते'त्यादिना आत्मन एव प्राकट्ये 'रसो वै स' इति रसरूपताया वक्ष्यमाणत्वात् रसस्य च निरुपधिप्रियात्मरूपस्थायिभावात्मकत्वात् तस्यैव परस्यात्मनो विवरणाय प्रपाठकप्रवृत्त्या

रश्मिः ।

आत्मशब्दाच्च ॥ १५ ॥ अप्याहेति । नामभेदादिः प्रतिबन्धकोपिपदार्थः । अधोक्षजत्वं च प्रतिबन्धकम् । उपासनाऽविषयत्वं च प्रतिबन्धकम् । **प्रियमेवेत्यादीति** । 'तस्य प्रियमेव शिर' इत्यत्र प्रियमेवेत्यादिः । आनन्दादय इत्यनुवर्तते । **भावनेति** । 'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः । आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तये'दिति । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण' इति च । **लौकिकेति** । लौकिकपुरुषे वैराजत्वेन देवदत्तशिर एव शिरः द्यौरूपं दक्षिणोत्तरपक्षावन्तरिक्षरूपौ इदं चरणं पुच्छं परिदृश्यमानौ पादौ पृथिवीरूपाविति । दृष्टावित्यर्थः । **भक्तिदृष्टाविति** । प्रियमोदप्रमोदात्मब्रह्मसु प्रीतिः धर्मो भक्तिः मोदप्रमोदौ आनन्दविशेषौ भक्तेराधारौ (आनन्द) आनन्द आत्मा चाधारः ब्रह्म उद्दीपनं व्यभिचारि वा । ब्रह्मानन्दो भक्तेराधारः । एवं भक्तौ दृष्टौ । **दोष इति** । पक्षाद्युपसंहारे दोषः । अनेन **रसात्मकानामिति** प्रियप्राधान्यादीनां विशेषणं भाष्ये व्याख्यातम् । **आत्मा स्वरूपमिति** भाष्यमपि । आत्मा व्यापकः । स्वस्य रसस्य रूपमानन्द इत्यर्थकम् । **आनन्देति** । तैत्तिरीये तथा । **रसरूपता** दशरसरूपता । **तस्य चेति** भाष्यार्थमाहुः **रसस्य चेति** । **निरुपधीति** । फलदत्वाद्युपाधिशून्यः प्रिय आत्मा तेन विषयेण रूप्यते व्यवह्रियते या रतिस्तद्रूपस्थायिभावात्मकत्वात् । **तस्यैवेति** । रसस्यैव । शेषं पूरयन्त एवाभासोक्ताशङ्कां वारयन्ति स्म **उपक्रमेति** । उपक्रमोऽत्रात्मनो रसस्य च । आदिनानन्दमयत्वं तत् । तात्पर्ये । स्वेषां आकारपूरकावयवप्रायपाठे प्रविष्टत्वेप्यनाकारे तात्पर्ये लिङ्गं कारणं त्रिविधात्मप्रसिद्ध्या कारणम् । आत्मोप-

वात्मकत्वात्तस्यैवानन्दमयत्वाच्च । प्रियविषयकलीलामध्यपातिभक्तज्ञानप्रकाराणामपि रसात्मकत्वेनानन्दरूपत्वात् तेषामुपासना तूत्तमाधिकाराभावाच्छिरःपक्षादिरूपेण कार्येति भाववती श्रुतिस्तथा न्यरूपयत् । एतेन यत्परम्परासम्बन्धेऽप्युपास्यत्वं तदस्य महत्त्वं कियदवधि वाच्यमिति ज्ञाप्यते । एवं सत्युपासनामार्गीयोपास्यं विभूतिरूपम्, न तु मूलरूपम् । 'यन्न योगेने'ति वाक्यादिति ज्ञेयम् ॥ १९ ॥

इति तृतीयाध्याये तृतीयपादे प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

तस्यैवानन्दमयत्वाच्चोपक्रमादिकं तात्पर्यलिङ्गमेव मानमित्यर्थः । नन्वेवं सति श्रुतौ पक्षादिरूपत्वं किमित्युक्तम्, अत आहुः प्रियविषयकेत्यादि । तथाच न सर्वथा तत्र निस्तात्पर्यः, अपि तु मुख्याधिकारिणः प्रति तथेत्यर्थः । ननूभयोः परस्वरूपपरत्वे तुल्ये कथमधिकारवैलक्षण्यावगतिरित्यत आहुः एतेनेत्यादि । आत्मपदस्यानन्दस्वरूप एव तात्पर्येण यत्परम्परासम्बन्धेपि पक्षादिविशिष्टानन्दमयस्योपास्यत्वम्, तस्य सम्बन्धिनो महत्त्वं कियदवधि वाच्यमिति तदग्रिमया 'यतो वाच' इति श्रुत्यापि ज्ञाप्यते । एवं तस्योत्कर्षे सति उपासनामार्गीयोपास्यं विभूतिरूपम्, न तु मूलरूपम् । 'यन्न योगेन सांख्येन दानव्रततपोऽध्वरैः । व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपी'त्येकादशस्कन्धे भगवता केवलेन भावेन स्वप्राप्तिं प्रक्रम्येतरनिषेधकथनादग्रे च रसभाववतामेव प्रशंसाया उक्तत्वात् । तथाचैवंविधवाक्यैरेव वैलक्षण्यावगतिरित्यर्थः । एवं चतुःसूत्र्या प्रियशिरस्त्वादिधर्माणामुपसंहारानुपसंहारावधिकारभेदेन विचारितौ । एवञ्चात्र बोधसौकर्यार्थमवान्तराधिकरणव्यवस्था कृता । वस्तुतस्तु पञ्चदशसूत्रेणानेनाधिकरणेन विध्यैक्यवेद्यैक्ययोरुपसंहारहेतुप्रयोजनयोः परविद्यासु तद्बाधकपरिहारतद्व्यवस्थयोरानन्दादीनामसाधारणत्वेनानुप-

रश्मिः ।

निषद्युक्तरीत्याऽन्नमयो बाह्यात्मा, प्राणमयमनोमयावन्तरात्मा, विज्ञानमयानन्दमयौ परमात्मेति । तत्र स्वावयवरूपाकारेणापि विशिष्टः । ननु लिङ्गं कथं मानमिति चेत् । न । आत्मरसानन्दमयानां मानाधिदैविकत्वेन मानत्वात् । **पक्षादिरूपत्वमिति** । धर्मिणोक्षजत्वात् सोर्थो न कृतः । प्रियविषयकलीलामध्यपातिभक्तानां विज्ञानमयपदवाच्यानां विशब्देनोक्तानां विविधज्ञानरूपज्ञानप्रकाराणामपि मोदप्रमोदरूपपक्षात्मकरसात्मकत्वेनानन्दरूपत्वात् । उत्तमाधिकारः श्रीभागवतप्रथमस्कन्धे त्रयोदशाध्यायैरुक्तः । **तथेति** । पक्षादिरूपत्वेन । तृतीयाया लुक् । **तत्रेति** । पक्षादिरूपत्वे । निस्तात्पर्यो ग्रन्थः । **तथेतीति** । निस्तात्पर्यो ग्रन्थ इत्यर्थः । **उभयोरिति** । पुष्टिमार्गे विज्ञानमयानन्दमययोर्भक्तभगवतोः । **परस्वरूपपरत्वे** पुष्टिमार्गीयफलपरत्वे । यद्वा । स्वरूपपक्षादिविशिष्टयोः स्वरूपपरत्व आत्मपरत्वे इत्यर्थः । **यत्परम्परेति** । यदित्यव्ययं यस्येत्यर्थः । **सम्बन्धिन** इति । अध्याससम्बन्धिनोऽभेदसम्बन्धिनो वा । **एवंसतीति**भाष्यं विवृण्वन्ति स्म **एवं तस्येति** । **तस्येति** । आनन्दमयस्य । **उपासनामार्गीयेति** । एतेन भक्तिमार्गीयं विज्ञानमयभक्तरूपोपास्यमपि ज्ञेयम् । तस्याध्यात्मिकादित्रितयविदाश्रयत्वात् । **यन्नेति** भाष्यं विवृण्वन्ति स्म **यन्नेति** । **इतरेति** । सत्सङ्गेतरस्याः स्वाध्यायो वेदस्तदुक्तोपासनाया निषेधकथनात् । **रसभावेति** । अधिकारिणाम् । **एवंविधेति** । उपास्यभजनीयप्रतिपादकैः । तथा चोपासना पक्षिविषया । भजनं रसरूपभगवद्विषयकम् । **विध्यैक्येति** । चतुःसूत्र्या प्रतिपादितयोः । **उपसंहारेति** । 'उपसंहारोऽर्थाभेदा'दित्यत्र । उपसंहारस्य हेतुः अर्थाभेदरूपः

१ तस्य ।

भाष्यप्रकाशः।

संहारस्य प्रियशिरस्त्वादीनां व्यवस्थयोपसंहारस्य च निर्णयात्, सर्वप्रपञ्चातीतः सर्वमुपसंहृत्यैवमेकः कारणरूपश्च भवति, प्राणाख्यां च कलां सृजत इति बोधितम्।

शङ्कराचार्यास्तु, अन्यथात्वादितित्रिसूत्रेऽधिकरण उद्गीथविद्याम्, व्याप्तेश्चेत्येकसूत्रेऽधिकरणे च तदीयशेषम्, सर्वाभेदेत्येकसूत्रे च प्राणविद्याम्, आनन्दादय इति सूत्रे च ब्रह्मधर्माणामेवोपसंहारानुपसंहारौ विचार्य, आध्यानादिद्विसूत्रे 'इन्द्रियेभ्यः परा ह्यर्था' इत्यादिके, 'सा काष्ठा सा परा गति'रित्यन्ते काठकवाक्येऽर्थादीनां ततस्ततः परत्वप्रतिपादने प्रयोजनाभावात्, 'सा काष्ठा सा परा गति'रित्यनेन पुरुषविषयकादरप्रदर्शनाच्च तस्यैव परत्वं प्रतिपाद्यत इति सिद्धान्तमाहुः।

भास्कराचार्या अप्येवमेव वदन्ति।

तत्र परविद्याविचारं विहाय प्रथमत एवोद्गीथप्राणविद्याविचारे बीजं न पश्यामः। युक्तं तु परविद्यासु विचार्यमाणास्वानुषङ्गिकी तद्विचारस्यापि सिद्धिरिति। अतीतपादान्ते ब्रह्मण एव धर्माणां विचारात्। समन्वयेपि पूर्वमानन्दवाक्यान्येव विचार्य पश्चात् प्रतीकवाक्यविचारादिति। एवमाध्यानाधिकरणविषयवाक्येपि अर्थादीनामिन्द्रियादिभ्यः परत्वप्रतिपादनं न निष्प्रयोजनम्। तत्तद्बलिष्ठताप्रतिपादनस्यैव प्रयोजनत्वात्। अन्यथा विषयत्यागेन्द्रियनिग्रहयोरनास्थायां 'इन्द्रियै-

रश्मिः।

समानं च। अन्यथात्वादित्रिसूत्र्योपसंहारस्य प्रयोजनं तादृक् तादृग्गुणविशिष्टत्वेनोपासनम्। एवमुपसंहारहेतुप्रयोजनयोरित्यर्थः। 'व्याप्तेश्चे'ति द्वाभ्यां सूत्राभ्यां परविद्यास्वक्षराधिगमयित्रीषु उपासनाबाधकं पौगण्डादिकम्, तस्य परिहारः 'सर्वतः पाणिपादान्त'मितिश्रुतेः 'साकारमेव व्यापक'मिति। तस्य। किंच द्वितीयसूत्रे **तद्व्यवस्था** तयोर्नित्यत्वभङ्गानुमततदावेदकमानविरोधयोर्व्यवस्था, सर्वाभेदाद्व्यवस्था। एवं तद्बाधकपरिहारतद्व्यवस्थयोरित्यर्थः। आनन्दादय इति सूत्रार्थे **आनन्दादीना**मिति। **प्रिये**ति सूत्रार्थमाहुः **प्रियशिरस्त्वे**ति। व्यवस्थयोपसंहारस्य चतुःसूत्र्या च निर्णयादित्यर्थः। अधिकरणसमाप्तावानन्दमयस्योक्तेः भक्तिविषयस्य जगत्कर्तृत्वमाहुः **सर्वप्रपञ्चे**ति। 'असद्वा इदमग्र आसी'दित्यत्रेदमर्थो जगत्तस्यासत्त्वेनोक्तेः। 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्ती'ति श्रुतेः। **प्राणाख्या**मिति। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'ति श्रुतेः। **भाष्य** आनन्दमयादीनां निरूपणात् उपासनाप्रकरणाच्चानन्दमयादिशिरःपुरस्कारेण निरूपणं प्रियशिरस्त्वादिसूत्रात्कृतम्, न त्वात्मपुरस्कारेण। उपासनायामात्मनोऽदृश्यत्वात्। तत्र प्रथमाधिकरणे प्रियकला तदादिसृज्यत्वेन प्राणकला प्राणमयशिरः। यद्यपि भाष्ये आनन्दमयादीनां निरूपणम्, न शिरोमात्रस्य निरूपणम्, तथापि प्रियशिरस्त्वादिसूत्रे शिरोमात्रग्रहणसूचितशिरआदिध्यानम्। एकैकाङ्गध्यानस्य 'आध्यानाये'ति सूत्रे सिद्धत्वात्। तेनान्नमयादिपञ्चापि ज्ञेयाः। अत्र पादार्थसंगमनाय आनन्दमयस्य प्राणधर्मो विचारितः, प्राणमय इति तैत्तिरीये उपसंहृत्यानन्दमयोपासना। वेदे 'वायुर्वै क्षेपिष्ठा देवते'त्युक्तेः। 'त्वमेव प्रत्यक्षं ब्रह्मासी'ति तैत्तिरीये। अतो वेदोक्तधर्मवत्त्वेनोपासना कार्या। कलापदान्मदुक्ता प्राणकला स्मृतानन्दमयप्रसङ्गेन प्राणमयः तत्प्रसङ्गेन प्राणकलेति। **तदीये**ति। 'ओमित्येतदक्षरमुद्गीथमुपासीते'त्यत्राक्षरोद्गीथशब्दयोः सामानाधिकरण्ये श्रूयमाणे शेषं विशेषणपक्षम्। **पुरुषे**ति। 'पुरुषान्न परं किञ्चित्सा काष्ठे'त्यादिना पुरुषविषयकेत्यादिः। ननु परस्य शाब्दापरोक्षविषयस्य विद्याविचार इत्यत आहुः **अतीते**ति। तथाच धर्मद्वारिकैव परविद्येति भावः। **समन्वय** इति। प्रथमाध्याये पञ्चमाधिकरण-आनन्दवाक्यानि। **पश्चा**दिति।

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ (३-३-२.)

तैत्तिरीयकेऽन्नमयादिनिरूपणे पुरुषविधत्वं तेषां निरूप्य, 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति सर्वत्र निगद्यते । तत्रानन्दमयपर्यन्तं शारीरात्मत्वकथनाद्भवति संशयः । शरीराभिमानी जीव एव कश्चित्, उत ब्रह्मैव ।

तत्र शारीरपदाज्जीव एव भवितुमर्हति । तथा सत्यानन्दमयस्यापि ब्रह्मत्वं नोपपद्यते । उच्यते च भार्गव्यां विद्यायां 'अन्नं ब्रह्मेति व्यजाना'दित्यारभ्या-

भाष्यप्रकाशः ।

विषयाकृष्टै'रिति स्मृत्युक्तप्रणाड्या तैः प्रबलानर्थप्रसङ्गात् । ज्ञाते तु तत्तन्नियामकतया तेषां तत्तत्परत्वे तत्त्यागनिग्रहादिभिः पुरुषनिष्ठपरत्वप्रतिपत्तिसौकर्यमिति तस्यैव मुख्यप्रयोजनत्वादिति ।

रामानुजाचार्यास्तु, आध्यानादिसूत्रद्वयमग्रिमं च सूत्रद्वयमानन्दाद्यधिकरणस्यैव शेषत्वेनाहुः । तत्र प्रियशिरस्त्वादीनां ध्यानार्थत्वमेव, न तु सर्वदा आनन्दमयप्रतीतावनुवर्तन्त इत्याध्यानसूत्र आहुः । अग्रिमे तु 'अन्योऽन्तर आत्मानन्दमय' इत्यानन्दमयस्य आत्मशब्देन निर्देशादात्मनश्च शिरःपक्षपुच्छाद्यसम्भवात् प्रियशिरस्त्वादयस्त्वस्य सुखप्रतिपत्त्यर्थं निरूपणमात्रमित्याहुः । इह तु विभूतिरूपे तथा वर्तन्त इति मुख्याधिकाररहितानां आनन्दमये ध्येयाः, मुख्याधिकारिणां तु विभूतौ ध्येयाः, न तु पुरुषोत्तम इति विशेषः । आत्मगृहीत्यादिसूत्रद्वये तु 'अन्योऽन्तर आत्मानन्दमय' इत्यत्रात्मपदेन परमात्मैव गृह्यते । इतरवत् । 'आत्मा वा इदमेक एवाग्र आसीत्, स ऐक्षत लोकानुसृज' इत्यैतरेयवत् । कुतः । उत्तरात् । 'सोऽकामयत बहु स्या'मिति वाक्यात् । अवधारणं च 'तस्माद्वा एतस्मा'दिति पूर्ववाक्यस्थमाहुः । तदस्माकमपि संमतम् ॥ १५ ॥ इति प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ पूर्वाधिकरणे भक्तिमार्गीयाणां प्रियशिरस्त्वाद्यनुपसंहारे 'आनन्द आत्मे'त्यात्मशब्दप्रयोगो हेतुत्वेनोक्त इति तत्प्रसङ्गेनानन्दमयप्रकरणस्थमात्मशब्दयुक्तवाक्यान्तरं विचारयतीत्याशयेनैतदधिकरणविषयादिकमाहुः तैत्तिरीयक इत्यादि । भवति संशय इति । अस्मिन् वाक्ये भवति संशयः । पूर्वपक्षमाहुः तत्रेत्यादि । इदं हि वाक्यं प्राणमयमारभ्यानन्दमयपर्यन्तं पठ्यते, तत्र तस्य प्राणमयादेः, एष एव शारीरः शरीराभिमानी आत्मा इत्युक्ते, क एष इति शङ्कायां 'यः पूर्वस्ये'त्युच्यते । तत्रापि पूर्वपूर्वविचारे सर्वेभ्यः पूर्वोऽन्नमयोऽस्तीति तस्य यः शारीर आत्मा स सर्वस्येति सिध्यति, तदभिमानी च जीव एव लोके दृश्यते । तथा सति स एवानन्दमयस्याप्यभिमानित्वेनायातीति तस्यापि ब्रह्मत्वं

रश्मिः ।

'अन्तस्तद्धर्मो'द्यधिकरणेषु प्रतीकस्य सूर्यादेः 'अथ योन्तरादित्ये हिरण्मयः पुरुषो दृश्यते'इत्यादीनि वाक्यानि तेषां विचारात् । तत्तन्नियामकेति । तेषां तेषामिन्द्रियादीनां नियामकतया तेषामर्थादीनां तत्तत्परत्वे तत्तन्नियामकपरत्वे, तत्त्यागः प्रतिकूलस्य विसर्जनं अन्यविषयेभ्यो निग्रहः । आदिनानुकूलस्य सङ्कल्पः । पुरुषेति । पुरुषे निष्ठा भक्तिर्यस्य तत्परत्वस्य प्रतिपत्तिर्ज्ञानं तस्याः सौकर्यमिति । तस्यैव प्रतिपत्तिसौकर्यस्यैव । अस्येति । उपासकस्य । अवेति । द्वितीयसूत्रस्थम् । 'तस्माद्वा' इत्यत्र वै अवधारणे ॥ १५ ॥ इति प्रथमं सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥१६॥ प्रसङ्गरूपामधिकरणसङ्गतिमाहुः पूर्वेति । उच्यते

नन्दमयपर्यन्तं 'आनन्दो ब्रह्मेति व्यजाना'दित्यन्तया श्रुत्या ब्रह्मत्वमित्युभयतःपाशा रज्जुरिति प्राप्ते, आह।

इतरवज्जीववदात्मगृहीतिरात्मग्रहणम्। 'तस्यैष एव शारीर आत्मे'ति यत्तदुत्तरात्। 'यः पूर्वस्ये'ति सर्वत्रोक्तत्वात् सर्वेभ्य उत्तर आनन्दमयस्तस्माद्धेतोरित्यर्थः। अन्नमयादिषु सर्वेष्वानन्दमयस्यैवोक्ततत्तच्छरीराभिमानित्वात् तथा। एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः।

अथवा। 'अन्योऽन्तर आत्मे'त्यन्नमयादन्यत्र सर्वत्रोक्तत्वात् पूर्वपूर्वनिरूपितो यः, स इतर इत्युच्यते। तथा च, 'यः पूर्वस्ये'ति श्रुत्येतरवत् पूर्वनिरूपितवत् प्रकृतस्याप्यात्मग्रहणं कथनं यत्तदुत्तरादिति पूर्ववत्॥ १६॥

भाष्यप्रकाशः।

नोपपद्यते। नचाब्रह्मत्वमेवास्त्विति वाच्यम्। उच्यते च भार्गव्यां विद्यायामन्नाद्यानन्दान्तानां ब्रह्मत्वम्। अत उभयथापि श्रुतेर्विरोधादत्र निर्णयो दुर्घट एवेति पूर्वः पक्ष इत्यर्थः।

सिद्धान्तं व्याकुर्वन्ति इतरवदित्यादि। जीववदिति। शारीरपदसमभिव्याहाराज्जीववत्। तथाच 'यः पूर्वस्ये'ति सर्वत्र कथनात् सर्वेभ्यः पूर्वो योऽन्नमयस्तस्य पूर्वमाकाशादिसृष्टिजनकस्य परस्यैव ब्रह्मण उक्तत्वात्तत्स्वरूपबोधनार्थमेवानन्दमयस्योक्तत्वाच्छारीरपदसमभिव्याहारमात्रेण जीवशङ्का न कार्या, किन्तूपक्रमादिकं विचार्य ब्रह्मैव तत्रात्मत्वेन बोध्यमित्येतदर्थमुत्तरादित्युक्तमित्यर्थः। नचाभिमानित्वे जीवत्वं स्यादिति शङ्क्यम्। सर्वात्मकत्वात्। अन्यस्यान्यस्मिन्नभिमानस्यैवाध्यासरूपत्वेन जीवत्वापादकत्वात्। पुरुषविधब्राह्मणे उपक्रान्तस्यात्मनो 'ब्रह्म वा इदमग्र आसी'दिति ब्रह्मत्वं निगमयित्वा, 'तदात्मानमेवावेदहं ब्रह्मास्मी'ति श्रावणेन तथावसायादिति। तदेतत् स्मारयन्ति एतदित्यादि।

ननु तस्मिन्नेव प्रकरणे 'शारीर आत्मे'तिवत् 'अन्योऽन्तर आत्मे'त्यप्यात्मग्रहणमस्तीति कमात्मशब्दमत्र सूत्रकारोऽनुसन्धत्त इति न विनिगमनेत्यतो व्याख्यान्तरमाहुः अथवेत्यादि। य इति। प्राणमयादिविज्ञानमयान्तः। तेन यत् सिद्धं तदाहुः तथाचेत्यादि। 'यः पूर्वस्ये'ति 'असन्नेवे'त्यनुवाकस्थया श्रुत्या पूर्वनिरूपितानां प्राणमयादीनामिव यत् प्रकृतस्यानन्दमयस्यापि पूर्वसम्बन्ध्यात्मकथनम्, तत् उत्तरात् पूर्वव्युत्पादितरीत्या 'अन्योऽन्तर आत्मे'त्यनुक्त्या च आनन्दमयादित्यर्थः। एवमप्यन्तरात्ममानन्दमय एव परिसमाप्यत इति निर्व्याज आत्मा स एवेति 'शारीर आत्मे'त्यत्रापि स एव परामृश्यत इति वाक्यविनिगमनाभावेपि आनन्दमय एव सर्वत्र शारीर आत्मेत्यस्यार्थस्य न व्याहतिरित्यर्थः॥ १६॥

रश्मिः।

चेति भाष्यं विवरीतुमाहुः **नचेति**। उभयतःपाशा रज्ज्वर्थमाहुः **उभयथापीति**। जीवत्वे च ब्रह्मत्वे च। ब्रह्मत्वबोधकश्रुतिविरोधः। 'शारीर आत्मे'ति श्रुतिविरोधः। तस्मात्। **भाष्ये। यत्तदिति।** इति यत् तत् उत्तरादित्यर्थः। **तथेति**। आनन्दमयस्य ब्रह्मत्वात्। **प्रकृते**। एतत्सिद्धार्थमाहुः **तथाचेत्यादि**। एतदित्यादिभाष्यमवतारयितुमाहुः **नचाभीति**। **कमिति**। शारीरशब्दत्वेनान्तरशब्दत्वेन वा प्रकारेणेति प्रश्नः। **श्रुत्येति**। 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति। तस्यैष एव शारीर आत्मा। यः पूर्वस्ये'ति श्रुत्या। 'असन्नेव' त्यस्या उपन्यासस्तु द्वितीयस्कन्धनवमाध्यायोक्त'तप तपे'ति वचनाज्ज्ञयाऽसत्त्वे प्राप्ते आनन्दमयस्य तन्निरासाय। **वाक्येति**। वाक्ययो'रन्योन्तर आत्मे'त्यस्य 'शारीर आत्मे'त्यस्य च विनिगमनाभावेपीत्यर्थः॥ १६॥

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

ननु सर्वत्र 'अन्योऽन्तर आत्मे'ति श्रुत्या प्रत्येकमन्नमयादीनां भेदनिरूपणाच्छारीरपदाच्च भिन्नो भिन्नो जीव एवात्मा शरीराभिमानी सर्वत्रोच्यते, आनन्दमयेपि तथोक्तियां, सा त्वानन्दमयस्य ब्रह्मत्वेन व्यापकत्वेन सर्वत्रान्वयात् सर्वेषु शरीरेषु सम्बन्धादित्याशङ्क्य, तन्निरासायोक्तेऽर्थ उपपत्तिमाह स्यादित्यादिना । स्यात् । आनन्दमय एवोक्तसर्वशरीराभिमानी भवतीत्यर्थः । तत्र हेतुरवधारणादिति । 'एष एवे'त्येवकारेणेतरनिषेधपूर्वकमानन्दमयस्यैवात्मत्वनिर्धारणादित्यर्थः ॥ १७ ॥

इति तृतीयाध्याये तृतीयपादे द्वितीयमात्मगृहीत्यधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥ अत्र भाष्यमतिरोहितार्थम् । तथाचान्नमयादीनां चतुर्णामाध्यात्मिकानां विभूतिरूपत्वात् तच्छरीरमप्राकृतसत्त्वात्मकम् । तत्र य आनन्दमयांशः प्रविष्टः, स तदभिमानी । तेन तदाधिभौतिकेष्वसदादिशरीरस्थेषु पञ्चकोशेष्वपि स एवाभिमानी । तेन 'आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविक' इति न्यायेनैकस्यैव कार्यद्वयकर्तृत्वाज्जीवोपि तदभिन्नत्वेन सिध्यति । एवमभेदे उपसंहृते सति 'सर्वं सहेत परुषं सर्वेषां कृष्णभावना'दित्युक्ता सेवाङ्गभूता शिक्षा सुखेन सिध्यति । तेन विचारदशायां 'सर्वभूतस्थितमेकमेव चिन्तये'दिति बोधितम् । श्रद्धाख्यकला च बोधिता ।

अन्ये तु, ऐतरेयवाक्ये परमात्मैवोच्यते, न तु हिरण्यगर्भ इत्याहुः । तदपि युक्तम् ॥ १७ ॥

इति द्वितीयमात्मगृहीत्यधिकरणम् ॥ २ ॥

रश्मिः ।

अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥ अन्तिर इति । श्रुत्येत्यन्त एको हेतुः । स्यादिति । आनन्दमय एवोक्तसर्वशरीराभिमानी भवतीति स्यादित्यर्थ इत्यर्थः । आनन्दमयस्यैवेति । एवकारेणान्नमये 'अयमात्मे'त्यनेनानन्दमयस्य आत्मत्वम् । 'तस्माद्वा एतस्मा' दित्यस्यामात्मानन्दमय इति । आत्मन आनन्दमयत्वस्यानन्दमयाधिकरणेन सिद्धेः । प्रकरणान्न सत्यज्ञानात्मकत्वम् । तिरोहिते सत्यज्ञाने तु स्त एव । एवमतिरोहितार्थमित्यर्थः । एतेनेति । अन्वयपदात् व्यापकत्वेन । एकमेवेति । अवधारणव्याख्यानश्रुतावेकत्वस्य विवक्षितत्वादिति भावः । चिन्तयेदिति । 'आध्यानाये'ति सूत्रवासनायाः । उपासनाया वा । श्रद्धेति । श्रद्धाकला विज्ञानमयशिरः । छान्दोग्ये षष्ठे प्रपाठके तु 'द्यौः कला'इत्यादिषु द्रष्टव्या । दिवि जलदर्शनात् । 'श्रद्धा वा आप' इति श्रुतेः । 'समुद्रः कला' इति वा । सामुद्रं जलं सूर्यनिपीतं मिष्टं जातमिति । बोधितेति । इतरवत्पदेन व्यञ्जनया बोधिता । आनन्दमये प्राणधर्मस्येव तद्विधायिका आपोत्रानन्दमयधर्मत्वेन स्मृता अत्रिवृत्कृताः । तद्धर्मत्वेनानन्दमयोपासना । अन्नमय इत्यत्र 'आपो वा अन्न'मिति श्रुतेः । ऐतरेयेति । 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्स ऐक्षत लोकानसृजते'ति वाक्ये । युक्तमिति । आत्मनः परमात्मत्वाद्युक्तम् । 'विशिष्टं शुद्धान्नातिरिच्यत' इति नैयायिकोद्घोषात् । सूत्राणां सारवद्विश्वतोमुखत्वाच्च ॥ १७ ॥ इति द्वितीयमात्मगृहीत्यधिकरणम् ॥ २ ॥

कार्याख्यानादपूर्वम् ॥ १८ ॥ (३-३-३.)

तैत्तिरीयके पठ्यते। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्युपक्रम्य महाभूतसृष्टिमुक्त्वा, आम्नायते 'पृथिव्या ओषधयः, ओषधीभ्योऽन्नम्, अन्नात् पुरुषः,स वा एष पुरुषोऽन्नरसमय'इति। एतदग्रेऽन्नस्योत्पत्तिस्थितिलयहेतुत्वमुक्त्वा, 'येऽन्नं ब्रह्मोपासत'इत्युच्यते। भृगुवरुणसंवादे च 'अन्नं ब्रह्मेति व्यजाना'दित्युच्यते। तत्र 'स वा एष पुरुषोऽन्नरसमय' इत्यनेन पूर्वोक्त एव पुरुष उच्यते, उत तद्भिन्न इति भवति संशयः। किमत्र युक्तम्। पूर्वोक्त एवेति। यतः पूर्वोक्तस्यैव 'स वा' इत्यनेन प्रत्यभिज्ञानं प्रतीयते। तत्र ब्रह्मत्वेनोपासना कार्येत्यभिप्रायेण ब्रह्मस्तूयत इति प्राप्ते, आह कार्याख्यानादपूर्वमिति। पूर्वस्यान्नकार्यस्य पुरुषस्याख्यानात्, 'स वा एष' इत्यनेनाग्रिमश्रुतिभिर्ब्रह्मत्वेन प्रतिपिपादयिषितमन्नरूपमेवोच्यते, न तु पूर्वमित्यर्थः। 'स वा एष' इति प्रत्यभिज्ञानमिति यदुक्तम्, तन्न। 'अन्नात् पुरुष'इत्यन्तेनाधिभौतिकतन्निरूपणात्। 'स वा एष'इत्यनेनाध्यात्मिकतन्निरूपणादुभयोश्च भेदात्। अत एव संशयाभावायाह। वै निश्चयेन एष वक्ष्यमाणः पुरुषः स आध्यात्मिकत्वेन प्रसिद्धोऽन्नरसमय इति। अन्यथा ब्रह्मात्मकतपोलक्षणसाधनेनाधिकारे सम्पन्ने 'अन्नं ब्रह्मेति व्यजाना'दिति न वदेत्। नचातदपि[1]

भाष्यप्रकाशः।

कार्याख्यानादपूर्वम् ॥ १८ ॥ अन्नमयादीनां कोशातिरिक्तत्वं बोधयितुमनुप्रसङ्गेन वदतीत्याशयेनाहुः तैत्तिरीयके इत्यादि। एतदग्र इति। 'अन्नाद्वै प्रजाः प्रजायन्त' इत्यग्रिमानुवाके। संशयमाहुः तत्र स वेत्यादि। तथाच 'अन्नात् पुरुष' इति हेतुहेतुमद्भावश्रावणात् पूर्वोक्त एव अन्नजन्य एव, उत अन्नस्य ब्रह्मत्वेनोपास्यतायास्तपसा ब्रह्मत्वेन ज्ञानस्य चाग्रे वक्ष्यमाणतया तादृशान्नरसमयत्वात् पूर्वोक्तपुरुषतो भिन्नो विभूतिरूप इति संशय इत्यर्थः। पूर्वोक्त एवेत्यादिपूर्वपक्षस्तु स्फुटः। सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति पूर्वस्येत्यादि। एतेन कार्यस्य आख्यानात् कथनात्। ल्यब्लोपे पञ्चमी। कार्यस्याकथनं कृत्वा अपूर्वं अग्रे उच्यमानं अतिरिक्तम्, न तु तदिति सूत्रयोजनात्र स्फुटीकृता।

अत्रायमाशयः। अन्नमयश्लोके यदि कार्यभूतस्यान्नस्य ब्रह्मत्वेनोपासनाय ब्रह्मधर्माः स्तुत्यर्थमुच्येरन्, तदा 'अन्नाद्वा' इत्यादिना पूर्वं तानुक्त्वा अग्रे 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते' इति सफलमुपासनमात्रं वदेत्। ब्रह्मत्वेनोपासनस्य तावतैव सिद्धेः। न तु तदग्रे पुनरपि 'अन्नꣳ हि भूतानां ज्येष्ठ'मित्यादिना भूतजनकत्वतद्वर्धकत्वाभ्यां धर्माभ्यां 'अतति

रश्मिः।

कार्याख्यानादपूर्वम्॥१८॥ कोशातीति। विभूतित्वम्। हेतुहेतुमदिति। अन्नं हेतुः, पुरुषो हेतुमान्। कार्यकारणभावश्रावणात्। प्रत्यभिज्ञानमिति। तत्ताइदन्ताप्रकारकं ज्ञानम्। अतिरिक्तमिति। अपूर्वत्वेन प्रसिद्धातिरिक्तम्। तस्य परमतत्वेन लौकिकभाषात्वेन सूत्रे विवक्षणात्। आत्मप्रकाशरूपम्[2]। 'धर्मो यस्यां मदात्मक' इति वाक्यात्, न तु पूर्वपुरुषरूपं प्रसिद्धं वा पूर्वमित्यर्थः। पूर्वपक्षोक्तमनुवदन्ति स्म अन्नमयश्लोक इति। निरस्यन्ति स्म पूर्वस्येति भाष्याशयात्। तदेति। तानिति। ब्रह्मधर्मान्।

१. न च तदपि, नवा तदपि इति पाठौ। २. उपासकरूप इति यावत्।

तत्तथात्वेन स्तूयत इति वाच्यम् । श्रुतेः प्रतारकत्वापत्तेः । आनन्दमयान्तमेवमेव निरूपणाच्च । अत एवास्याप्यात्माग्रे निरूपितो 'यः पूर्वस्ये'ति । स त्वाधिदैविक आनन्दमयः ।

भाष्यप्रकाशः ।

भूतानि सततं व्याप्नोती'त्यन्नमिति भूतव्याप्तिबोधकं निर्वचनं सूचयेत् । नापि 'अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत' इति निरुच्यात् । प्रयोजनाभावात् । एवं सत्यपि यदेवं पुनर्निर्वक्ति, तेन पूर्वोक्तात् कार्यरूपादन्नादेतं व्यवच्छिनत्ति । अग्रिमप्रपाठके ब्रह्मात्मकेन तपोरूपेण साधनेन तस्मिन् ब्रह्मत्वेन ज्ञानं भृगोर्वक्ति, न तु साधनं विना । तेनास्यान्नस्य पूर्वस्माद्वैलक्षण्यमवश्यं वक्तव्यम् । मैत्रायणीये 'विश्वभृद्वै नामैषा तनूर्भगवतो विष्णो'रिति भगवत्तनुत्वश्रावणात् । बृहन्नारायणोपनिषदि चान्नमुपक्रम्य 'स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं चे'त्यादिना व्यापकत्वश्रावणाच्च । एवमन्नयो-र्वैलक्षण्ये सिद्धे 'अन्नात् पुरुष' इत्यत्र य उच्यते, स भौतिक एव, पूर्वं तस्यैव सिद्धत्वात् । यः पुनस्तदग्रे 'स वा एष पुरुषोऽन्नरसमय' इत्यनेनोच्यते, स आध्यात्मिक एव । अन्नसार-भूतत्वात् । अत एव मध्ये निश्चयार्थकस्य 'वै' इत्यस्य कथनम् । नच प्रत्यभिज्ञाबोधकयोः 'स एष' इत्यनयोर्विरोधः शङ्क्यः । 'स' इत्यस्य 'स राजा तोयनीव्या भुवः' 'कला च सा कान्तिमती कलावत' इत्यादाविव प्रसिद्धार्थकतया 'एष' इत्यस्य वक्ष्यमाणार्थकतया चोपपत्तेः प्रत्यभिज्ञाया निश्चेतुमशक्यत्वात् । नच तौल्यं शङ्क्यम् । तदेतत्पदाभ्यां प्रसिद्धवक्ष्यमाणपरामर्षे पूर्वोक्तनिरुक्ति-लिङ्गाभ्यासानां सामञ्जस्यस्यान्यथा तदनुपपत्तेश्च प्रमाणत्वेन तन्निरासात् । प्रत्यभिज्ञापक्षे तज्जनकस्यान्नस्य कार्यतया अब्रह्मणो ब्रह्मत्वेन ज्ञानं तपसा वदन्त्याः श्रुतेः प्रतारकत्वापत्तिरिति दोषसम्भवात् । प्रशंसामात्रार्थतायास्तत्र वक्तुमशक्यत्वात् । आनन्दमयज्ञानपर्यन्तं तपोरूपसाध-ननिरूपणाच्चात्रैव तथा वक्तुमशक्यत्वात् । किञ्च । यदि भौतिक एवान्नमयः स्यात्, तदा

रश्मिः ।

निरुच्यादिति । निर्वचनं कुर्यात् । भाष्यीयहेत्वाशयपूर्वकं 'स वा एष' इत्यादिसाध्यभाष्याश-यमाहुः **विश्वभृदिति** । 'पृथिवी वा अन्न'मिति श्रुतेः । **पञ्चात्मेति** । पञ्चमहाभूतात्मा । **अन्न-सारेति** । 'पुरि शेत' इति पुरुषः कीटादिः सोऽन्नसारः, नत्वन्नम्, तथा दर्शनाभावात् । एवं भाष्योक्तहेत्वाशयमुक्त्वा साध्याशयमाहुः **नचेति** । देहलीदीपन्यायेनोभयहेत्वन्वयि । **पूर्वोक्त-हेतुग्रन्थेन** न शङ्क्य इत्यर्थः । स्वीयभाष्याशयमाहुः **स इत्यस्येति** । स प्रसिद्धः राजा दशरथः । तोयं नीवी मर्यादा यस्या भुवः । कान्तिमती सा प्रसिद्धा । कलावतश्चन्द्रस्य । **वक्ष्यमाणेति** । भाष्ये वक्ष्यमाणोऽर्थोऽन्नरसमयरूपः । **अशक्येति** । त्यदादीनां पूर्वपरामर्शकत्वमात्रत्वाभावात् । **तौल्य-मिति** । सुन्दोपसुन्दन्यायेनोभयत्र निश्चयाशक्त्या प्रसिद्धार्थस्यापि निश्चेतुमशक्त्या तथा । **निरुक्तीति** । 'अद्यतेऽत्ति च भूतानी'त्यन्ननिरुक्तिः । तपोरूपसाधनसाध्यत्वं ब्रह्मत्वेन ज्ञाने लिङ्गम् । अन्नाभ्यासः पूर्वोक्तः । **प्रमाणत्वेनेति** । अनुपलब्धेः प्रमाणत्वं प्राचां मते । तन्निरासस्तौल्यनिरासः तस्मात् । **नचान्तरिति** भाष्याशयमाहुः **प्रत्यभिज्ञापक्ष इति** । **तज्जनकस्येति** । विषयविधया प्रत्यभिज्ञा-जनकस्य । **वदन्त्या इति** । 'स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजाना'दिति श्रुतेः । कार्यतयाऽब्रह्मत्वेपि प्रशंसान्नस्येत्यत आनन्दमयप्रशंसेत्यादिभाष्याशयमाहुः **प्रशंसेति** । **तत्रेति** । श्रुतौ अर्थवादत्वापत्त्या तथा । तदेवाहुः **आनन्देति** । **अत्रैव तथेति** । अन्नमये तत्प्रवाहपठिते प्रशंसामात्रार्थतायाः । तथेत्य-

अथवा। वाजसनेयिशाखायां 'आत्मेत्येवोपासीते'त्युपक्रम्य 'तदेतत्प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मे'ति। एतदग्रेऽन्यस्य प्रियत्वं

भाष्यप्रकाशः ।

आनन्दमयस्य एतदात्मरूपत्वं न वदेत् । वदति तत् । अतः कार्यरूपाद्वैलक्षण्यमस्यावगन्तव्यम् । नचैवमपि आधिदैविकाद्भेदस्तु वर्तत एवेति किमनेन प्रयासेनेति शङ्क्यम् । 'आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविक'इति द्वितीयस्कन्धे आध्यात्मिकाधिदैविकयोः स्वरूपभेदनिवारणेन तदभावात् । अभिलापभेदस्य तु पाचकपाठकवत् कार्यभेदप्रयुक्तत्वेन स्वरूपाभेदकत्वात् । तस्मादाध्यात्मिकाधिदैविकयोरन्नमयानन्दमययोः कार्यभेदेन विभूतिविभूतिमद्भावादेव भेदः, न तु स्वरूपतः । धर्मधर्मिणोस्तादात्म्यरूपस्याभेदस्य पूर्वं साधितत्वात् । अयमेव न्यायः प्राणमयादिष्वपि द्रष्टव्यः । तेनानन्दमयविद्यायां पञ्चाप्यन्नमयादयः कोशातिरिक्ताः, तेषु चत्वारो विभूतित्वेनोपास्याः, आनन्दमयः पुरुषोत्तमस्तु तादृशविभूतिमत्त्वेनोपास्य इत्येतदर्थमिदमिति बोधितम् । तेन विशेषतो वैष्णवानां समीपे आसीनत्वं द्रष्टव्यमिति ज्ञापितम् ।

एतस्य विचारस्य पूर्वशेषत्वादर्थस्य प्रागपि व्युत्पादितत्वाच्च नात्यन्तमावश्यकतेत्यरुच्या प्रकारान्तरेणैतत् व्याकुर्वन्ति **अथवे**त्यादि । विषयादिकमाहुः **वाजसनेयी**त्यादि । **वाजसने-**

रश्मिः ।

स्मात्पष्ठ्यालुक् । वैलक्षण्यार्थं पुनराहुः **किञ्चे**ति । **एतदात्मरूपत्व**मिति । एतस्यान्नमयस्यात्मा इदंपदवाच्यस्तेन रूप्यते आत्मित्वेन व्यवह्रियत इत्येतदात्मरूपत्वम् । **वदति तदि**ति । 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'ति श्रुतिर्वदति तत्, एतस्य अन्नमयस्य आत्मा इदंपदवाच्योऽन्नमयनिरूपण आत्मत्वेनोक्तः, तेन रूप्यते आत्मित्वेन व्यवह्रियते इत्येतदात्मरूपत्वम् । न च पूर्वभाष्यानन्दमयाधिकरणयोर्विरोधः । 'आनन्द आत्मे'ति श्रुत्युक्तात्माभेदेन 'तस्यैष' इत्यत्रात्मनो नेतुं युक्तत्वान्न विरोध इति । ननु 'तस्माद्वा एतस्मादात्मन' इति श्रुत्युक्त आत्मा, 'तस्यैष' इति श्रुतौ 'आनन्द आत्मे'ति श्रुतौ तु प्रतीकगतो यः कश्चिदिति चेत् । न । अप्रसिद्धेः । तथाचान्नमये मूलात्मान्यात्मा न प्रसिद्धः । प्राणमये आकाशस्यात्मनाध्यासाख्यसम्बन्धः । 'आकाशशरीरं ब्रह्मे'ति श्रुतेः । आकाशाभिन्नो बाह्यात्मेत्यर्थः । आत्मोपनिषदा नात्मपदे लक्षणा । मनोमये आदेशस्यात्मना प्रतिपाद्यतासम्बन्धः । आदेशप्रतिपाद्याभिन्न आत्मेत्यर्थः । सर्वस्यात्मत्वेनादेशस्याप्यात्मत्वान्न लक्षणादेशपदे । विज्ञानमये योगस्यात्मना साध्यसाधनभावसम्बन्धः । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दिति निबन्धात् । भूमत्वेन साधनत्वात्तेन रूपेणाभेदः आत्मना । स्वस्वरूपसाधनाभिन्न आत्मेत्यर्थः । लिङ्गभूयस्त्वाधिकरणे सर्वात्मभावस्य भूमत्वं योगस्तदन्तर्गत इति सुष्ठु अभेदान्वयः । **अस्ये**ति । आध्यात्मिकस्य । **अत एवे**त्यादिभाष्याशयं विवरीतुमाहुः **नचैव**मित्यादि । भाष्यार्थस्तु **अत एवे**ति । आध्यात्मिकत्वादेव । **अस्यापी**ति । अन्तानन्दमयस्यापि । **अग्रे** अत्रैवाग्रे । **स त्विवि**ति । 'यः पूर्वस्ये'ति निरूपितः । अत्राशङ्कते स **नचैव**मित्यादिना । **वर्तत** इति । आध्यात्मिकस्य ज्ञेयः । **अनेने**ति । आधिदैविकशून्येनोपासनाविचारप्रयासेन । **तदभावा**दिति । वैयर्थ्यापादकस्य किमनेन प्रयासेनेति प्रश्नस्याभावात् । **कार्यभेदे**ति । प्राणमयमनोमययोराध्यात्मिकयोः कार्यं शरीरधारणं सङ्कल्पादि च । आधिदैविकानन्दमयकार्यं प्रेरणम्, वेदान्तप्रसिद्धम् । तादृशभेदप्रयुक्तत्वेन । **स्वरूपे**ति । पाचनकाले पाठनकाले एकस्य स्वरूपाभेदकत्ववदिति बोध्यम् । **पूर्व**मिति । प्रकाशाश्रयाधिकरणे । **अय**मिति । कार्याख्यानसूत्रन्यायः ।

निराकृत्य 'ईश्वरो हि तथा स्यादात्मानमेव प्रियमुपासीते'ति पठ्यते । अत्रात्मौपाधिकत्वात् सर्वत्र प्रियत्वस्यात्मपदेन जीवात्मन एव प्रियत्वेनोपासना विधीयते, उतेश्वरपदात् परमात्मन इति भवति संशयः । किमत्र युक्तम् । जीवात्मन एवेति । कुतः । यथा पुत्रादेरात्मौपाधिकप्रियत्वोक्त्या जीवात्मन एव प्रियत्वमुच्यतेऽन्यत्र श्रुतौ, तथेहापि 'प्रेयः पुत्रा'दित्यादिकथनाज्जीवात्मैव भवितुमर्हतीति प्राप्ते, आह कार्याख्यानादपूर्वमिति । इतः पूर्वमाम्नायते 'प्राणन्नेव प्राणो नाम भवति वदन् वाग् रूपं पश्यँश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येवे'ति । तथाच प्राणनवदनादिकार्यैः कृत्वा प्राणवागादित्वेनैकस्यैवात्मन आख्यानात् कथनादपूर्वम्, पूर्वं तु पुत्रवित्ताद्यभिमानदशायां 'न वा अरे पत्युः कामाय पतिः प्रियो भवती'त्यादिना यत्प्रियत्वेनोच्यते, तस्माद्भिन्नमात्मशब्दवा-

भाष्यप्रकाशः ।

च्यिशास्त्रायामिति । तस्यां बृहदारण्यके पुरुषविधब्राह्मणे । संशयं तद्बीजं चोक्त्वा पूर्वपक्षमाहुः जीवेत्यादि । अन्यत्रेति । मैत्रेयीब्राह्मणे । यद्यपि मैत्रेयीब्राह्मणेपि ब्रह्मैव प्रतिपाद्यत इति वाक्यान्वयाधिकरणे निर्णीतम्, तथाप्यापाततो निरुपधिप्रियत्वं जीवे भासते इति पूर्वपक्षे तदादृतम् । सिद्धान्तं वक्तुं सूत्रे कार्यैराख्यानं कार्याख्यानमिति तृतीयासमास इत्यभिप्रेत्य कर्मनामकथनादित्यर्थः सिध्यतीति तत् व्याकुर्वन्ति इत इत्यादि । अपूर्वमिति । पुत्राद्यभिमानदशायामभिमानित्वेन प्रतीयमानात् प्रतीचो भिन्नम् । तदेतद्विवृण्वन्ति पूर्वं त्वित्यादि । यदिति । जीवात्मरूपं वस्तु । आत्मशब्दवाच्यमत्रेति । 'आत्मानं प्रियमुपासीते'तिवाक्ये

रश्मिः ।

'यः पूर्वस्ये'ति सर्वत्र श्रावणात् । प्राणमयस्यादिः प्राणमयादिः अन्नमयः प्राणमय आदिर्ययोः मनोमयविज्ञानमययोः तौ प्राणमयादी, प्राणमयादिश्च प्राणमयादी च प्राणमयादयस्तेषु । सिद्धमाहुः तेनेत्यादि । पूर्वोक्तवेदनमुपासनं यद्यपि, तथाप्यात्मत्वात्सर्वेषां विशेषतः 'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारदे'तिवाक्याद्वैष्णवाना'मेतमानन्दमयमात्मानमुपसंक्रम्ये'त्यत्रैतच्छब्दात्समीपतरवर्त्यानन्दमयः 'आसीनः संभवा'दिति सूत्रादासीनः इत्येवं विशेषमुपासनायामनुसन्धायाहुः तेनेति । भार्गवी वारुणी विद्येयम् । पूर्वेति । विषयवाक्यमुपनिषत् भाष्यादसन्दिग्धं मन्येतेति । विद्याद्युपाधिना । अतः पूर्वस्य जन्माद्यधिकरणस्य शेषत्वम् । पूर्वाधिकरणस्य वा । तेनाधिकरणान्तरत्वभञ्जकत्वमिति भावः । प्रागपीति । आनन्दमयाधिकरणेपीत्यर्थः । उपासनाप्रकरणे विचारस्यास्मारणान्नात्यन्तमिति । तद्बीजमिति । हेतुतृतीयान्तहेतुपञ्चम्यन्तपदाभ्यां संशयबीजम् । इत इत्यादीति । विषयवाक्यात्पूर्वं पुरुषविधब्राह्मणे । अस्येति । अकृत्स्नस्य । प्राणनादिक्रियाविशिष्टस्य । 'मेने सन्तमिवात्मान'मितिवाक्योक्तस्य । कर्मकृतानि नामानि कर्मनामानि । अभिधाविषयकर्मणो नामानि वा । 'कर्मणा जायते जन्तु'रितिवाक्योक्तस्य । एवकारेण रूपनामव्यवच्छेदः क्रियते । तथा च पुरःस्फूर्तिकस्य कार्याख्यानात्साध्यत्वेनाख्यानात् यागस्य स्वर्गपर्यन्तं स्थित्यर्थमपूर्वमित्यस्यार्थस्य विचारेपि वेदान्तीयकर्मविचारः । अन्तरात्मपरत्वे तूपलक्षणेन षोडशापि ज्ञेयाः । तथाचेति । पुराणे परमतलौकिकीभाषाभ्यां हेतुभ्यां पूर्वोक्तसदर्भसिद्धार्थं च अपूर्वमित्यन्तः सूत्रार्थ इत्यर्थः । आत्मन इति । कर्मविशिष्टात्मरूपस्य, नित्यस्याफलमनुवर्तमानस्य । वेदान्तीयकर्मानन्तरं तदीयापूर्वं वक्ष्यमाणभाष्योक्तमाहुः पुत्रादीति । अहं पुत्रीति पुत्राभिमानः ।

च्यमत्रेत्यर्थः । लोके हि प्राणवायुवागिन्द्रियादीनामेव तत्तच्छब्दवाच्यता, न तु जीवस्य, अत एवाग्रे श्रुतिराह 'ईश्वरो हि तथा स्या'दिति । अत एव 'प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मे'त्याह । अन्तरो जीवात्मा, ततोऽप्यतिशयेनान्तरमन्तरतरं पुरुषोत्तमस्वरूपमेव भवितुमर्हतीति । एतेन विग्रहस्यैवात्मरूपत्वं सिध्यति । तेनाविकृतत्वपरमानन्दत्वादयोपि धर्मा उपसंहर्तव्याः ॥ १८ ॥

ननु विग्रहे चक्षुःश्रोत्रादीनां वैलक्षण्यप्रतीतेरात्मनश्चैकरसत्वादुक्तकर्मनामवत्त्वं ब्रह्मण्यनुपपन्नमित्याशङ्क्योत्तरं पठति ।

भाष्यप्रकाशः ।

आत्मशब्दवाच्यम् । ननु प्राणनादिकार्ये जीवस्यापि प्रयोजकत्वात् कार्याख्यानमात्रेण प्रत्यगात्मातिरिक्त आत्मात्रोच्यत इति कथं निश्चेयमित्यत आहुः लोके हीत्यादि । अत एवेति । जीवभिन्नत्वादेव । अत एव प्रेय इत्यादि । ईश्वरत्वादेव प्रेयोऽन्यस्मादित्यादिकं श्रुतिराह । तदेव व्युत्पादयन्ति अन्तर इत्यादि । तथाचेश्वरत्वान्तरतरत्वाभ्यां लिङ्गाभ्यामुपष्टब्धेन तेन तथेत्यर्थः । ननु भवत्वेवम्, तथापीदानीं तद्विचारस्य किं प्रयोजनमत आहुः एतेनेत्यादि । एतेनेति । प्राणनादिकार्यमुक्त्वा 'ईश्वरो हि तथा स्या'दिति तत्तत्सर्वरूपताख्यानेन । एवमेतत्साधनस्यापि प्रयोजनमाहुः तेनेत्यादि । उपसंहर्तव्या इति । अवतीर्णे स्वरूपेऽनुसन्धेयाः । तथाचैतदर्थमिदमत्र विचारितमित्यर्थः । तेन पूर्वोक्ते अनावश्यकतामात्रं न वर्णकान्तरकथने बीजम् किन्त्वेतदपीति बोधितम् ।

अन्ये तु इदमेकसूत्रमधिकरणमङ्गीकृत्य अत्र प्राणविद्याशेषं विचारयन्ति । भोजनारम्भसमास्योराचमनीयास्वप्सु प्राणवासोदृष्टिः कर्तव्येति ।

तत्र नास्माकमादरः । तासाममुख्यविद्यात्वेन तद्विचारस्य प्रासङ्गिकत्वात् । विद्यान्तरं मध्ये विचार्य दूरस्थितस्य पुनरत्र स्मृतौ बीजानुपलम्भाच्चेति ॥ १८ ॥

रश्मिः ।

प्रतीचो जीवात् । भिन्नमात्मशब्दवाच्यम् । न हि जीवो वदन् वाग्भवति अनुक्तेः, किन्तु छान्दोग्यीाष्टमोपदेशविषयः । आत्मशब्देति । अपूर्वं प्रकाशाश्रयात्मशब्दवाच्यम् । 'धर्मो यस्यां मदात्मक' ति वाक्यात् । अभिधातात्पर्याभ्याम् । प्रयोजकेति । 'जीव प्राणधारण' इति धातुपाठात्प्राणनादिप्राणकार्ये परम्परया जीवस्य कारणत्वात् । तेन तथेति । आत्मपदेन अन्तरो जीवात्मेत्यादिः । प्राणनादीति । अन्तर्यामिब्राह्मणोक्तस्यात्मनो विग्रहत्वकथनेनेत्यप्येतेनेत्यस्यार्थो बोध्यः । एतदिति । नित्यविग्रहवत्त्वसाधनस्य । एतदपीति । विग्रहस्यैवात्मरूपत्वम् । प्राणविद्येति । प्राणवासो दृष्टिरूपम् । भोजनस्यारम्भसमास्योः । प्राणवास इति । 'आपोमयः प्राण' इति श्रुतेरप्सु प्राणवासः । न्तरेति । प्राणविद्यास्थितस्य ॥ १८ ॥

समान एवं चाभेदात् ॥ १९ ॥

चोऽप्यर्थे । तथाचैवमपि सति श्रोत्रचक्षुरादिवैलक्षण्यप्रतीतावपि सति **समान** एकरूप एव, न तु विषमः । तत्र हेतुर**भेदा**दिति । चक्षुरादीनां ब्रह्मत्वेन परस्परमभेदादित्यर्थः ।

अत्रेदमाकूतम् । 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुतेरुपनिषद्वेद्यमेव ब्रह्मस्वरूपम् । ताश्च 'प्राणन्नेव प्राणो भवति वदन् वा'गित्यादिरूपाः प्रतिनियतेन्द्रियग्राह्यान् अर्थान् स्वरूपेणैव गृह्णत् ब्रह्म तत्तच्छब्दवाच्यं भवतीति वदन्ति । तद्वाच्यता च व्यवहार्यत्वे । स च 'तदेतत्प्रेयः पुत्रा'दित्यादिवाक्यैकवाक्यतया निरुपधिस्नेहवतामेव व्यवहार्य इति ज्ञाप्यते । स चाविर्भूतेऽवताररूप एव सम्भवति । एवं सति तत्र भक्तैर्भगवद्विग्रहे तत्तदवयवेषु भेदेन यथा यथा व्यवह्रियते, तथा तथैव तदेकमेवाखण्डसच्चिदानन्दरूपं ब्रह्मेत्यर्थः सम्पद्यते । एवंविधो लोके न प्रसिद्ध इत्यसम्भावना स्यात्, तदभावायाग्रे श्रुतिराह 'ईश्वरो हि तथा स्या'दिति । एतेनाविर्भूतरूपे व्यापकत्वैकरसत्वसच्चिदानन्दत्वादयो धर्मा उपसंहर्तव्याः, अनाविर्भूतेऽपीति स्थितम् । एवं सत्याविर्भावेऽनाविर्भावेऽपीश्वरः

भाष्यप्रकाशः ।

समान एवं चाभेदात् ॥ १९ ॥ सूत्रमवतारयन्ति **ननु विग्रह** इत्यादि । तथाच तरुकुसुमयोरिव स्वगतद्वैतमापततीति तत्परिहारायोत्तरं पठतीत्यर्थः । व्याकुर्वन्ति **चोऽप्यर्थ** इत्यादि । ननु भिन्नप्रकारकप्रतीतौ विद्यमानायां कथमभेदसिद्धिरित्यतस्तमुत्पादयन्ति **अत्रे**त्यादि । **स चेति** । औपनिषदः पुरुषश्च । **स चेति** । व्यवहारश्च । नच तस्य व्यवहारस्याप्रामाणिकत्वं शक्यशङ्कम् । वरणहेतुकतनुविवरणैकसाध्यत्वात् । 'प्रकाशवच्चावैयर्थ्यात्' 'आह च तन्मात्र'मिति सूत्रद्वयेनातीतपादेऽपि तस्योपपादनात् । तदेतदभिसन्धायाहुः **एवं सती**त्यादि । अत्र लौकिकयुक्तेः कौब्ज्यमेव श्रुत्यभिप्रेतमित्याशयेनाहुः **एवंविध** इत्यादि । सिद्धमाहुः **एतेने**त्यादि । **एतेनेति** । ईश्वरस्य तथात्वश्रावणेन ।

एतामेव श्रुतिं हृदिकृत्य प्रकारान्तरेण सूत्रं योजयन्ति **एवं सत्याविरि**त्यादि । तथाच, 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायये'ति

रश्मिः ।

समान एवं चाभेदात् ॥ १९ ॥ **भाष्ये । परस्परमिति** । धर्मिधर्मयोरिति बोध्यम् । **प्रकृते । स चेतीति** । अत्र निरुपधीत्यादिभाष्यं गताज्ञानानामिति बोध्यम् । **तस्येत्यादि** । औपनिषदः पुरुषश्चेत्याकारकस्य । शक्या शङ्का यस्मिन्निति शक्यशङ्कम् । **वरणेत्यादि** । पुष्टिमार्गीयम् । वरणस्य स्वीयत्वेनाङ्गीकारे रूढेः । वस्तुतस्तु वृङ् संभक्तौ । सर्वात्मभावो वरणम् । वेदान्ते योगात्, रूढेरभावात् । विवरणं प्रकाशनम् । तथा च निरुपधिस्नेहवतामितिभाष्येण गताज्ञानानामिति सूचनात्तमोभावेन विशुद्धसत्त्वजज्ञानविषयत्वेन स व्यवहारः प्रामाणिक इति भावः । **एवं सतीत्यादि । भेदेनेति** । इवार्थेन । गीतायां 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति ब्रह्मनिरूपणे वाक्यात् । **एवं सत्याविरित्यादीति** । आविर्भाव इत्यादिना सूत्रार्थः । एवं चेत्यत्र सूत्रेऽन्वयादिति सूत्रान्मण्डूकप्लुत्याव-

समानः । न ह्याविर्भावे काँश्चनागन्तुकान् धर्मानादायाविर्भवतीति वक्तुं शक्यमनाविर्भूतस्यापि । एवमाविर्भूतप्रकारेणैवाभेदादित्यपि सूत्रार्थः सूत्रकाराभिमत इति ज्ञातव्यम् । चकारेण विरुद्धसर्वधर्माश्रयत्वं समुच्चीयते । एवं साक्षादाविर्भूते भगवद्रूपे पूर्णानन्तधर्मास्तदुपासकेनोपसंहर्तव्या इति सिद्धम् ॥ १९ ॥

अथ यत्र कार्यचिकीर्षया जीवे स्वयमाविशति, तदावेशात्तद्धर्मा अपि केचित् तस्मिन्नाविर्भवन्ति । तत्रोपासकेनाखिलब्रह्मधर्मोपसंहारः कर्तव्यः, न वेति शङ्कासमाधानं विकल्पेनाह सूत्राभ्याम् । तत्रादौ विधिपक्षमाह ।

सम्बन्धादेवमन्यत्रापि ॥ २० ॥

अन्यत्रापि जीवेऽप्येवं ब्रह्मणीवोपासना कार्या । तत्र हेतुः सम्बन्धादिति ।

भाष्यप्रकाशः ।

गीतावाक्येनास्यां श्रुतावुक्तस्येश्वरत्वस्य नैसर्गिकत्वेन तादृगाकारस्य सार्वदिकत्वात् तथेत्यर्थः । अत्र च 'विश्वतश्चक्षुः''यदेकमव्यक्तमनन्तरूप'मित्यादिश्रुतयोऽप्यनुसन्धेयाः । पूर्वं चोप्यर्थे व्याख्यात इत्यस्मिन् पक्षेऽर्थान्तरमाहुः चकारेणेत्यादि । सिद्धमाहुः एवं साक्षादित्यादि । **साक्षादाविर्भूत** इति । सत्त्वाद्यधिष्ठानमनपेक्ष्य स्वरूपेणाविर्भूते ।

अन्ये त्विदमेकसूत्रमधिकरणमङ्गीकृत्य वाजिशाखीयाग्निरहस्यस्थबृहदारण्यकस्थयोः शाण्डिल्यविद्ययोरैकविद्यं परस्परगुणोपसंहारं च विचारयन्ति ।

तदपि प्रथमाधिकरणीयपञ्चसूत्र्यैव सिध्यतीति बोध्यम् । रूपाभेदस्यैव प्रयोजकत्वादिति ॥ १९ ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥ एवमवतारोपासनादौ गुणोपसंहारं विचार्यावेशे तं विचारयतीत्याशयेनाग्रिमसूत्रमवतारयन्ति अथेत्यादि । 'य आत्मनि तिष्ठन् य आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीर'मिति श्रुत्या आत्ममात्रस्य ब्रह्मशरीरत्वेपि, 'योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'त्येकादशस्कन्धे तनुभृदन्तर्बहिरशुभवि-

रश्मिः ।

धारणादित्यनुवर्तते इत्याशयेन सूत्रशेषं व्याकुर्वन्ति स्म एवमित्यादि । **एवेति** । अनुवृत्ते स्थले । **स्वामिति** । उक्तरीत्या स्वाम् । आत्ममाया पञ्चाध्याय्युक्तयोगमाया । पुराणे, अत्र त्विच्छेति ज्ञेयम् । **नैसर्गिकत्वेनेति** । 'प्रकृतिं स्वा'मित्यनेन विशुद्धसत्त्वाधिष्ठानकत्वोक्तेः । वासुदेव इत्यर्थः । **तथेति** । एवंसत्याविरित्यादिरित्यर्थः । **विश्वत** इति । अत्र योगमाययौपनिषदः पुरुषश्च ज्ञेयः । आदिना 'एकं सद्विप्रा बहुधा वदन्ती'ति श्रुतिः । **सत्त्वादीति** । सत्त्वं वराहस्याधिष्ठानं रजो वामनस्य तमो मत्स्यकच्छपयोः । सात्त्विकादिपुराणोक्तत्वात् । तावतीं मायां दूरीकृत्य स्वरूपेण मूलरूपेणाविर्भूते । **शाण्डिल्येति** । पूर्वस्यां गुणाः श्रूयन्ते । 'स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमि'त्येवमादयः । तस्यामेव शाखायां बृहदारण्यके पुनः पठ्यते 'मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एव सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्चे'ति । तयोः । **रूपाभेदस्येति** उपसंहारहेतोरुपसंहारसूत्रोक्तस्य ॥ १९ ॥

सम्बन्धादेवमन्यत्रापि ॥ २० ॥ **अवतारेति** । सर्वदा संक्रमणमवतारः (कार्य)कार्यकालं

अयोगोलके वह्नेरिव तस्मिन्नावेशलक्षणः सम्बन्धोऽस्तीति, तत्त्वेन व्यपदेशाच्च तथेत्यर्थः ।

अत्रैवं ज्ञेयम् । अयं तु जीवः, अत्राविष्टं भगवन्तमहमुपास इति जानाति चेत्, तदा न सा जीवगामिन्युपासना, किन्तु ब्रह्मगामिन्येव । तत्राखिलधर्मोपसंहारे न किञ्चित् बाधकम् । यत्र ब्रह्मत्वेनैव ज्ञात्वोपास्ते, तत्रापि 'तं

भाष्यप्रकाशः ।

धूननपूर्वकस्वगतिव्यञ्जनरूपविशेषकार्यसरणात् तदादिकार्यचिकीर्षया यत्र जीवे स्वयं भगवानाविशति, तदा भगवदावेशाद्भगवद्धर्मा अपि केचित्तस्मिन्नाविर्भवन्ति । यथा इन्द्रप्रतर्दनसंवादे इन्द्रे । अत्र जीव इत्युपलक्षणम् । तेन प्रतिमाया अपि सङ्ग्रहः । गोपालतापनीये मथुरासमीपस्थवनस्थिता द्वादशमूर्तीरुक्त्वा, 'ता हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्त' इति फलमुक्त्वा, अग्रे 'मथुरामण्डले यस्तु जम्बूद्वीपे स्थितोपि वा । योऽर्चयेत् प्रतिमां मां च स मे प्रियतरो भुवि । तस्यामधिष्ठितः कृष्णरूपः पूज्यस्त्वया सदे'त्यादिभिः प्रतिमोपासनं लक्षीकृत्य सर्वेषां स्वपूजनस्योक्तत्वात् प्रतिमायामधिष्ठानोक्त्या स्वावेशस्य चोक्तत्वात् । अतस्तादृशे जीवादावुपासकेनाखिलब्रह्मधर्मोपसंहारः कर्तव्यो न वेति शङ्कायाम्, 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति श्वेताश्वतरश्रुत्या गुरुभक्तेर्देवभक्तिवदतिदिष्टत्वात्, भक्तिपारम्यस्य चाखिलगुणोपसंहार एव सिद्धेर्गुरौ स कार्यः । अन्यत्र प्रतिमादौ तु न कार्यः, तादृशवाक्याभावादिति प्राप्ते, तत्समाधानं मार्गभेदव्यवस्थितविकल्पेन सूत्राभ्यामाहेत्यर्थः । तत्रेति । गुरौ प्रतिमादौ च । सूत्रं व्याकुर्वन्ति **अन्यत्रापीत्यादि** । प्रतिमासंग्रहायाहुः **तत्त्वेन व्यपदेशादिति** । उक्तं च स्कान्दे पाण्डुरङ्गमाहात्म्ये 'शिलाबुद्धिर्न कार्या च तत्र नारद कर्हिचित् । ज्ञानानन्दात्मको विष्णुर्यत्र तिष्ठत्यचिन्त्यकृ'दिति । उपासनामार्गे व्यवस्थितस्य विधिपक्षस्य बीजं स्फुटीकुर्वन्ति **अत्रैवमित्यादि** । एवमिति । वक्ष्यमाणप्रकारा-

रश्मिः ।

त्वाक्रमणमावेशः । **स्वगतिमिति** । नूतनमार्गं प्रवर्तयतीत्यर्थः । **तदादीति** । आदिनोपनयनसाङ्गवेदाध्यापने । 'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षत' इति वाक्यात् । रहस्यं वेदान्ताः । तानि शिक्षादीनि अङ्गानि यस्य वेदस्य स तथोक्तस्तम् । **अधिष्ठानेति** । अधिकस्थितिः । 'यमादिभि'रिति श्रीभागवतवाक्यात् । तस्या उक्त्येत्यर्थः । **जीवादाविति** । जीवगुरुप्रतिमासु । **अतिदिष्टत्वादिति** । देव उपसंहृतविरुद्धधर्माश्रयस्तद्भक्तिवत् उपसहृतविरुद्धधर्माश्रयगुरुभक्तिर्भवतीत्यतिदेशस्तस्मात् । येनकेनापि गुणेन भक्तिदर्शनाद्भक्तिपारम्यस्येत्युक्तम् । **तदिति** । उक्तायां शङ्कायां समाधानम् । सप्तमीति योगविभागात्समासः । **मार्गभेदेति** । मार्गावुपासाभक्तिरूपौ तयोर्भेदेन व्यवस्थितः उपासामार्गे उपसंहारः भक्तिमार्गेऽनुपसंहार इत्येवं विकल्पस्तेनेत्यर्थः । **आहेति** । उत्तरस्याहेत्यस्याकर्षः । **तत्रेतीति** । **विधिपक्षमिति** । कर्तव्य इत्यत्र विधौ तव्य इति तं पक्षम् । **अन्यत्रापीत्यादीति** । **आवेशलक्षण** इति । अभेदसंसर्गात् आवेशलक्षण इत्युक्तम्, संयोगविशेष इत्यर्थः । सम्बन्धोस्तीत्यत्रेतिशब्दो हेतौ । हेत्वन्तरमाहुस्तत्त्वेनेत्यादिनेत्याशयेनाहुः **प्रतिमेति** । ननु प्रतिमायाः ऐतदात्म्येन व्यपदेशः, नतु तत्त्वेन महावाक्य इत्यत आहुः **उक्तं चेति** । **यत्रेति** । सति प्रतिमादौ । तथा च ज्ञानानन्तानन्दसद्रूपत्वं प्रतिमादौ । ब्रह्मलक्षणमुक्तम् । प्रतिमाया असंग्रहायाहुरिति वाभासार्थः । **विधीति** । उपसंहारः कर्तव्य इति पक्षस्य । एवमित्यस्मात्प्रकारवाचकात्ततीयाद्विवचन-

यथा यथोपासते तथैव भवति तद्भूतान् भूत्वाऽवती'ति श्रुतेर्गुर्वादौ जीवत्वबुद्धिनिषेधाच्च तथा। तत्र यादृगुपासकस्तदुपासनासिद्ध्यर्थं तत्फलदानार्थं च तादृग्रूपो भगवानाविशतीति च तथा॥ २०॥

यस्त्वन्तरङ्गं भगवद्भक्तं हृद्याविर्भूतभगवत्कं ज्ञात्वैतद्भजनेन अहं भगवन्तं प्राप्स्यामीति ज्ञात्वा तमेव भजते, स भक्तिमार्गीय इति भक्तहृद्याविर्भूते रूपे उपसंहारो धर्माणां तेन न कार्य इत्यग्रिमं पठति।

न वाऽविशेषात्॥ २१॥

अनुपसंहारे हेतुरविशेषादिति। अस्य भक्तभक्तत्वेन तद्भजनरसास्वादनेन विस्मृततदाविष्टभगवत्कत्वेन तन्निरपेक्षत्वेन वा तदाविष्टभगवति गुणोपसंहारेऽनु-

---

भाष्यप्रकाशः।

भ्याम्। जीवत्वबुद्धिनिषेधादिति। 'आचार्यं मां विजानीयान्नावमन्येत कर्हिचि'दित्यादिवाक्योक्तात् तस्मात्। नचोक्तश्रुत्या गुरौ भक्तिरेवोक्ता, नोपासनेति तदुपासनप्रकारव्यवस्थात्र न सङ्गतेति शङ्क्यम्। एवं 'गुरूपासनयाशितेने'त्येकादशस्कन्धे तस्या अप्युक्तत्वादिति। अत्रैवं प्रकारद्वयेप्यभिसन्धिमात्रं न प्रयोजकम्, किन्तु ब्रह्मावेश इति बोधनायाहुः **तत्र यादृगित्यादि**। आवेशस्त्वनुभावादिनावधार्यत इति नात्र काचिच्छङ्का। **एवमेव** श्रीजगन्नाथादौ पूजाप्रवाहस्थलेप्यवगन्तव्यम्। तेन उपासनामार्गे उभयत्राप्युपसंहारः सर्वगुणानां युक्त इत्यर्थः॥ २०॥

न वाऽविशेषात्॥ २१॥ निषेधपक्षो भक्तिमार्गे इति बोधयन्तः सूत्रमवतारयन्ति **यस्त्वन्तरङ्गमित्यादि। स भक्तिमार्गीय** इति। श्वेताश्वतरमन्त्रोक्तरीतिकप्रेमविश्वासयोरुत्कर्षात् स भक्तिमार्गीयः। सूत्रं व्याकुर्वन्ति **अनुपसंहारे** इत्यादि। कुतो वा, कुत्र वा अविशेष

रश्मिः।

लुगित्याहुः **वक्ष्यमाणेत्यादि। भाष्ये।** महावाक्ये ऐतदात्म्येन तत्त्वेन च सच्चितोरभेद उक्तः, तत्र सच्चितोरुपासने स्तः, तत्र सत्युपासनं बाधकमित्यन्तेनोक्तम्। **अत्रेति। प्रतिमादौ सति।** ऐतदात्म्येऽभेदसम्बन्धेनाविष्टम्। **ब्रह्मेति।** ऐतदात्म्यरूपब्रह्मगामिनी। एवकारस्तु, पाण्डुरङ्गमाहात्म्योक्तवाक्यात्। अधुना **यत्रेत्यारभ्य तथेत्यन्तेन** चित्युपासनमाहुः **यत्रेत्यादिना। ज्ञात्वेति।** 'तत्त्वमस्या'दिवाक्येन जीवं ज्ञात्वा। **तथेति।** अखिलधर्मोपसंहारे। 'तं यथायथे'ति श्रुत्यनुसारेण कृते न किञ्चिद्बाधकम्। इदमपि कश्चित्प्रकारः तथाशब्दनिविष्टः। **प्रकृते। एवं प्रकारेति।** सुबोधिन्यनुसारेण जीवविशेषं गृहीत्वोक्तप्रकारद्वये सद्विषये चिद्विषये च। **अभिसन्धीति।** भग्नानुसन्धानस्य संघट्टनमात्रम्। सन्धिर्भग्नसंघट्टनम्। **तत्र यादृगित्यादीति। तथेति।** पूर्ववत्। **अनुभावेति।** 'द्रौण्यस्त्रविप्लुष्ट'मित्यत्र द्वितीयस्कन्धेस्ति। आदिना विरुद्धधर्मप्रदर्शनं शैल्यां मूर्तौ निम्नत्वदर्शनं यथा। भक्तिमार्गे उक्त्वा शरणमार्गे आहुः **एवमेवेति।** यथाश्रुतं जगन्नाथबलभद्रयोरश्वावारुह्य भक्तकार्यकरणम्। प्रकारद्वये भक्तिमार्गभ्रमं वारयन्ति **स तेनेति। उभयत्रेति।** सति चिति च। 'तेन जीवो नोपास्य' इत्युक्तं सुबोधिन्यां तद्भक्तिमार्गीयमिति न तस्या विरोधः॥ २०॥

नवाऽविशेषात्॥२१॥ श्वेतेति। तथा गुरावित्यत्रादिष्टा भक्तिः प्रेम। अविश्वासो बाधकः। बाधकाभावो विश्वासः, सोपि तात्पर्यविषयः, यथा देवस्तथा गुरुरिति विश्वासः 'यथा देवे तथा गुरा'वित्यत्र। तयोरुत्कर्षो भक्तिमार्गीयत्वम्, स पुष्टिभक्तिमार्गीय इत्यर्थः। **पुष्टिमार्गे** भक्तसहितो भगवान्

पसंहारे वा भक्तोपासनायां विशेषाभावादित्यर्थः । अनुपसंहारस्यात्र बाधकत्वाभावज्ञापनाय वाशब्दः ।

विशेषादिति वा । पूर्वं विहितत्वेन भगवदाकारादिषु भजनं कुर्वन्नप्युक्तरूपभक्तसङ्गेन तद्भजनेन च पूर्वस्माद्विशिष्टं रसमनुभूतवानिति रसास्वादे विशेषाद्गुणोपसंहारं स न करोतीत्यनुवादः । विहितत्वेन गुणोपसंहारपूर्वकोपासनायां नीरसत्वेनानादरज्ञापनाय वाशब्दः । भगवदवतारेऽपि बादरायणः प्रासङ्गिकेऽपि भक्तिमार्गस्मरणे तदीयरसावेशपरवशस्तद्भावस्वभावमनूक्तवान् ॥ २१ ॥

अपिच । उपसंहारो हि तत्रानुक्तानामन्यत्रोक्तानां गुणानां तत्र सत्त्वेन ज्ञानमात्रम् । उक्तरूपभक्ताय तु तद्भजनीये भक्त एवालौकिकाननुभावान् भगवान् प्रत्यक्षं दर्शयतीति न तत्रोपसंहारापेक्षागन्धोऽपीत्यत्रोत्तरं पठति ।

भाष्यप्रकाशः ।

इत्याकाङ्क्षायां तद्व्युत्पादयन्ति अस्येत्यादि । तथाच नवमस्कन्धे 'तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः । अभवन् योगिनः सर्वे नारायणपरायणा' इतिवत् तादृशस्य तथात्वेन तद्भजनरसास्वादनेन तदाविष्टभगवति गुणोपसंहारे वा 'विस्मृते'त्यादिहेतुद्वयेनानुपसंहारे वा तत्प्रसङ्गानुभावादेव भगवत्प्राप्तिरविशिष्टेति तादृशभक्तोपासनायां ताभ्यामुत्कर्षापकर्षाभावान्नोपसंहारस्य किमपि प्रयोजनमित्यर्थः । 'अविशेषा'दिति पदच्छेदं कश्चिन्न मन्येत, तदोक्तोऽर्थो न सिध्येदिति, तदापि तत्सिद्ध्ये प्रकारान्तरे हेतुं व्याकुर्वन्ति विशेषादित्यारभ्य वाशब्द इत्यन्तम् । तद्भजनेनेति । भगवदाकृतिभजनेन । ननु तर्ह्यनुवादस्य किं प्रयोजनम्, अत आहुः भगवदवतारेत्यादि तथाच । तदुत्कर्षबोधनाय तत्स्वभावबोधनमेव प्रयोजनमित्यर्थः ॥ २१ ॥

रश्मिः ।

फलतीति साधनेपि तथेति । भाष्ये । इत्यग्रिममिति । इति हेतोः कार्याकार्यसाधारणमग्रिमं सूत्रम् । प्रकृते । तद्व्युदिति । कुत इति प्रश्ने, भक्तभक्तत्वेनेत्यादिव्युत्पादनम् । कुत्रेति प्रश्ने, तदाविष्टभगवतीति व्युत्पादनम् । कुर्वन्तीत्यर्थः । तत्प्रसङ्गेति । रन्तिदेवप्रसङ्गस्य योऽनुभावः विसर्पियशोरूपः तेन तत्पुत्राः । तथात्वेन भक्तभक्तत्वेन । तत्प्रसङ्गेति । भगवद्भक्तप्रसङ्गस्यानुभावः स्वर्गपुनर्भवाधिकभगवत्सङ्गिसङ्गस्य स्वर्गपुनर्भवानादरः । 'तुलयाम लवेनापि' इति वाक्यात् । ताभ्यामिति । भगवत्युपसंहारानुपसंहाराभ्यां भक्तभक्तस्योत्कर्षापकर्षाभावात् । भाष्ये । वाशब्दोऽनादर इत्याहुः अनुपेति । अत्रेति । भक्तभक्तविषये भगवत्प्राप्तौ । प्रकृते । प्रकारान्तर इति । उक्तरूपभक्तसङ्गेन भगवद्भजने । विशेषादित्यारभ्येत्यादि । विहितत्वेनेति । 'तं भजे'दिति गोपालतापिनीये । विशिष्टमिति । भक्तपूजनेन समं भगवद्भजने पुष्टिमार्गो जात इति, 'ज्ञात्वाज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवे'दिति भक्तसङ्गेन भगवज्ज्ञानं जातमिति वा, विशिष्टम् । अनुवाद इति । अनुपसंहारे प्रकारानुवादः प्रकारान्तरे । विहितत्वेनेति । पूर्ववत् । नीरसत्वेनेति । सात्त्विकत्वात्तथा । 'मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते' इति गीताष्टादशाध्यायवाक्यात् । तर्हीति । प्रकारान्तरकाले । तदुत्कर्षेति । भक्तिमार्गोत्कर्षबोधनाय । तत्स्वभावेति । भक्तस्यानुपसंहारस्वभावबोधनम् ॥ २१ ॥

दर्शयति च ॥ २२ ॥

ननु भक्तभक्तः स्वसेव्येऽप्यलौकिकं वीर्यं दृष्ट्वा तदाविष्टे भगवति तत्सम्भारकत्वस्येन्द्रादीनामपि तदाज्ञापेक्षित्वं दृष्ट्वा द्युलोकव्यापकत्वस्योपसंहारं करिष्यतीत्याशङ्क्याह ।

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

राणायनीयानां खिलेषु पठ्यते । 'ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान, ब्रह्म भूतानां प्रथमं तु जज्ञे, तेनार्हति ब्रह्मणा स्पर्धितुं क' इति । अस्यार्थस्तु–अन्यैर्हि पुरुषैः सहायानपेक्ष्य विक्रमाः संभ्रियन्ते । तेन तत्पराक्रमाणां त एव नियतपूर्वभावित्वरूपकारणत्वेन ज्येष्ठाः । ब्रह्मधर्माणां तु

भाष्यप्रकाशः ।

दर्शयति च ॥ २२ ॥ सूत्रमवतारयन्ति **अपिचेत्यादि** । प्रकटार्थमत्र भाष्यम् ।

अन्ये तु, 'सम्बन्धादेवे'त्यादित्रिसूत्रमधिकरणमङ्गीकृत्य, बृहदारण्यकोपान्ते 'सत्यं ब्रह्मे'त्युपक्रम्य, आदित्यमण्डलस्थस्य अक्षिस्थस्य च ये उपासने विहिते, तयोरुपनिषदौ रहस्यनामनी उपासनशेषतयाम्नायेते । 'तस्योपनिषदहरित्यधिदैवतम्, तस्योपनिषदहमित्यध्यात्म'मिति, ते किं सङ्कीर्येते, उत व्यवतिष्ठेते इति सन्देहे, सम्बन्धिभेदाद्व्यवतिष्ठेते इति सिद्धान्तयन्ति ।

सोऽपि स्वाध्यायसूत्रस्थसवदृष्टान्तबोधितेन सम्बन्धिभेदेनैव व्यवस्थितिं लभमानो नाधिकरणान्तरमपेक्षत इति चिन्त्यम् ॥ २२ ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ सूत्रमवतारयन्ति **ननु भक्तेत्यादि** । **तत्सम्भारकत्वस्येति** । वीर्यसम्भारकत्वस्य । **उपसंहारं करिष्यतीति** । 'तं यथा यथोपासत' इत्यत्र स्वाभिसंहितरूपेणैव स्वावनस्योक्तत्वात् स्वैहिकपारलौकिकार्थं उपसंहारं करिष्यति । सूत्रं व्याकर्तुं विषयवाक्यमुपन्यस्य प्रथमं तत् व्याकुर्वन्ति **राणायनीयेत्यादि** । **उक्तं भवतीत्यन्तम्** ।

रश्मिः ।

दर्शयति च ॥२२॥ प्रकटार्थमिति । **भक्त एवेति** । आचार्ये कृष्णदासद्वारा शिलाधारणम् । रामानुजाचार्ये बदरिकाश्रमे पर्वतात्पातेऽप्यभङ्गः । मध्वविजये माध्वाचार्ये । व्यासे 'अपश्यत्पुरुषं पूर्ण'मित्यादि समाधिभाषायाम् । एवं प्रकाटार्थम् । दर्शयति भजनीये भक्त आचार्यादौ जनताऽलौकिकानुभावान् पश्यति, भगवान् तं अलौकिकानुभावान् दर्शयतीति सूत्रार्थः । चोऽनुक्तसमुच्चये । **उपनिषदादाविति** । शब्दोऽयं हलन्तः । अजन्तं पदं तदा शकन्ध्वादिषु पररूपम् । **तस्योपेति** । अर्थस्तु उपनिषदशब्देनोपनिषच्छब्देन वा देवताप्रकाशकं रहस्यं नाम । अहरिति नाम । अहःशब्दः प्रकाशवाची । आदित्यरूपस्योक्तरूपस्य नाम . . । **तस्येति** । चाक्षुषपुरुषस्य सत्यस्य । **अधिदैवतमिति** । देवतैव दैवतं तस्मिन्नित्यधिदैवतं नाम । अभिव्यापकाधारे सप्तमी । **तस्येति** । मुक्ताविद्यस्य पुरुषस्य सत्यस्य । **आत्मनीत्यध्यात्मं** नाम । उपनिषदशब्देनोपनिषच्छब्देन वा देवताप्रकाशकं रहस्यं नाम । अहमिति नाम । अहंशब्दः प्रत्यगात्मवाची । चाक्षुषपुरुषस्योक्तरूपस्य । **व्यवतिष्ठेते** इति । व्यवस्थितिं कुर्वाते । **सम्बन्धीति** । उपसंहारात् संकीर्येते इति पूर्वपक्षे तथा ॥ २२ ॥

सम्भृतिद्युव्याप्त्यपि चातः ॥ २३ ॥ वीर्येति । नृसिंहतापिनीयेऽग्निपूतत्ववायुपूतत्वादित्यपूतत्वसोमपूतत्वविष्णुपूतत्वसर्वपूतत्वमृत्युतर्तृत्वपाप्मतर्तृत्वब्रह्महत्यातर्तृत्वभ्रूणहत्यातर्तृत्ववीरहत्यातर्तृत्वसर्वहत्यातर्तृत्वाग्निस्तम्भकत्ववायुस्तम्भकत्वादित्यस्तम्भकत्वसोमस्तम्भकत्वोदकस्तम्भकत्वसर्वदेवस्त-

ब्रह्मैव ज्येष्ठमनन्यापेक्षं सृष्ट्यादि करोतीत्यर्थः । एवं सति ब्रह्म ज्येष्ठं येषां तानि ब्रह्मज्येष्ठानि वीर्याणि । अत्र छन्दसि बहुवचनस्य डादेशः । किञ्च, अन्येषां वीर्याणां बलवद्भिर्मध्ये भङ्गोऽपि भवति । तेन ते स्ववीर्याणि न सम्बिभ्रति । ब्रह्मवीर्याणि तु ब्रह्मणा सम्भृतानि निष्प्रत्यूहं सम्भृतानीत्यर्थः । तच्च ज्येष्ठं ब्रह्माग्रे इन्द्रादिजन्मनः प्रागेव दिवं स्वर्गमाततान व्याप्नवन्नित्यमेव विश्वव्यापकमित्यर्थः । देशतोऽपरिच्छेदमुक्त्वा कालतोऽपि तमाह ब्रह्मेति । भूतानामाकाशादीनां पूर्वमेव जज्ञे । आविर्बभूवेत्यर्थः । एतेन वीर्यसम्भृतिद्युव्याप्तिप्रभृतिमाहात्म्यमुक्तं भवति ।

तथाच सम्भृतिश्च द्युव्याप्तिश्च तयोः समाहारस्तथा । एतावपि स तत्र नोपसंहरति । तत्र हेतुः 'न वाविशेषा'दिति सूत्रोक्त एवेत्यतिदिशति अत एवेति । एतत् यथा तथा तत्रैवोक्तम् ।

विषयवाक्योत्तरार्धोक्तधर्मानुद्देशेनैवं ज्ञायते भक्तस्यैहिकपारलौकिकोपयोगिधर्मोपलक्षणार्थं द्वयोरेवोद्देशः कृत इति । चकारेण दर्शनमप्युक्तं समुच्चीयते ।

भाष्यप्रकाशः ।

सूत्रं व्याकुर्वन्ति **तथाचेत्यादि** । **तत्रैवोक्तमिति** । 'अस्य भक्तभक्तत्वेने'त्याद्युक्तरीत्या उपासनायामविशेषात्, पूर्वं 'विहितत्वेने'त्याद्युक्तरीत्या च भजनरसास्वादने एतदपेक्षया विशेषाच्च न करिष्यतीति तस्मिन्नेव सूत्र उपपादितम् । अयमेव सूत्रकाराशय इत्यत्र गमकमाहुः **विषयवाक्येत्यादि** । तथाचोपसंहारं विनापि भक्तस्य लौकिकालौकिकसम्पादनादलौकिकानुभावदर्शनाच्च एतयोरपि नोपसंहारशङ्कात्रेति पूर्ववदत्रापि भक्तस्वभावस्यैवानुवादः, प्रथमाधिकारिणः शिक्षा वेति

रश्मिः ।

म्भकत्वसर्वग्रहस्तम्भकत्वादिवीर्यं यस्य सम्भारकत्वं तस्य । उपसंहारमित्यनेनान्वेति । **भाष्ये** । **इन्द्रादीनामिति** । आदिना महर्लोकादिस्थजनाः । तथा तत्रैव श्रुतयः 'सर्वेषां लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं जयति स महर्लोकं जयती'त्यादयः । तथा च इन्द्रस्यादी इन्द्रादी इन्द्र आदिर्येषां ते इन्द्रादयः इन्द्रादी च इन्द्रादयश्च इन्द्रादयस्तेषाम् । भक्तभक्ताज्ञापेक्षित्वमेकादशवाक्येन विष्ण्वात्मकस्याक्षरात्मकहृदयस्य भक्तभक्तस्य सर्वगे मनोनिवेशेनाज्ञापकत्वशक्तेः प्राप्तत्वात् । वाक्यं तु 'विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे । स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदना'मिति पञ्चदशाध्याये । **प्रकृते** । **राणायणीयेत्यादीति** । **अस्यार्थ** इति । वेदस्यार्थः । ब्रह्मज्येष्ठत्वं स्फुटयितुमन्यत्राज्येष्ठत्वं वीर्ये सम्पादनीय आहुः **अन्यैरित्यादि** । **सहायानिति** । यथा कौरवैः पाण्डवैश्च । **सम्भ्रियन्ते** सम्पाद्यन्ते । **ज्येष्ठा** मुख्याः । **ब्रह्मज्येष्ठे**ति व्याकुर्वन्ति स्म **ब्रह्मधर्माणामिति** । धर्मा जगत्कर्तृत्वादयः । धर्माणां धर्म्यभेदान्निर्धारणे षष्ठी । **सम्भृतानी**ति व्याकुर्वन्ति स्म **किञ्चेति** । **बलवद्भिरिति** । यथा यादवैर्जरासन्धवीर्यभङ्गः । **न** इति । अन्ये । **समिति** । शिशुपालस्तु बिभर्ति । **ब्रह्मणे**त्यसहायेन । **ब्रह्माग्र** इत्यादि व्याकुर्वन्ति स्म **तच्चेति** । **विश्वेति** । विश्वस्मिन्व्यापकम् । **देशत** इति । वीर्यदेशभिन्नदेश इति तथा । **कालतः** प्रथमकालम् । अत्यन्तसंयोगे द्वितीयेति तथा । **तथाचेत्यादीति** । **तथेति** । सम्भृतिद्युव्याप्ति । 'स नपुंसक'मिति नपुंसकत्वम् । **एतावित्यर्थौ** । **अतिदिशति** अन्यत्र हेतुसाध्यादिप्राप्तिं करोति । सौत्रचकारमेवकारार्थसमुच्चायकमाहुः **अत एवेति** । अनुपसंहारो विशेषाभावादेव । वक्ष्यमाणप्रकाशात्तु स्थानविशेषादेव । स्थानं दहरादिविद्यास्थं हृदयादि तत्र विशेष आध्यात्मिकत्वादिः तस्मात् । **विषयवाक्येत्यादीति** । धर्मः भूतप्रथमजत्वं तम्यानुद्देशेन

अन्यच्च। स्पर्धाकृतिसम्भावनायां हि तद्योग्यतानिषेधः सम्भवति। सा चाविर्भूत एव भगवति सम्भवतीत्यखिलशक्त्याविर्भावपूर्वकमाविर्भूतस्य तस्य एतया श्रुत्या माहात्म्यमुच्यत इति गम्यते। एवं सत्येतद्वाक्योक्तधर्मयोरेवानुपसंहार्य-

---

भाष्यप्रकाशः।

भावः। **चकारेणो**त्तरार्धोक्तधर्मसमुच्चयमाशङ्क्य तत्तात्पर्यमाहुः **चकारेणे**त्यादि। श्रुतेरनारभ्याधीतत्वेन भक्तहृदयाविष्टभगवद्धर्मकत्वस्य सन्दिग्धत्वात् पूर्वोक्ते व्यासाशयो न निश्चेतुं शक्यत इति शङ्कायां विषयवाक्यतात्पर्यकथनपूर्वकं तमुद्घाटयन्ति **अन्यच्चे**त्यादि। तथाच तुरीयपादेन श्रुतेराविर्भूतब्रह्मविषयकत्वे निश्चिते यत् द्वयोरेवानुपसंहारकथनम्, तेन तत्र व्यासाशयो निश्चीयत इत्यर्थः। तेनानारभ्याधीतानामप्यनुपयुक्तानां नोपसंहार इति सिद्धम्। –

अन्ये तु, इदमेकसूत्रमधिकरणमङ्गीकृत्य, अनारभ्याधीतेऽस्मिन् वाक्ये उक्तानां गुणानां सर्वासु विद्यासूपसंहारः न वेति शङ्कायाम्, नोपसंहारः। कुतः। विशेषात्। दहरादिविद्यासु हृदयादिरूपस्थानविशेषादिति व्याख्याय, स्थानस्य तदनुपसंहारकत्वे आध्यात्मिकत्वं

रश्मिः।

सूत्रे। **द्वयोरि**ति। सम्भृतिद्युव्याप्त्योः। कथमत्र भक्ते सूत्रकाराशय इत्यत आहुः **तथाचे**त्यादि। आभासोक्तरीत्या लौकिकः सम्भारः अलौकिकं द्युव्यापनेन भगवत इन्द्रादीनां भक्ताज्ञापेक्षित्वं तयोः सम्पादनं तस्मात्। नृसिंहतापिनीयोक्तस्याग्निपूतत्वादेरलौकिकानुभावस्य जीवत्वम्। तद्विरुद्धधर्मरूपस्य दर्शनात्। **एतयोरि**ति। सम्भृतिद्युव्याप्त्योरत्र भगवति तथा। **पूर्ववदि**ति। रसास्वादे विशेषात्तस्य भक्तस्वभावत्वात्तथा। एवकारो विषयवाक्यस्य श्रुतित्वात्। **अनुवाद** इति। सिद्धस्य कथनम्। **प्रथमे**ति। जिज्ञासुत्वामात्सर्यश्रवणादरवत्त्ववतः **शिक्षा** धर्मानुपसंहारशिक्षा। अस्पर्धाशिक्षा वा। **तत्तात्पर्यमि**ति। चकारस्य तात्पर्यार्थमाहुरित्यर्थः। वैयाकरणमतम्। नैयायिकमतेन चकार एवकारार्थ इत्युक्तम्। **सन्दिग्धे**ति। अनारभ्याधीतस्यात्र 'यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः। स वेदैतत्परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम्। उपासते पुरुषं ये ह्यकामास्ते शुक्रमतिवर्तन्ति धीरा' इति मुण्डकश्रुत्यैकवाक्यतयार्थः कृतः। अन्यश्रुत्यैकवाक्यतायां तु सन्दिग्धत्वादित्यर्थः। **स** इति। भूतिकामः। **पुरुषमात्मज्ञं** तत्स्थं वा। अतिवर्तन्ति पुंसो रेतःकणाश्रया न भवन्तीति भावः। **तमि**ति। व्यासाशयम्। **अन्यच्चेत्यादी**ति। स्पर्धा संघर्षः। संघर्षः पराभिभवेच्छा। **सम्भवती**ति। अभावस्य प्रतियोगिनिरूपणाधीननिरूपणकत्वात्। **एवे**ति। नचानाविर्भूताय नास्तिकः स्पर्धते इति वाच्यम्। ॐ। एवेत्यस्याप्यर्थकत्वात्। **माहात्म्यमि**ति। सम्भृतिद्युव्याप्तिरूपम्। **एतद्वाक्ये**ति। धर्मौ सम्भृतिद्युव्याप्त्याख्यौ। एवकारेण भूतप्रथमजत्वं व्यवच्छिद्यते। ननु कथं सर्वादित्वस्यानुपसंहार्यत्वम्। उपसंहार्यत्वस्यान्यत्र परस्परमसाधारणत्वेन स्थितधर्मनियम्यत्वात् सर्वसाधारण्येन प्रकारेणोपसंहारायोग्यत्वादनुपसंहार्यत्वम्, न तु प्रकृतमनुपसंहार्यत्वम्, व्यापकधर्मत्वात्। **तथाचे**ति। **तुरीये**ति। उपसंहारेणार्थनिर्णायकेन। **आविर्भूते**ति। अपिरग्रे योज्यः। **तत्रे**ति। सम्भृतिद्युव्याप्तिसूत्रे भगवद्भक्ते उपसंहारस्तन्निष्ठभगवत्यनुपसंहारे। ब्रह्मभूतानामित्यत्र भूतानां प्रथमं ब्रह्म जज्ञ इत्यन्वयवत् ब्रह्मभूतानां 'ब्रह्मभूतः प्रसन्नात्मे'ति गीतोक्तानां प्रथमं जज्ञ इत्यन्वयस्यापि सम्भवात् स भगवतो ब्रह्मभूतस्य भक्तिमतो निरूपयन्त्याः श्रुतेः कीर्तनभक्तेः भक्तभक्तविषयत्वेन तद्धर्वीकाणामप्येवं भवत्विति व्यासाशयः। **तेने**ति। सकलसाधारणधर्मभूतप्रथमजत्वस्योपसंहार्यानुपसंहार्यधर्मेष्वविचारेण। **दहरादी**ति। आदिना शाण्डिल्यविद्यादहरविद्योपकोशल-

भाष्यप्रकाशः ।

केचन हेतुत्वेनाहुः । केचिदल्पत्वम् । अन्ये तु विद्याविशेषं हेत्वन्तरमाहुः । किञ्च । यद्यपि तासु 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' 'अतः परो दिवो ज्योतिर्दीप्यते' 'ज्यायान् पृथिव्या ज्यायानाकाशा'दित्यादिभिराधिदैविक्यो विभूतयोऽप्युच्यन्ते, तथापि ता माहात्म्यज्ञापनार्था इति ता एव तत्रोपसंहार्याः, प्राकरणिकत्वात्, न त्वितराः । अतो द्युव्याप्तिनिवृत्तौ तत्सहपठिताया वीर्यसम्भृतेरपि निवृत्तिरित्याहुः ।

तन्न रोचिष्णु । द्युव्याप्तिरूपाया महत्या आधिदैविक्या विभूतेर्ब्रह्मस्वरूपमादायैव स्थानस्य तदाध्यात्मिकतायास्तदन्यतायाश्च बाधकतामनादृत्योपदेशेन तस्मिन् स्थानविशेषे द्युव्याप्त्युपसंहार-बाधकत्वकथनस्यायुक्तत्वात् । नच सा दिक्कालादीनामिव भिन्नेति युक्तम् । ब्रह्मण उभयत्राप्यैक्येन व्याप्तौ भेदस्य वक्तुमशक्यत्वात् । नच शब्दान्तरनिर्देशाद्भेद इत्यपि युक्तम् । सौत्रहेतुविरोधात् । सूत्रे पूर्वसूत्रोक्तस्थानविशेषोपबन्धस्यैवातिदेशाङ्गीकारात् । एतेनैव विद्याविशेषस्याप्यनुपसंहा-रहेतुत्वं दत्तोत्तरम् ।

यत्तु भामत्याम्, या काचिदाधिदैविकी विभूतिः शाण्डिल्यविद्यायां श्रूयते, तस्यास्तत्प्र-करणाधीतत्वात् तन्मात्रं गृहीष्यते, नैतावता सम्भृत्यादीननुक्रष्टुमर्हति, तत्रैतत्प्रत्यभिज्ञानाभावात्, ब्रह्माश्रयत्वेन प्रत्यभिज्ञानमतिप्रसक्तम्, भूयसीनामैक्यप्रसङ्गादित्युक्तम् ।

रश्मिः ।

विद्या आधिदैविक्यः । तदनुपेति । अनारभ्याधीतस्योपसंहारकत्वविरोधित्वे । विरोधरूपे । विरोधो नञर्थ इति । आध्यात्मिकत्वमिति । स्थानस्येति बोध्यम् । केचनेति शंकराचार्याः भास्करा-चार्याश्च । केचिदिति रामानुजाचार्याः । अन्ये त्विति । माध्वादयः । तास्विति दहरादिविद्यासु । निवृत्तिरिति । सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिरिति न्यायेन । ता एवेति । नत्वना-रभ्याधीते सम्भृतिद्युव्याप्ती उपसंहार्ये । महत्या इति । व्यापकधर्मस्य व्यापकत्वनियमान्महत्याः । तस्या धर्मत्वेनाधारभूतं ब्रह्मस्वरूपम् । एवकारो विद्वन्मण्डनोक्तत्वात् । तदाध्यात्मिकेति । द्युव्याप्त्या-ध्यात्मिकायाः । बाधकता उपसंहारबाधकता या परैरादृता तामित्यर्थः । उपदेशेन सूत्रे सम्भृति-द्युव्याप्त्योरुपदेशेन । तस्मिन्निति । आध्यात्मिकेऽन्यस्मिंश्च । अयुक्तत्वादिति । भवता ब्रह्मस्वरूप-मादायानुक्तत्वेन तथा । तथाच स्थानविशेषस्यानुपसंहारहेतुत्वं न सम्भवतीतिभावः । अथ सौत्रसमा-हारविचारेणाहुः न च सेति । व्याप्तिः । दिग्देशरूपा कर्मणि प्रसिद्धा । आदिना मन्त्रः तेजः द्युत्वम् । भिन्नेति । व्याप्तिः सम्भृतिभिन्ना वा । ब्रह्मण इति । उक्तब्रह्मस्वरूपस्य उभयत्र सम्भृतिद्युव्याप्त्यो-रैक्यं समाहारद्वन्द्वात् तेनेत्यर्थः । भेदे सति उभयत्र एकहेतोरसम्भवाभिप्रायेणाहुः सौत्रेति । विरोधमाहुः सूत्र इति । एवकारोऽविशेषादित्यस्य व्यवच्छेदकः । तेन सम्भृतिद्युव्याप्त्योर्वीर्यत्वेपि स्वतन्त्रेच्छस्य मुनेर्वर्णनासक्तस्य पर्यनुयोगानर्हत्वमिति बोधितम् । एतेनैवेति । उक्तप्रकारेण । विद्याविशेषस्य स्थानघटितत्वात् । एवकारस्तु सौत्रार्थस्य व्यासाशयगोचरत्वोक्तेः । तन्मात्रमिति । सैवेति तन्मा-त्रम् । प्राकरणिकाधिदैविकविद्यामात्रम् । नत्वाधिदैविक्योरनारभ्याधीतयोः सम्भृतिद्युव्याप्त्योर्ग्रहणं करिष्यते । तत्रैतदिति । शाण्डिल्यविद्यायाम् । एतयोः सम्भृतिद्युव्याप्त्योः प्रत्यभिज्ञानाभावात्' दहरविद्योक्ताधिदैविक्यो विभूतयस्तु प्रत्यभिज्ञायन्ते । 'अतः परो दिव'इत्याद्युक्तश्रुत्योः शाण्डिल्यवि-द्यास्थयोः दहरविद्यास्थस्य 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः, उभे ह्यस्मिन् अन्तरेव समाहिते'इति श्रुतिभ्यां तत्ताइदन्ताप्रकारकज्ञानसम्भवात् । दहरविद्योक्तोयं शाण्डिल्यविद्यास्थ

त्वेन यत् कथनम्, तत्तु भक्तहृद्याविर्भूतं ब्रह्माप्येवंभूतमेवेति ज्ञापनाय, अतो युक्त एवानुपसंहारः ॥ २३ ॥

इति तृतीयाध्याये तृतीयपादे तृतीयं कार्याख्यानादित्यधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः ।

तदपि तथा । विद्यैक्ये संयोगरूपचोदनाख्यानां चतुर्णां हेतुतायाः पूर्वमुक्ततया केवलेन रूपैक्येन विद्यैक्यप्रसङ्गस्य वक्तुमशक्यत्वादिति । एवमन्यत्रापि ज्ञेयम् ।

सिद्धान्ते तूक्तरीत्या 'सर्वभूतस्थ एक' इत्येवं चिन्तिते, स आत्मत्वेन निरुपधिप्रियत्वेन पतित्वेन च साकारः पर्यवस्यति, सम्बन्धश्च तस्यावेशरूपो यत्राधिकः, तत्राप्यधिष्ठितं तमनुसन्धाय तद्गुणा अन्येप्युपसंहार्याः । यद्यधिष्ठान एव विशेषस्फूर्तिः, तदा तत एव फलसिद्धेरुपसंहारस्य न किञ्चित्प्रयोजनमिति सिद्धम् । एवं व्याख्या खरूपा कला च सिद्धेति ॥ २३ ॥ इति तृतीयं कार्याख्यानादित्यधिकरणम् ॥ ३ ॥

रश्मिः ।

आकाश इति । ब्रह्माश्रयत्वमाकाश इव संभृतिद्युव्याप्त्योरप्यस्तीति ब्रह्माश्रयत्वेन रूपेणाकाशशब्देन संभृतिद्युव्याप्त्योरपि प्रत्यभिज्ञानमुपकोसलविद्यास्थे 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यत्रातिप्रसक्तं सत् भूयसीनामौपमन्यवादिविद्यानामैक्यप्रसङ्गात् ऐक्यप्रसङ्गमालोच्यान्यत्रैक्यमापादयेत् । ल्यब्लोपपञ्चम्यान्ते शेषः पूरणीयः । **तथेति** । दत्तोत्तरम् । **पूर्वमिति** । सर्ववेदान्तप्रत्ययसूत्रे । **अशक्येति** । तथाच ब्रह्माश्रयत्वेन सम्भृत्यादेः प्रत्यभिज्ञानं प्राप्तमिति भावः । **अन्यत्रेति** । ब्रह्माश्रयत्वेनेत्याशङ्कायामशक्यत्वं ज्ञेयम्, शिथिलत्वात् । नैयायिकानां घटत्वेन वह्न्यभावमादाय साध्याभाववद्वृत्तित्वं धूमेस्तु, शास्त्रान्तरत्वात् । **उक्तरीत्येति** । अधिकरणत्रयोक्तरीत्या । पुरुषविद्यायाः अग्रे स्पष्टत्वात्स्मृतया । सर्वभूतस्थः सर्ववेदान्तप्रत्ययो भवति । 'तृतीयं सर्वभूतस्थ'मिति वाक्यात् । 'सर्वं खल्विदं ब्रह्मे'ति सामान्यं ब्रह्मोपासनम् । 'सर्वभूतेषु मन्मति'रिति श्रीभागवतं चासन्दिग्धम् । 'व्यासेश्च'तिसूत्रे पुरुषोत्तमः । 'प्रथमं महतः स्रष्टृ'ति वाक्यात् । 'पुरुषविद्या'सूत्रे 'द्वितीयं त्वण्डसंस्थितं' वक्ष्यते । **चिन्तित** इति । चिन्तितप्राये । **स** इति । पुरुषोत्तमः रसरूपः, दशरसात्मकं जगदिति । आत्मत्वेनानन्दमय इति सूत्रे । **निरुपधीति** । समानसूत्रे पतितत्वेनेत्यपि ज्ञेयम् । साकारोऽग्निमाधिकरणेनेति तत्कारणं साकारः । अत उक्तं **पर्यवस्यतीति** । **सम्बन्धश्चेत्यादि** । 'सम्बन्धा'दिति सूत्र उक्तम् । **तत्रापीति** । भक्तेपि । तमित्यावेशरूपं सम्बन्धम् । **विशेषेति** । पूर्वभजनाद्विशेषस्य रसे स्फूर्तिः । **तत एव** अधिष्ठानभक्तादेव । **उपसंहारस्येति** । भगवत्युपसंहारस्य । **एवं व्याख्या खेति** । 'समान' सूत्रोक्तरीत्या व्याख्याखकलान्नमयशिरोरूपा सिद्धेत्यर्थः । 'आकाशशरीरं ब्रह्मे'ति श्रुतेरीश्वरशिरः खम्, एवमवतारेपीति । किं पुनर्जीवेपि, 'छिद्रा व्योम्नीव चेतना' इति सिद्धान्तमुक्तावलीवाक्यात् । आकाशस्य छिद्रदातृत्वात् वृद्धिह्रासभाक्त्वाच्च । मनोमये 'आकाश आत्मे'ति मनोमये श्रावणम्, तस्य न ग्रहणम्, आत्मरूपस्याकाशस्योपासनानुपयोगात् । 'अन्तरिक्षे कले'ति छान्दोग्ये । 'श्रोत्रं कले'ति च । 'अन्तरिक्षमाकाशः' । श्रोत्रं कर्णशष्कुल्यवच्छिन्न आकाशः ॥ २३ ॥ **इति तृतीयं कार्याख्यानादित्यधिकरणम्** ॥ ३ ॥

---

१. प्रसङ्गरूपेति पूर्वः पाठः ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ (३-३-४.)

तैत्तिरीयके, 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्, स भूमिं विश्वतो वृत्वा अत्यतिष्ठत् दशाङ्गुलम्, पुरुष एवेद५ सर्वं यद्भूतं यच्च भाव्य'मित्यादिना पुरुषविद्या निरूप्यते । तत्रैव, 'ब्रह्मविदाप्नोति पर'मिति प्रश्ने, 'स वा एष पुरुषोऽन्नरसमय' इत्यारभ्य प्राणमयमनोमयविज्ञानमयानन्दमयात्मकं ब्रह्मस्वरूपं निरूप्यते । तत्र सर्वत्र 'स च पुरुषविध एवे'ति च पठ्यते ।

अत्रान्नमयादिषु पुरुषसूक्ते च पुरुषपदश्रवणादन्नमयादिषु सहस्रशीर्षत्वाद्युपसंहारः कर्तव्यो न वेति भवति संशयः । किमत्र युक्तम् । उपसंहर्तव्यमेवेति । कुतः । सर्वत्र ब्रह्मण एवोपास्यत्वादत्राप्युपासनोक्तेर्ब्रह्मत्वपुरुषत्वयोरविशेषाद्विद्यैक्यादिति प्राप्ते, उच्यते । पुरुषविद्यायामिवेति । अन्नमयादिषु सहस्रशीर्षत्वादिकं नोपसंहर्तव्यम् । कुतः । पुरुषविद्यायां यथा पुरुषस्वरूपं निरूप्यते, न तथेतरेषामन्नमयादीनां विज्ञानमयान्तानां स्वरूपं तत्प्रकरणे निरूप्यते । अत्र हि पुरुषत्वमुच्यते । सहस्रपदमनेकत्वोपलक्षकम् । अन्यथाक्ष्णां शिरोभ्यो द्वैगुण्यं वदेत् । तेन साकारव्यापकत्वमुक्तं भवति । तत्र पुरुषविधत्वम्, स चाध्यात्मिकरूपः, तच्छरीराभिमान्यात्मा चान्य आधिदैविक उच्यते, न तथात्र । किञ्च, 'पुरुष एवेद५ सर्व'मित्यादिना प्रपञ्चात्मकत्वं मुक्तिदातृत्वं चोक्त्वा, नैतावन्मात्रमस्य माहात्म्यम्, इतोऽपि महन्माहात्म्यमस्तीति वक्तुं प्रपञ्चरूपं तद्विभूतिरूपमिति 'एतावानस्य महिमे'त्यनेनोक्त्वा तत आधिक्यमाह 'अतो ज्यायाँश्च पूरुष' इति । एवमतिवैलक्षण्यात् पुरुषपदमात्रसाधर्म्येण

भाष्यप्रकाशः ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ एवमनारभ्याधीतानां धर्माणां भक्तिमार्गेऽनुपसंहारमुक्त्वा उत्तमाधिकारिभिरशेषगुणपूर्णं परं ब्रह्मैवोपास्यम्, न तु विभूतिरूपमिति बोधनायोपासनामार्गे तेष्वशेषाणुपसंहारमवसरसङ्गत्या वदतीत्याशयेनाधिकरणविषयादिकं दर्शयन्ति तैत्तिरीयक इत्यादि । प्रश्न इति । प्रपाठके । अविशेषादिति । भृगुविद्यायां ब्रह्मत्वस्यात्र च पुरुषविधत्वोक्त्या तदाकारत्वस्योक्तत्वेन तयोरविशेषात् । सूत्रं व्याकुर्वन्तोऽत्रापि नशब्दः पूर्वसूत्रादनुवर्तत इत्याशयेनाहुः अन्नमयादिष्वित्यादि । निरूप्यत इति । 'सहस्रशीर्षे'त्यादिना निरूप्यते । अत्र हीति । पुरुषविद्यायाम् । तेनेति । सहस्रशीर्षत्वादिश्रावणेन । वैलक्षण्यबोधनायाहुः तत्रेत्यादि । तत्रेति । अन्नमयाद्युपासनप्रकरणे । स चेति । अन्नमयादिः । वैलक्षण्यान्तरमाहुः किञ्चेत्यादि । सिद्धमाहुः एवमित्यादि । तथाच पुरुषविद्यायाममृतत्वस्य फलत्वेनोक्ततयान्नमयादिचतुष्टयविद्यासु यथायथमन्नायुर्भयाभावसर्वकामप्राप्तीनां फलत्वेनोक्ततया

रश्मिः ।

पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥ उत्तमेति । दृढवैराग्यवत्त्वमुत्तमाधिकारः । दृढत्वं द्वादशाङ्गपुरुषोत्तमैकतानत्वरूपम् । हरेरपि हरित्वं वैराग्य उत्कर्षः । तादृशैः । विशेषेति । विभूतीनामशेषगुणपूर्णत्वार्थं तथा । प्रश्न इति । 'सर्वे सर्वार्थवाचका' इति तथा । तत्रेत्यादीति । द्वैगुण्यमिति । सहस्रशीर्षसु द्विगुणाक्षिसत्त्वात्तथा । द्विसहस्राक्ष इति पदं वदेत्

---

१. इत्यध्याये इति पाठः । २. सहस्रशीर्षत्वादिकमिति पाठः । ३. भक्तिमार्गेऽपि विशेषानुपसंहारमिति पूर्वः पाठः ।

वेद्यत्वं वक्तुं शक्यम्, नचोपसंहार इति। चकारात् 'अम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीया'नित्यादिश्रुतयः, 'सर्वतः पाणिपादान्त'-मित्यादिस्मृतयश्च संगृह्यन्ते। एतेन यत्किञ्चिद्धर्मसाम्येपि न मूलभूतब्रह्मरूपत्वम्, अत एव न तत्रोपास्यता तथात्वेनेति ज्ञापितम्। अत एव भृगूपाख्यानेऽन्नमयादिब्रह्मज्ञानेपि जिज्ञासैवोक्ता। भृगोरानन्दरूपपरब्रह्मज्ञाने तु नोक्ता। तेनाशेषगुणपूर्णं ब्रह्मेत्युक्तं भवति। अत उत्तमाधिकारिभिस्तदेवोपासनीयम्, न

भाष्यप्रकाशः।

ोगभेदात्, पुरुषविद्यायां पुरुषत्वस्यान्नमयादिषु पुरुषविधत्वस्य चोक्ततया रूपभेदादेस्तस्यास्तासां ॆद्नाख्ययोर्भेदस्य स्पष्टत्वाच्च न विद्यैक्यमिति तथेत्यर्थः। वैलक्षण्यबोधनस्य तात्पर्यमाहुः यादि। एतेनेति। विभूतिभ्योऽतिवैलक्षण्यबोधनेन। न तत्रोपास्यता तथात्वेनेति। ब्रह्मत्वेनोपास्यतायां सत्यामपि न मूलभूतब्रह्मरूपत्वेन। एतदधिकरणप्रयोजनस्य पूर्वमनुक्तत्वादिदानीमाहुः तेनेत्यादि। तेनेति। एवं महिमाधिक्यादतिवैलक्षण्यबोधनेन। उत्तमाधिकारिभिरिति। एतेन भक्ता अपि संगृहीता ज्ञेयाः। तेषामेव तथात्वादिति। अत्र समाचारस्तत्रोक्तैर्हेतुभिरेवानुपसंहारप्राप्तावपि यत्पुनर्विशेषतस्तद्धेतुकथनम्, तद्विभूतिरूपेषु मूलरूपगुणानुपसंहारार्थम्। 'योऽन्यथा सन्तमात्मान'मिति वाक्योक्तबाधकस्य विद्यमानत्वात्। एवञ्चात्र पूर्वं पतित्वेन चिन्तिते चित्तस्य निवेशो यदाधिकः, तदा सोऽक्षरस्यापि पतिरित्येवं पर्यवस्यति। 'उतामृतत्वस्येशान' इति मोक्षेशनशीलत्वस्यात्र श्रावणात्। अनस्तमितत्वाद्वायुरूपा कलाप्यत्र बोधिता।

अन्ये तु, ताण्डिनां पैङ्गिनां च या 'पुरुषो वा व यज्ञ' इत्यादिनोक्ता षोडशशतवर्षजीवनफलिका पुरुषविद्या, या च तैत्तिरीयाणां 'तस्यैवं विदुषो यज्ञस्यात्मा यजमान' इत्यादिनोक्ता विद्या, तयोः पुरुषविद्येति समाख्यैक्यात् पुरुषावयवेषु यज्ञावयवकल्पनेन रूपैक्याच्च विद्यैक्ये, तैत्तिरीयोक्ता गुणास्तत्रोपसंहर्तव्या इति प्राप्ते, यथा पुरुषविद्यायां ताण्ड्यादिभिर्गुणा आम्नायन्ते, न तथा तैत्तिरीयक इति रूपभेदात्, तैत्तिरीयके च 'य एवं वेद ब्रह्मणो महिमानमाप्नोती'ति फलसंयोगभेदाच्च विद्याभेदे सति न तैत्तिरीयोक्तानां गुणानां तत्रोपसंहार इत्येवमाहुः।

तत्रेदमवधेयम्। व्यासचरणैर्हि जिज्ञासाशास्त्रं शीघ्रं मोक्षो भवतु जीवानामिति करुणया आरब्धम्। तेन याभिः शीघ्रं मुच्यन्ते, ता एव विद्या आदरेण विचारणीयाः, शेषाणां तु तत्रो-

रश्मिः।

नच द्विरूपवर्णलोपः। सहस्रपादित्यत्रापि तथापत्तेः। पूर्वमिति। 'ईशान' इति श्रुत्येशनशीलत्वस्य भावित्वात्तत्पूर्वं पतित्वेन 'दर्शयति'सूत्रभाष्योक्तरीत्या चिन्तिते 'स मानसीन आत्मा जनाना'मिति श्रुत्या चित्तस्य निवेशः स यदाधिकः मानससेवारूपः, तदा स भगवान् अक्षरस्यापि पतिः। 'मम योनिर्महद्ब्रह्मे'ति गीतावाक्यात्। अपिना स्वस्य पतिः। अतिगोप्यत्वात्स्पष्टं नोक्तम्। विभूत्युपासनानन्दमयभजनाभ्यामानन्दमयाधिकरणोक्तरीत्या पर्यवस्यति। तदेतद्भजनं गीतगोविन्दटीकायां श्रीगोस्वामिभिः कृतमिति निगर्वः। मोक्षेति। ज्ञानिप्राप्यभगवद्योन्यक्षरस्य ईशनशीलत्वं तस्य। 'यदन्नेनातिरोहती'ति श्रुतिविचारेणाहुः अनस्तमिति। तैत्तिरीये 'स वा एषोऽन्नरसमय' इत्युक्तेरन्नेन स्वकारणेन अतिरोहतीति छान्दसो नलोपः। 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिण' इति वाक्यात्षष्ठो भावविकारोऽस्तस्तदभावं इतत्वात् गतत्वात् वायुरूपा कलेति। 'सैषानस्तमिता देवते'ति श्रुतेः। इयं कलान्नमयादिनिरूपणानुवृत्त्यान्नमयस्य शिरोरूपापि प्रियशिरस्त्वादिसूत्रोक्तप्रियशिरस्त्वादिवासनयान्नमयशब्देन बोधिता। 'वायवस्थे'ति संहिताश्रुतेः। मनोमयस्य शिरो यजुःकला सा नोक्ता। प्रतिपादकत्वात्।

विभूतिरूपमिति ज्ञापितम् ॥ २४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्थं पुरुषविद्यायामित्यधिकरणम् ॥ ४ ॥

अथ निर्दोषत्वं ज्ञात्वा भजनीयमिति ज्ञापयितुमधिकरणान्तरमारभते

वेधाद्यर्थभेदात् ॥ २५ ॥ (३-३-५.)

वाजसनेयिशाखायां 'द्वया ह प्राजापत्या' इत्युपक्रम्य तेषां मिथः स्पर्धामुक्त्वोच्यते, 'ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययामेति, ते ह वाचमूचुस्त्वं न उद्गायेति, तथेति, तेभ्यो वागुदगायत्, यो वाचि भोगस्तं देवेभ्य आगायत्, यत् कल्याणं वदति तदात्मने, तेऽविदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य

भाष्यप्रकाशः ।

क्तैरेव न्यायैरानुषङ्गिको निर्णयो भविष्यति । अतः परविद्यां विहायैतद्विचारो युक्तो वा, परविद्याविचारो वा युक्त इति । ताण्डिप्रभृतीनां विद्यायामायुर्वृद्ध्यादिरूपं लौकिकं फलम्, 'तस्यैवं विदुष' इति तैत्तिरीयविद्यायामपि ब्रह्ममहिमप्राप्तिः फलम्, महिमा च विभूतिः, 'गोअश्वमिह महिमेत्याचक्षत' इति छान्दोग्ये सिद्धत्वात् । पुरुषसूक्ते तु 'तमेवं विद्वानमृत इह भवती'ति फलम् । अतो विद्यान्तरं विहायेदमत्र विचारितमिति । एवमन्यत्रापि बोध्यम् ॥ २४ ॥ इति चतुर्थं पुरुषविद्यायामित्यधिकरणम् ॥ ४ ॥

वेधाद्यर्थभेदात् ॥ २५ ॥ एककार्यत्वरूपां सङ्गतिमधिकरणप्रयोजनं च वदन्तोऽवतारयन्ति अथेत्यादि । सूत्रं व्याकर्तुं विषयादिकमाहुः वाजेत्यादि । वाजसनेयिशाखायामिति ।

रश्मिः ।

*अत्रेत्यधिकरणे । करुणयेति । गुरुलक्षणे करुणानिवेशात्तथा । भविष्यतीति । सूत्राणां न्यायरूपत्वाद्भविष्यति । अन्यत्रापीति । भास्कराचार्यादिमतेष्वपि दूषणं बोध्यमित्यर्थः ॥ २४ ॥ इति चतुर्थं पुरुषविद्यायामित्यधिकरणम् ॥ ४ ॥

वेधाद्यर्थभेदात् ॥ २५ ॥ एककार्यत्वेति । एकस्य विचाररूपस्य कारणस्य कार्यत्वमशेषगुणपूर्णभजने पूर्वोक्ते निर्दोषभजने चेति तथा । नच पूर्वमुपासनीयमिति पदान्न भजनमिति शङ्क्यम् । उप समीपे स्थित्वा यथायोग्यकरणस्योपासनापदार्थत्वेन मनोनिवेशरूपोपासनाभावात् । अशेषगुणपूर्णपदसमभिव्याहारेणोपासनायास्तादृशत्वात् । तेन निर्दोषत्वज्ञानमधिकरणप्रयोजनम् । भजनीयत्वं पूर्वं सिद्धम् । वाजेत्यादीति । यज्ञेत्यादि । सोमे सप्तसंस्थे तत्राप्यग्निष्टोमे उद्गीथकर्मकर्तृप्राणस्वरूपाश्रयणेनासुरानभिभूय स्व देवभावमत्ययामातिगच्छामह इत्यन्योन्यमुक्तवन्तः । उद्गीथकर्मकर्तृस्वरूपाश्रयणं च ज्ञानकर्मभ्यां भवति । तत्र कर्म 'तदेतानि यजे'दिति विधास्यमानं मन्त्रजपलक्षणम् । ज्ञानं त्विहाख्यायिकया परीक्ष्यमाणमशुद्धवादिप्रत्याख्यानेन विशुद्धप्राणोपादानरूपमित्यर्थः । तदुपास्यस्वरूपनिर्धारणाय परीक्षाप्रकारं दर्शयति स्म 'ते ह वाचमूचु'रिति कण्डिकाषट्केन । ते देवा ह उक्तप्रकारेण निश्चित्य वाचं वागभिमानिनीं देवतामग्निमेवोद्गानकर्त्रीं 'असतो मां सद्गमये'त्यादिमन्त्रप्रकाश्यां देवतां च मत्वा त्वं नोऽस्मभ्यमुद्गायौद्गात्रकर्म कुर्वित्यूचुरुक्तवन्तः । एवं देवैर्नियुक्ता वाग्देवताकृत्यमाह तथेत्यादीति । तथास्त्विति तन्नियोक्तॄन्प्रत्युज्य स्वसामर्थ्यमविचार्योद्गानकर्तृत्वं मन्त्रप्रकाश्यत्वं चात्मनोऽङ्गीकृत्य तेभ्योऽर्थिभ्य उदगायत् उद्गानं कृतवती । कः पुनरनेन कर्मणा कार्यविशेषः कृत इत्यपेक्षायां यथा प्रकृते ज्योतिष्टोम उद्गात्रा त्रिषु स्तोत्रेषु यजमानार्थमुद्गानं क्रियते, न च सुखार्थं तद्वदत्रापि द्विविधं तदिति कथयन्तं कार्यविशेषमाह य इति । यो वाचि निमित्तभूतायां सत्यां भोगः सुखविशेषस्तं देवेभ्योऽर्थिभ्य आगायदुद्गानेन प्रापितवती । यत्पुनः कल्याणं शोभनं

पाप्मनाविध्यन्, स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव, स पाप्मे'ति । एवमेव प्राणचक्षुःश्रोत्रप्रभृतिषु पापवेधमुक्त्वोच्यते । 'अथैनमासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उद्गायत्, ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविव्यत्सन्, स यथाश्मानम् ऋत्वा लोष्ठो विध्वंसेतैवं ह वै विध्वंसमाना विष्वञ्चो विनेशु'रिति । छान्दोग्येपि प्राणादिष्वेवमेव पाप्मवेधमुक्त्वासन्ये न तथेत्युच्यते । एतावान् परं विशेषः, वाजसनेयिनां गानकर्तृत्वम्, सामगानामुद्गीथत्वेनोपास्यत्वमुच्यते वाक्प्राणादीनामिति ।

अत्र देहसम्बन्धित्वगानकर्तृत्वयोरुपास्यत्वस्य चाविशेषेपि वागादिषु पाप्मवेधः, आसन्यप्राणे कुतो नेति भवति जिज्ञासा ।

नचासन्योपासनाया विधेयत्वात् तत्स्तुत्यर्थमन्येषु पाप्मवेध उच्यते,

भाष्यप्रकाशः ।

बृहदारण्यक उद्गीथब्राह्मणे । तथैव छान्दोग्येपि । न तथेति । न पाप्मवेधः ।

सन्देहमाहुः अत्रेत्यादि । इति भवति जिज्ञासेति । इति हेतोर्वागादीनां पाप्मवेधः सत्यः, काल्पनिको वेति संशय इत्यर्थः । सिद्धवत्तदुक्तिः सन्देहबीजम् । नन्वपार्थेयं चिन्ता, अन्येषु पाप्मवेधोक्तेर्विधेयासन्योपासनास्तुत्यर्थत्वेन 'अन्ये त्वपशव' इतिवदासन्यप्रशंसामात्रार्थतया वस्तुतः सर्वेषु

रश्मिः ।

यथाशास्त्रं वर्णानभिनिर्वर्तयति तदात्मने स्वार्थमेव । तद्ध्यसाधारणं वाग्देवतायाः कर्म यत्सम्यग्वर्णोच्चारणम् । एवं वाग्देवतायाः कल्याणवदनरूपासाधारणविषयाभिषङ्गलक्षणरन्ध्रं स्वावसरं प्रतिलभ्य तेऽसुराः स्वकार्यायोद्युक्ता इत्याह त इति । तेऽसुराः कामादिस्वाधिकाराद्देवैः शमादिना कृत्वा प्रच्याव्यमाना देवहृद्गतमविदुर्विदितवन्तः । किं तदित्यत आह अनेनेति । अनेनैवोद्गात्रा शास्त्रजनितकर्मज्ञानरूपेण नोऽस्मान् स्वाभाविककर्मज्ञानात्मकान् देवान् अत्येष्यन्तीति तमुद्गातारं वाग्रूपमभिद्रुत्य वेगेनागम्य स्वेनासङ्गलक्षणेन पाप्मनाऽविध्यंस्ताडितवन्तः स्वनिष्ठपापं संयोजितवन्त इति यावत् । अस्मानसुरानतिक्रम्य देवानेष्यन्तीत्यर्थः । एवमसुरैः प्रजापतेर्वाचि पाप्माक्षिप्त इति कुतोऽवगम्यत इत्याशङ्कायां प्रजास्वनुभूयमानपाप्मकार्यलक्षणलिङ्गेनानुमीयमानः पाप्मा प्रजाकारणप्रजापतावप्युपमेयादित्याह स य इति । यः स पाप्मा साधकावस्थस्य प्रजापतेर्वाचि प्रक्षिप्तः, स एषोऽनुमानेन प्रत्यक्षीक्रियते । कोसौ । यदेव येनैव प्रयुक्ता सतीयं वागिदमप्रतिरूपमननुरूपं शास्त्रप्रतिषिद्धं स्त्रीवर्णनादि वदति, स एव य एवं प्रजासु प्रतिकूलवदनहेतुत्वेनानुमितः, स एव पाप्मा स कारणभूतप्रजापतिवाचि गतः । कारणानुविधायि हि कार्यमित्यर्थः । अथैनमित्याद्युक्तार्थम् । वागादिषु नैराश्यानन्तरं अथेत्यस्यार्थः । अविव्यत्सन् वेद्धुमिच्छां कृतवन्तः सश्लिष्यमाणाः सन्तो विष्वञ्चो नानागतयो विनेशुरित्यन्वयः । तत्र स प्रसिद्धो दृष्टान्तो यथा लोके पाषाणचूर्णनाय प्रक्षिप्तो लोष्टः पांसुपिण्डः अश्मानं पाषाणं ऋत्वा प्राप्य स्वय विध्वंसेन विचूर्णीभवेदेव हैव एवमेव खलु विध्वंसमाना विशीर्यमाणा असुरा अपि नष्टा इत्यर्थः । छान्दोग्य इति भाष्यं विवृण्वन्ति स्म तथैवेति । उद्गीथब्राह्मण एव । इति हेतोरिति । प्राणस्यातिदेशाधिकरणेन ब्रह्मत्वानुसन्धानमकुर्वतो यतो जिज्ञासा भवतीति हेतोः प्रजापतेर्वागादीनां सप्राणानाम् । ननु प्रजापतेः स्वगुब्रह्मत्वे पाप्मवेधो विरुद्धधर्मोपि न संभवति । ब्रह्मत्ववदपहतपाप्मत्वस्याप्यसाधारण्यात् । अन्येषां साधारणधर्माणां स्वविरुद्धधर्मसामानाधिकरण्येपि साधारणधर्माणां तदभावात् । अन्यथा ब्रह्मत्वविरुद्धाब्रह्मत्वस्याप्यापत्तेरिति सत्यत्वकोटिर्न संभवतीत्यनुसंधायाहुः सिद्धवदिति । 'तमभिद्रुत्य पाप्मनाविध्य'न्नित्यत्र तथा । तथाच द्वितीयकोटिसंभवा-

अस्मिन्नेति वाच्यम् । न हि प्रयोजनायासन्तमप्यर्थं बोधयति श्रुति रिति वक्तुं शक्यम् । प्रमाणत्वव्याहतिप्रसङ्गात् । एकत्र प्रतारकत्वे सर्वत्रापि तच्छङ्कया तदुक्ते कोपि न प्रवर्तेतापि । साक्षात्क्रियार्थत्वाभावेपि

भाष्यप्रकाशः ।

तदभावादिति पूर्वपक्षं हृदिकृत्याहुः नचेत्यादि । असद्वचने बाधकं व्युत्पादयन्ति न हीत्यादि ।

नन्वर्थवादाधिकरणे विधेयस्तावकत्वेनार्थवादानां प्रामाण्यं पूर्वतन्त्रे व्यवस्थापितम्, 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु'रिति, अतस्तदर्थ एव प्रामाण्यं तेषाम्, न तु स्वार्थ इत्याकाङ्क्षायामाहुः एकत्रेत्यादि । तथाच विचारकस्य हृदि श्रुतेः प्रकारांशे असत्यभाषित्वे भाते विधेयाद्यंशेपि तादृशशङ्कोदयस्य दुर्निवारतया तत्र प्रवृत्तिव्याघातेन विधेः प्रवर्तकत्वमेव कुण्ठीभवेत्, ततश्च वेदस्य वैयर्थ्यमेव स्यात्, 'अपशव' इत्यत्रापि पशुत्वपर्युदासोऽन्येषु पशुसादृश्यं ग्राहयति, न तु पशुत्वं निषेधति । यथा 'न कलञ्ज'मित्यत्र । तच्च गवादिसादृश्यं तु तेष्वस्त्येवेति तत्सादृश्यं तेषाममुख्यतां बोधयद्गवादिप्रशंसायां पर्यवस्यतीति नासदर्थबोधने स दृष्टान्तः । नच मध्वादिविद्यायां कल्पनोपदेशस्य व्यासपादैरप्यङ्गीकारादत्रापि तथास्त्विवति वाच्यम् । 'अविध्य'न्निति भूतार्थकप्रयोगबाधापत्तेः । 'यदेवेदमप्रतिरूपं वदति, स एव पाप्मे'त्यादिभिः श्रावितस्य पाप्मस्वरूपस्येदानीमनुभूयमानस्याप्यननुभवापत्तेश्च । मध्वादिविद्यास्वपि कल्पनोपदेशाङ्गीकारः सांख्यप्रसिद्ध्या तद्बोधनार्थ इति तु तत्रैवोपपादितम् । अथ यदि स सिद्धान्तीयत्वेनाद्रियते, तदापि 'तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमपूप' इत्याद्युद्देश्यरूपविशिष्टस्यैव

रश्मिः ।

त्संदेह इति भावः । अनेन विषयवाक्यस्यासंदिग्धत्वं विषयत्वविघटकं वारितम् । विधेयेति । विधेया यासन्योपासना तस्याः स्तुत्यर्थत्वेन । इतिवदिति । 'गो अश्वा एव पशवोऽन्ये त्वपशव' इतिवत् । सर्वेषु वागादिषु । तदभावात् सत्यपाप्मवेधाभावात् । पूर्वपक्षं पूर्वमीमांसकपूर्वपक्षम् । तदर्थे इति । स्तुत्यर्थे । प्रकारांश इति । स्तुत्यंशे । अर्थवादेन स्तुतो विधिरिति प्रकारत्वम् । गो अश्वा एवेत्यत्र गुणवाद उक्तः सोऽसदर्थबोधक इति तच्छ्रुंदसितुमाहुः अपशव इति । पशुत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थोऽपशव इत्यत्र यदा, तदा पशुत्वपर्युदासो भवति । यदा तु पश्वभावोऽर्थः, तदा पशुप्रतियोगिकाभाव इत्यर्थो भवति । पर्युदासो नञर्थः । अन्येषु गवाश्वभिन्नेषु गवाश्वभिन्ना गवाश्वसदृशा इति सादृश्यमपशवो गृह्णन्ति तत्पशुत्वपर्युदासो ग्राहयति । पर्युदासः सदृग्ग्राही । न कलञ्जमिति । अत्र कलञ्जपर्युदासः पूर्वतन्त्रे नास्ति । आकृतौ शक्तेः । अतः कलञ्जत्वपर्युदासः । कलञ्जत्वभिन्नं कलञ्जत्वसदृशं आक्षेपलभ्यं कलञ्जं भक्षयेदित्यर्थः । कलञ्जभक्षणादेरनर्थहेतुत्वमाक्षिपन् पुरुषं ततो निवर्तयति निषेधः निषेधस्य निवर्तनाभिधायकत्वात् । निवर्तना पर्युदासरूपा, लिङर्थः प्रवर्तना । तेन सम्बध्यमानो नञ् प्रवर्तनाप्रतिपक्षभूतां निवर्तनां गमयति, विधिवाक्यश्रवणोत्तरं प्रवर्तयतीति प्रवर्तनाप्रतीतिवत् निषेधवाक्यश्रवणेऽयं मां निवर्तयतीति निवृत्त्यनुकूलव्यापारनिवर्तनायाः प्रतीतेरपि अर्थान्वयो नञ इति मीमांसार्थप्रदीपे । तेष्विति । गवादिभिन्नपशुषु । तत्सादृश्यमिति । गवादिसादृश्यं गवादीतरपशूनां पशुत्वांशेऽमुख्यताम् । प्रत्यक्षविरोधे कल्पना, नतु भूतेर्थ इत्याशयेन हेतुमाहुः अविध्यन्निति । व्यध ताडने लङ् । तत्रैवेति । प्रथमाध्याये तृतीयपाद एव । साक्षादितिभाष्यं विवरीतुमाहुः अथेति । स इति । संशयनिरूपण उक्तः कल्पनापक्षः । आद्रियत इति । असाधारणधर्मस्य विरुद्धधर्मानङ्गीकारात् । अन्यथा ब्रह्मत्वविरुद्धाब्रह्मत्वस्याप्यापत्तेः । उद्देश्येति । द्यामुद्दिश्य तिरश्चीनवंशत्वकल्पना । एवमन्तरिक्षमुद्दिश्यापूपत्वकल्पना । एवं च लौकप-

नासन्निरूपकत्वमर्थवादानाम् । वस्तुतस्तु 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवती'ति श्रुतेः, 'ज्ञात्वाज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवे'दित्यादिवाक्यैः 'य एवं वेदे'ति वाक्यैश्चार्थवादोक्तस्वरूपं ज्ञात्वा कर्मकरणे पूर्णं फलम्, अन्यथा नेत्यर्थवादानां फलोपकार्यङ्गनिरूपकत्वान्नानर्थक्यम्, अत उक्तेऽर्थे हेतुं न पश्याम इति प्राप्ते, तमेवाह वेधादीति । वाक्प्राणादिषु यः पाप्मवेधः, आदिपदात् दुष्टविषयसम्बन्धश्च, तत्र हेतुरर्थभेदः । अर्थो भगवांस्तस्माद्भेदादित्यर्थः । आसन्यस्तु 'य एवायं मुख्यः प्राण'स्तमुद्गीथमुपासीते'ति छान्दोग्य उपास्यत्वेनोक्तः । 'सर्ववेदान्तप्रत्यय'मिति

भाष्यप्रकाशः ।

रूपान्तरविधानदर्शनेन रूपान्तरविधानमात्रस्यैव काल्पनिकत्वम्, न तु सर्वस्य, अन्यथा 'ता वा एता ऋच एतमृग्वेदमभ्यतप'न्नित्यादेरपि बाधापत्तेः । अतो भूतार्थवादस्य स्वार्थे प्रामाण्यमवश्यमभ्युपेयम् । नचार्थवादेषु सर्वत्र यथाश्रुतार्थग्रहणे 'आदित्यो यूपः' 'यजमानः प्रस्तर' इत्यादिषु गौण्युच्छेदः सूत्रविरोधश्च स्यादिति वाच्यम् । तत्र प्रत्यक्षविरोधेन गौणीस्वीकारात् । असति मानान्तरविरोधे तद्दृष्टान्तेन सर्वत्र प्रत्यवस्थातुमयुक्तत्वादित्यसकृदुक्तम् । तस्माद्यत्र प्रमाणान्तरविरोधः, तत्रैव कल्पनोपदेशादिः, न सर्वत्रेति निश्चयः । तदेतदभिसन्धायाहुः साक्षादित्यादि । एवं पूर्वतन्त्रविचारेण परम्परयार्थवादानां क्रियार्थत्वमुक्त्वा, उत्तरकाण्डविचारेण साक्षादेव तेषां क्रियार्थत्वमाहुः वस्तुत इत्यादि । य एवं वेदेति वाक्यैरिति । 'य एवं वेद स वीर्यैरेव छान्दोभिरर्चति', 'य एवं वेदोपैनं यज्ञो नमती'त्यादिजातीयैर्विद्वद्वाक्यैः । तथाच सत्ययैव प्रशंसया विधेयस्तुतेरुचितत्वात् सिद्धेऽन्येषां पाप्मवेधे आसन्यस्य कुतस्तदभाव इत्यत्र हेत्वनुपलम्भात् तेषां पाप्मवेधहेतोर्न निर्णयः कर्तुं शक्य इति पूर्वपक्षे प्राप्ते, तमेव निर्णयहेतुमाहेत्यर्थः । सौत्रं हेतुं व्याकुर्वन्ति वाक्प्राणेत्यादि । भेदादिति । भौतिकतया प्राकृतत्वेन भेदात् । तथाचास्माद्धेतोः पाप्मवेधः शक्यनिर्णय इत्यर्थः । नन्वयमासन्येपि तुल्य इति कथं तत्र तदभाव इत्यत आहुः आसन्य इत्यादि । उक्त इति । उत्कृष्टप्रणवादित्यैकत्वोद्गीथदृष्टयनन्तरं उक्तः ।

रश्मिः ।

विशिष्टस्य तिरश्चीनवंशस्य । सर्वस्येति । उद्देश्यरूपविशिष्टस्य । ता वा एता इति । ताः प्रसिद्धाः एताः सूर्यातपरूपाः समीपतराः । अभ्यतपन्नित्यार्षम् । भूतार्थवादत्वाद्बाधापत्तेः । गौणीति । वेदप्रतिपाद्यत्वगुणयोगात् सत्त्वगुणयोगात् । सूत्रेति । 'विधिना त्वेकवाक्य'सूत्रविरोधः । स्वार्थं प्रतिपाद्योपक्षीणशक्तित्वाद्वाक्यस्य । तत्रेति । वाक्ययोः । उक्तमिति । ग्रन्थान्तरेषूक्तप्रायम् । य एवमिति । 'स वीर्यै'रितिपदं 'उपनमती'ति च । उपशब्दं करोति उपवक्तीत्यर्थः । विद्वदिति । 'ज्ञात्वाज्ञात्वे'ति स्मृत्युत्तरं 'य एवं वेदे'ति । विद्वद्वाक्यं न तैत्तिरीयश्रुतिरिति भावः । माहात्म्यज्ञानस्य भक्त्युपयोगेन कर्मण्युपयोगाभावाच्च । अन्येषामिति । वाक्प्राणादीनाम् । तेषामिति । वागादीनाम् । आसन्येपीति । प्राणत्वेन पूर्वोक्तप्राणसाम्यात्तथा । तत्रेति । आसन्ये पाप्मवेधाभावः । उत्कृष्टमिति । छान्दोग्येऽथाधिदैवतमित्युपक्रमात्तदनन्तरमुत्कृष्टं त्रैगुण्यवेदोत्तरं तत्त्वमुत्कृष्टत्वम् । अधिदैवतस्य सात्त्विकत्वात् । एवं चात्राप्यधिदैवतत्वम् । अस्यास्तृतीयखण्डस्थत्वेपि चतुर्थपञ्चमखण्डयोरभावेपि षष्ठे इत्यधिदैवतमिति समाप्तिश्रुतेः । मैवम् । तृतीयखण्डत्वेन द्वितीयखण्डकृतवैलक्षण्यादरात् । तथाच प्रणवे उद्देश्ये आदित्यैकत्वं उद्गीथदृष्टिश्च तयोरनन्तरम् । तथाच श्रुतिः 'अथ खलु य उद्गीथः स

१. अधिदैवितस्येति मूले पाठः ।

न्यायाद्वेदान्तेषूपास्यं ब्रह्मातिरिक्तं नोच्यत इत्यासन्योऽपि ब्रह्माभिन्नः, अत एव 'अपहतपाप्मा ह्येष' इति सामगैः पठ्यते। अतस्तत्र न पाप्मवेध इति भावः। ब्रह्मणः स्वतन्त्रपुरुषार्थत्वज्ञापनायार्थपदेनोक्तिः। एतेन विभूतिरूपेऽपि यत्रैवम्, तत्र मूलभूतब्रह्मणि निर्दोषत्वं किं वाच्यमिति ज्ञापितम्। अथवा, अर्थः प्रयोजनं विषय इति यावत्। तद्भेदादित्यर्थः। अत्रेदमाकूतम्। देवा हि स्वस्यासुरजयाय गानार्थं वागादीनूचुः 'त्वं न उद्गाये'ति गानानन्तरं 'यो वाचि भोगस्तं देवेभ्य आगाय'-दित्युच्यते। एवमेव प्राणादिष्वपि 'स्वस्वभोगं देवेभ्य आगाय'दिति। एवं सति

भाष्यप्रकाशः।

ब्रह्माभिन्न इति। उत्कृष्टतद्विभूतिरूपत्वात् तदात्मकतयोक्तः। उत्कर्षश्च पाप्मवेधाभावादेव गम्यते। एवञ्च 'मनो ब्रह्मेत्युपासीते'त्यादौ यत्तेषामुपास्यत्वेन विभूतित्वेपि नैतत्साम्यम्, तद्भगवता स्वसामर्थ्यस्य तत्र तारतम्येनैव स्थापितत्वादिति। यत् पुनर्वागादीनामुपास्यत्वं छान्दोग्ये प्रतीयते, तत्तु भ्रमप्राप्तानुवादरूपम्, न तु वास्तवम्। श्रुत्यनभिप्रेतत्वात्। उदवसानीयपञ्चकपालवत्। तत्र निषेधेनेवात्र पाप्मवेधादेव तथा निश्चयात्। अतो न चोद्यावकाशः। ननु यदि वागादीनां ब्रह्मभिन्नत्वमेवमभिप्रेतम्, तदा सूत्रे ब्रह्मभेदादित्येवोच्येतेत्यत आहुः ब्रह्मण इत्यादि। ननु भवत्वेवमासन्योत्कर्षः, तथापि पूर्वप्रतिज्ञातस्याधिकरणप्रयोजनस्य कथमवगतिरित्यत आहुः एतेनेत्यादि। तथाच कैमुतिकन्यायादवगतिरित्यर्थः। नन्वर्थपदस्य वस्त्वर्थकत्वे उक्तमेव सिध्यति,तदनङ्गीकारे कथमेतदवगन्तव्यमित्यत आहुः अथवेत्यादि। रायभिधेयनिवृत्तीनामत्र प्रसङ्गाभावात् प्रयोजनमत्रार्थो ग्राह्यः। स चात्र वागादीनां विषयरूपः। तस्यैव देवार्थत्वेनोक्तत्वात्। अतस्तद्भेदादित्यर्थः। तदेतदुपपादयन्ति अत्रेदमित्यादि। उच्यत इति। बृहदारण्यके

रश्मिः।

प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेती'ति। अग्रे 'अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीतोमित्येष स्वरन्नेती'ति। प्रणवशब्दवाच्योपि कस्मात्, हि यस्मात् एष सविता ओमिति स्वरन्नुच्चारयन् एति गच्छति। यद्वा। प्राणिनां प्रवृत्त्यर्थमोमिति स्वरन्ननुज्ञां कुर्वन्निव एति। स्पष्टमन्यत्। अत्र यद्यपि प्रणवोद्गीथयोरेकत्वोक्तिरिति व्याख्यातम्, तथापि भाविनीमाख्यां आदित्य उद्गीथरूपामादायोद्गीथस्थले आदित्यपदोक्तिः। एवमुद्गीथदृष्टिरित्यत्रादित्यदृष्टिरिति व्याख्यानं द्रष्टव्यम्। 'असौ वा आदित्य उद्गीथ' इति श्रुतेः। भाष्ये। ब्रह्मातिरिक्तमिति। ब्रह्म अतिरिक्तमिति छेदः। प्रकृते। उत्कृष्टेति। अन्येषामप्रत्यक्षत्वात् 'त्वमेव प्रत्यक्षं ब्रह्मासी'ति श्रुतेः प्रत्यक्षत्वादुत्कृष्टेति विशेषणम्। यद्यपि तथाप्यध्यात्मत्वात्पाप्मवेधाभाव उत्कर्षः। पाप्मावेध उत्कर्ष इत्याहुः उत्कर्ष इति। पूर्वेति। आभासे प्रतिज्ञातस्य। अधीति। निर्दोषत्वज्ञानस्य। वस्त्वर्थेति। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि'ति कोशात्तथा। उक्तमिति। ब्रह्मैवार्थत्वेन सिध्यति। ब्रह्मातिरिक्तस्यावस्तुत्वात्। तदनङ्गीकार इति। सौत्रार्थशब्दस्य वस्त्वर्थकत्वानङ्गीकारे रायाद्यर्थानामङ्गीकारे केन प्रकारेण एतद्ब्रह्मणो निर्दोषत्वमधिकरणप्रयोजनमवगन्तव्यम्। प्रयोजनरूपार्थाभावादित्यर्थः। अरुचिर्नोक्ता। अस्याप्यर्थस्य विवक्षितत्वात्। रायभीति। रैश्च अभिधेयं च निवृत्तिश्च रायाभिधेयनिवृत्तयः तासाम्। अत्रेति। पूर्वव्याख्याने वस्तुरूपे। अत्रेति। द्वितीयार्थशब्दव्याख्याने। तस्येति। प्रयोजनरूपविषयस्यैव 'यो वाचि भोगस्तं देवेभ्य आगाय'दित्यादिश्रुतिषु देवार्थत्वेनेत्यादिः। तद्भेदात् विषयरूपप्रयोजनभेदात्। प्रयोजनं फलं तदत्र विषयभोगः।

देवार्थमेवैतद्गानम्, न तु भगवदर्थम्। यद्यप्यासन्येऽप्येवमुच्यते, 'तेभ्य एष प्राण उद्गाय'दिति, तथापि यथा वागादिषु स्वनिष्ठभोगं 'देवेभ्य आगाय'-दित्युक्तम्, तथा नासन्ये। तेनोक्तमानैर्ब्रह्मात्मकत्वेनासुरजयहेतुर्भगवत्सम्बन्ध एवेति ज्ञात्वा तथैवागायदासन्य इति ज्ञायते। अत एवान्यत्र वेध उक्तोऽत्र तत्करणेच्छायामप्यासुराणां नाश उक्तः। अग्रे च, 'भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेदे'ति पठ्यते। तेन परब्रह्म निर्दोषमिति किमु वाच्यम्। यत्र तद्विभूतिरूपासन्यस्योक्तरूपतां यो वेत्ति, सोऽपि गुणयुक्तो दोषरहितश्च भवतीति कैमुतिकन्यायः सूचितो भवति। एतेन लोके दोषत्वेन ये धर्माः प्रतीयन्ते, त एव धर्मा भगवति निरूप्यमाणा न दोषत्वेन ज्ञेयाः, किन्तु

भाष्यप्रकाशः।

उच्यते। उक्तमानैरिति। उपास्यत्वपाप्मवेधराहित्यासुरजयहेतुभूतार्थज्ञानैः। आसन्यस्यैवं-प्रकारकज्ञानसत्तायां गमकमाहुः अत एवेत्यादि। एवं व्याख्यानेपि पूर्वोक्तार्थसिद्धिमाहुः तेनेत्यादि। एतेनार्थान्तरस्यापि सिद्धिमाहुः एतेनेत्यादि। य इति। मोहत्रणपलायनादयः। न दोषत्वेन ज्ञेया इति। यथा सृष्टिस्थितिप्रलयकर्तृत्वस्य भगवल्लक्षणत्वान्मूलरूपे प्रलयकर्तृ-त्वमतृत्वादिकं च न दोषः, तथावतीर्णेपि भगवति मोहादयोप्यसुरमोहनार्थत्वात्तथा। 'अज्ञत्वं पारवश्यं च विधिभेदादिकं तथा। तथा प्राकृतदेहत्वं देहत्यागादिकं तथा। असुराणां विमोहार्थं दोषा विष्णोर्न हि क्वचि'दिति ब्रह्माण्डवाक्यात्। तथाच तेभ्यः सकाशाद्दोषत्वमुद्धाप्य भगवतो निर्दोषत्वं ज्ञात्वा भजनीयमिति सिद्धम्। तेन मुख्यविभूत्यतिरिक्तविभूतीनामपहतपाप्मत्वाभा-वात्तेषूत्कृष्टानुपसंहारोपि सिद्धो बोध्यः।

अन्ये तु, इदमप्येकसूत्रमधिकरणं स्वीकृत्य, 'शुक्रं प्रविध्य' 'हृदयं प्रविध्ये'त्यादीन्याथर्व-णिकानामुपनिषदारम्भस्थानि वाक्यानि विषयत्वेनोदाहरन्ति।

रश्मिः।

उपास्यत्वेत्यादि। अत्रैवोक्तैः 'य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीते'त्युपास्यत्वमानं प्रमाणं शब्दरूपं 'अपहतपाप्मा ह्येष' इति पाप्मवेधराहित्यमानं शब्दरूपम्। आसुरजयहेतुभूतोऽर्थ उद्गीथस्तस्य ज्ञानं येनोक्तशब्देन तैर्मानैरित्यर्थः। भाष्ये। भगवत्सम्बन्ध एवेति। विलक्षणोपास्यत्वापहतपाप्म-त्वं विशिष्टभगवतो व्याप्यव्यापकभावसम्बन्धः विभूतिविभूतिमद्भावः सम्बन्धो वा आसन्यस्येति ज्ञेयम्। व्यापकेनाप्यासुरजयसम्भवादेवकार आसन्यत्वस्यासुरजयहेतुत्वयोगव्यवच्छेदकः। प्रकृते। एवंप्रका-रकेति। आसुरनाशो ज्ञानसाध्य इत्याशयेनोक्तम्। अत एवेत्यादीति। एतादृशज्ञानवत्त्वादेव। भवतीति। भवति प्रजापतिरूपेण अस्योपासकस्य। द्विषन् पाप्मा। भ्रातृव्यः भ्रातुः 'व्यन्सपत्न' इति सूत्रात्सपत्नः। भवति पराभवति। 'व्यवहिताश्चे'ति सूत्रम्। पूर्वोक्तेति। अत्रैव पूर्वोक्तार्थः कैमुति-कस्तस्य सिद्धिस्ताम्। 'शुक्रं प्रविध्ये'ति श्रुत्यर्थस्तु, अभिचारकर्मदेवतामभिचारकर्त्री प्रार्थयन्ते। हे देव, ते मद्रिपोः सर्वमङ्गं प्रविध्य विदारय। हृदयं च विदारय। धमनीः शिराः प्रवृज्य भिन्धि। तस्य शिरश्चाभितो भिन्धि। एवं मद्रिपुस्त्रेधा विभक्तो विश्लिष्टो भवतीत्यर्थः। आदिना 'देव सवितः प्रसुव यज्ञ'मिति ताण्डिनां 'श्वेताश्वो हरितनीलोसी'त्यादिः शाट्यायनानां श्रुती गृह्येते। सविता देवपत्नी सूर्यापरपर्यायत्वात्। निरुक्ते सूर्यो देवपत्नीनामसु पठित इति प्राणिगर्भविमोचने मरणकोस्तीत्यभिचारकर्म। हरित इन्द्रनीलस्तद्वन्नी-

गुणत्वेनैव, वस्तुन एव तथात्वादिति भावो ज्ञाप्यते ॥ २५ ॥

एवं भगवत्सम्बन्धाभावे दोषसम्बन्धमुक्त्वा तथा सति गुणहानिं च वदंस्तत्र विशेषमाह ।

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

भाष्यप्रकाशः ।

तत्र केवलो वेधशब्दो नास्ति ।

माध्वास्तु, 'अग्ने त्वचं यातुधानस्य भिन्धी'ति वाक्यम् ।

तत्र तु वेधशब्द एव नास्तीति विषयवाक्यत्वं चिन्त्यम् । अथ वेधरूपार्थबलाद्विषयवाक्यत्वम्, तदापि सन्निधिना विद्याङ्गत्वपूर्वपक्षोत्थापनम् । लिङ्गस्य बलिष्ठत्वात्नाङ्गत्वमिति सिद्धान्तः । स च पूर्वतन्त्रादेव सिध्यन्नस्य सूत्रस्यानुवादकत्वमापादयतीत्यतोपि चिन्त्यम् ॥ २५ ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥ एवमुपास्यस्य निर्दोषत्वं व्युत्पाद्य पूर्वसूत्रस्य पुरःस्फूर्तिकमादाय जीवस्य ब्रह्मभावेपि ब्रह्मासाधारणगुणा नोपसंहार्या इति प्रसङ्गतो वक्तीत्याशयेन सूत्रमवतारयन्ति एवमित्यादि । भगवत्सम्बन्धाभावे सति गुणहानिमपि वदन् भगवत्सम्बन्धे गुणप्राप्तिरूपं विशेषमाहेत्यर्थः । सूत्रं व्याकर्तुं

रश्मिः ।

लोऽसीतीन्द्रः सम्बोध्यते । केवल इति । किंतु प्रशब्दघटित इति । सति वेधादेः केवलस्य विषयवाक्ये सम्भवे प्रशब्दघटितमयुक्तमिति हृदयम् । सूत्रार्थस्तु प्रविध्यादयो मन्त्रा विद्यासूपसंह्रियेरन्, किंवा नोपसंह्रियेरन्निति संशयः । उपसंहार एवैषां विद्याप्रधानानामुपनिषद्ग्रन्थानां समीपे पाठादिति पूर्वपक्षे, सिद्धान्तः नैषामुपसहारो विद्यास्विति । कस्मात्, वेधाद्यर्थभेदात् । 'हृदयं प्रविध्ये'त्यादिमन्त्राणां येऽर्था हृदयवेधादयो भिन्नाः अनभिसंबद्धाः ते उपनिषदुक्ताभिर्विद्याभिः, न तेषां ताभिः संगन्तुं सामर्थ्यमस्ति । अयमर्थः । पूर्वपक्षोक्तस्थानरूपप्रमाणस्य लिङ्गरूपप्रमाणापेक्षया दुर्बलत्वान्न पूर्वपक्ष इति । देशसामान्यं स्थानम् । तच्च द्वेधा पाठदेशसामान्यमनुष्ठानदेशसामान्यं च । तत्र पाठदेशसामान्यमपि द्वेधा । यथासंख्यरूपं सन्निधिरूपं च । तत्र प्रथमस्यानुक्तत्वाद्द्वितीयः सन्निधिपाठरूपदेशसामान्यसहकृतो 'यथाग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपे'दिति, 'सोत्र जुहोत्यग्नये स्वाहा' 'कृत्तिकाभ्यः स्वाहे'त्यादि च । अत्र 'सोत्र जुहोती'त्यादिवाक्यविहितोपहोमानां सन्निधिपाठरूपदेशसामान्येन 'अग्नये कृत्तिकाभ्यः पुरोडाश'मित्यादिवाक्यविहितनक्षत्रेष्ट्यङ्गत्वं बोध्यत इति । लिङ्गरूपप्रमाणं त्वर्थगतं शब्दगतं वा सामर्थ्यम्, तत्रार्थगतसामर्थ्य रूपलिङ्गसहकृतो यथा 'स्रुवेणावद्यती'त्यादि । अत्र स्रुवादीनां सामर्थ्यमालोच्य 'द्रवं मांसं कठिन'मित्यभिधात्रीं श्रुतिं कल्पयित्वा स्रुवस्य द्रवावदानेङ्गत्वं बोधयतीत्येवं प्रकृतेपि विद्यासमीपे पाठे पूर्वोक्ते समीपपाठसामर्थ्यमालोच्य वेधादीनां विद्याभिर्भेद इत्यभिधात्रीं श्रुतिं कल्पयित्वा वेधादिविद्यासु नोपसंहारेङ्गत्वं बोधयतीति ज्ञेयम् । अग्न इति । हे अग्ने, त्वं यातुधानस्य सत्त्वविशेषस्य श्रीभागवतप्रसिद्धस्य त्वचं भिन्धीति । लिङ्गस्येति । स्थानरूपसन्निध्यपेक्षया भिन्धीति विधिशब्दसामर्थ्यस्य । असन्दिग्धं न विषयवाक्यमित्याहुः स चेति । सिद्धान्तश्च । आपादयन्तीति । यदि सूत्रमनुवादकं न भवेत्पूर्वतन्त्रोक्तं नानुवदेदित्येवमापादयति । वेधादि विद्याङ्गं न वेति सन्देहे, विद्याङ्गमिति पूर्वपक्षेऽर्थस्य लिङ्गस्य स्थानाद्भेदेन भेदादिति सूत्रार्थः ॥ २५ ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदु

'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'त्याथर्वणिकैः पठ्यते। परमपदेन ब्रह्मोच्यते। तथाच सकार्याविद्यारहितः परममुपैति। तदनन्तरं साम्यमुपैतीति योजना।

तत्रेदं विचार्यते। साम्यं हि समानजातीयधर्मवत्त्वम्। तच्च कतिपयधर्मैरशेषतन्निष्ठधर्मैर्वा भवति। तत्रान्त्यः पक्षो ब्रह्मणा समं न सम्भवति। 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतिविरोधात्। अत आद्य एव पक्षोऽनुसर्तव्यः। तत्र कैर्धर्मैः साम्यमिहोच्यत इत्याकाङ्क्षायामाह हानाविति। ब्रह्मणः सकाशाद्विभागो जीवस्य हानिशब्देन उच्यते। तथाच तस्यां सत्यां ये धर्मा जीवनिष्ठा आनन्दांशैश्वर्यादयो भगवदिच्छया तिरोहिताः, ते ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव

भाष्यप्रकाशः।

भगवत्सम्बन्धे विशेषबोधिकां श्रुतिमाहुः तदेत्यादि। एतत्पूर्वार्धं तु 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनि'मिति। पठ्यते इति। मुण्डके पठ्यते। ननु कात्र भगवत्सम्बन्ध उच्यत इति शङ्कायां पूर्वार्धस्य स्फुटार्थत्वादुत्तरार्धं व्याकुर्वन्ति परमपदेनेत्यादि। विद्वान् भगवज्ज्ञानवान्, पुण्यपापे अविद्याकार्ये, ज्ञानेन विधूय निवार्य, निरञ्जनः अविद्यारहितः सन्, परमं ब्रह्म उपैति, तदनन्तरं साम्यमुपैतीत्येवमर्थः संक्षेपेण तथाचेत्यादिनोक्तः। एतेन यदन्यैरुक्तं 'परममत्युत्कृष्टं साम्यं समत्वं अद्वैतलक्षणं उपैति अवगच्छती'ति। तन्निरस्तम्। समशब्दस्य सर्वपर्यायत्वे साम्यं सर्वत्वम्, तुल्यपर्यायत्वे तौल्यम्, न पुनरद्वैतं निर्विशेषत्वलक्षणम्, लक्षणाप्रसङ्गात्। उभयनिरूपितधर्मरूपसाम्याङ्गीकारेपि यथा नाद्वैतहानिः, तथातीतपाद एवोपपादनात्। अन्यथा श्रुतिविरोधप्रसङ्गाच्च। अत उपैतिपदावृत्तिरेव युक्तेति। ननु भवत्वेवम्, तथापि किमत्र विचार्यमित्यत आहुः तत्रेदमित्यादि। इदमिति। साम्यम्। विचारमुपपादयन्ति साम्यं हीत्यादि। आहेति। यैर्धर्मैः साम्यं तानत्राहेत्यर्थः। सूत्रं व्याकुर्वन्ति ब्रह्मण इत्यादि। सूत्रे तुशब्देन श्रुत्यन्तरे समाभ्यधिकनिषेधादत्र साम्यपदं लक्षणया अद्वैतपरमिति पक्षो निरस्यते। ब्रह्मणः सकाशाद्विभागो जीवस्य, 'ओहाक् त्यागे' इति धातुनिष्पन्नेन हानिशब्देनोच्यते। विभागस्य पूर्वस्थितित्यागरूपत्वात्। तथाच तस्यां सत्याम्, उपायनशब्दशेषत्वात्, उपायनं ब्रह्मप्राप्तिस्तद्वाचकः शब्द उपैतिशब्दस्तच्छेषत्वात् साम्यस्य ये धर्मास्तिरोहिताः, ते परमोपायने ब्रह्मसम्बन्धे सति पुनराविर्भूता इति तैरेव तथा तैरेव साम्यमित्यर्थः। नन्वेवं

रश्मिः।

तथा सतीतिभाष्यं विवृण्वन्ति स्म भगवदित्यादि। विशेषेति। साम्योपायनरूपविशेषबोधिकाम्। पश्य इति। पश्यतीति पश्यः। भगवज्ज्ञानेति। स्मार्तः प्रयोगः। उपैतीति। उप आ एतीति पदच्छेदः। तथाचेत्यादिना भाष्येणोक्तः। लक्षणेति। ब्रह्मवत् सर्वत्वे अभेदसम्बन्धो लक्षणा। तौल्येपि अभेदः। ब्रह्मतुल्यः ब्रह्माभिन्न इत्यर्थात्। सिद्धान्ते साम्येऽद्वैतमुपपादयन्ति स्म उभयेति। वक्ष्यमाणे इत्यर्थः। अतीतेति। तदनन्यत्वाधिकरणे। 'परमत' इत्यधिकरणे 'स्थानविशेष' सूत्रे 'अम्बुव'दधिकरणे वा। श्रुतीति। अद्वैतश्रुतिविरोधप्रसङ्गात्। लक्षणयेति। अभेदसम्बन्धरू-

तथेत्यर्थः। भगवदानन्दादीनां पूर्णत्वाज्जीवानन्दादीनामल्पत्वान्नान्नैव समैर्धर्मैः कृत्वा ब्रह्मसाम्यं जीव उपचर्यते। 'साम्यमुपैती'ति। वस्तुतस्तु नैतैरपि धर्मैः साम्यमिति भावः। अत एव, 'न तत्सम' इति श्रुतिरविरुद्धा। अत एव सूत्रकृता 'साम्यमुपैती'ति साम्योपायनशब्दमात्रम्, न तु साम्यपदार्थः स्वारसिकोऽत्रास्तीति भावप्रकटनाय शब्दशब्द उक्तः। ननु तैरेव धर्मैः साम्यम्, नेतरैरित्यत्र को हेतुरित्याकाङ्क्षायामाह उपायनशब्दशेषत्वादिति। 'परममुपैती'ति य उपायनशब्दः, तच्छेषत्वात् साम्योपायनस्येत्यर्थः। ब्रह्मसम्बन्धहेतुकत्वादानन्दांशाद्याविर्भावस्य, तदैव साम्योपायनकथनात्तैरेव धर्मैः साम्यमभिप्रेतमिति भावः। नन्वानन्दादीनां ब्रह्मधर्मत्वात् तैस्तत्साम्यकथनं तदभेदमेव गमयतीत्याशङ्क्य, तद्धर्मवत्त्वमात्रस्य न तदभेदसाधकत्वमित्यत्र दृष्टान्तमाह कुशेत्यादि। कुशा औदुम्बर्यः समिधस्ता अग्निष्टोमादियागेषु प्रस्तोत्रा स्थाप्यन्ते। तदा तत्सम्बन्धि यच्छन्दःस्तुत्युपगानं तद्वदित्यर्थः। तत्र 'अभि त्वा शूर नोनुमो दुग्धा इव धेनव'

भाष्यप्रकाशः।

साम्येपि 'न तत्सम' इति श्रुतौ संकोचस्तु स्यादेवेत्यत आहुः भगवदित्यादि। जीवानन्दादीनामल्पत्वादिति। 'सर्वे जीवाः सर्वमयास्तथाप्यल्पा' इति नृसिंहोत्तरतापनीये जीवानामल्पताया उक्तत्वेन तदानन्दादीनामपि तथात्वात्। नन्वेवमेव सूत्राशय इति कथं ज्ञातव्यमित्यत आहुः अत एव सूत्रकृतेत्यादि। हेतुमवतारयन्ति नन्वित्यादि। तदैवेति। ब्रह्मसम्बन्ध एव। तथाचोपायनशब्दशेषत्वात् उक्तैरेव धर्मैः साम्यमिति सूत्रयोजनेत्यर्थः। दृष्टान्तमवतारयन्ति नन्वानन्देत्यादि। व्याकुर्वन्ति कुशा इत्यादि। उपगीयतेऽनेनेत्युपगानम्। करणे ल्युट्। तथाच कुशाभिः कृत्वा छन्दःस्तुत्युपगानसाधनभूतभकारवदिति सूत्रार्थं इत्यर्थः। एतद्व्युत्पादयन्ति तत्रेत्यादि।

रश्मिः।

पया। तच्छेषत्वादिति। हानावुपायनशब्दशेषत्वात्। भगवदित्यादीति। उपचर्यते कतिपयधर्मैर्गौणं क्रियते। सूत्रयोजनेति। हानौ जीवस्य भगवत्सकाशाद्विभागे ये जीवनिष्ठा धर्मास्तिरोहिता भगवदिच्छया आनन्दैश्वर्यादयस्ते भगवत्सम्बन्धे सति पुनराविर्भूता भवन्तीति परमं तुकारात् 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुतिनिषिद्धसाम्यपदं लाक्षणिकमद्वैतवाचकमिति पक्षनिरासकात्[1] साम्यमुपैतीति योजना यद्यपि, तथापि दुरूहत्वममन्यमाना उपायनशब्दस्योपैतीत्यस्य साम्ये कर्मत्वाच्छेषत्वं विशेषणत्वं तस्मात् उक्तैरवैश्वर्यादिधर्मैः साम्यमिति साम्यस्यैतादृशस्य योजनेत्यर्थः। नन्वानन्देत्यादीति। नेति। चन्द्रवन्मुखमित्यादौ तथा। अनेनेति। भकारेण। छन्द इत्यादि। छन्दोभिर्वेदैः स्तुतियुक्तमुपगानं तत्साधनभूतो भकारः तद्वत्। अत्रोपगानं भावल्युडन्तम्। ऋत्विजो गायन्तीत्यार्त्विज्यं गानस्य। अत्र भाष्ये। तत्सम्बन्धीति। स्तुतिरूपप्रतिपाद्यस्य प्रतिपादकत्वसम्बन्धि, छन्दसः स्तुतियुक्तमुपगानमित्यर्थः। प्रकृते। तत्रेत्यादीति। अभि त्वेति श्रुत्यर्थस्तु, हिरण्याक्षस्य वराह प्रति वचः, ब्राह्मणे वाराहोक्तेः। कृष्णं प्रति भीष्मवचो वा। वेदान्ते कृष्णोक्तेः। यद्वा, हे शूर यातुधानादे, यज्ञाभिभावक, त्वामभि त्वा नोनुमः न रथन्तरेण साम्ना स्तुमः। तत्र दृष्टान्तः। अदुग्धाः न विद्यते दुग्ध यासु ताः धेनवो यथा न स्तुत्यास्तद्वत्, तवापि ब्रह्मत्वं परं

1, अभेदो लक्षणा।

इत्यृचि ये वर्णाः, तेषामच एवोपसंहृत्य भकारेणैव गानं क्रियते। न हि तदार्चिक्रवर्णधर्माणामचामुपसंहारोऽस्तीति तद्दगात्मकत्वं भकारस्य सम्भवति, एवं प्रकृतेऽपि ब्रह्मधर्मप्राकट्येन न तदात्मकत्वं जीवस्य सम्भवति। ननु तत्त्वमस्यादिवाक्यैरत्राभेदबोधनादस्तु तथेति चेत्, तत्राह तदुक्तमिति। जीवब्रह्माभेदबोधनतात्पर्यमुक्तमित्यर्थः। 'तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञव'दिति सूत्रेणेति शेषः।

अपिच। श्रुतौ ब्रह्मोपायनस्य साम्योपायनहेतुत्वोक्त्या तदनुपायनस्य साम्यानुपायने हेतुत्वमिति ज्ञाप्यते। तथाच, 'पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ'विति सूत्रे जीवस्य ब्रह्मांशत्वेनानन्दैश्वर्यादिब्रह्मधर्मवत्त्वात्

भाष्यप्रकाशः।

तदात्मकत्वमिति। तदभेदः। अत्र किञ्चिदाशङ्क्य तत्समाधिं स्मारयतीत्याहुः ननु तत्त्वमित्यादि। अत्राभेदबोधनादिति। जीवे ब्रह्माभेदबोधनात्। तदुक्तपदं व्याकुर्वन्ति जीवेत्यादि। नच तद्गुणसारत्वसूत्रे संसारावस्थायामेव व्यपदेशपक्ष उच्यते, न तु मुक्त्यवस्थायाम्, 'यत्र त्वस्य सर्वमात्मैवाभूत्', 'सलिल एको द्रष्टाऽद्वितीयो भवती'त्यादिश्रुतिषु ब्रह्माभेदस्यैव श्रावणादिति वाच्यम्। अभेदेपि मुक्त्यवस्थायां जीवन्यूनताया 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतमे'ति काठकश्रुत्या भेदसहिष्णोरभेदस्यैव निश्चायनात्। नच 'सलिल एक' इत्यादिविरोधः। तत्र तादृशाभेदप्रतीत्यापि तदुपपत्तेः। लोकेपि मिलिताङ्गुल्यादौ विभागाभाव एव एकशब्दप्रयोगाच्च। नचावान्तरमुक्तावेवंभाव इति वाच्यम्। मानाभावात्। परमतेपि 'अविभागेन दृष्टत्वा'दिति सूत्रेऽविभागस्यैव व्याख्यातत्वात्। ब्रह्मसूत्रेषु मुक्तिविचारे कुत्राप्यैक्यपदादर्शनाच्च। नचैवमपि शङ्कापिशाची न निवर्तत इति चेत्। 'भिद्यते हृदयग्रन्थि'रिति श्रुत्युक्तदर्शने एव निवर्त्स्यते इति किमतोऽधिकं वाच्यमिति दिक्। नच गतिसामान्यसूत्रभाष्यविरोधः। तत्रापि सामान्यपदस्य तुल्यपदेनैव व्याख्यानात्। सूत्रकारस्याप्येतदेव मतम्। अन्यथा तु 'गत्यैक्या'दित्येव वदेत्। नच तद्विषयवाक्यविरोधः। तत्रापि विज्ञाता विज्ञातृरूपेण न तिष्ठति, किन्तु ब्रह्मरूपेणेति भेदविरुद्धसंपदा अभेदेन स्थानस्याभिप्रेतत्वादिति न कोपि चोद्यावकाशः। तदुक्तपदसूचितमर्थान्तरमाहुः अपिचेत्यादि। एतेन गुणहानिर्व्याख्याता बोध्या। नन्वेतद्व्या-

रश्मिः।

दुष्टमिति भावः। पूर्वपक्षयोरदुग्धा दुग्धविरोधिन्यः। विरोधो नञर्थः। अच एवेति। द्वितीयाबहुवचनान्तमच इति पदम्। एवकारः स्पर्शाक्षरव्यवच्छेदकः। उपसंहृत्येति। 'त्वामिद्धि हवामह' इत्यस्यामुपसंहृत्य, सान्निध्यात्। सान्निध्यं पूर्वतन्त्रे द्वितीयाध्यायस्य तृतीयपादे प्रथमाधिकरणे। 'अभित्वा शूर' त्येतस्यां योनावुत्पन्नं रथन्तरं साम। 'त्वामिद्धि हवामह' इत्येतस्यामुत्पन्नं बृहत्साम। जगतीछन्दस्कायामप्युत्पन्नं जगत् सामेत्युक्तेः। त्वां इत् हि इति छेदः। ञिमिदा स्नेहने त्वा त्वामिद्धि इति वा। भकारेणैवेति। 'अभि त्वे'ति श्रुते रथन्तरसामयोनित्वेनास्या उद्धृतभकारस्य रथन्तरसामत्वं प्रतिभाति। अस्याः श्रुतेर्लाघवम्। भकारशब्दः कोशादेकादशबलयुक्तशुक्रस्य वाचकः। नक्षत्रवाचको वा। तेनेत्यर्थः। लाघवादेवकारः शरीरगुर्वीं श्रुतिं व्यवच्छिनत्ति। आर्चिकेति। ऋक्सम्बन्धिनां ऋचि भवानाम्। 'तत्र भव' इति ठक्। चतुर्दशमाहेश्वरसूत्रोक्तत्वात्पाणिनीयानुक्तत्वादचां वर्णधर्मत्वम्। तद्दगात्मकत्वमिति। अष्टादशाचः पञ्चाशद्वर्णास्तदज्झलात्मकर्क् तदात्मकत्वम्। गतीति। इदं सूत्रं प्रथमस्य प्रथमपादे। गुणहानिरिति। भाष्यीयाभासोक्ता।

ब्रह्मणः सकाशाद्विभागे सति तदिच्छया तद्धर्मतिरोधानस्य संसारित्वे हेतुः यत्, तदपि 'तदुक्त'मित्यनेन स्मार्यत इति न विस्मर्तव्यम्। यथान्यशाखोक्त अप्येकस्यां विद्यायामुपसंह्रियन्ते, एवं ब्रह्मनिष्ठा धर्मा जीवेऽप्येतया श्रुत्या बोध

भाष्यप्रकाशः।

ख्यानमसङ्गतम्, उपसंहारप्रकरणे धर्मसाम्यविचारप्रसङ्गस्याभावादित्यत आहुः **यथेत्यादि**। छान्दोग्यस्थपञ्चाग्निविद्यायां काण्वाद्युक्तः षष्ठोऽग्निः प्राणविद्यायां पञ्चमं रेतश्चोपसंह्रियते, विद्यैक्य बलात्, तथात्र श्रुत्या परमसाम्यनिरूपणादैक्यभ्रमेणासाधारणा ब्रह्मनिष्ठा धर्मा अपि जीवे उपसंहार्या इति शङ्कानिरासायैतदुक्तमित्यर्थः। तस्मान्निर्दोषत्वे तिरोहितगुणप्राप्त्या साम्ये च सिद्धे ब्रह्मभूतस्य मुख्यं भजनं सिध्यतीति तदर्थं यतनीयम्, न तु विभूतिपरेण भवितव्यमिति बोधितम्। अत्रापहतपाप्मत्वस्य यज्ञे प्राकट्याद्यज्ञसम्बन्धे रुक्मवर्णत्वात् सौभाग्यस्य कर्तृत्वयो-

रश्मिः।

पञ्चममिति। सर्ववेदान्तप्रत्ययसूत्र एवोक्तम्। 'उपसंह्रियन्त' इत्यनुक्त्वा 'बोध्यन्त' इत्युक्तं तदर्थमाहुः **इति शङ्केति**। उपसंहारशङ्कानिरासायैतत् 'बोध्यन्त' इति पदमुक्तमित्यर्थ इत्यर्थः। उपासनां प्राकरणिकीमाहुः **तस्मादिति**। ब्रह्मनिष्ठधर्माणां जीवे बोधनात्। दोषः पाप्मवेधः तस्मान्निर्गतत्वे प्रथमसूत्रोक्ते द्वितीयसूत्रोक्ते तिरोहितगुणानामानन्दादीनां प्राप्त्या साम्ये। 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते परा'मिति गीताया आहुः **ब्रह्मभूतस्येति**। जीवस्य। मुख्यं परं फलाविसंवादि एकादशैकोनविंशाध्यायोक्तम्। **तदर्थं** इति। मर्यादामार्गीर्थे तदुक्ते। एतेन तत्पदार्थाशया भजनेऽय पुष्टिमार्गो भवति। 'तत्त्वायामि ब्रह्मणे'ति सन्ध्याश्रुतेः। तत् महावाक्योक्तं त्वा त्वायामि पद्भ्यां सेवे। पादसेवोक्ता। ब्रह्मणा हिरण्यगर्भेण वन्द्यमानः वन्द्यमानम्। असुः सुः। 'ब्रह्मा मानसीं सेवां प्रत्यह करोती'ति सुबोधिन्याम्। वन्दनभक्तिः सेवापूर्वा एकादशस्कन्धसुबोधिन्यामुक्तम्। तत पूर्वोक्त यजमानो दैशिक आशास्ते आशां कुरुते। हविर्भिः बहुविधभक्तिमार्गीयैः समर्पणदानैः। स यजमानो न कृतात्मनिवेदी, किन्तु श्रुतात्मनिवेदीत्याह **अहेडमान** इति। हेड अनादरे। हेडते कृतात्मनिवेदनत्वदशायां गुरुणा न हेडमानोऽहेडमानः, हे वरुण, इह लोके बोधी ज्ञानी उरु यथा भवति तथा शंसमानः कीर्तनभक्तिमान्। आयुः अस्मं प्रमोषीः प्रकर्षेण मोषीः। मुष स्तेये। जलदोषेण स्तेयं मा कार्षीः। अडभावश्छान्दसः। उरु श यथा भवति तथा स यजमानोऽतो नोऽस्माकं आयुः त्वं प्रमोषीः। आनन्दमयादीनां प्रियशिरस्त्वसूत्रानुसारेण प्रियाद्युपासनमुक्त्वा तत्प्रसङ्गेन **स्मृताय** विरुद्धधर्माधारत्वाय निकेतत्वानिकेतत्वे श्रीवैराग्यरूपे आहुः पुरुषविधब्राह्मणोक्तपतिपत्नीभजनाय। तत्प्रसङ्गेन स्मृताय च। **अत्रापहतेति**। श्रुतौ अपहतपाप्मा यज्ञ उक्तः, सोऽत्र शाखाभेदेन पुरुषविधः। आनन्दमयाधिकरणे पुरुषविधब्राह्मणोक्तानन्दमयाद्युपासनप्रसङ्गेन पुरुषविध आनन्दमय इति स्मृतेः। पुरुषविधयज्ञो दंपतीत्वतः 'पतिः पत्नी चाभवता'मिति पुरुषविधब्राह्मणश्रुतेः। तते यज्ञ आसन्येऽपहतपाप्मत्व रुक्मवर्णत्व पत्नीकृतमधोक्षजे। तस्याः क्रियात्वेन रुक्मवर्णत्वमिति गोप्यत्वा'दजामेका'मिति श्रुत्युक्ताया अजायास्त्यक्ताया गुणहानिः तस्यां सत्यां ब्रह्मोपायनशेषत्वात्साम्यस्य। ब्रह्मप्राप्तिमुख्यनित्यक्रीडाप्रवेशोपयिकः प्रपञ्चः तस्य शेषत्वं पत्नीनिष्ठसाम्यस्येति परम्परया ब्रह्मोपायनशेषत्वं साम्यस्येत्याशयवन्त आहुः **सौभाग्यस्येति**। अलौकिककर्तृत्वयोनित्वाभ्यां सौभाग्यक साम्यरूपस्य। ब्रह्मवदभिन्न(निर्भिन्न)निमित्तोपादानत्वेन साम्यमित्युक्तम्। तस्याः कार्यकारण-प्रपञ्चसम्बन्धः इति त्रिधा सौभाग्यतन्यकर्तृत्वयोनित्वैस्त्रिधा आधिदैविकादिभेदेन या श्रीर्लक्ष्मीः शोभा

भाष्यप्रकाशः ।

नित्वाभ्यां प्रपञ्चस्य च सम्बन्ध इति त्रिधा श्रीनिकेतनत्वमुक्तम् ।

अन्ये तु इदमप्येकसूत्रमधिकरणमङ्गीकृत्य, 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहुमुखात् प्रमुच्य, धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी'ति ताण्डिश्रुतिं 'तदा विद्वा'नित्याथर्वणश्रुतिं 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या'मिति शाट्यायनिश्रुतिं 'तत्सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृत'-मिति कौशीतकिश्रुतिं चोदाहृत्य, यत्रोभयं श्रूयते, तत्र न कश्चिद्विचारः, यत्राप्युपायनमेव श्रूयते, न हानम्, तत्राप्यर्थादेव हानं सन्निपतति, अन्यैरुपेयमानयोरात्मीयसुकृतदुष्कृतयोर्हानस्यावश्यकत्वात्, यत्र पुनः केवलं हानमेव श्रूयते, तत्रोपायनं सन्निपतेन्न वेति संशये, अश्रवणाद्विद्यान्तरगोचरत्वाच्च न सन्निपततीति पूर्वपक्षे, तत्रापि तत्सन्निपातं सिद्धान्तयितुं सूत्रमेवं व्याकुर्वते । हानौ केवलायामपि श्रूयमाणायामुपायनं सन्निपतति । कौशीतकिरहस्ये उपायनशब्दस्य हानशेषत्वेन समधिगतत्वादित्यादि ।

रश्मिः ।

तस्या **निकेतनत्वं** निकेतनं धर्मो भक्तिविषयः । **उक्तम्** । सूत्रयोस्तात्पर्येण भजनीयतावच्छेदकपञ्चकेन सहोक्तश्रीनिकेतनमुक्तम् । प्रपञ्चस्वत्वं सम्बधयति प्रियाम् । **श्रीनिकेतनत्वमुक्त**मिति पाठे । उक्तप्रपञ्चस्य स्वत्वमात्मत्वं सम्बन्धयति प्रियामिति णिजन्तत्वेन कर्मद्वयम्, प्रिया श्रीः तस्या निकेतत्वमुक्तम् । द्वितीयस्कन्धसुबोधिन्यां भाष्ये भजनीयमुक्तं तद्विषयतावच्छेदकं पञ्चकमुक्तं द्वितीयस्कन्धसुबोधिन्यां द्वितीयाध्याये तत्त्वध्यानप्रकरणे 'एवं स्वचित्ते स्वत एव सिद्धे' इति श्लोके 'आत्मत्वं प्रियत्वं अर्थत्वं भगवत्त्वमनन्तत्वं चे'ति । 'आध्यानाये'ति सूत्रेण तत्त्वध्यानप्रकरणस्मारणात् । सुबोधिन्यामुक्तपञ्चधर्मोक्त्यनन्तरं भजने चैते धर्मा भजनीयविषयतावच्छेदकत्वेन गुणोपसंहारन्यायेन ग्राह्या इति । तेन 'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् । लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधि'मित्यत्र सेवा प्रपञ्चिता । तेनानन्दमयस्य नित्यक्रीडास्थसाम्येपि श्रीवत्सकौस्तुभौ विना साम्यमिति केवलस्वरूपभक्तिकामेन श्रीवत्समुपसंहार्याधोक्षजे जानातीच्छति यतत इति क्रमेण भक्तिः सम्पाद्येति साम्ये भजनव्यभिचारात् कथमानन्दमयस्य भजनीयत्वमिति कुचोद्यं निरस्तम् । श्रीवत्सेनेतरपार्थक्यात् । किंच तृतीयस्कन्धे 'अद्राक्षमेकमासीन'मित्यत्र सुबोधिनी 'तदा भगवतः ऐश्वर्यस्य प्रादुर्भूतत्वात् षोडशापि कलाः तदा भगवति दृष्टाः संपूर्णो भवति । अतोत्र भगवतः षोडशविशेषणानि । एतान्येव गुणोपसंहारे षोडशाधिकरण्या प्रतिपादितानी'ति । **अश्व इवेति** । प्रत्येकं भाष्यकाराणामिमानि विषयवाक्यानि । श्रुत्यर्थस्तु, 'यथाऽश्वो जीर्णानि रोमाणि रजोभिः सह त्यक्त्वा स्वच्छो भवत्येवमहमपि पापं सर्वं विधूय निर्मलः सन् यथा वा चन्द्रो राहोर्मुखात्प्रमुच्य भास्वरो भवत्येवमकृतं प्रवाहरूपेणानादिसिद्धं शरीरं धूत्वा त्यक्त्वातिस्वच्छः सन् कृतात्मा कृतकृत्यो ब्रह्मात्मकं लोकमभिसंभवाम्याभिमुख्येन प्रसक्तेन प्राप्नोमीत्यर्थः । परमं साम्यमैक्यम् । तस्य मृतस्य विदुष इत्यर्थः । दायं भागमित्यर्थः । **हानस्येति** । उपायनशेषस्य । **इत्यादीति** । अमूर्तयोः पुण्यपापयोरन्यत्र संचारात्मकोपादानस्य मुख्यस्यायोगात् सूत्रे शब्दपदेन हानावुपायनोपसंहारस्य स्तुत्यर्थत्वं सूचितम् । शाखान्तरो विशेषः शाखान्तरे पापेक्षित उपसंहरणीय इत्यत्र दृष्टान्तमाह **कुशाछन्द** इत्यादिना । तत्र कुशदृष्टान्तो यथा—'कुशा वानस्पत्याः स्थे'त्यादौ भाल्लविनां श्रुतौ हे कुशाः समिद्रूपा यूयं वानस्पत्याः स्थ सा मो यजमानं रक्षतेति यजमानप्रार्थने वनस्पतियोगित्वेन सामान्यसमितश्रवणे 'औदुम्बरा' इति

भाष्यप्रकाशः ।

तच्चिन्त्यम् । आद्ये उपायनशब्दस्याभावेन अर्थग्रहणेपि तस्य फलबोधकत्वेन द्वितीयवाक्येपि तस्य तथात्वेन हानशेषत्वाभावाद्विषयत्वायोगात् । ताण्ड्याथर्वणकौशीतकिवाक्येषु कम्पनार्थकधा निष्पन्ने 'धूत्वे'त्यादिशब्दे हान्यर्थत्वं लक्षयित्वा उपायने तच्छेषताकल्पनस्य क्लिष्टत्वात् । चतुष्वाक्येषूपायनस्य सत्त्वात् क उपायनशब्दः सूत्रकाराभिसंहित इत्यनिश्चयेन कौशीतकिस्थशब्दस्यैव विषयत्वमित्यस्याप्यतिक्लिष्टत्वाच्च ।

यद्प्यस्योपायनवादस्य स्तुत्यर्थत्वादन्यदीयपुण्यपापयोः कथमन्यत्र प्राप्तिरित्यत्र नाभिनिवेशः कार्य इत्युक्तम् ।

तदपि न रोचिष्णु । 'राज्ञि चामात्यजा दोषाः पत्नीदोषाश्च भर्तरी'त्यादिस्मृतावभिमान-

रश्मिः ।

शाखान्तरीयो विशेष आश्रितः 'औदुम्बराः कुशा' इति । छन्दोदृष्टान्तो यथा—'छन्दोभिः स्तुवीते'त्यत्र देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे 'देवच्छन्दांसि पूर्वाणी'ति पैङ्गिश्रुत्या निर्णयः । स्तुतिदृष्टान्तो यथा—षोडशिनः पात्रविशेषस्य ग्रहणे त्वङ्गभूतं स्तोत्रं कदा कर्तव्यमित्याकाङ्क्षायां छन्दोगानां कालाविशेषप्राप्तौ 'समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोती'ति तैत्तिरीयकवाक्यात् कालविशेषधीर्भवति । एवं (भूया अर्च्यानां श्रुते) वा कालविशेषधीरिति । उपगानदृष्टान्तो यथा—'ऋत्विज उपगायन्ती'ति सामान्यवाक्यं शाखान्तरीयं नाध्वर्युरुपगायन्तीति विशेषमपेक्ष्याध्वर्युवर्जिता ऋत्विज उपगायन्तीत्येतदर्थपरतया निश्चीयते । तथाच यथा कुशादिश्रुत्यन्तरगतविशेषान्वयास्तथा हानावुपायनान्वय इत्यर्थः इत्यादिशब्दार्थः । **अभावेनेति** । उपयन्तीति पदाभावात्तथा । **अर्थेति** । विधूयेत्यस्यार्थः विभागानुकूलो व्यापारः त्यक्त्वेत्यर्थात् । तत्र पूर्वक्षणे ईश्वरस्य निमित्तत्वात् पुण्यपापयोः कर्म, ततः देवदत्तात् पुण्यपापयोर्विभागः, ततः पुण्यपापवैशिष्ट्येन साञ्जनत्वारम्भकवैशिष्ट्यनाशः, ततः पुण्यपापनाशः, तेन साञ्जनत्वनाश इति । ततस्तेनैव देवदत्तात्पुण्यपापयोर्विभागेन सकर्मणोः पुण्यपापयोराकाशादिविभागो जन्यते, ततः पूर्ववैशिष्ट्यनाशः, ततो विष्णुमित्रकृष्णदत्तयोर्वैशिष्ट्यम् । ततो विष्णुमित्रे कृष्णदत्ते चोपसंहृतयोः पुण्यपापयोर्हानम्, ततः कर्मनाश इति विभागस्यार्थस्तस्य ग्रहण इत्यर्थः । **तस्येति** । उपायनशब्दस्य फलं उपयन्तीत्यत्रोपायनं तस्य फलबोधकत्वेन । इदं हानशेषत्वाभावादित्यनेनान्वेति । **तस्येति** । उपायनशब्दस्य फलबोधकत्वेन । उपायनानुकूलव्यापार इति धात्वर्थात् । फलं वा धात्वर्थ इति मतम्, मण्डनमिश्राणामपि । **हानशेषत्वेति** । 'परार्थः शेषलक्षण'मिति जैमिनिसूत्रात् हानार्थत्वाभावात् । किन्तु व्यापारार्थत्वम् । फलं धात्वर्थ इति पक्षेपि लकारार्थव्यापारशेषत्वेन हानशेषत्वाभावात् । **लक्षयित्वेति** । जन्यजनकभावसम्बन्धो लक्षणा । **सत्त्वादिति** । प्रथमे धूत्वेत्यस्य त्यागार्थग्रहणे सत्त्वात् । द्वितीये विधूयेतिपदस्य त्यागार्थग्रहणे सत्त्वात् । तृतीये उपयन्तीत्युपायनस्य सत्त्वात् । तथा चतुर्थे सत्त्वात् । **कौशीतकीति** । उभयोक्तेरेवकार एकोक्तिविशिष्टव्यवच्छेदकः । **अतीति** । प्रथमविषयवाक्यत्यागे मानाभावान्मानस्थापन एकवाक्यताङ्गीकारादेकवाक्यतायाश्चतुर्षु प्रमाणेष्वन्तर्भावाभावात्परस्परमेकवाक्यतापन्नवाक्यचतुष्टयस्य शब्दत्वेन प्रामाण्यादतीति । **स्तुत्यर्थत्वादिति** । असदर्थबोधकत्वात् । 'नाभिनिवेशः कार्य' इत्यनेनान्वेति । **अभिमानेति** । अमात्येन निग्रहादिके कृते राजाभिमन्यते मया कृतमिति, पत्न्यां दुष्टायां

इत्येतावत्साम्यमस्तीत्युपसंहारप्रकरण एतस्य निरूपणं कृतम् ॥ २६ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चमं वेधाद्यधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः।

मात्रेण दोषसंक्रमकथनात्, भारतादौ माण्डव्यदत्तयमशापप्रसङ्गे बालकृतपापस्य जनकत्वोपाधिना पितृसंक्रमकथनात्, विश्वामित्रपुण्येन त्रिशङ्कोः स्वर्गप्राप्तिस्मरणाच्चापि तथा सम्भवेन स्तुतिमात्रत्वाङ्गीकारस्याप्रयोजकत्वात्, 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथे'ति श्रुतिस्मृतिभ्यां ज्ञानस्य कर्मनाशकत्ववत् विद्याविशेषस्यान्यत्र कर्मसंक्रामकत्वेपि बाधकाभावात्। नच सुकृतदुष्कृतयोः कर्तृसामानाधिकरण्यस्यैव सर्वत्र दर्शनान्नान्यत्र साक्षात् संक्रमः, अपि तु फलस्य तत्र सम्बन्धात् तत्र स उपचर्यत इति वाच्यम्। हेतुव्यधिकरणस्य फलस्यैवाशक्यवचनत्वात्। नच वाक्यान्यथानुपपत्त्या तत्र तथा कल्प्यत इति वाच्यम्। तस्या अत्रापि तौल्यात्। किञ्च। आन्यत्रिकवाक्यस्य आन्यत्रिकवाक्यशेषत्वाय 'कुशाच्छन्दःस्तुत्युपगानव'दित्यत्र दृष्टान्तत्रयं यत् स्वीकृतम्, तदपुष्टार्थम्। एकेनापि तत्सिद्धेरप्रत्यूहत्वेन बहूनां कथने प्रयोजनाभावादिति ॥ २६ ॥ **इति पञ्चमं वेधाद्यधिकरणम् ॥ ५ ॥**

रश्मिः।

पतिर्दुष्ट इति लोका वदन्ति। **दोषसंक्रमेति**। अन्यथा नाभिमन्येत। **जनकत्वेति**। अभिमानस्थलेऽयमुपाधिः। यथाभिमानोऽन्यदीयपुण्यपापयोरन्यत्र प्राप्तिरित्यत्राभिनिवेशे उपपत्तिसाधकः, तथात्र जनकत्व'मात्मा वै पुत्रनामासि स जीव शरदः शत'मिति श्रुत्युक्तपितृपुत्रयोरैक्यज्ञानसंजातवासनासमानाधिकरणमुपपत्तिसाधकं ज्ञेयम्। **तथेति**। अन्यदीयपुण्यपापयोरन्यत्र प्राप्तिरित्यत्राभिनिवेशे शब्दस्योपपत्तिसाधकत्वेन संभवस्तेन। एवं भगवन्माहात्म्यमुक्त्वा 'अनृतेन प्रत्यूढा' इति श्रुतेः पुण्यपापयोरविद्यया प्रतिकूलत्वेन प्रापितयोरन्यदीयपुण्यपापयोरन्यत्र प्राप्तिरित्यत्राभिनिवेशसाधकं विद्याविशेषमाहुः **क्षीयन्त** इति। **कर्मनाशेति**। कर्माविद्यारूपमत्र बोध्यम्। 'अविद्यायामन्तरे वर्तमाना' इति मुण्डकश्रुतेः। **विद्येति**। विद्याविशेषोऽत्र त्रय्या व्यतिरिक्त आथर्वणः। **अन्येति**। ऋतादन्यदनृतं कर्म। योगमायास्थले दशमे प्रसिद्धं यथा कथञ्चित्। **कर्तृत्वेति**। यो हि कर्ता तत्र सुकृतदुष्कृते इति। **फलस्येति**। सुकृतदुष्कृतफलस्य पुण्यपापरूपस्य। **तत्रेति**। तथा 'तस्य सुहृदः साधुकृत्यामुपयन्ति'। मृतस्य साधुकृत्यां मृतोऽयं सुहृद्वयं तत्कार्यरहितास्तत्सुकृतफलभागिन इत्युपयन्ति। 'द्विषन्तः पापकृत्यामुपयन्ति'। मृतस्य पापकृत्यां मृतोयं द्वेषेण वयं पापफलभागिन इति। सम्बन्धो दार्ष्टान्तिके। **स** इति। सुखदुःखोपसंहारः सुकृतदुष्कृतोपसंहारो वा। **वाक्यान्यथेति**। विषयवाक्यान्यथानुपपत्त्या। यद्विना यदनुपपत्तिरसम्भवस्तेन। तत्र तत्समाधानाय तथा उपायनवादः स्तुतित्वेन कल्प्यत इत्यर्थः। **तस्या** इति। स्तुतेरत्रास्मन्मतेपीत्यर्थः। **दृष्टान्तत्रयमिति**। पूर्वमुक्तं व्याख्यातं च। **एकेनापीति**। न च बहुभिः साध्यदार्ढ्यमिति वाच्यम्, हेतोः सदोषत्वापत्तेः ॥ २६ ॥ **इति पञ्चमं वेधाद्यधिकरणम् ॥ ५ ॥**

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ (३-३-६.)

वाजसनेयिशाखायां 'स एष नेति नेतीत्यात्मे'त्युपक्रम्य, 'न व्यथत' इत्यन्तेन ब्रह्मस्वरूपमुक्त्वा, यत एतादृग्ब्रह्मातस्तद्विदपि विवक्षितरूप इत्यभिप्रायेणाग्रे पठ्यते 'अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृत' इत्यादिना । अग्रिमया 'एष नित्यो महिमा ब्राह्मणस्ये'त्यृचा च ब्रह्मविदो माहात्म्यमुक्त्वा पठ्यते । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः श्रद्धा-

भाष्यप्रकाशः ।

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ साम्पराय इति पाठे स्वार्थेऽण् बोध्यः । पूर्वाधिकरणे जीवस्य भगवत्सम्बन्धे विशेषमुक्त्वा तत्साधनयोर्ज्ञानभक्त्योर्मध्ये किं ज्याय इति विचारयितुमधिकरणमारभत इत्याशयेन सूत्रे तर्तव्याभावपदात्तल्लिङ्गिके श्रुती विषयत्वेनोदाहरन्ति वाजेत्यादि । अथर्वणेत्यादि च । एतयोराद्यं वाक्यं बृहदारण्यके शारीरब्राह्मणस्थम् । तत्र च पूर्वं 'मनसैवानुद्रष्टव्य'मित्यनेन तद्दर्शनसाधनमुक्त्वा, 'विरजः पर आकाशा'दित्यादिना विरजत्ववशित्वेशानत्वादीन् धर्मान् बोधयित्वा, ततोऽनिरुक्तत्वाय 'नेति नेती'त्यनेनैतावन्मात्रतां निषिध्य, 'अगृह्यो नहि गृह्यते, अशीर्यो नहि शीर्यते, असङ्गोऽसितो न सज्जते न व्यथत' इत्यनेन लौकिकप्रमाणाग्राह्यत्वमनाशित्वमसङ्गत्वम्, 'षिञ् बन्धने', अबद्धत्वं निर्दुःखत्वं चोक्त्वा, तेन जडविलक्षणं ब्रह्मस्वरूपं बोधयित्वा, ब्रह्मण एतादृशत्वात् तद्विदपि साध्वसाधुकर्मरहित इति बोधनायाग्रे पठ्यते 'अतः पापमकरवमतः पुण्यमकरवमित्युभे ह्येष एते तरत्यमृतः साध्वसाधुनी' इति । अत इदमभिसंधाय पापमकरवं कृतवानस्मि, अत इदमभिसन्धाय कल्याणं पुण्यं कृतवानस्मि, इति एवमभिसन्धिपूर्वकं कृते एते उभे साध्वसाधुनी हि निश्चयेन एष उक्तरीतिकब्रह्मवित् तरति अतिक्रामत्यभिभवति । अमृतो जीवन्नेव, नैनं कृताकृते तपतः, एनं ब्रह्मविदं निन्दितकरणकल्याणकरणे पश्चात्तापं न जनयतः, नास्य केनचन कर्मणा लोको मीयते, अस्य प्राप्तव्यो ब्रह्मलोकः केनापि कर्मणा नापयाति, प्राप्तव्यं प्राप्नोत्येवेत्यर्थः । तदेतदृचाभ्युक्तम् । ब्राह्मणोक्तोऽर्थो वक्ष्यमाणर्चाप्युक्त इत्यर्थः । ऋक् तु 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् तस्यैव स्यात् पदवित् तं विदित्वा न कर्मणा लिप्यते पापकेने'ति । 'एष' इति ब्राह्मणोक्तः । 'तं' पूर्वोक्तरूपमात्मानं विदित्वा तस्यैवात्मनः पदवित् पदं चरणं स्थानं वा 'तद्धाम परमं ममे'ति वाक्यादक्षरं तद्वित् स्यात् । ततः पापेन लिप्तो न भवतीत्येवमक्षरविदो माहात्म्यमुक्त्वा पठ्यते । तत्साधनमुच्यते 'तस्मादेवंवि'दित्यादिना । यस्मादेवं ज्ञातुर्माहात्म्यम्, तस्मादेवं शास्त्रतो ज्ञः, यः स्वरूपवित्, शान्तो दान्तः निगृहीतान्तर्बहिःकरण उपरतो निवृत्तसर्वेहस्तितिक्षुः दुःखसहिष्णुः श्रद्धावित्त आस्तिक्यबुद्धिमान् आत्मनि स्वशारीर एवात्मानमक्षरं पश्येत् । 'अर्हे कृत्यतृचश्चे'-

रश्मिः ।

सम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥ २७ ॥ अत इति । अभावस्य प्रतियोगिसापेक्षत्वात् । साध्वसाधुनी इति । द्वितीयाद्विवचनान्तं पदम् । नापयातीति । मीयत इति । माङ्माने शब्दे च । अपयातिशब्देन शब्द्यत इत्यर्थः । पदवित्तमिति । पदवित् तं इति छेदः । 'तस्यैवात्मा पदवित् तमिती'दानीन्तनपाठः । स्वशारीर इति । स्वजीवे । 'यस्यात्मा शरीर'मित्य-

चित्तो भूत्वात्मन्येवात्मानं पश्येत्, सर्वमेनं पश्यति, सर्वोऽस्यात्मा भवति, सर्वस्यात्मा भवति, सर्वं पाप्मानं तरति, नैनं पाप्मा तरती'त्याद्युक्त्वान्ते पठ्यते 'य एवं वेदे'ति । अत्र हि पाप्मतरणादिरूपं ब्रह्मज्ञानमाहात्म्यमुच्यते । ज्ञानस्य संसारमुक्तिहेतुत्वात् । अथर्वणोपनिषदादिषु तु भगवद्भक्तेर्मुक्तिहेतुत्वमुच्यते । 'परं ब्रह्मैतत् यो धारयती'त्युपक्रम्य 'भजति सोऽमृतो भवति सोऽमृतो भवती'ति । अग्रेपि 'मुक्तो भवति संसृते'रिति । एतद्विषयव्यवस्था तु पुरैवोक्तेति नात्रोच्यते ।

एतावान् परं सन्देहः, 'य एवं वेद स पाप्मानं तरती'ति वचनाज्ज्ञानदशायामपि पापसत्त्वं वाच्यम्, अन्यथा तरणासम्भवापत्तेः । एवं सति भक्तिदशायामप्येवमेव, न वेति भवति संशयः ।

भाष्यप्रकाशः ।

त्यहार्थे लिङ् । दर्शनार्ह इत्यर्थः । एवं दर्शनार्हतामुक्त्वा स्वस्य द्रष्टृतानिश्चयार्थं द्रष्टृलिङ्गानि वदति 'सर्वमेनं पश्यती'त्यादिना । स्वज्ञानार्थं लिङ्गमुक्त्वा परज्ञानार्थं तदाह 'विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति, य एवं वेदे'ति । य उक्तप्रकारकब्रह्मद्रष्टा स विपापादिलिङ्गैर्निश्चेय इत्यर्थः । अत्र विपापत्वं पापरूपकार्याकर्तृत्वमेव । बाह्यानां जराद्यभावानां समभिव्याहारात्, न तु पूर्वपापराहित्यम्, तस्य तर्तव्यत्वेनात्रोक्तत्वात् । इदं चान्यमतेपि तुल्यम् । सर्वैरेव 'अश्व इव रोमाणि विधूय पापम्' 'स आगच्छति विरजां तत्सुकृतदुष्कृते विधूनुत' इत्यादिश्रुतीरुदाहृत्य विदुषोपि देहवियोगसमय एव तर्तव्याभावव्याख्यानात् । अन्यथोक्तश्रुतिविरोधादिति सर्वमभिसन्धायास्य वाक्यस्य निष्कृष्टार्थमाहुः अत्र हीत्यादि । तर्तव्यलिङ्गां श्रुतिमुक्त्वा तदभावलिङ्गामाहुः अथर्वणेत्यादि । 'परं ब्रह्मे'त्यादिवाक्यं गोपालतापनीयस्थम् । अर्थस्तु स्फुटः । आदिपदेन तदुपबृंहणभूतपुराणसङ्ग्रहः । अतः परं यदंशे संशयस्तं प्रकटयितुं पूर्वविचारितमंशं प्रथममाहुः एतदित्यादि । एतच्छ्रुतिद्वयविषयभूते ये ज्ञानभक्ती तयोर्या व्यवस्था, अधिकारिभेदेन रूपभेदकथनात् तेन तेन ते ते धर्मास्तत्र तत्रोपसंहार्याः, नोपसंहार्याश्चेति नियमरूपा, सा तु 'न वा प्रकरणभेदा'दिति सूत्र एवोक्तेति तदंशे संदेहाभावादत्र पुनर्नोच्यत इत्यर्थः । सन्दिग्धांशमाहुः एतावानित्यादि । एवं सतीति । मुक्तिकारणत्वेन भक्तिज्ञानयोस्तौल्ये सति । तयोस्तौल्यं भक्तौ पापसूचनाद्यभावश्च सन्देहबीजम् ।

रश्मिः ।

न्तर्यामिब्राह्मणात् । शरीरमेव शारीर इति वा । स्वज्ञानेति । स्वस्य ब्रह्मद्रष्टृत्वज्ञानार्थं लिङ्गं समीपतरवर्तिनमान्तरं सर्वं यथाश्रुतं वा पश्यतीति लिङ्गमुक्त्वा । विजर इति । विगता जरा यस्मात् । विगता जिघत्सा अदनेच्छा यस्मात् । अदेर्घस्लृ, सन् द्वित्वम् । एवेति । प्रायपाठादान्तरपापकर्तृत्वव्यवच्छेदकः । तस्येति । पूर्वपापस्य । सर्वैरिति । भाष्यकारैः । अश्वो रोमाणीव ब्रह्मवित्पापं पापशब्दान्तैक्यम् । विरजां विरजशब्दात्सोर्डा । अम् अव्ययम् । उक्तेति । 'सर्वं पाप्मानं तरती'ति घटितविषयवाक्यश्रुतिविरोधात् । इति सर्वमिति । पराभिप्रायप्रकारेण सर्वमभिसन्धाय । तदभावेति । तर्तव्यपापाभावलिङ्गाम् । तदुपबृंहणेति । 'भेजिरे मुनयोऽथाग्र' इति । 'भवपारप्लवो दृष्टो हरिचर्यानुवर्णन'मिति च । सन्देहबीजमिति । ज्ञानमार्गवत्पापसत्त्वे भक्तिमार्गे तयोस्तौल्यं बीजं प्रथमकोटौ । द्वितीयकोटौ भक्तौ पापसूचनमुक्तत्वसूचनाभावो बीजम् । उक्तगोपालतापिनीयश्रुतौ बोध्यम् । श्रुतौ पापशब्दाभावात् सूचनशब्द उक्तः । सूचकशब्दोपि नेति भावः । 'मुक्तो भवति संसृते'रित्यत्र

तत्र श्रुतावविशेषेण पापनाशश्रवणान्मुक्तिपूर्वकाले पापनाशावश्यम्भावादेकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन भक्त्या पापनाशादत्रापि तथैवेति प्राप्ते, आह सम्पराय इत्यादि । सम्परायः परलोकः, तस्मिन् प्राप्तव्ये सतीत्यर्थः । अथवा । परः पुरुषोत्तमस्तस्याऽयो ज्ञानम् । तथाच सम्यग्भूतं पुरुषोत्तमज्ञानं येन स सम्परायो भक्तिमार्ग इति यावत् । अथवा । परे पुरुषोत्तमे अयनमयो गमनं प्रवेश इति यावत् । तथाच सम्यक्परायो येन स तथा भक्तिमार्ग इत्यर्थः । ज्ञानमार्गेऽक्षरप्राप्त्या भक्तिमार्गे पुरुषोत्तमप्राप्त्या तस्माद्विशेषमत्र ज्ञापयितुमेवंकथनम् । अतो भक्तेः पूर्वमेव पापनाशो युक्त इति भावः । ब्रह्मभूतस्य भक्तिलाभानन्तरं 'भक्त्या मामभिजानाती'ति भगवद्वाक्यात् पुरुषोत्तमस्वरूपज्ञानस्य भक्त्येकसाध्यत्वात् तथा । एवं सति 'मुक्तानामपि सिद्धानां नारायण-

---

भाष्यप्रकाशः ।

पूर्वपक्षमाहुः तत्र श्रुतावित्यादि । तथैवेति । भक्तिदशायां पापसत्त्वमेव । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति सम्पराय इत्यादि । भक्तिदशायामेव तर्तव्याभाव इति भावः । संपरायशब्दस्य प्रसिद्धार्थग्रहणे भक्तिमार्गबोधकपदाध्याहारापत्तिरिति तमर्थं विहाय यौगिकार्थं गृहीत्वा व्याकुर्वन्ति अथवेत्यादि । अत्र द्वेधा व्याख्यानेन पुरुषोत्तमज्ञानस्य तत्प्राप्तेश्च साधनं भक्तिमार्ग एवेति ज्ञापिते सन्देहो भवति । ननु 'रूढिर्योगमपहरती'ति न्यायेन योगस्य निर्बलत्वादिदं न युक्तम्, व्यासचरणैर्वा कुत एवं प्रयुक्तमिति, तद्वारणायाहुः ज्ञानमार्गे इत्यादि । तस्मादिति । ज्ञानमार्गात् । एवंकथनमिति । यौगिकपदकथनम् । तथाचैवं व्यासाशयादध्याहारापेक्षया यौगिकादरस्य लघुत्वाच्चैवमाशयकथनं युक्तमित्यर्थः । भक्तेरिति । मर्यादामार्गीयप्रेमात्मिकाया भक्तेः । नन्विदं तदा युज्येत, यदा ज्ञानमार्गाद्भक्तिमार्गोत्कर्षः स्यात्, स एव तु कथमित्यत आहुः ब्रह्मेत्यादि । तथेति । ज्ञानमार्गाद्भक्तिमार्गस्योत्कृष्टत्वम् । ज्ञानमार्गे साक्षात्कारोत्तरं पुण्यपापनिवृत्त्या सुखप्राप्तेः, भक्तेस्तु पापनाशोत्तरमेव भवनादादित एव सुखप्राप्तेश्चेत्यपि बोध्यम् । किञ्च । ननु भवत्वेवम्, तथापि कथं भक्तिमार्गे तर्तव्याभाव इत्यत आहुः एवं सतीत्यादि ।

रश्मिः ।

मुक्तो ज्ञानमार्गीयाद्भिन्नः । तत्र श्रुतावित्यादीति । अत्रापीति । भक्तिमार्गेपि । प्रसिद्धेति । 'कृत्वा तत्साम्परायिक'मित्यादौ परलोके सम्परायशब्दः प्रसिद्धः । भक्तिमार्गेति । भक्तिमार्गे यः सम्परायः परलोकस्तस्मिन् तर्तव्याभावात् । तथा ज्ञानानन्तरमपि पापवन्तोऽन्ये भक्तिमार्गीयेभ्योऽन्ये 'मुक्तानामपि सिद्धाना'मित्याद्युक्तवाक्येभ्य इति सूत्रार्थः स्यादत्र तथेत्यर्थः । सप्तम्यन्तभक्तिमार्गपदाध्याहारः । लाघवादर्थाध्याहारे पदजन्यपदार्थोपस्थितिहान्या घटपदात्पटबोधः स्यादिति भावः । तत्प्राप्तेरिति । भाष्ये प्रवेशः प्राप्तिरिति भावः । भक्तिमार्ग एवेति । प्रथमान्तं पदम् । तथाच तृतीयसुबोधिनी । 'भक्तिमार्ग एव मार्ग' इति । सन्देह इति । उक्तसन्देहः । एवमिति । यौगिकं पदम् । ज्ञानमार्ग इत्यादीति । इदमानुमानिकाधिकरणे 'त्रयाणामेव चैव'मिति सूत्ररश्मौ 'यस्मिन्निदं विचिकित्सन्ती'ति श्रुतिव्याख्याने स्पष्टम् । युक्तमित्यर्थ इति । तथाच पूर्वमीमांसाकारिकासु श्रीमदाचार्याः 'विचारो योगरूढित' इति । वेदे तथा । वेदान्ते योगमात्रं 'सर्वे सर्वार्थवाचकाः' 'सर्वं सर्वमय'मिति चेति । अत्रेति । भक्तिमार्गे । ब्रह्मेत्यादीति । ब्रह्मभूतस्येति । तर्तव्यपापरहितस्य । भक्त्येकेति । न तु पापाभावं द्वारीकृत्य भक्त्येकसाध्यत्वात् । उत्कृष्टत्वमिति । 'अभिजानाती'ति-

परायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' 'मुक्तोपसृप्यव्यपदेशात्' 'जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' 'जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् । वैष्णवत्वं लभेत् कश्चित् सर्वपापक्षयादिहे'त्यादिवाक्यैः पापनाशानन्तरमेव भक्तिसम्भवाद्भक्तस्य तर्तव्यपापादेरभावान्न ज्ञानमार्गीयतुल्यतेत्यर्थः ।

ननु 'य एवं वेदे'ति सामान्यवचनात् पुरुषोत्तमविदोऽप्येवमेवेति चेत्, तत्राह तथा ह्यन्ये । तथा ज्ञानानन्तरमपि पापवन्तोऽन्ये भक्तिमार्गीयेभ्योऽन्य इत्यर्थः । उक्तवचनरूपोपपत्तिर्हिशब्देन ज्ञाप्यते ॥ २७ ॥

ननु भक्तिमार्गीयाणामपि गोपस्त्रीणां 'दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः । ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमङ्गला' इति वचनेन दुष्कृतसुकृतयोरपि हानिश्रवणात् पूर्वोक्तवचनैर्विरोध इत्याशङ्कायामुत्तरं पठति ।

छन्दत उभयाविरोधात् ॥ २८ ॥

छन्द इच्छा, तथाच भक्तिमार्गीयाणामपि पूर्वं पापनाशो यः, स भगव-

भाष्यप्रकाशः ।

'मुक्ताना'मिति वाक्यं तु षष्ठस्कन्धचतुर्दशाध्यायस्थम् । 'नराणां क्षीणपापाना'मिति तु पाण्डवगीतास्थम् । 'समाराध्य वृषध्वज'मिति तु वाराहपुराणीयप्रबोधिनीमाहात्म्यस्थम् । वैष्णवत्वमिति । भक्तिमार्गीयप्रेमवत्त्वम् । एतदग्रे 'एतज्ज्ञात्वा तु विद्वद्भिः पूजनीयो जनार्दनः । वेदोक्तविधिना सम्यक् भक्तिमार्गानुसारत' इति गारुडवाक्यात् । 'स्निग्धास्ते वैष्णवाश्च त' इति गारुडाच्च । तथाचैतेभ्यो वाक्येभ्यो भक्तस्योत्कृष्टत्वात् तथेत्यर्थः । सूत्रशेषमवतारयन्ति ननु य इत्यादि । नन्विदं सूत्रे कुतो लभ्यत इत्यत आहुः उक्तेत्यादि । तथाच हिशब्दाल्लभ्यत इत्यर्थः ॥ २७ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥ सूत्रमवतारयन्ति ननु भक्तीत्यादि । पूर्वोक्तवचनैरिति । पापाभावबोधकवचनैः । तथाच विरोधादनिश्चये पापसन्निपातान्न भक्तिमार्गीयस्यो-

रश्मिः ।

पदोक्तं ज्ञानं तु फलात्मकमिति भावः । उत्कर्षापकर्षौ तु साधनभूतज्ञानभक्त्योः । इति त्विति । अत्र त्रुटिः 'अमुकस्य'मित्यस्य । एतेभ्य इति । भाष्ये आदिशब्देन 'दुःसहप्रेष्ठविरहतीव्रतापधुताशुभा' इति वाक्यं तदत्रापीति ज्ञेयम् । तथेति । तर्तव्याभावो भक्तिमार्गे इत्यर्थः । ननु य इत्यादीति । इयं 'वाजसनेयिशाखाया'मित्यादिभाष्योक्ता ज्ञेया । यः पूर्वोक्तप्रकारेण ब्रह्म वेदेत्यर्थे पुरुषोत्तमो वाग्विषयः सगुणं ब्रह्मेति पुरुषोत्तमविदोप्येवमेवेत्यर्थः । अन्य इत्यर्थ इति । तथाच ब्रह्मशब्देन न पुरुषोत्तमः, तस्य पुच्छत्वात्, 'ब्रह्म पुच्छं प्रतिष्ठे'ति श्रुतेः । पुरुषोत्तमस्तु भक्तैः सह निगूढभावं करोतीति ब्रह्म वेदेत्यत्र पुरुषोत्तमग्रहणाभावान्न ब्रह्मशब्दः पुरुषोत्तमसाधारणः । तथाच ब्रह्मविदो ज्ञानानन्तरमपि पापवन्तो पुरुषोत्तमविद्भ्यो भक्तिमार्गीयेभ्योऽन्य इत्यर्थः ॥ २७ ॥

छन्दत उभयाविरोधात् ॥ २८ ॥ विरोधेति । भक्तिमार्गे पापपापाभावयोर्विरोधः

१. असम्भवादिति पाठः । २ मर्यादामार्गीयप्रमेयवत्त्वमिति पाठः । ३ वेदोक्तविधिना भद्रे आगमोक्तेन वा सुधीरिति वाक्यादिति पाठः ।

द्विच्छाविशेषतः, अतो भक्तेः पूर्वमेव पापनाशनिरूपकातन्नाशनिरूपकवचनयो-रविरोधाद्धेतोर्भक्तेः पूर्वमेव पापनाश आवश्यक इत्यर्थः। एवं सति भक्तेः पूर्वमेव तन्नाश औत्सर्गिकः। स क्वचिद्विशेषेच्छयापनोद्यत इति भावो ज्ञापितो भवति। अत्रेच्छाविशेषे वक्तव्यबहुत्वेपि किञ्चिदुच्यते। चिकीर्षितलीलामध्यपातिभक्ता न सोपधिस्नेहवत्यः, न सगुणविग्रहाः, न वा सुकृतादियुक्ता इति ज्ञापयितुं कतिपयगोपीस्तद्विपरीतधर्मयुक्ताः कृत्वा, तस्यां दशायां स्वप्राप्तौ प्रतिबन्धं कारयित्वा, स्वयमेव तां दशां नाशयित्वा, स्वलीलामध्यपातिनीः कृतवानिति। न ह्येतावता सार्वदिक एवायं भावो भवति। न हि मन्त्रप्रतिबद्धशक्तिरग्निरदाहक इति तत्स्वभावत्वमेव तस्य सार्वदिकमिति वक्तुं शक्यम्। एतच्च श्रीभागवतद-

---

भाष्यप्रकाशः।

त्कर्षसिद्धिरिति शङ्कायां विरोधनिवारणायोत्तरं पठतीत्यर्थः। सूत्रं व्याकुर्वन्ति छन्द इच्छेत्यादि। एवं सतीति। पापनाशस्य बहुवाक्यसिद्धत्वे सति। ज्ञापितो भवतीति। इच्छाया अविरोधकथनेन ज्ञापितो भवति। ननूपपादनमन्तरेणैवमिच्छा कथं ज्ञातुं शक्यत इत्यत आहुः अत्रेच्छेत्यादि। तथाच विस्तरभियात्रानुपपादनेपि सुबोधिनीतोऽवगन्तव्यमित्यर्थः। एवं चात्र तर्तव्यलिङ्गकश्रुतौ 'तमेतं वेदानुवचनेन विविदिषन्ती'ति पूर्वं श्रावणात् सामान्यतो वेदैकसमधिगम्यत्वं प्रतिपादितम्। सरस्वत्यां कृतकेतमिति। विशेषस्त्वग्रे वाच्य इति।

रश्मिः।

सहावस्थानाभावस्तस्य निवारणाय। इच्छाया इति। पञ्चम्यन्तम्। अत्रेच्छेत्यादीति। द्वितीयस्कन्धनवमाध्याये मूलेच्छा विशेषेच्छा चोक्ता, तत्रोक्तविशेषेच्छायां वक्तव्यं बहुत्वं यत्र विषयबहुत्वात्तस्मिन् सत्यपि। तद्विपरीतेति। चिकीर्षिताङ्गसङ्गलीलामध्यपातिभक्तधर्मा निर्गुणत्व-सोपाधिस्नेहवत्त्वाभाववत्त्व-सगुणविग्रहाभाववत्त्व-सुकृतदुष्कृतत्वयुक्तत्वाभाववत्त्वरूपाः। तद्विपरीतधर्माः सगुणत्वसोपाधिकस्नेहवत्त्व-सगुणविग्रहवत्त्व-सुकृतदुष्कृतत्वयुक्तत्वरूपाः। तैर्युक्ताः कृत्वा। तस्यामिति। शारीर्यां दशायाम्। गोपकृतं प्रतिबन्धं कारयित्वेति। गोपाः कुर्वन्ति तान् प्रतिबन्धं कारयित्वा। तां शारीरीम्। 'अङ्गसङ्गं करिष्यामी'ति श्रुतिविरोधोऽङ्गसङ्गाभावे मत्वा परिहरन्ति स्म नहीति। अयमिति। सगुणत्वादिभावः। तस्येति। अग्नेः। दशमेति। पञ्चाध्याय्याम्। सम्परायछन्दशब्दयोः गूढार्थं व्यङ्ग्यार्थं वाहुः एवं चात्रेति। अत्रेति। अधिकरणे। श्रावणादिति। वेदस्य वेदान्ताङ्गत्वश्रावणात् सामान्यतः वेदवेदान्तसाधारण्येन वेदत्वेन यो वेदः तदेकसमधिगम्यत्वम्। सरस्वत्यां वेदवेदान्तरूपायां कृतं केतः स्थानं प्रतिपादकत्वं येन तत्। विशेषः सकलजीवनिकायकेतत्वम्। अग्रेऽग्रिमाधिकरणे। तेनोक्तश्रीनिकेतत्वधर्मे प्रमाणं सूत्रीयछन्दःशब्दो वेदवेदान्तार्थव्यञ्जक उक्तः। पश्चात् सकलजीवनिकायकेतत्वमग्रेतनाधिकरणे निरूपयिष्यत इति ज्ञेयम्। श्रीवत्सकौस्तुभौ भगवतोऽन्यवैलक्षण्यज्ञापकौ। तेन प्रसङ्गात्पूर्वोक्तश्रीवत्सवत्त्वोपसंहारो दृढीकृतः। भक्तिमार्गे पापानुपसंहारः क्वाचित्को विशेषेच्छापनोद्य उपसंहारश्चोक्तः। किञ्च, पादारम्भे 'इह तु ब्रह्मगता एव धर्मा विचार्यन्त' इति सावधारणभाष्यादुक्तोऽत्राध्यात्मिकादित्रितयविदाश्रयभक्तो नित्यलीलास्थो भक्तत्वेन न ग्राह्यः, अपित्वाश्रयत्वेनेतिफलप्रकरणवाक्योक्त्या ज्ञायते। अन्यत्र तु 'जीवमुख्यप्राणलिङ्गा'दिति सूत्रन्यायेन परम्परया ब्रह्मधर्मा बोध्या इति।

भाष्यप्रकाशः ।

नन्वन्यैर्यत् सूत्राणि व्याख्यायन्ते, तत्र पूर्वतन्त्रोक्तन्याया उपोद्बलकत्वेनोपन्यस्यन्ते, व्यासपादैस्तेषां तत्र तत्रादरणात्, अत्र तु पुराणेतिहासवाक्यानि, तत्र किं ज्याय इति चेत् । उच्यते । इदमेव ज्यायः । इतिहासपुराणयोर्वेदोपबृंहणत्वात् । तत्रापि 'वेदान्तकृद्वेदविदेव चाह'मिति 'मां विधत्तेऽभिधत्ते मा'मिति वाक्याद्गीतैव ज्यायसी । स्वयं समाधावनुभूयोक्तत्वाच्छ्रीभागवतं च । पूर्वतन्त्रे तु जैमिनये यत् स्वयं गुरुमुखादवगत्य पाठितं तदेव आद्रियते, नेतरदिति जैमिनिमतदूषणादवगम्यते, पुराणादिकं न क्वापि दूष्यते, प्रत्युतोपोद्बलकत्वेन चाद्रियते, अतो विचारय किं ज्याय इति । किञ्च, अस्मिन् सूत्रे छन्दःशब्देन कैश्चिद्विद्याभ्यासयमनियमजनिका विदुष इच्छा व्याख्याता, अन्यैस्तु तत्सुहृदां तद्द्विषामिच्छा, इतरैस्तु व्याख्यातुरिच्छा, यथाकथञ्चिच्छ्रुतिद्वयाविरोधः सम्पाद्य इति । एवमपि विचारे ईश्वरेच्छायाः सर्वत्र कारणत्वात् तत्तद्वि-

रश्मिः ।

व्याख्यायन्त इति । द्विसूत्रमिदमधिकरणमन्येषामपि । तैः सुकृतदुष्कृतहानिकालविचारः । तद्धानं किं देहवियोगकाले देहादनुत्क्रान्तस्याध्वनि च, उत देहवियोगकाल एवेति विशये । मार्गमध्ये परित्याग इति पूर्वपक्षे । मरणात्पूर्वमेवोपास्ये साक्षात्कृते तयोः परित्याग इति व्याख्यायन्ते । उपन्यस्यन्त इति । (यथा शंकरभाष्ये पर्यङ्कविद्यात्रोक्ता, तस्यां पूर्वतन्त्रोक्तन्यायाः पूर्वतन्त्रोक्तन्यायसिद्धार्थकविद्याः तासामुपोद्बलकत्वेनोक्तिः । यथा पर्यङ्कविद्यायां कौषीतकिनोध्वनि सुकृतदुष्कृतवियोगमामनन्ति, तथा ह्यन्येपि शाखिनः ताण्डिनः शाट्यायनिनश्च । देहवियोगकाले सुकृतदुष्कृतहानमामनन्तीति) व्याख्याकारैरुपन्यस्यन्ते । भाष्येष्वदर्शनात् । तत्र तत्रेति । यथा 'आकाशस्तल्लिङ्गा'दित्यत्राकाशपदेन 'ब्रह्म वदे'दिति श्रुतिं कल्पयित्वाकाशादुत्पद्यन्त इत्याकाशादिशब्दा ब्रह्मवाचका इत्यत्र 'श्रुतिलिङ्गवाक्यप्रकरणे'ति पूर्वतन्त्रसूत्रात् । अहमिति । गीतावक्ता । इदं गीतावाक्यम् । वेदवित्कर्तृकत्वाद्गीता ज्यायसी । 'मा'मित्यादिश्रीभागवतं गीताव्याख्यानत्वेन । व्याख्याता गीता ज्यायसी । स्वयमिति । व्यासेन भगवता चेति ज्यायः । जैमिनीति । इदं गुणत्रयविवरणाध्याये स्पष्टम् । कैश्चिदिति । शङ्कराचार्यैः । तथाच भाष्यं 'छन्दत' इति सूत्रस्य । 'यदि च देहादपसृप्तस्य देवयानेन पथा प्रस्थितस्यार्धपथे सुकृतदुष्कृतक्षययोरभ्युपगम्येत, ततः पतिते देहे यमनियमविद्याभ्यासात्मकस्य सुकृतदुष्कृतक्षयहेतोः पुरुषप्रयत्नस्येच्छातोऽनुष्ठानानुपपत्तेरिति । यमादिकं विदुष इति तथा । पुरुषप्रयत्न इच्छानिमित्तक इत्युभयोर्निमित्तनैमित्तिकयोरिच्छा सुकृतदुष्कृतक्षययोरित्युभयाविरोधात् ।' अन्यैरिति । भास्कराचार्यैः । तथाच भाष्यं 'छन्दतः संकल्पतो यो हि विदुषः शुभं संकल्पयति, तस्य सुकृतापत्तिः । यस्तु द्वेषादहितमिच्छति, तस्य दुष्कृतापत्तिरिति । उभयोः कौषीतकिशाट्यायनिश्रुत्योरविरोधात् । 'तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृत'मिति कौषीतकिश्रुतिः । 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या'मिति शाट्यायनिश्रुतिः । 'प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् । विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातन'मिति स्मृतिः । इतरैरिति । रामानुजैः । तथाच तद्भाष्यं 'एवमस्वाभाव्यात्सुकृतदुष्कृतहानिकालेऽवधृते सत्युभयाविरोधेन श्रुतेरर्थस्वभावस्य चाविरोधेन, छन्दतो यथेष्टं पदानामन्वयो वर्णनीय इति । कौषीतकिवाक्ये 'तत्सुकृतदुष्कृते विधूनुत' इति चरमश्रुतो वाक्यावयव एव 'एतं देवयानं पन्थानमापद्ये'ति प्रथमश्रुतावयवात्प्रागनुगमयितव्य इत्यर्थ इति । श्रुत्यर्थस्वभावाविरोधेन छन्दत इत्युक्त्या व्याख्यातुरिच्छा ।' तदाहुः यथाकथञ्चिदिति । एवमपीति । भगवदिच्छाविशेषत इति भाष्यैकवाक्यतायामपि दुष्कृतांशेऽसंदिग्धश्रुत्येकदेशे

१ सिद्धान्तर्गतं ग्रन्थकृद्भिः स्वयं लोपितमिति प्रतिभाति ।

ग्रामस्कन्धविवृतौ प्रपञ्चितमस्माभिः ॥ २८ ॥

इति तृतीयाध्याये तृतीयपादे षष्ठं सम्परायाधिकरणम् ॥ ६ ॥

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥ (३-३-७.)

ननु 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योम'न्निति 'तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाये'त्यादिश्रुतिभिरुक्तरू-

भाष्यप्रकाशः ।

द्यावतस्तदा तदा तथा तथेति यथाश्रुताङ्गीकारेपि मुक्तिप्रतिबन्धाभावाच्छ्रुतिसङ्कोचाभावाच्च किं ज्याय इत्यपि विचारय । न हि क्रमेण मुक्तिं प्राप्नुवतो देहवियोगकाले वा किञ्चित्क्षणोत्तरं विरजानदीतरणे वा सुकृतादिक्षये पर्यङ्कोपासकस्य कश्चिद्विशेषो भवति । अतः काकदन्तविचारप्रायमेतत् ॥ २८ ॥ इति षष्ठं सम्परायाधिकरणम् ॥ ६ ॥

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥ पूर्वाधिकरणे ज्ञानापेक्षया भक्तेर्ज्ञान्यपेक्षया भक्तस्य चोत्कर्षः प्रतिपादितः । तदेव तद्धेतुबोधनेन दृढीकरोतीत्याशयेनाधिकरणमवतारयन्ति नन्वित्यादि । अत्र 'तमेवं विद्वा'निति वाक्यमुत्तरनारायणस्थम् । तत्र 'वेदाहमेतं

रश्मिः ।

श्रुतेरक्षरमात्रान्यथाऽवक्रीत्वेन सुकृतदुष्कृतहानावान्तरविचारस्येच्छया स्पष्टत्वाद्विचारानपेक्षे सति । **तत्तद्विद्येति** । कौषीतकिनां पर्यङ्कविद्योपकोशलविद्या–पञ्चाग्निविद्या–दहरविद्या–मधुविद्या–शाण्डिल्यविद्या–षोडशकलविद्या–वैश्वानरविद्यासु सा सा विद्या तत्तद्गतः । **तदा तदा** तत्तद्विद्याकाले । **तथा तथेति** । तत्तद्विद्याप्रकारेणेच्छेति । यथाश्रुतं देहत्यागकालेऽध्वनि वा सुकृतदुष्कृतक्षयं श्रुत्युक्तमनतिक्रम्य यथाश्रुतम् । अव्ययीभावः । तस्याङ्गीकारे । **मुक्तीति** । पर्यङ्कविद्यायामामनन्ति । 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छती'त्युपक्रम्य 'स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधुनुते' इति तदुक्तमुक्तेः श्रुत्युक्तत्वेन प्रतिबन्धकाभावात् । यथादृष्टमिति विरोधाभावश्रुत्योः । श्रुत्योः संकोचाभावो यथादृष्टत्वादित्वादेव, तथैव विषयवाक्यत्वविरोधासंदिग्धत्वाङ्गीकारादेव च । **किं ज्याय** इति । अयमर्थः । सम्परायसूत्रादारभ्य ज्ञानमार्गीयत्वेन व्याख्यातोपि गीतादिवाक्यैरुपबृंह्य भक्तिमार्गो व्याख्यातः । स च ज्ञानकाण्डः कर्मकाण्ड इति समाख्यातो विरुद्धश्च । मैवम् । गतिप्रतिबन्धस्य श्रौतत्वेनैवाभावादसन्दिग्धत्वेन विषयत्वायोगाच्च । न्यूनताख्यनिग्रहस्थानस्यापत्तेश्चाभावः । ननूक्तं समाख्याद्वयाद्भक्तिमार्गोऽप्रामाणिक इति । नैष दोषः । उक्तदुर्लभाधिकारात्काण्डद्वयसमाख्या, अन्यथा 'भगवान्ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यथो भवे'दिति वाक्यं न स्यात् । तथाच प्रत्यक्षश्रुतिः 'अग्नये जुष्टं निर्वपामी'ति संहितायाम् । निरुक्ते च दुर्गाचार्याः 'सरस्वतीमाविवासेम धीतिभि'रिति । सरस्वती भगवल्लक्षणा । विवासतिः परिचरणकर्मा । धीतिभिरङ्गुलिभिः, उपलक्षणं विविधोपचारैरिति । तामसत्व च 'यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पं च तत्तामसमुदाहृत'मिति वाक्यात् । नच स्मार्ते पर्यवसानाद्विषयवाक्यमपि स्मार्तकं स्यादिति वाच्यम् । पूर्वतन्त्रे स्मृतिविषयवाक्यत्ववददोषात् । 'स्मृतेश्चे'ति 'स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गा'दिति सूत्राभ्यां व्यासपादैस्तत्रतत्र स्मृतीनामुपष्टम्भकत्वोक्तेः । एतदिति । गतिप्रतिबन्धकसुकृतदुष्कृतविचारसूत्रेण कथनम् ॥२८॥ **इति षष्ठं सम्परायाधिकरणम् ॥ ६ ॥**

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥ **तदेवेति** । प्रतिपादनमेव उक्तमेव वा । तद्धेतुः पुरुषोत्तमः यज्ज्ञानेनैव मोक्षः तद्बोधनेनेत्यर्थः । **उत्तरेति** । टीकायां द्रष्टव्यम् ।

पब्रह्मज्ञाने सत्येव मोक्ष इत्युच्यते। 'यमेवैष वृणुते तेन लभ्य' इति श्रुत्या आत्मीयत्वेनाङ्गीकारात्मकवरणस्य भक्तिमार्गीयत्वात् तस्मिन् सति भक्तिमार्गे प्रवेशाद्भक्त्यैव स इत्युच्यते। किञ्च। 'भक्त्या मामभिजानाती'त्युक्त्वा, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मिति भगवतोक्तमिति भक्तिमार्गेपि पुरुषोत्तमज्ञानेनैव मोक्ष उच्यते, ज्ञानमार्गे त्वक्षरज्ञानेनेति विशेषः। 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति वचनेन भक्तिमार्गीयस्य ज्ञाननैरपेक्ष्यमप्युच्यते। तथाचैवं मिथः श्रुत्योः स्मृत्योश्च विरो-

भाष्यप्रकाशः।

पुरुषं महान्तमादित्यवर्णं तमसः परस्ता'दिति पूर्वार्धे एतं जगत्कर्तृतया पूर्वमत्र उक्तं महान्तं पुरुषं अहं वेदेति श्रुतिः स्वस्य ज्ञातृत्वमुक्त्वा, तत्स्वरूपमाह, तमसः अज्ञानात्मकस्य परस्तात् परम्, आदित्यवर्णम्, आदित्यस्येव मण्डलान्तःश्यामावदातो वर्णो यस्य, 'श्यामाच्छबलं प्रपद्ये शबलाच्छ्याम'मिति छान्दोग्ये श्रुतत्वात्तादृशम्। तथाचैतादृशश्रुतिभिः सत्यादिलक्षणकोक्तरूपब्रह्मज्ञानेन मोक्ष उच्यते, 'यमेवे'ति श्रुतौ तूक्तप्रकारेण भक्त्यैव स आत्मलाभात्मको मोक्ष उच्यत इति मोक्षार्थं ज्ञानभक्ती समुच्चेतव्ये, किं वा विकल्पयितव्ये इत्येकः संशयः। किञ्च, 'भक्त्या मा'मिति गीतायां पुरुषोत्तमज्ञानस्य, 'ब्रह्मविदाप्नोति पर'मिति श्रुतावक्षरज्ञानस्य च मोक्षहेतुत्वमुच्यते इति भक्तेन तदर्थं ते समुच्चेये, विकल्पनीये वेत्यपरः। नच विकल्पस्याष्टदोषदुष्टत्वात् समुच्चय एव युक्त इति वाच्यम्। 'तस्मान्मद्भक्ती'त्येकादशस्कन्धीयभगवद्वाक्ये भक्तं प्रति ज्ञानस्यानुपयोगबोधनेन तत्समुच्चयस्य वैयर्थ्यात्। तथाचैवं प्रथमे कल्पे श्रुत्योर्द्वितीये च स्मृत्योर्विरोधात् समुच्चय-

रश्मिः।

श्यामावेति। अवदातो भास्वरशुक्लरूपः। शबलं मिलितम्। भास्वरशुक्लेनेति ज्ञेयम्। **शबला**दिति। भास्वरशबलश्यामात् श्यामं कदाचिज्ज्ञानिप्रत्यक्षविषयम्। 'सत्यं ज्ञानमनन्त'मित्यत्र व्यापारं विनैव हेतुतया निर्व्यापारया निर्वाहमाश्रित्य द्वितीयकोटित्वसमर्थनाद्द्वितीयकोट्या सशयमाहुः **सत्यादी**ति। **यमेवे**ति। मुण्डकश्रुतौ। **भक्त्यैवे**ति। 'वृङ् संभक्ता'विति धातुपाठाद्वरणात्मकस्य भक्तिसाधनकरणव्युत्पत्तिलभ्यस्य। एतद्रूपाद्भक्तिमार्गीयत्वात्। तस्मिन्साधने सति। चरणपदार्थनिविष्टफलरूपभक्तिमार्गे प्रवेशात् फलरूपभक्त्यैवेत्यर्थः। 'भक्त्या जानाति चाव्यय' मितिश्रुतेरेवकारः। **ज्ञानभक्ती** इति। ज्ञानं ज्ञानमर्यादाभक्तिभेदेन द्विविधम्। भक्तिः पुष्टिभक्तिः। एवं साधनभूतज्ञानभक्ती उक्त्वा फलात्मकज्ञानमसिद्धवदावृतं परपदार्थनिविष्टं ब्रह्मज्ञान तदुभयविषयकसंशयमुखेन **किञ्चे**त्यादिभाष्यं विवृण्वन्ति स्म **किञ्चे**त्यादि। **ब्रह्मवि**दिति। 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसा'मिति तदर्थकस्मृतिः पाठ्या। भाष्ये **स्मृत्यो**रित्युक्तेः। प्रथमकोटावक्षरज्ञानमसिद्धवादावृत्तं गृहीतमत्रापि तथा। 'ते प्राप्नुवन्ति मामेवे'ति वाक्यात्। अत एव 'क्लेशोऽधिकतर' इति स्मृतावक्षरमात्रविषयिण्यामक्षरज्ञानस्य च मोक्षहेतुत्वमुच्यत इति न कोपि दोषः। 'क्लेशोऽधिकतर' इति स्मृत्युपन्यास इति बोध्यम्। **तदर्थ**मिति। मोक्षाय। **समुच्चेये** इति। 'भक्तिर्ज्ञानाय कल्पत' इति ज्ञानाभेदात्समुच्चेये। भेदे तु विकल्पनीये। स्नेहस्य ज्ञानाद्भेदात्। 'तस्मान्मद्भक्ती'त्यादिभाष्य विवरीतुमाहुः **नचे**त्यादि। **अष्टे**ति। एते पूर्वं व्याख्याताः। तथाचैवमिति भाष्य विवृण्वन्ति स्म **तथाचैव**मिति। **स्मृत्यो**रिति। 'ब्रह्मविदाप्नोति पर'मित्यस्य स्मृतित्वं 'वेदान्तकृद्वेदविदेव चाह'मित्यत्र गीतायां वेदवित् वेदान्तकृदिति

धान्नैकतरनिर्धारः सम्भवति । नच ज्ञानेनैव मोक्षः, उभयत्रापि तथोक्तेः, ज्ञाननैरपेक्ष्योक्तिस्तु भक्तिस्तुत्यभिप्रायेति वाच्यम् । विषयभेदेन ज्ञानभेदान्मुक्तिसाधनं कतमज्ज्ञानमित्यनिश्चयात् । नच श्रौतत्वाविशेषात् समुच्चय इति वाच्यम् । ज्ञानिनोऽक्षरे भक्तस्य पुरुषोत्तमे लयात् समुच्चयासम्भवात् । तर्ह्येवं विरोधाभावादुपपन्नं सर्वमिति चेत् । न । पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञान-

भाष्यप्रकाशः ।

विकल्पयोरेकतरानिर्धाराद्वाक्यानामबोधकत्वं प्रसज्यते । नच ज्ञानेनैव मोक्षः, 'तमेव'मिति श्रुतौ 'भक्त्या मा'मिति स्मृतौ च तस्यैव मोक्षहेतुत्वेनोक्तेः, भक्तस्य ज्ञाननैरपेक्ष्योक्तिस्तु तत्त्वतो ज्ञानं भक्त्येति साधनान्तरसाधितं ज्ञानमतात्त्विकत्वान्न श्रेयः, अतो भक्तिरेव ज्ञानार्थं कार्येति तत्स्तुत्यभिप्रायेति न भक्तेः समुच्चयशङ्केति वाच्यम् । एवं भक्तित्यागेपि श्रुतौ 'ब्रह्मवि'दित्यत्र अक्षरस्य 'तमेव'मित्यत्र पुरुषोत्तमस्य च विषयत्वेनोक्ततया विषयभेदेन ज्ञानभेदान्मोक्षसाधकज्ञानविकल्पस्य दुर्वारत्वात् । नच श्रौतत्वाविशेषाज्ज्ञानयोरेव समुच्चयोऽस्त्विति वाच्यम् । 'अक्षरात् परतः परः' इति श्रुतेः 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम'ेति गीतावाक्याच्चाक्षरपुरुषोत्तमयोर्भेदादव्यक्तवाक्येऽक्षरस्य परमगतित्वकथनेन ज्ञानिनोऽक्षरे लयात्, 'भक्त्या मा'मिति वाक्ये स्वस्य विशतिकर्मत्वबोधनेन भक्तस्य पुरुषोत्तमे लयात् तत्स्थानभेदेन फलभेदे तयोरपि समुच्चयस्यासम्भवात् । ननु यद्येवं फलभेदः, तर्हि तस्य तस्य साधनस्य तत्र तत्र व्यवस्थित्या वाक्यानामितरेतरविरोधाभावात् सन्देहे निवृत्ते सर्वं श्रुत्युक्तं स्मृत्युक्तं चोपपन्नमिति व्यर्थमेवाधिकरणमिति चेत् । न । पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतः 'अन्ते या मतिः

रश्मिः ।

वेदार्थस्मरणप्राप्तेः । वस्तुतस्तु **श्रुतिस्मृत्यो**रिति पाठः । 'स्मृतेश्चे'तिसूत्रभाष्ये वेदान्तानां वेदत्वोक्तेः । 'ब्रह्मवि'दितिश्रुतिस्थले 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसा'मिति स्मृतिः पठनीया । भाष्ये 'स्मृत्यो'रित्युक्तेन ज्ञानेनेति भाष्यं विवृण्वन्ति स्म **नच ज्ञानेनेति** । **उभयत्रापी**तिभाष्यविवरणं **तमेवमिती**ति । **तस्यै**वेति । ज्ञानस्यैव । 'भक्तिर्ज्ञानाय कल्पत'इत्यङ्गीकारात् । गीतायां 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'त्युक्त्वा 'एतज्ज्ञानमिति प्रोक्त'मिति गीताया एवकारः । **ज्ञाननैरपेक्ष्ये**ति भाष्यं विवृण्वन्ति स्म **भक्तस्ये**ति । **तत्त्वत** इति । फलत्वेन ज्ञानम् । **साधनान्तरे**ति । साधनं भक्तिः तदन्यत्साधनं साधनान्तरं तेन साधितमित्यर्थः । **अतात्त्विकत्वा**दिति । अतत्त्वसम्बन्धित्वात् । अफलरूपत्वादिति यावत् । **ज्ञानार्थ**मिति । फलात्मकज्ञानार्थम् । **तत्स्तुती**ति । भक्तिस्तुत्यभिप्राया । **विषये**तिभाष्य विवृण्वन्ति स्म **एवं भक्तित्याग** इति । नचेति भाष्यं विवृण्वन्ति स्म **नचे**ति । **ज्ञानिन** इति भाष्यं हेतुं दत्वा विवृण्वन्ति स्म **अक्षरा**दिति । **तदि**ति । लयस्थानभेदेन । फले अक्षरपुरुषोत्तमौ तयोस्तज्ज्ञानयोः । **तर्ह्येव**मिति भाष्यं विवृण्वन्ति स्म **नन्वि**ति । **वाक्याना**मिति । अक्षरतत्प्राप्तिसाधनपुरुषोत्तमतत्प्राप्तिसाधनप्रतिपादकवाक्यानाम् । अक्षरमात्रप्राप्त्यसाधकत्वात्तथा । **उपपन्न**मिति । तत्तत्परत्वेनोपपन्नम् । तत्रापि 'भक्तिमार्ग एव मार्ग' इति सुबोधिन्या पुष्टिमर्यादाभक्तिसम्बन्धिनां वाक्यानाम् । **उपपन्न**मिति । पूर्ववत् । **अधिकरण**मिति । पुष्टिमर्यादाभेदेन वाक्यानामुपपत्तिकरम् । न पूर्वमिति भाष्यं विवृण्वन्ति स्म **न पूर्व**मिति ।

१. (न पूर्वमिति भाष्यं विवृण्वन्ति स्म **नपूर्व**मिति । **भक्ती**ति । भक्तिमार्गीयशाब्दज्ञानवत । ज्ञानमार्गीयज्ञानं तु शाब्दापरोक्षरूपं श्रवणादिभिः शुद्धान्तःकरणस्य सूक्ष्मपदार्थविषयकं 'यथा यथात्मेति' वाक्यादिति स्पष्टम्) इति चिह्नान्तर्गतमधिकम् ।

वतो लयस्थाननिर्धारासम्भवात् । अपरं च । 'ततो मां तत्त्वतो ज्ञात्वे'ति वचनाद्भक्तिमार्गे तत्त्वतो भगवज्ज्ञानमेव प्रवेशसाधनमिति मन्तव्यम् । तथाच 'मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रश' इति वाक्याज्ज्ञानमार्गीयभक्तिमार्गीयज्ञानरहितानामपि भगवत्प्राप्तेस्त-

भाष्यप्रकाशः ।

सा गति'रित्यङ्गीकारे पूर्वज्ञानवैयर्थ्यप्रसक्तेर्दुर्वारतया तस्य न्यायस्याशक्यवचनत्वेन तादृशस्य लयस्थाननिर्धारासम्भवात् सन्देहेऽधिकरणप्रणयनस्यावश्यकत्वात् । अपरं च । यदि भक्तेरिवाक्षरज्ञानादपि परज्ञानमेव कयाचिद्विधया आदृत्याधिकरणावश्यकत्वमुच्यते, तदा तु 'ततो मा'मित्याद्युक्तरीत्या भगवज्ज्ञानस्यैव प्रवेशसाधनत्वमधिकरणे मन्तव्यम् । तथाच 'तमेवे'ति श्रुतेः सावधारणत्ववत्, 'मत्कामा' इति स्मृतौ 'सङ्गाच्छतसहस्रश' इति कथनेन तदुपबृंहिताया वरणश्रुतेरपि सावधारणतुल्यत्वेन मार्गद्वयसिद्धज्ञानरहितानामपि भगवत्प्राप्तेर्ज्ञानसाधनत्वनिरूपकश्रुतिविरोध इति

रश्मिः ।

ज्ञानमार्गभक्तिमार्गौ विविच्य साधने वक्तव्येऽग्रे मिलितयोर्विचारः क्रियते । ज्ञानं सर्वभावः सर्वत्वं सर्वस्मिन्नात्मनो भावः स्मरणम् । स्वयमेवानुभूतनिजसुखानुभवश्च । सर्वश्चासावात्मनो भावश्चेति विग्रहवान् सर्वात्मभावोभिन्नः । मनोमात्रजन्यत्वसर्वेन्द्रियभवनत्वाभ्यामपि ज्ञानमार्गीयज्ञानसर्वात्मभावयोर्भेदः । मार्गभेदाच्च भेदः । सर्वात्मभावस्वरूपं **भक्तिमार्तण्डे** स्पष्टम् । सर्वभावः सर्वभूतेषु मन्मतिः । स्वयप्रकाशः । सर्वभूतस्थाक्षरत्वेन स्वयंप्रकाशत्वं तत्प्रकाश्यत्वेप्यक्षुण्णमक्षरे । भक्तिकारणं श्रीभागवत उक्तम् । ज्ञानं भगवद्धर्मः । सर्वभावसामानाधिकरण्यान्मार्गत्वम् । तदीयभावमेलनात् । ज्ञानमार्गीयज्ञानं सर्वभूतेषु मन्मतिरूपम् । 'यथा यथात्मा परिमृज्यते' इति ज्ञानं ज्ञानाङ्गभक्तिजन्यं पृथक् । 'सर्वं खल्विदं ब्रह्मे'ति श्रुत्युक्तं कार्यकारणवस्त्वैक्यमर्षणजन्यं ज्ञानं एतदन्तर्गतं हृदयस्थाक्षरत्वेन ज्ञानम् । साधनेन सदानन्दतिरोभावपूर्वकं ज्ञानप्राधान्यात् । स्वरूपात्मकज्ञानं चतुर्विधं नित्यम्, षड्विधं जन्यम्, एवं दशविधम्, तत्रेदं ज्ञानं क्वचिन्नित्ये जीवधर्मे ज्ञाने निविशते । तज्ज्ञानवतो भक्तस्य पश्चात् उक्तसाधनात्पश्चात् भक्तिमार्गीयं ज्ञानं साध्यम् । भक्तिरनन्तानन्दधर्मः । तपो वैराग्ययोगे मार्गः । भक्तिमार्गीयं ज्ञान फलात्मकं ज्ञान तद्वतः । **पूर्वज्ञाने**ति । अक्षरप्राप्तिसाधकस्य पूर्वज्ञानस्य यत्रोक्तसाध्यसाधनभावः तत्र वैयर्थ्यं तस्य प्रसक्तेर्दुर्वारत्वमेवेत्यर्थः । **तस्ये**ति । 'अन्ते या मति'रित्युक्तस्य मर्यादाभक्तस्याक्षरात्मकचरणयोर्लयः, पुष्टभक्तस्य पुरुषोत्तमे लय इत्यर्थविघटकस्य । **तादृशस्ये**ति । भक्तस्य । भक्तसवलितो भगवांल्लयस्थानं चरणौ वा लयस्थानमिति निर्धारासंभवात् पुष्टभक्तो मार्यादिकभक्तो वेति सन्देहे सति । **सन्देह** इति । उक्तोभयविधसन्देहे उभयथेति सिद्धान्तान्निवृत्त इत्यर्थः । यद्वा । ज्ञानभक्ती समुच्चेतव्ये विकल्पयितव्ये वेति सन्देहः । **अधिकरणे**ति । पुष्टमर्यादाभक्तोपासनार्थं पुष्टिमर्यादयोः पुष्टौ साधनोपसंहारो न वेति सदेहे नेति तात्पर्यकाधिकरणप्रणयनस्य तथात्वात् । क्वचिन्नोभयमुक्तिसाधनमिति प्रतिपादकं भाष्यमपरं चेति तद्विवृण्वन्ति स्म **अपरं चे**ति । **अक्षरज्ञाना**दिति । पादरूपाक्षरज्ञानं भगवज्ज्ञानं अवयवज्ञानस्यावयविज्ञाननिविष्टत्वात् । **कये**ति । पादत्वविधया । 'भक्त्या मामभी'त्यत्र ज्ञाने पादरूपाक्षरस्य सत्त्वात् । **अपी**ति । पादसेवनमात्रभक्तेर्विवक्षितमोक्षसाधकत्वाभावात् भगवत्पादसेवनस्य शमलधूननसाधनत्वात् तन्निवारणायाधिकरणस्यावश्यकत्वमुच्यत इत्यर्थः । **उक्तरीत्ये**ति । भाष्योक्तरीत्या । **एवे**ति । पादत्वेन ज्ञानव्यवच्छेदकैवकारः न अवयवित्वेन तु ज्ञानमस्त्येव । **सावधारणतुल्यत्वेने**ति । 'बहूनामनुग्रहो न्याय्य' इति न्याय-

त्साधनत्वनिरूपकश्रुतिविरोधः । तथाच क्वचिज्ज्ञानं मुक्तिसाधनत्वेनोच्यते, क्वचिद्भक्तिः, क्वचिन्नोभयमपीत्येकतरसाधनानिश्चयान्मुक्तिसाधने मुमुक्षोः प्रवृत्त्यसम्भव इति प्राप्ते, आह गतेरर्थवत्त्वमित्यादि । गतेर्ज्ञानस्य अर्थवत्त्वं फलजनकत्वम्, उभयथा मर्यादापुष्टिभेदेनेत्यर्थः ।

अत्रायमाशयः । 'एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषती'त्यादिश्रुतिभ्यो भगवान् सृष्टिपूर्वकाल एवैतस्मै जीवायैतत्कर्म कारयित्वैतत्फलं दास्य इति विचारितवानिति तथैव भवति । तत्रोक्तरीत्या मुक्तिसाधनाननुगमे हेतुरवश्यं वाच्यः । एवं सति कृतिसाध्यं साधनं ज्ञानभक्तिरूपं

भाष्यप्रकाशः ।

तत्कृतसंशयादप्यधिकरणमावश्यकम् । अतः पूर्वोक्तौ विषयौ संशयौ च निर्बाधौ । तथा सति, तथाच क्वचिदित्याद्युक्तरीत्या मुमुक्षुप्रवृत्त्यसम्भवान्मोक्षेच्छां परित्यज्य स्वर्गसाधन एव प्रयतनीयम्, किञ्च, एवं मुमुक्षुप्रवृत्त्यसम्भवे प्राप्ते पूर्वोक्तं ज्ञानभक्त्योस्तारतम्यं भक्त्युत्कर्षो दोषस्य कादाचित्कत्वं च न निर्धारयितुं शक्यमिति च पूर्वपक्षे प्राप्ते श्रुतेर्बोधकताप्रकारं वदन् सिद्धान्तेन पूर्वोक्तं द्रढयितुं ज्ञानोत्कर्षबोधनतात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति गतेरित्यादि । नन्विदं कथं बुद्धावारोहतीत्याकाङ्क्षायां व्युत्पादयन्ति अत्रायमित्यादि । कार्यमात्रं प्रतीश्वरेच्छायाः कारणत्वेन तस्याश्च नित्यत्वेन 'एष उ एवे'त्यादिश्रुत्युक्तापीच्छा तथेति भगवान् सृष्टिपूर्वकाल एव यद्यद्यथा विचारितवांस्तत्तथैवेति, तत्र भगवद्विचारशरीरप्रविष्टोन्नयनकारणविमर्शे पूर्वोदाहृतवाक्योक्तरीत्या ज्ञान-भक्ति-वरण-भगवद्विषयककाम-रमण-जारादिबुद्धीनां शास्त्रे कथनेन मुक्तिसाधनाननुगमे सति शास्त्रद्वारा मुमुक्षुप्रवृत्तिसिद्धये तत्साधनानुगमे हेतुरवश्यं वक्तव्यः । एवं तद्वदनावश्यकत्वे सति उक्तमार्गभेद एव हेतुः । तत्र कृतिसाध्यमित्याद्युक्तरूपा मर्यादा, सर्वसाधारणहेतुना साध्यसिद्धौ मर्यादापदप्रयोगस्य लोके दर्शनात्, यथैतावति कृत एतावद्दीयत इति राज्यमर्यादेति,

रश्मिः ।

पेक्षया तथा । 'शतशोऽथ सहस्रश' इति बहूनामनुग्रहः । तत्कृतेति । ज्ञानरहितानां भगवत्प्राप्तिः ज्ञानसहितानां वेति विरोधकृतसंशयात् । प्राप्तस्वर्गसाधने यतनीयमिति पूर्वपक्षवारकमधिकरणमावश्यकमित्यर्थः । निर्बाधाविति । बाधाः पूर्वोक्ताशङ्काः । पूर्वपक्षार्थं तथाचेति भाष्यार्थमाहुः तथासतीति । उक्तरीत्येति । भाष्योक्तरीत्या । श्रुतेरिति । ज्ञानसाधनत्वबोधकश्रुतेः । नित्यत्वेनेति । 'अविनाशी वा अर' इति श्रुतेः । इच्छेति । अवान्तरेच्छा । तथेति । नित्यत्वेन नित्या । तत्रेति भाष्यं विवृण्वन्ति स्म तत्र भगवदिति । ज्ञानेति । ज्ञान च भक्तिश्च वरणं च भगवद्विषयककामश्च रमणं च जारब्रह्मबुद्धिश्च ताः तासाम् । शास्त्र इति । ज्ञानभक्तिवरणानि वेदान्तशास्त्रेऽन्यच्छ्रीभागवतशास्त्रे । 'इतिहासः पुराणं च वेदानां पञ्चमो वेद' इति छान्दोग्यश्रुतेः । वेदोपाङ्गत्वेन वेदशास्त्रनिवेशाच्च । उपाङ्गानि चरणव्यूहे प्रसिद्धानि । पूर्वपक्षग्रन्थोक्तरीत्याननुगमः । तदिति । तस्या मुक्तेः साधनानि शास्त्रोक्तान्युक्तानि तेषां मुक्त्यनुगमे मुक्त्यर्थं पार्थक्येन प्रापणे हेतुर्मार्गभेदः । एवं सतीतिभाष्यं विवृण्वन्ति स्म एवमिति । तद्वदन हेतुवदन तस्यावश्यकत्वे सति । उक्तानां मार्गाणां भेदः । कृतीति । मर्यादेत्यन्ता । सर्वेति । राजप्रजासाधारणेन हेतुना । साध्येति । साध्य राज्यं तस्य सिद्धिर्मर्यादया भवतीति स्वकार्ये कार्यकारणभावसम्बन्धरूपलक्षणया मर्यादापदप्रयोगस्य । राज्यमर्या-

१. सत्साधनानुगमे इति श्रीहस्ताक्षरेषु पाठ. ।

शास्त्रेण बोध्यते । ताभ्यां विहिताभ्यां मुक्तिर्मर्यादा । तद्रहितानामपि स्वस्वरूपबलेन स्वप्रापणं पुष्टिरित्युच्यते । तथा च यं जीवं यस्मिन्मार्गेऽङ्गीकृतवान्, तं जीवं तत्र प्रवर्तयित्वा तत्फलं ददातीति सर्वं सुस्थम् । अत एव पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरपेक्ष्यम्, मर्यादायामङ्गीकृतस्य तदपेक्षित्वं च युक्तमेवेति भावः ।

भाष्यप्रकाशः ।

शास्त्रेऽपि 'स्वकृतसेतुपरीप्सये'ति सेतुर्मर्यादा । तद्रहितानामित्याद्युक्ता तु पुष्टिः अनुग्रह इति यावत् । 'पोषणं तदनुग्रह' इति द्वितीयस्कन्धात् । अनुग्रहश्च धर्मान्तरमेव, न तु फलदित्सा । 'यस्यानुग्रहमिच्छामी'ति वाक्यात् । कृपानुकम्पादिशब्दानां स एव वाच्यः । एवं सति 'लोकवत्तु लीला कैवल्य'मितिन्यायेन तथाच यं जीवमित्याद्युक्तरीत्या ददातीत्युदितानुदितहोमिवदधिकारिभेदाद्व्यवस्थितमिति सर्वं पूर्वोक्तं सुस्थम् । केवलमर्यादायां वृतस्य जीवस्याक्षरे पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतः क्रमेण मर्यादायां पुष्टौ चाङ्गीकारात्तस्य पूर्वमक्षरे ततः पुरुषोत्तमे लयस्य 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इतिवत् सुखेन सम्भवाच्छ्रुतिद्वयोक्तमुपपन्नमित्यर्थः । एतेनैव स्मृत्योरपि विरोधः परिहृत इति बोधयन्ति अत एवेत्यादि । अत एवेति । मार्गभेदादेव । सूत्रशेषमवतार्य व्याकुर्वन्ति अत्रेत्यादि । तथेति । मुक्तिसाधने

रश्मिः ।

देति । राज्ये मर्यादा राज्यनिमित्तं तत्सिद्धिफलिका मर्यादा। **परीप्सा** इच्छा तया। एतेनोभयथापदविवरणभाष्यान्तर्गतमर्यादेत्यस्य विहितज्ञानभक्ती इत्याशयो विवृतः। अविहितज्ञानभक्ती तु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इति मैत्रेयब्राह्मणश्रुतौ । श्रवणस्य स्मरणकीर्तनभक्तिनिवर्त्यत्वेन तन्मात्राक्षेपेऽन्यासां प्रेमवशात्स्वयमेव भवनादविहितत्वम् । 'श्रवणकीर्तनस्मरणैः प्रेमे'ति सुबोधिन्यामेकादशस्कन्धस्य सुबोधिन्याम् । 'श्रोतव्य'इत्यत्र तव्यस्त्वावश्यकेपि प्रोक्त इत्यवैधत्वम् । तथाच श्रवणादिसरणिर्मर्यादाभक्तिः । सा च मत्कृत**भक्तिरत्नदीकयोः** प्रपञ्चिता, ततो द्रष्टव्या । तद्रहितानामितिभाष्यं विवृण्वन्ति स्म **तद्रहिताना**मिति। **इतिवाक्या**दिति । नचानुग्रहाभिन्न फल दातुमिच्छां करोमीत्यर्थ इति वाच्यम् । सनर्थेच्छानन्वयात्। **कृपे**ति । आदिना दया । **सः** अनुग्रहः । एवकारः फलदित्साव्यवच्छेदकः । **तथाचे**ति भाष्य विवृण्वन्ति **स्म एवं सती**ति। **उक्तरीत्ये**ति। भाष्योक्तरीत्या । उदितानुदितकालिकौ होमौ ययोस्तः तौ उदितानुदितहोमिनौ तयोरिवेति षष्ठचन्ताद्वतिः । अधिकारिणौ तयोर्भेदादित्यर्थः । अपर चेति भाष्योक्तमत्र नोक्तमिति न्यूनं पूरयन्ति **स्म केवले**ति। न्यूनताया निग्रहस्थान वे तूपलक्षणविधयाहुः **केवले**ति। मर्यादाशब्देन भगवद्धर्मरूपं ज्ञानं केवलशब्देन विद्याङ्गतपआदियोगो व्यावर्त्यते। केवलज्ञानेन तु ज्ञानमार्ग इत्यर्थः, केवलानां ज्ञानभक्तिकर्मणां भगवद्धर्मत्वम्, वैराग्यादिविद्याङ्गसाहित्ये मार्गत्वमित्येकादशसुबोधिन्याम् । **अक्षर** इति । आध्यात्मिके । केवलभक्तेस्तु स्वस्वरूपबले वर्णनीय उपयोगः । योगादिविद्याङ्गवैशिष्ट्ये तु तस्य मार्गत्वमित्याहुः **पूर्व**मिति । ज्ञानमार्गे योगयोगाद्विद्यापञ्चाङ्गेषु । मर्यादायामङ्गीकारादिति वक्ष्यमाणत्वात् । मर्यादा प्रेम्णीत्यर्थात् । 'योगयोगे तथा प्रेमे'ति निबन्धात् योगयोगः । **भक्तिमार्गीये**ति । अत्रापि योगयोगः । पुष्टावङ्गीकारादिति वक्ष्यमाणत्वात् । **मर्यादाया**मिति । मर्यादाभक्तिमार्गे । **पुष्टौ** पुष्टिमार्गे । **अक्षर** इति । पादरूपे । **श्रुतिद्वयेति** । 'सत्यं ज्ञानमनन्त'मित्यनया 'यमेवैष' इत्यनया चोक्तम् । **अत एवेत्यादी**ति । **मर्यादाया**मिति । मर्यादाभक्तिर्ज्ञानं च तस्याम् । **युक्त**मिति । किञ्च, 'भक्त्या मा'मित्यादिभाष्योक्तस्मृत्योर्युक्तमित्यर्थः ।

अत्र साधकत्वेन विपक्षे बाधकमाह अन्यथा हि विरोध इति । अन्यथा मर्यादापुष्टिभेदेन व्यवस्थाया अकथने विरोधाद्धेतोस्तथेत्यर्थः । विरोधस्तु पूर्वपक्ष-

भाष्यप्रकाशः ।

मुमुक्षुप्रवृत्तिप्रतिरोधः ।

ननु सूत्रे को वा विरोधोऽभिप्रेतो योऽत्र साधकत्वेनाद्रियत इत्यत आहुः विरोध इत्यादि ।

अत्रेदं बोध्यम् । ब्रह्मनिरूपकेषु वेदान्तवाक्येषु क्वचित्सृष्टिकर्तृत्वप्रशासितृत्वादिरूपं ब्रह्ममाहात्म्यं जीवात्मनः परमात्माभेदस्तादृशज्ञानस्य मोक्षसाधनत्वं चोच्यते । क्वचिच्च वरणेन स्वतनुविवरणम् । क्वचिद्भक्त्यैव मोक्ष इत्युच्यते । तत्र प्रकरणभेदान्माहात्म्यज्ञानवतात्माभेदज्ञानेनाक्षरप्राप्तिः । वरणेन स्वतनुविवरणश्रावणात्तेन भगवत्स्वरूपे दर्शनगोचरे सति हृदयग्रन्थिभेदात् सुदृढस्नेहरूपायां भक्तौ जातायां पूर्वजातमुक्तविधज्ञानमपि तत्रैवोपकरोतीति पुरुषोत्तमप्राप्तिः । नच केवले ज्ञाने वरणमुपसंहर्तुं शक्यम् । विद्याधर्मत्वाभावात्, वरणश्रुतौ जीवकृतसर्वसाधनालभ्यत्वश्रावणेन परमात्मनः श्रवणादिविध्युक्तसाधनालभ्यतया तन्मात्रसाधनकायां विद्यायां

रश्मिः ।

अत्रेति । मर्यादापुष्टिभेदेन व्यवस्थाकथने मुक्तिसाधने मुमुक्षुप्रवृत्तिसाधकत्वेन विपक्षे पुष्टिमर्यादाभेदेन व्यवस्थाया अकथने बाधक मुमुक्षुप्रवृत्तिप्रतिरोधमाहेत्यर्थः । मर्यादापुष्टीति । धर्मादिष्वनियम इति पूर्वप्रयोगार्हस्य पुष्टिशब्दस्य परप्रयोगः । अत्रेदमिति । भाष्ये श्रुतिविषयवाक्यत्वायेद वक्ष्यमाणं बोध्यम् । वेदान्तेति । 'यतो वा इमानि भूतानि जायन्ते', 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः', 'तदात्मानꣳस्वयमकुरुत' 'तत्त्वमसी'त्यादिषु । सृष्टीति । आदिना साक्षात्सृष्टिकर्तृत्वम् । तादृशेति । भक्त्यङ्गज्ञानस्य । मोक्षसाधनत्व भक्तिरूपव्यापारद्वारा चोच्यते । तदुक्तम्- 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथे'ति पञ्चरात्रे । 'अनवगाह्यमाहात्म्ये' 'नृप स्वात्मैव वल्लभ' इति वाक्यद्वय श्रीभागवते । भगवानात्मनोप्यात्मा । क्वचिदिति । वरणश्रुतौ । तनुविवरणं 'विवृणुते तनुं स्वा'मितिपाठे । क्वचिदिति । 'ब्रह्मविदाप्नोति पर'मित्यत्र 'ब्रह्मसंस्थोऽमृतत्वमे'तीति । संस्था भक्ति । 'तत्संस्थस्यामृतत्वोपदेशा'दिति शाण्डिल्यसूत्रात् । पादस्थानभेदेनाक्षरस्य द्वैविध्यात्तादृशज्ञानेन पादरूपाक्षरप्राप्तिस्तदाहुः तत्रेति । प्रकरणेति । अक्षरप्रकरणपुरुषोत्तमप्रकरणयोर्भेदात् । माहत्म्यज्ञान स्वमतोद्भव तस्य त्वमसीति तत्त्वमसीत्यत्रार्थपक्षे जीवस्यांशत्वेन ज्ञान'मध्यात्मज्ञाननित्यत्व'मिति गीतोक्तम्, नत्वर्थवादरूपम् । तद्वतामात्माभेदज्ञान तेनाक्षरस्य पादरूपस्य प्राप्तिः । एतस्य पश्चाद्भक्तिमार्गीयज्ञानोपयोग वक्तुमाहुः वरणेनेति । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनु स्वा'मित्यस्यां तेन वृतेनेत्यर्थे वरणे पर्यवसानाद्वरणेनेत्युक्तम् । स्वतनुविवरण स्वस्य भगवतस्तनुस्तस्या विवरण प्रकाशनं बाहुलकात् तस्य श्रावणात् । तेनेति । स्वतनुविवरणश्रावणेन । 'भिद्यते हृदयग्रन्थि'रिति श्रुतेराहुः हृदयेत्यादि । हृदयग्रन्थिः दुष्टकामक्रोधादिः । सुदृढेति । तत्त्वं च 'कामाद्द्वेष्य' इत्यादिवाक्योक्तं अदुष्टकामाद्यविहितभक्तिपूर्वकत्वम् । पूर्वजातमिति । अक्षरात्मकहृदये भगवत्स्वरूपे दर्शनगोचरे सत्यक्षराज्ञान पूर्वजात उक्तविधज्ञानं अक्षरप्रतिष्ठितत्वविषयक सत्तत्र नाम भक्त्यशमाहात्म्यज्ञानमुपकरोति तज्जनकत्वेन इत्येवं भक्त्या पुरुषोत्तमप्राप्तिः । उपसंहारपादत्वादाहुः नचेति । शक्यमिति । तस्य ज्ञानवद्वृतधर्मत्वादिति भावः । न'न्वेकं रूप रसात्पृथ'गित्यत्रैकत्वपृथक्त्वयो रूपधर्मवज्ज्ञानधर्मत्व वरणस्येत्यत आहुः वरणेति । श्रवणादीति । 'श्रोतव्य' इत्यत्र विधौ तव्य इति भावः । साधनानि श्रवणादीनि । तन्मात्रेति ।

ग्रन्थ उपपादितः। एतेनैव 'ननु श्रवणादिरूपा प्रेमरूपा च भक्तिरविशेषेण पापक्षय एवोदेति, उत कश्चिद्विशेषोऽस्ति। तत्राधुनिकानामपि भक्तानां दुःखदर्शनाच्छ्रवणादेः पापनाशकत्वश्रवणाच्चाविशेषपक्षस्त्वसङ्गतः। अथ श्रवणादिरूपा पापे सत्यपि भवति, प्रेमरूपा तु तन्नाश एवेति विशेषो वाच्यः। सोऽपि प्रेमवतामपि अक्रूरादीनां मणिप्रसङ्गे भगवता समं कापट्यकृतिश्रवणान्न साधीया'नित्यपि शङ्का निरस्ता वेदितव्या।

भाष्यप्रकाशः।

वरणस्योपसंहर्तुमशक्यत्वाच्च। एवं साधनभेदेन फलभेदसिद्धौ पूर्वोक्तोन्निनीषाश्रुतिसिद्धभगवद्विचारशरीरे श्रौतसाधनानां तदभावस्य तद्विरुद्धानां कामादीनामपि प्रवेशेन वरणे प्रकारभेदः सिध्यति। स च पुराणोक्तैरुपबृंहणैर्विशेषतोऽवगम्यत इति हृदिकृत्य सूत्रकृता इदमधिकरणं प्रणीतमित्याशयेन पुराणस्थविरोधपरिहारचिन्तनमत्र कृतम्, न तु मुख्यतया तेषां विषयवाक्यत्वमिति वैदिकम्मन्यबहिर्मुखबोधनाय वर्त्म। वस्तुतस्तु 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मितिवाक्याद्वेदत्वमेव श्रीभागवतस्य। 'इतिहासपुराणं वेदानां पञ्चमो वेद' इति बृहदारण्यकश्रुतेश्च। अतस्तद्वाक्यत्वेनापि विषयवाक्यत्वं युक्तमिति न शङ्कालेशः।

प्रकृतमनुसरामः। एतस्याधिकरणस्य पूर्वाधिकरणोत्थशङ्कानिरासरूपं प्रयोजनान्तरमाहुः एतेनेत्यादि। एतेनेत्यस्य इत्यपि शङ्का निरस्ता वेदितव्येत्यनेनान्वयः। न साधीयानिति। पापं विना भगवति कापट्यकृत्यसम्भवान्न साधीयान्। तथाच सम्परायसूत्रसिद्धः सिद्धान्तो न

रश्मिः।

वरणमात्रं साधनं यस्याः सा वरणमात्रसाधनिका तस्याम्। अशक्यत्वादिति। नहि साधनस्य वरणस्य साध्ये ज्ञाने उपसहारो दृष्ट इति भावः। अन्यत्रादर्शनात्। तथा 'चैकं रूप'मिति दृष्टान्तो नेति भावः। एवमित्यादि। श्रवणादिविध्युक्तसाधनतन्मात्रसाधनयोर्भेदेन। फलयोः पुरुषोत्तमतदितरफलयोर्भेदसिद्धौ। पूर्वोक्तेति। अत्रैव पूर्वोक्तेत्यादिः। तदभावस्य वरणेतरसाधनाभावस्य। स चेति। अत्रैव 'यमेवैष'इत्यादिभाष्योक्तो वरणे प्रकारभेदश्च। उपेति। 'भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्था रतिरात्मन्यतो भवे'दित्यत्रोपबृंहणे यच्छब्दार्थ ऐक्यमाहात्म्ययोर्माहात्म्ये वरणस्यान्तर्भावाद्विशेषतः। तथे'तिहासपुराणाभ्यां वेदं समुपबृंहये'दित्युपबृंहणम्। तथा 'जन्माद्यस्य यतोऽन्वयादितरत' इत्युपबृंहणम्। जगज्जन्मादिकर्तृत्वस्य माहात्म्यात्। किंच 'भक्त्या मामभिजाना'तीति भाष्योक्तोपबृंहणे तेः। वैदिकमिति। वेद एव षडङ्गानीत्येवं वैदिकमात्मान मन्यते स वैदिकमन्यः, स च बहिर्मुखः, बहिः तर्का मुखान्युपाया यस्य तस्य बोधनाय उपबृंहणानां विशेषतोऽवगमांशे उपकारात्। ननु नेयं भाष्यकृतां शैली, यदि स्यात्, तदा पूर्वोक्तं स्यात्, नत्वेवम्, पूर्वमीमांसाभाष्ये शबरस्वामिशैल्याः षष्ठाध्याये द्वितीयपादे षष्ठाधिकरणे 'तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेर'न्नित्यधिकरणे दर्शनादित्यत आहुः वस्तुतस्त्विति। ननु स्मृतीनामुत्सन्नप्रच्छन्नशाखामूलत्वादस्तु पूर्वमीमांसाविषयत्वम्, पुराणानां तु कथं मीमांसाविषयत्वमत आहुः सर्ववेदेति। तद्वाक्येति। पुराणवाक्यत्वेनापि। एतेनेत्यादीति। भक्तानामिति। श्रवणादिमताम्। ननु कुतो न कारणसत्त्वे प्रेमेति चेत्। न। प्रेमवन्मुक्तेरपि फलत्वात्, प्रेमादिकं प्रति श्रवणादीनां तृणारणिमणिन्यायेन कारणत्वात्। दुःखेति। पापकार्यदुःखदर्शनात्। पापनाशकत्वेति। अन्योन्याश्रयापादकात्तस्मात्। श्रवण तु 'केचित्केवलया भक्त्या वासुदेवपरायणाः। अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्कर' इति वाक्ये। कापट्येति।

तथाहि । मर्यादापुष्टिभेदेनाङ्गीकारे वैलक्षण्याद्‌ाद्यायामङ्गीकृतानां मुमुक्षयैव श्रवणादौ प्रवृत्तिः, तद्दातृत्वेनैव भगवति प्रेमापि, न तु निरुपधिः। कदाचिद्वस्तुस्वभावेन मुक्तीच्छानिवृत्तावपि तद्भक्तेः साधनमार्गीयत्वात् 'अनिच्छतो मे गतिमण्वीं प्रयुङ्क्त' इति वाक्यादन्ते मुक्तिरेव भवित्री। अस्मिन् मार्गे श्रवणादिभिः पापक्षये प्रेमोत्पत्तिः, ततो मुक्तिः । पुष्टिमार्गेऽङ्गीकृतेस्त्वत्यनुग्रहसाध्यत्वात् तत्र च पापादेरप्रतिबन्धकत्वाच्छ्रवणादिरूपा प्रेमरूपा च युगपत्, पौर्वापर्येण वा, वैपरीत्येन वा भवत्येव। अत्र श्रवणादिकमपि फलरूपमेव। स्नेहेनैव क्रियमाणत्वान्न विधिविषयः। न ह्यविद्यादिमुक्त्यन्तरूपभजनान-

---

भाष्यप्रकाशः ।

युक्त इत्याशङ्काप्येतेन मार्गभेदेन समाधानान्निरस्ता वेदितव्येत्यर्थः । कथं निरस्तेत्याकाङ्क्षायां व्युत्पादयन्ति तथा हीत्यादि वक्तुं शक्येत्यन्तम्। तथाच सम्परायसूत्रसिद्धः सिद्धान्तो मर्यादामार्गविषयः। सत्यपि पापे भक्त्युदयपक्षस्तु पुष्टिमार्गे, तत्र वरणप्रकारभेदे नियामिका या इच्छा,

रश्मिः ।

कापथ्यं पापकार्यम् । तथाहीत्यादि वक्तुं शक्यमित्यन्तमिति । अस्मिन्निति । मर्यादायामङ्गीकारे मार्गे । 'यमेवैष वृणुत' इत्युक्तभाष्यरीत्या मार्गे। वैपरीत्येनेति । पूर्वं प्रेमरूपा पश्चाच्छ्रवणादिरूपेत्येवम् । अयोगव्यवच्छेदकैवकारः । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यत्र पाठक्रमे 'दृष्ट एव स्नेह' इति भाष्याद्दर्शनानन्तरं प्रेम तदनन्तरं श्रोतव्य इत्युक्तश्रवणादीत्येवं श्रुत्यर्थात् । अत्रेति । पाठक्रमेण श्रवणाद्यङ्गीकारे । फलरूपमेवेति। स्नेहस्य श्रवणादिफलत्वात्तथा। मुक्तिप्रतिपादकैकादशस्कन्धे 'श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तन'मित्युपक्रम्य 'एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् । मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यत' इत्यन्तवाक्यैरेवकारः । मुक्तेः फलत्वात् । न कुलालकुविन्दादिफलघटपटादिवदवान्तरफलत्वम्। न विधीति। स्नेहेनैवेत्यत्रापि हेतुः। तथाच प्रेमपर्यन्तं विधेयत्वेन श्रवणादिकम्, प्रेमानन्तरं तु स्वव्यसनतः क्रियमाणमुत्तमभक्तिरूपं न विधिविषयम्। भाष्ये विषयशब्दो नियतलिङ्गः। पूर्वतत्रेप्येवम्। नहीति । अविद्या आदिर्यस्य मुक्तिः सायुज्यमन्ते यस्य भजनानन्दात्यन्तरायस्य । अत एवाविद्यादिमुक्त्यन्ताभ्यां रूप यस्य भजनानन्दात्यन्तरायस्यान्तेन रूप्यन्ते उपमीयन्ते इत्यविद्यादिमुक्त्यन्तरूपभजनानन्दात्यन्तरायरूपाणि तानि अभ्रंकषाविरलविविधमहातरुगहनानि तेषाम् । यथानलोऽभ्रंकषम्। कष हिंसायां (भ्वा-प-सेट्) अभ्रमाकाशं कषति हिनस्तीत्यभ्रंकषं गहनं विपिनं दहति । स्वदेहहिंसकं वस्त्वित्युक्तम्। दाह्यत्वसमर्थकं विशेषणं अविरलविविधमहातरु इति। अविरला गह्वरा विविधा अनेकरूपा महान्तोत्युच्चाः तरवो यस्य। तथानुग्रहः अभ्रंकषं गहनं दुःखं दहति अविद्याऽज्ञानं आकाशं देहं हिनस्ति। यथाधुनिक आकाशं ब्रह्मदेह न मनुत इति। अत्रापि दाह्यत्वसमर्थकं विशेषणं अविरलेत्यादि । अविरलानि विद्यानाख्यानि विविधानि विविधदुष्कृतजन्यानि महातर्वादिवृक्षस्तस्य दुःखानि गहनानि । आदिवृक्षस्य वेदार्थत्वेन कर्मरूपत्वात् । तस्य वेदार्थत्वं तु 'ऊर्ध्वमूलमधःशाख'मिति श्वेताश्वतरश्रुतेः । 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रात् कर्मरूपत्वं तस्य । अतो महातर्वादिवृक्षसम्बन्धीनि दुःखानि मुक्त्यन्तरूपाणि । भगवदीयानां मुक्त्यनादरस्मरणात् गहने प्रवेशः । 'शुद्धाश्च सुखिनश्चैव ब्रह्मविद्याविशारदाः । भगवद्भजने योग्या नान्य इत्यर्थतः फल'मिति प्रथमसुबोधिनीकारिकायाः सुखिनो भजनानन्दाधिकारिण इति दुःखानां गहनानामत्यन्तरायत्वं भजनानन्दे । मुक्तेरप्यत्यन्तान्तरायरूपत्वम्।

न्दात्यन्तरायरूपाश्रङ्कषाविरलविविधमहातरुगहनानां दहने लोलुपस्यानुग्रहानलस्य तदान्तरालिकपापतूलं प्रतिबन्धकमिति वक्तुं शक्यम्।

तदुक्तं श्रीभागवते 'स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथञ्चिद्धुनोति सर्वं हृदि संनिविष्ट' इति। विकर्म प्राक्तनम्, तत् दुःखदमिति, स्वयं च हरित्वेन दुःखहर्तेति धुनोति।

भाष्यप्रकाशः।

सा 'छन्दत उभयाविरोधा'दिति सूत्रे सूचिता, सैवात्रोभयथेति पदव्याख्याने व्युत्पादिता। तेन न चोद्यावकाशः। नापि तत्कृतश्रवणादीनां पापनाशार्थत्वं शङ्क्यम्। तेषां प्रेम्णा क्रियमाणत्वेन फलमध्यपातित्वात्। पापस्य त्वनुग्रहेणैव नाशसम्भवादित्यर्थः।

नन्वेतादृश्येवेच्छेत्यत्र किं मानमत आहुः तदुक्तमित्यादि। अत्र यद्विकर्म यच्च कथञ्चिदुत्पतितं तत्सर्वं धुनोतीत्यन्वयः। तत्र पूर्वं विवृण्वन्ति विकर्मेत्यादि। तत् दुःखदमित्यत्र तदिति भिन्नं पदम्। हरित्वेन दुःखहर्तेति। 'हराम्यघं यत्स्मर्तृणां हविर्भागं क्रतुष्वहम्। वर्णश्च मे हरिश्चेष्टस्तस्माद्धरिरहं स्मृत'इति महाभारतवाक्यात्तथा। मध्ये निविष्टस्य कथञ्चित्पदस्य धुनोतिना सम्बन्धे धूननप्रकार इच्छाविषय एव वाच्यः। स चेच्छाविवरणादेव लभ्यत इति वैयर्थ्यात्

रश्मिः।

भजनस्य भेदसाध्यत्वेन मुक्तेरभेदरूपायास्तथा। तदान्तरेति। अन्तरायान्तरालिकं मायारूप पापतूलम्। भगवत्सृष्टं पाप तु प्रतिबन्धक भवत्येव। 'अघ धुन्वन्ती'ति वाक्यात्। इति नहि वक्तुं शक्यमित्यन्वयः। ननु भजनानन्दः ज्ञानक्रियाकाण्डोक्तः स्यात्, तत्र तु न दृश्यत इति चेत्। न। ज्ञानक्रियापरिनिष्ठितानामत्यन्तानुग्रहे भक्तिदानस्य 'भगवान्भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति वाक्ये सिद्धत्वाद्भक्तमनोरथेन भजनानन्ददानात्। 'अचलत्व चापेक्ष्ये'ति व्याससूत्रात्। सूचितेति। भक्तेः पूर्वमेव पापनाशो यया भवति, सा छन्दपदवाच्या। वरणप्रकारभेदे नियामिका तु छन्दपदसूचितेत्यर्थः। व्युदिति। अत्रायमाशय इत्यादिभाष्येण व्युत्पादिता। न चोद्येति। सम्परायसूत्रसिद्धः सिद्धान्तो न युक्त इति चोद्यस्यावकाशः। अत्रेति भाष्य विवरीतुमाहुः नापीति। तत्कृतेति। मर्यादाभक्तकृतश्रवणादीनाम्। पापेति। अविद्यया विद्योपमर्दे पाप तस्य नाशार्थत्वमविद्योपमर्दकाले शङ्क्यम्। विवृण्वन्ति स्म तेषामिति। व्याख्यातम्। अनुग्रहेणेति। मर्यादायामपि कारणमनुग्रह इति भक्तिहेतुग्रन्थेऽस्ति। एतादृशीति। पुष्टिमर्यादाभेदे नियामिका। यजमानस्य तदाशया कृतायां श्रवणादिसरणौ पुष्टिपदप्रयोगः। तदाशाभावे मर्यादा। 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति गीतायां तदाशाभावे याऽव्यभिचारिणी भक्तिर्भवति तस्या उक्तेः। 'तद्रूपं तत्र च स्थितं साकारव्यापकत्वाच्चे'त्यव्यभिचारिणी। अत्रैकदेशविकृतन्यायेनाभेदमाश्रित्य प्रश्नः। अथवा। भाष्योक्तौ पुष्टिमर्यादामार्गौ प्रमाणप्रमेयबलरूपौ ग्राह्यौ। अस्मिन्पक्षे भेदे प्राप्ते किमिति प्रश्नः अभेदमुपपाद्य भेदाभावाभावरूपभेदविषयको ग्राह्यः। विकर्मेति। सचितम्। उत्पतितं विकर्म क्रियमाणम्। भाष्ये। स्वपादेति। उपकार स्मृत्वा स्वस्य भगवतः पादयोर्मूलं ओघं समूह 'प्रियतमकरपद्मस्पर्शभावेक्षणा'दिति स्वामिनीस्तोत्रोक्तम्। भजतः। अन्यस्मिन् भावः त्यक्तोऽन्यभावो येन तस्य। प्रकृते। पूर्वमिति। विकर्म। विकर्मेत्यादीति। प्राक्तनं संचितं कर्म। तथेति। हरित्वेन दुःखहर्तृत्वम्। धूननेनान्वयं निराकुर्वन्ति स्म मध्य इति। उत्पतितधुनोतिपदयोर्मध्ये। धूननेति। कथञ्चिदित्यत्र कथशब्दार्थः धूनने प्रकारः केनापि प्रकारेण धूनन करोती-

१. भजनान्दात्यन्तरायेति पाठः।

उक्तविशेषणविशिष्टस्य स्वतो विकर्मकृत्यसम्भवात् सांसर्गिकं मत्तो भूतम्, न तु मया कृतमितिवत्[1] वा यत् कृतं विकर्म तत् 'कथञ्चिदुत्पतित'मित्युच्यते। त्यक्तान्यभावत्वेन भगवत्सेवाख्यासङ्गेनेन्द्रद्युम्नाख्यपाण्ड्यराजवन्महदागमनाद्यज्ञानं वा। वक्ता उक्तरूपे भक्ते विकर्मोक्तावनुचितत्वज्ञापनाय[2] वा 'कथञ्चि'दित्युक्तवान्। तेन तर्कितं विकर्मात्राभिप्रेतमिति ज्ञायते। एतादृशस्यापि यदि विकर्म भवेत्, तदा तन्निवृत्त्यर्थं न तेनान्यत् कर्तव्यम्। भगवानेव हृदि निविष्टस्तद्धुनोति यत इति। कदाचित् स्वभक्तिबलस्फूर्त्या सदोषमपि जनं कृतार्थीकरिष्यामीत्यङ्गीकुर्याच्चेद्भक्तः, तदैव तद्धृदिस्थ एव तत्संसर्गजं दोषमस्यैतदङ्गीकारेण तद्दोषमपि धुनोतीति सर्वपदेनोच्यते। चिरकालभोग्यमपि तत्क्षणेनैव नाशयति। तन्नाशने कालादेरप्रतिबन्धकत्वमित्यपि ज्ञापयितुं परस्य कालादेरीश-

भाष्यप्रकाशः।

पूर्वपदेनैव सम्बन्धो युक्त इत्याशयेन द्वितीयं विवृण्वन्ति उक्तेत्यादि। मत्तो भूतम्, न तु मया कृतमितिवदिति। अकामतः अबुद्धिपूर्वकं च कृतम्। एवञ्च सांसर्गिकेन सह त्रिविधं विकर्मोक्तम्। त्यक्तान्यभावस्यैतदपि न सम्भवतीत्यरुच्या ततोऽतिरिक्तमन्यदाहुः त्यक्तेत्यादि। अज्ञानं वेति। कथञ्चिदुत्पतितविकर्मस्थानीयमिति शेषः। गौण्यङ्गीकारे बीजं वक्तुमाहुः वक्त्रेत्यादि। तथाच तादृशस्य पापमेव नास्ति, किन्तु भगवदिच्छैव तादृशी सन्मार्गस्थापनार्थेत्याशयेनैतद्वाक्यवक्ता करभाजनो योगीश्वर एकादशस्कन्धे निमिं प्रति तथोक्तवानित्यर्थः। एवं कथनस्य तात्पर्यमाहुः तेनेत्यादि। सर्वपदतात्पर्यमाहुः कदाचिदित्यादि। इदमपि नवमस्कन्धे रन्तिदेवोपाख्याने सिद्धम्। 'तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः। अभवन् योगिनः सर्वे नारायणपरायणा' इति, द्वितीयस्कन्धे शुकोक्तौ च 'किरातहूणान्ध्रपुलिन्दपुक्कसा आभीरकङ्का यवनाः खसादयः। येऽन्येऽपि पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नम' इति। चिरकालभोग्यस्य यत्र क्षणमात्रेण नाशनम्, तदुदाहरणं त्वन्तर्गृहगताः प्रागेवोक्ताः। सिद्धमाहुः

रश्मिः।

त्यर्थात्। अयमिच्छाविषयो वाच्यः पूर्वभाष्यात्। पूर्वभाष्य इच्छाविवरणम्। पूर्वेति। उत्पतितपदेन। द्वितीयमिति। कथञ्चिदुत्पतितम्। मत्त इति। इत्यत्रेतीतिवत्। सप्तम्यन्ताद्वतिः। मत्तो कामतः भूतं अबुद्धिपूर्वकं भूतं संसर्गतो भूतम्। अकामतः पञ्चमस्कन्धे बभ्रूहननं बभ्रूहनने इच्छाभावात्। अबुद्धिपूर्वकं यथा सेवा संसारसहितसंसारस्य नाशनं कृतम्। संसर्गतः कृतमक्रूरे। संसर्गः शतधन्वनः। सांसर्गिकमित्यत्र ससर्गेण निर्वृत्तमिति विग्रहे 'तेन निर्वृत्तमि'ति सूत्रेण 'अध्यात्मादेष्ठञिष्यत' इति वा भवार्थे 'तदस्य प्रयोजन,मिति वा ठञ्। एतदपीति। त्रिविध विकर्म। तत इति। त्रिविधात्। गौणीति। एकस्थानीयत्वं गुणस्तद्योगाद्गौणी। वक्त्रेत्यादीति। उक्तरूप इति। पाण्ड्यराजवद्वर्तमाने। अनुचितत्वेति। अनुचितत्वसूचनाय। तादृशस्येति। पाण्ड्यराजवद्वर्तमानस्य। सन्मार्गेति। पाण्ड्यराजवद्वर्तमाने भक्ते विकर्मोक्तावनुचितत्वं यत्र मार्गे तादृशसन्मार्गस्थापनार्था। तथेति। कथञ्चिदित्युक्तवान्। तेनेत्यादीति। तर्कित अन्यथाज्ञानविषयं विकर्मात्र वाक्येऽभिप्रेतम्। तत्प्रसङ्गेति। रन्तिदेवस्य यः

१ कृतमिति बुद्ध्येति पाठ। २. अरुचिज्ञापनाय इति पाठ.। ३. अत्राप्यभीत्यादिपाठ.।

त्वमुक्तम् । अत्र भजनादिहृन्निवेशान्तानां स्पष्ट एव विकर्मणि सत्यपि सम्भव इति ॥ २९ ॥

इति तृतीयाध्याये तृतीयपादे सप्तमं गतेरर्थवत्त्वमित्यधिकरणम् ॥ ७ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ (३-३-८.)

ननु मुक्तेरेव सर्वत्र फलत्वमुच्यते, युक्तं चैतत्, संसृतेर्दुःखात्मकत्वात्, तन्निवृत्तेः सर्वेषामिष्टत्वात्, पुष्टिमार्गीयभक्तानां तु तदनपेक्षित्वमुच्यते । तदुक्तमथर्वणोपनिषत्सु । अष्टादशार्णमन्त्रस्वरूपमुक्त्वा पठ्यते 'परब्रह्मैतद्यो धारयती'त्यादेरन्ते 'सोऽमृतो भवती'त्यादि । एतदग्रे 'किं तद्रूपं किं रसनं कथं हैतद्भजन'मित्यादिप्रश्नोत्तरं पठ्यते 'भक्तिरहस्यभजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्यात्मनः

भाष्यप्रकाशः ।

अत्रेत्यादि । तथाच मर्यादाभक्तिमार्गे तर्तव्याभावाज्ज्ञानमार्गेत उत्कर्षः, पुष्टिभक्तिमार्गे तु क्वचित्पापसत्त्वेपि भगवतैव तन्नाशनेन कृपातिशयादुत्कर्ष इति सिद्धमित्यर्थः । तेन पूर्वाधिकरणोक्तो भक्त्युत्कर्षो हेतुबोधनेन दृढीकृतः । किञ्च, एतेन भगवतः फलत्वबोधनात् स्वरूपावस्थितस्यैव तथात्वादकेतनत्वरूपो धर्मोपि प्रतिपादितः ॥ २९ ॥ इति सप्तमं गतेरर्थवत्त्वमित्यधिकरणम् ॥ ७ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥ पूर्वाधिकरणे भक्तिहेतुबोधनेन ज्ञानमार्गापेक्षया भक्तिमार्गस्योत्कर्षो दृढीकृतः । अत्र त्वनुग्रहजन्ययोर्मर्यादापुष्टिभक्त्योर्मध्ये मर्यादाभक्तेः पापनाशोत्तरमेव जायमानत्वात् पुष्टिभक्तौ च तादृशनियमाभावात् तत आधिक्यं न स्यादतस्तारतम्यं विचार्यते । वरणश्रुतिप्रपञ्चभूतमिति पूर्ववदेव विशयसंशयौ पूर्वपक्षे निक्षिप्य सूत्रमवतारयन्ति ननु मुक्तेरित्यादि । पुष्टिमार्गीयभक्तानां मुक्त्यनपेक्षत्वं कुत्राथर्वोपनिषत्सूच्यत इत्याकाङ्क्षायाम्, गोपालपूर्वतापनीय इत्याह अष्टादशार्णेत्यादि । भक्तिरहस्यभजनमिति । अत्र भक्तिशब्दाच्छान्दसः सोलुक् । रहस्यभजनमित्यस्य विवरणं तदिहेत्यादि । अर्थस्तु—तत् भजनम्, अमुष्यात्मनो

रश्मिः ।

प्रसङ्गस्तस्य योऽनुभावो नारायणपरायणत्वं साधनाभावेपि तत्त्वं तेन । तर्तव्येति । तर्तव्यं पापम् । पुष्टीति । भाष्यीयात्रशब्दस्यार्थः । पूर्वाधिकरणसमाप्तौ विरुद्धधर्माधारत्वप्रतिज्ञानादुक्तकृतकेतनत्वविरुद्धधर्ममाहुः किञ्चेति । एतेनेति । हृदि सन्निवेशकथनेन । 'स मानसीन आत्मा जनाना'मिति श्रुतेः फलत्वम् । स्वरूपेति । फलत्वोक्तेर्मोक्षरूपत्वात् 'मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः' सा च भगवतः 'स आत्मा स्वाश्रय' इत्याश्रयलक्षणवाक्योक्तोऽतः स्वरूपावस्थितिराश्रयरूपता तदाधारस्य तथात्वात् फलत्वात्, 'दशमस्य विशुद्ध्यर्थं नवानामिह लक्षण'मिति वाक्यादेवकारः । तथात्वात् फलत्वात् । अपिना फलत्वम् ॥ २९ ॥ इति सप्तमं गतेरर्थवत्त्वमित्यधिकरणम् ॥ ७ ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ भक्तिहेत्विति । कृपातिशयरूपभक्तिहेतुबोधनेन । ननु मुक्तेरित्यादीति । तदनपेक्षित्वं मुक्त्यनपेक्षित्वम् । आहेति । पूर्वपक्ष्याह । अष्टादशार्णेत्यादीति । पञ्चपदोऽष्टादशार्णमन्त्रः । 'कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहेति' । गोपीजनेति वल्लभायेति पदद्वयम् । अत्र दशार्णपदाभावेपि, अग्रे 'एतस्मादन्ये पञ्चपदाऽभूवन् गोविन्दस्य मनवो मानवानाम् । दशार्णाद्यास्तेपि संक्रन्दनाद्यैरभ्यस्यन्ते भूतिकामैर्यथावत्' । 'तदेतस्य स्वरूपार्थं वाचा वेदयती'ति श्रुतेरत्रापि दशार्णत्वं प्राप्यते । श्रुत्यर्थस्तु टीकायां द्रष्टव्यः, अत्र प्रयोजनाभावान्न लिख्यते ।

कल्पनमेतदेव नैष्कर्म्य'मिति । एतदत्र विचार्यते । मन्त्रावृत्तितदधिष्ठातृरूपध्याना-देरमृतत्वं फलमुच्यते । भजनस्वरूपं च यावत्फलनैराश्येन भगवत्यात्मनः कल्पनमित्युच्यते । नच फलनैराश्येन भजनेऽप्यन्ते मुक्तिरेव भवित्रीति वाच्यम् । 'तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वावती'ति श्रुतेर्मुक्तिसाधनत्वेन ज्ञात्वा भजतः सैव फलम् । स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वमनुभवन् यो भजते, तस्य तदेव फलमिति यतो निर्णयः सम्पद्यते । 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यह'मिति

भाष्यप्रकाशः ।

वस्तुत एतदीयस्य जीवस्य इहामुत्रोपाधिनैराश्येनैव ऐहिकामुष्मिकयावत्फलेप्साराहित्येन कल्पनं तदीयत्वसमर्थनम् । अन्तर्बहिःसेवया तद्दृढीकरणम् । 'कृपू सामर्थ्ये' इति धात्वर्थात् । एतदेव स्वस्य तदीयत्वसमर्थनमेव, नैष्कर्म्यं संन्यास इति । अन्ये तु, 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्ये-नामुष्मिन् मनःकल्पन'मिति पठन्ति । एवं पाठद्वयेऽपि यावत्फलनैराश्यस्य प्रविष्टत्वादामुत्रिक-मध्ये मुक्तेरपि प्रवेशात् तदनपेक्षत्वं समानम् । एतदत्र विचार्यत इति । उक्तं तापनीयवाक्यद्वयम-स्मिन् सूत्रे विचार्यते । सन्देहं वक्तुं विचारप्रकारमाह मन्त्रेत्यादि । 'अमुं पञ्चपदं मन्त्रमावर्तयेद्यः स यात्यनायासतः केवलं तत्' इति मन्त्रोक्ता या पञ्चपदस्याष्टादशार्णमन्त्रस्यावृत्तिः पुनः पुनः कथनम्, 'तस्मात् कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं भजे'दिति ब्राह्मणोक्तं यत्तदधिष्ठातृ-ध्यानादि, तस्य सर्वस्य अमृतत्वं फलम्, उपक्रम एव 'यो ध्यायति रसति भजति सोऽमृतो

रश्मिः ।

एतस्य दशार्णमन्त्रस्य स्वरूपं पञ्चपदमुक्त्वा । 'भक्ती रहस्यभजन'मिति प्राप्त आहुः अत्र भक्तीति । 'सुपां सुलुगि'तिसूत्रेण लुक् । अमुष्येति । अमुष्य विप्रकृष्टस्य य आत्मा जीवस्तस्य । नैष्कर्म्यमिति । यावत्फलेप्साराहित्ये सति तदेककामत्वे तदीयत्वं भवतीति यावत्फलेप्साराहित्यं करणं तदीयत्वसमर्थने उक्तम्, तज्जन्यं तदीयत्वसमर्थनं नैष्कर्म्यम् । तदित्थम् । कर्मणा कर्मनिर्हारो नैष्कर्म्यं कर्मनिर्हारकं कर्म । अकामस्याप्तकामस्य यावत्फलेप्साराहित्यं भवति तदन्वाप्तकामस्याविहितं विहितं दास्यं भवति । 'आदरः परिचर्यायां'मित्येकादशैकोनविंशे कथनात् । कर्मनिर्हारकं कर्म । भक्तित्वाच्च । 'केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वन्ती'ति वाक्यात् । तच्च नैष्कर्म्यं संन्यासः । कर्मसंन्यासयोगाध्याये 'त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः । कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः ॥ निराशीर्य-तचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ गतसङ्गस्य मुक्तस्य ज्ञानाव-स्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना' इति । नचाधः सेवन संसारजनकं 'अधश्चोर्ध्व'मिति वाक्यविषयत्वात् अस्मदादिविषयवत् इत्यनुमानेन संसारजनकं दास्यमिति वाच्यम् । आचार्यमार्गत्वस्योपाधित्वात् । 'कृत्वा-ऽतरन् वत्सपदं स्म यत्प्लवाः' इत्यस्य सुबोधिन्यनुगुणयत्किंचित्संसारवत्सेवनं साध्यव्यापकत्वस्थलम् । सेवनातिरिक्तविषयं साधनव्यापकत्वस्थलम् । एव नैष्कर्म्यं संन्यास इत्यर्थः । उपबृंहितोयं संन्यास उपनिषत्सु तत्तदधिकारानुसारी ज्ञेयः । समानमिति । पुष्टभक्तानां समानम् । तन्मते पुष्टभक्ताभावेपि स्वमते तदविरुद्धमित्यर्थः । मनःकल्पनं मानसी सेवा । आहेति । पूर्वपक्षीति बोध्यम् । एवमग्रेपि । ब्राह्मणेति । ब्रह्मा ब्राह्मणः ब्रह्म जानाति ब्राह्मण इति व्युत्पत्तेः । अधिष्ठाता दशार्णप्रतिपाद्यः ।

भगवद्वाक्याच्च। अत एव रहस्यभजनं लक्ष्यमुक्तम्। तथाच श्रौतत्वभगवत्सम्बन्धित्वयोरविशेषात् कतमो गरीयानिति संशये गूढाभिसन्धिः पठति।

मुमुक्षोः सकाशाद्रहस्यभजनकर्तैव उपपन्नः उपपत्तियुक्तः। तमेवोद्घाटयति तल्लक्षणार्थोपलब्धेरिति। तल्लक्षणो भगवत्स्वरूपात्मको योऽर्थः स्वतन्त्रपुरुषार्थरूपः, तदुपलब्धेः स्वाधीनत्वेन तत्प्राप्तेरित्यर्थः। यद्यपि पुरुषोत्तमे प्रवेशो तदानन्दानुभवो भवति, तथापि न प्रभोस्तदधीनत्वम्। भक्तितिरोभावात्। प्रत्युत वैपरीत्यम्। भजनानन्दस्य तत आधिक्यं तु 'मुक्तिं ददाति कर्हिचित् स न भक्तियोगम्'

भाष्यप्रकाशः।

भवती'त्यनेनोच्यते। भजनस्वरूपमित्यारभ्य, भगवद्वाक्याच्चेत्यन्तग्रन्थस्तु स्फुटार्थः। एतन्निगमनायाह अत एवेत्यादि। अत एवेति। स्वरूपस्य फलत्वादेव। 'अस्य भजन'मिति पाठे तु निरुपधिभजनमेव लक्ष्यम्। उभयथापि 'तद्वैता'नित्यादिभिः सिद्धो निर्णयस्तुल्यः। अतो निरपेक्षभजनेपि मुक्तिरेव फलमिति निर्णयस्य कर्तुमशक्यत्वात् यत् सिद्धं तदाह तथाचेत्यादि। उक्तहेतुभ्यामुभयोर्भक्तयोः साम्यमेव युक्तमिति पूर्वपक्षरूपे संशये श्रुतिस्थगूढाभिप्रायं प्रकटयन् सूत्रं पठतीत्यर्थः। सूत्रं व्याकुर्वन्ति मुमुक्षोरित्यादि। रहस्यभजनकर्तेति। पाठान्तरे तु निरुपधिभजनकर्ता। तमेवेति। तादृशं भक्तम्। गूढाभिसन्धिं वा। अग्रे उपपत्तेरेव कथनादिति। ननु पुरुषोत्तमे सायुज्येपि सूत्रोक्तस्य हेतोरुपपद्यमानत्वात् कथं रहस्यभजनकर्तुरेवाधिक्यस्य सिद्धिरित्यत आहुः यद्यपीत्यादि। ननु मास्तु प्रभोस्तदधीनत्वं सायुज्ये, तथापि स्वरूपानन्दापेक्षया भजनानन्दस्याधिक्ये किं मानम्, अत आहुः भजनानन्दस्येत्यादि। अत्र प्रथमवाक्यं पञ्चमस्कन्धषष्ठाध्याये श्रीशुकैः परीक्षितं प्रत्युक्तम्। 'राजन् पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किङ्करो वः। अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स न भक्तियोग'मिति। अत्र मुक्तिदातुरप्यदेयत्वेन भक्तेराधिक्ये सिद्धे तदानन्दस्या-

रश्मिः।

एतन्निगमनायेति। तस्मात्तथेति निगमनं न्यायशास्त्रे। भाष्ये। रहस्येति। तत्प्राप्तिसाधनं लक्ष्यम्, 'तदिहामुत्रे'त्यादिलक्षणम्। लक्ष्यं निरुपधि बोध्यम्। प्रकृते। मुक्तिरेवेति। एवकारः स्वरूपस्य व्यवच्छेदकः। उक्तेति। श्रौतत्वभगवत्सम्बन्धित्वाभ्यां हेतुभ्यां उभयोर्मुक्तिभगवत्स्वरूपार्थं भजतोः। इति पूर्वपक्षेति। मुक्तिसाधनत्वेन भजन् गरीयानुत स्वरूपस्यैव स्वतन्त्रपुरुषार्थत्वमनुभवन् भजन् गरीयानिति संशये उक्तहेतुभ्यामित्यादिपूर्वपक्षे रूपं यस्य तादृशे संशये। उक्तायां 'यो ध्यायति रसति भजति सोऽमृतो भवती'ति श्रुतौ तिष्ठतीति श्रुतिस्थं गूढं मुमुक्षोः सकाशात् रहस्यभजनकर्तैवोपपन्न इत्यमृतपदगूढं अभिप्रायम्। गूढाभिसन्धिरितिपाठे उक्ताभिप्रायवान् व्यासो भगवान् गूढोभिसन्धिर्यस्येति बहुव्रीहिः। सूत्रमिति। बुद्धिस्थत्वात्सूत्रमपठित्वा व्याकुर्वन्तीत्यर्थः। गूढाभिसन्धिरूपे भाष्यीयार्थव्यतिरिक्ते। अत्र हेतुः अग्र इति। सूत्रेऽग्रे उपपत्तेः उपपन्नरूपतादृशभक्तधर्मस्य। यदि तल्लक्षणार्थो न स्यात्तदा तदुपलब्धिर्न स्यादित्येवमन्यथाज्ञानरूपायाः। ननु स्यादमृतपदगूढोभिप्रायः मुमुक्षोः सकाशाद्रहस्यभजनकर्तैव मुख्य इति उपपन्नरूपतादृशभक्तधर्मस्य तथापि तल्लक्षणार्थोपलब्धेरिति हेतुना कथं प्राप्तिरत उक्तं एवेति। अप्यर्थे आकृतौ शक्तेः तदाक्षेप्यव्यक्तेरुपपन्नरूपाया गौणार्थत्वात्। कथनात् तल्लक्षणार्थोपलब्धेरिति पदेन कथनात्। सायुज्य इति। उक्ततदीयत्वविलक्षणसायुज्ये। रहस्येति। तदीयस्य। तदानन्दस्येति। भजनानन्दस्य। ननु भजनेनानन्दो भजनानन्दः। अत्र

'दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः' 'नारायणपरा लोके' इत्युपक्रम्य 'स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन' इत्यादिवाक्यैरध्यवसीयते। अत एव सामीप्यवाच्युपसर्ग उक्तः। तेन दासीत्वेन दासत्वेन लीलायां सुहृत्त्वेन प्रभुनिकटे स्थितिरुक्ता भवति। नच महत्पदार्थस्वरूपाज्ञानादल्प एवानन्दे यथा सर्वाधिक्यं मन्वानः पूर्वोक्तं न वाञ्छति, तथात्रापीति वाच्यम्। दीयमानानामर्थानां स्वरूपाज्ञानासम्भवात्। अनुभवविषयीक्रियमाणत्वस्यैवात्र दीयमानपदार्थत्वात्। तद-

भाष्यप्रकाशः।

धिक्यम्। द्वितीयं तृतीयस्कन्धे कपिलवाक्यम्। तृतीयं षष्ठस्कन्धे सप्तदशाध्याये उमां प्रति शिववाक्यम्। नन्वयमर्थः सूत्राशयगोचरत्वेन कथं ज्ञेय इत्यत आहुः अत एवेत्यादि। तथाच यद्येवमर्थोऽभिप्रेतो न स्यात्, तदा 'तल्लक्षणार्थलब्धे'रित्येव सूत्रे वदेत्। भगवत्स्वरूपलाभस्योभयत्रापि तुल्यत्वेनोपोपसर्गप्रयोजनाभावात्। अत उपलब्धिपदाज्ज्ञेय इत्यर्थः। चतुर्विधमुक्त्यन्तर्गतत्वव्यावृत्त्यर्थं तादृशस्य सिद्धं स्वरूपमाहुः तेनेत्यादि। एतदेव भक्तेराधिक्यमूहापोहेन द्रढयन्ति नचेत्यादि। स्पष्टम्।

इतोप्यत्युत्कटभक्तसूचनाय पक्षान्तरमाहुः अथवेत्यादि। स्पष्टम्। एवमत्र भक्तेः परमा

रश्मिः।

फलसाधनयोरेकीकृत्य निरूपणात्कथं सायुज्यापेक्षयाधिक्यम्। किञ्च, किं शक्यतावच्छेदकमिति चेत्। सत्यम्। भजनेनेत्यत्र न करणे तृतीया, अपि तु 'प्रकृत्यादिभ्य उपसंख्यान'मिति वार्तिकेनाभेदे तृतीया। फलत्वेनाभेदः। ननु किं साधनं फलरूपमिति चेत्। न। एकादशे मुक्तिफलप्रतिपादकं सुबोधिन्यां फलात्मकं साधनमाहेति परस्परानुकथनमित्यस्याभासेन तदुक्तसाधनानां फलत्वात्। तेन साधनभूतभजनाभिन्नानन्दपदस्य भजनानन्दस्य भजनानन्दत्वमपि शक्यतावच्छेदकम्। 'साधनानामसिद्धवदावृत्तिः कर्तव्ये'ति सुबोधिन्या फलदशायामपि साधनावृत्तेः। यादृशं साधनं तदुक्तं भजनानन्दत्वं वा शक्यतावच्छेदकं भजनं तादृशानन्दे तात्पर्यग्राहकम्। लाघवात्। उभयत्रेति। उपोपसर्गे तदभावे च, सायुज्ये तदीयत्वे वा। ज्ञेय इति। तथाहि। उप समीपे लब्धिः तदीयत्वे। तस्य भेदघटितत्वात्। सायुज्ये लब्धिः, नतूपलब्धिः, सायुज्येऽभेदादिति। चतुर्विधेति। सामीप्यस्य वक्ष्यमाणभाष्यात्तदीयत्वेन तदतिरिक्तस्य सालोक्यवाक्योक्तसालोक्यादिचतुष्टयरूपचतुर्विधेत्यर्थः। तादृशस्येति। तदीयत्वरूपमुक्तिं प्राप्तस्य। तेनेत्यादीति। शरीरादिकं चतुर्थपादे वक्तव्यम्। ऊहेति। ऊहस्तर्कः। वाच्यमित्यत्रोहवचनविवक्षणात्। अपोहः तर्कापोहनं समाधानम्, तयोः समाहारः तेनैकवचनम्। स्पष्टमिति। तादृशं महतां पदार्थस्वरूपमक्षरज्ञान तस्यान्यत्र वैराग्यजनकस्याज्ञानात् अल्पानन्दे भगवदीयसम्बन्धिनि सगुणे। उत्कटेति। तदीयत्वमुक्तिं गतस्य भेदोऽयमुत्कटभक्तस्तस्य सूचनाय। पूर्वोक्तमिति। पदार्थस्वरूपमज्ञातम्। तथात्रापीति। दृष्टान्तवत् अत्र भजनानन्दाधिक्यप्रतिपादकवाक्येषु। उत्कृष्टत्वेन सालोक्यादिसायुज्यान्तेषु ज्ञानाभाववतः सगुणे भजनानन्देऽल्पे आधिक्यज्ञानमिति भावः। वाच्यमिति। वचनमूहरूपं अपोहनम्। दीयमानानामिति। सालोक्यादीनाम्। उत्कृष्टत्वेन स्वरूपाज्ञानासंभवात्। दीयतेऽनुभवविषयीक्रियते तत् दीयमानमित्याशयवन्त आहुः अनुभवेति। दीयमानेति। आकृतौ शक्तिपक्ष इति भावः। भाष्यीयत्वादेवकारः। नन्व-

१ इतः पूर्वं (यथा पूर्णो भगवदीयास्ते शेषव्यासाग्निमारुताः)।

ज्ञाने स्वर्गादित्रये तुल्यदर्शित्वासम्भवश्च। 'मुक्तिं ददाति कर्हिचित् स न भक्तियोग'मिति वाक्ये भक्तेराधिक्यं स्पष्टमेवोच्यते। तस्मात्र्यूनार्थजिघृक्षोः सकाशात् पूर्णार्थवान् महानिति युक्तमेवास्योपपन्नत्वम्। इममेवार्थं दृष्टान्तेनाह लोकवदिति। यथा स्वाधीनभर्तृका नायिका तदवस्थाननुगुणगृहवित्तादिकं दीयमानमपि नोररीकरोति, तथेत्यर्थः।

अथवा। स भगवानेव लक्षणमसाधारणो धर्मो यस्य स तल्लक्षण उद्भटभक्तिभावः स एव अर्थः स्वतन्त्रपुरुषार्थरूप इति। अग्रे पूर्ववत्। भगवत्प्राकट्यवानेव हि भक्तो भक्तत्वेन ज्ञायत इति तथा। एतेन ज्ञाप्यं हि ज्ञापकादधिकं भवति। एवं सति यज्ज्ञापकं परमकाष्ठापन्नं वस्तु पुरुषोत्तमस्वरूपं सर्वफलरूपं तन्महित्वं[1] कथं वक्तुं शक्यमिति सूच्यते ॥ ३० ॥

इति तृतीयाध्याये तृतीयपादेऽष्टममुपपन्नाधिकरणम् ॥ ८ ॥

भाष्यप्रकाशः।

काष्ठा सूचिता। तेन फलभक्तौ मुक्तिर्न सन्निपततीति मर्यादाभक्तिफलभूतमुक्तिभाजोपि सकाशात् पुष्टिभक्तोऽधिक इति सिद्धम्। अत्र गोपालतापनीयोक्ते विषयवाक्ये भक्तिविषयतया पुरुषोत्तमस्वरूपस्य सिद्धत्वेन श्यामावदातत्वं प्रतिपादितम्।

रश्मिः।

(नु)भवविषयीक्रियमाणत्वं न जातिरिति कथं तस्य पदार्थत्वमिति चेत्। न। विशेष्यौदासीन्येन धर्मावच्छिन्ने शक्तेः। कलशपदस्य कलशत्वे शक्तस्य कलशत्वधर्मवाचकत्वेप्याकृतौ शक्तेरनिवार्यत्वात्। व्यक्तेरभेदस्य जातिबाधकस्य सत्त्वात्। **तदज्ञान** इति। तुल्यत्वनिरूपकलौकिकसगुणसुखत्वेनापवर्गाज्ञाने। अपवर्गस्य सात्त्विकत्वात्सगुणत्वम्। उत्कृष्टत्वेनापवर्गज्ञाने। **पूर्णार्थे**ति। यथा 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुता' इत्युक्ताः पूर्णार्थवन्तः। 'अत इतरज्ज्याय' इति सूत्रादेवकारः। अस्य मुमुक्षोः सकाशाद्रहस्यभजनकर्तुः। **तदवस्थे**ति। भर्त्रवस्थेत्यर्थः। एवं स्पष्टमित्यर्थः। **स्पष्टमिति**। **यस्ये**ति। भक्तस्य। **उद्भटे**ति। भक्त इति वक्तव्ये भक्तत्वस्योद्भटभक्तिभावप्रयुक्तत्वात्प्रयोजकस्य मुख्यत्वात्तदेवोपात्तम्। **अग्र** इति। दृष्टान्तांशे। **ज्ञाप्यमि**ति। अत्र भक्तो ज्ञाप्यः। सामान्ये नपुंसकम्। **तन्महित्वमि**ति। भक्तमहित्वम्। **सूच्यत** इति। सूत्रेण सूच्यते। एवं स्पष्टमित्यर्थः। **काष्ठे**ति। तदीयत्वरूपा। **फलभक्तावि**ति। 'भक्तिरहस्यभजन'मिति श्रुत्युक्तायां मनःकल्पनं मानसीसेवारूपं तनुवित्तजसेवाफलमिति फलभक्तित्वम्। **ने**ति। 'फलभोगनैराश्येने'त्यत्र मुक्तिरूपफलस्य सत्त्वान्न सन्निपततीत्यर्थः। यद्यपि तदीयत्वस्य सामीप्यमुक्तित्वम्, तथापि सामीप्ये दासत्वेन दासीत्वेन सुहृत्त्वेन स्थित्यभावान्न प्रायपाठपठितसामीप्यमुक्तित्वम्। तत्र सुहृत्त्वरूपभक्त्यभावात्। वस्तुतस्तु प्रायपाठपठितसामीप्ये दासत्वदासीत्वे सोपाधिके, न तु निरुपाधिके। आत्मकामस्य नोपाधित्वम्। 'अकाम आप्तकाम आत्मकाम' इति श्रुतावकामत्वानन्तरमात्मकामत्वश्रावणात्सकलोपाधिनैराश्यात्। **विषयवाक्य** इति। 'भक्तिरहस्यभजन'मित्यादिरूपे तदाक्षिप्त 'एतदत्र विचार्यत' इत्यादिभाष्योक्ते च। भजतीत्युक्त्या भजनविषयतयेत्यादिः। अक्षरस्य ज्ञानविषयत्वात्। **श्यामे**ति। पूर्वमानन्दमय-

---

१. तन्महत्त्वमिति शोधितपाठः।

भाष्यप्रकाशः

शांकराचार्यास्तु, 'गतेरर्थवत्त्व'मिति द्विसूत्रमधिकरणमङ्गीकृत्य, क्वचित् पुण्यपापहानसन्निधौ देवयानः पन्था श्रूयते, क्वचिन्न । स किं सर्वत्र संनिपतेन्न वेति संशये, उपायनवत् सर्वत्रेति प्राप्तम् । तत्राह । गतेः देवयानस्य पथः, अर्थवत्त्वमुभयथा विभागेनेत्युक्त्वा क्वचिदर्थवती गतिः, क्वचिन्नेति विभागस्वरूपं व्याचक्रुः । तन्मन्दम् । एकस्य प्रकारस्य गतिसार्थक्यं प्रत्यहेतुतया सौत्रस्योभयथापदस्य विरोधात् ।

भास्कराचार्यास्तु, उभयथेत्यस्य सुकृतनिवृत्त्या दुष्कृतनिवृत्त्या चेत्यर्थमाहुः । पूर्वव्याख्यानादिदमेव समीचीनम् । सूत्रस्थपदसङ्गतेः ।

वाचस्पतिमिश्रास्तु, यदि पुण्यमपि निवर्तते, किमर्था तर्हि गतिरिति भास्कराचार्योक्तमवतारणं सूत्रव्याख्यानं चानूद्याहुः । तैरनाशङ्कनीयमेवाशङ्कितम्, विद्याक्षिप्तायां हि गतौ केयमाशङ्का, यदि क्षीणसुकृतः किमर्थमयं यातीति । न हीयं सुकृतनिबन्धना गतिः, अपि तु विद्यानिबन्धनेति । तस्माद्वृद्धोक्तमेवोपवर्णनं साध्विति । तन्मन्दम् । विद्याक्षिप्ताया एव गतेरर्थवत्त्वस्य सूत्रे प्रकारद्वयेन समर्थितत्वात् । तत्र प्रकाराकाङ्क्षायामर्थशब्दस्य पञ्चस्वर्थेषु निवृत्तेरप्युक्तत्वात् तदभिप्रेत्य द्वेधा निवृत्त्यार्थवत्त्वव्याख्याने दोषाभावात् । तद्व्याख्येयवृद्धोक्तौ त्वर्थशब्दस्य प्रयोजनार्थताया निवृत्त्यर्थताया वा उपगमेऽप्युभयथेति पदासामञ्जस्यं दुर्वारमेव, अतो वृथायमाडम्बरः । किञ्च । मतद्वयेपि देहवियोगकाल एव द्विविधकर्मक्षयस्याङ्गीकृतत्वात् ब्रह्मणश्च व्यापकत्वाद्गतिवैयर्थ्यं तु मतद्वयेपि नापैति ।

यत्पुनर्भास्कराचार्यैः पर्यङ्कस्थस्य ब्रह्मणः कार्यब्रह्मत्वमुपगतम् । तदपि मन्दम् । हेत्वदर्शनात् । नच साकारत्वमेव हेतुरिति वाच्यम् । तस्य कार्यासाधारणतायाः प्रागेव बहुधास्माभिर्निरस्तत्वेनाभिमानमात्रत्वात् । नच 'यजूदरः सामशिरा' इति श्लोकरूपया तत्स्वरूपसंग्राहकश्रु-

रश्मिः ।

निरूपणेन स्मृतविरुद्धधर्मौ निरूपितौ । तत्र श्रीनिकेतत्वेन लक्ष्मीसहस्रलीलाभिः सेव्यमान उक्तः, तस्य शृङ्गाररसरूपत्वाच्छ्यामावदातत्वं भक्त्यर्थं सौत्रदृष्टान्तेन प्रतिपादितम् । आध्यानाय द्वितीयस्कन्धे इदं रूपं द्रष्टव्यम् । **अर्थवत्त्वं** पुण्यपापहानवत्त्वम् । उभाववयवौ यस्येत्युभयं तस्मात्प्रकारे थाल् । एतदाह **विभागेनेति** । **एकस्येति** । क्वचिन्नेत्युक्तस्य । सूत्रव्याख्यानं पूर्वोक्तम् । **अनाशङ्कनीयमिति** । यदि पुण्यमपि निवर्तते, किमर्था तर्हि गतिरित्यनाशङ्कनीयम् । **विद्याक्षिप्तेति** । विद्याप्रेरितायाम् । **आशङ्केति** । पुण्यप्रेरितत्वाशङ्का । **यातीतीति** । आशङ्केति बोध्यम् । सुकृतेन निबध्यते साध्यसाधनभावसम्बन्धेनेति सुकृतनिबन्धना । 'शाङ्करव्याख्यानापेक्षयेदमेव समीचीन'मित्युक्तत्वादधोक्षजत्वं विस्मृत्य 'पुण्यः पुण्येन भवती'ति श्रुत्या पुण्यरूपभगवत्प्राप्तिः पुण्येन भवतीत्याशयेनाहुः **विद्याक्षिप्ताया** इति । सुकृतनिबन्धनाया व्यवच्छेदक एवकारः । **अर्थवत्त्वस्येति** । व्याख्यातमिदं पदम् । **तत्र प्रकारेति** । सुकृतदुष्कृतप्रकारद्वये । प्रकारः निवृत्तसुकृतो निवृत्तदुष्कृत इत्यत्र निवृत्तत्वं निवृत्तिः । **पञ्चस्विति** । 'अर्थोऽभिधेयरैवस्त्वि'त्युक्तेषु । **अर्थवत्त्वेति** । अर्थवत्त्वमर्थ एव निवृत्तिरित्यर्थस्तद्व्याख्याने । **दुर्वारमिति** । एतदुपपादितं पूर्वम् । **आडम्बरः** समारम्भः । **गतीति** । व्यापकस्य प्राप्तत्वात्तत्प्राप्त्यर्थकगतिवैयर्थ्यम् । **नापैतीति** । न आ अप एतीति छेदः । **पर्यङ्कस्थस्येति** । इयं प्रागुक्ता । पर्यङ्कविद्यायां कार्यब्रह्मप्राप्तिरित्यत्र तद्भाष्यम् । **तस्येति** । साकारत्वस्य । **प्रागेवेति** । सर्ववेदान्तप्रत्ययाधिकरण एव । **न चेति** । 'यजूदरः सामशिरा असावृङ्मूर्तिरव्ययः । स च ब्रह्मेति

भाष्यप्रकाशः ।

त्योक्तं वेदरूपत्वमेव हेतुरिति युक्तम् । तदा मनोमयत्वेन भगवद्धर्मरूपतयापि नित्यत्वानपायात् । नच द्वैतापत्तिः । तस्या अपि प्रागेवाभेदस्वरूपविचार एव निरस्तत्वात् । उपासकस्य लिङ्गशरीरवत्त्वं वेदात्मकस्थूलशरीरवत्त्वं च युक्तमिति बोध्यम् ।

रामानुजाचार्यास्तु, संपरायाधिकरणं पञ्चसूत्रमङ्गीकृत्य, तत्र देहपातसमय एव यावत्कर्मक्षयं सूत्रद्वयेन व्याख्याय, गतिसूत्रं पूर्वपक्षत्वेन व्याकुर्वन्ति । गतेर्देवयानगतिश्रुतेः । उभयथा अर्थवत्त्वं सुकृतदुष्कृतयोरेकदेशस्य देहवियोगकाले हानिः शेषस्य पश्चादित्युभयथा कर्मक्षये सत्येवार्थवत्त्वम्, अन्यथा हि विरोधः । देहत्यागसमय एव सर्वकर्मक्षये सूक्ष्मदेहस्यापि नाशात् केवलस्य गमनं तु विरुध्येतेति । एतस्योत्तरमुपपन्नसूत्रे । उपपन्न एवोत्क्रान्तिकाले सर्वकर्मक्षयः । कथम् । तल्लक्षणार्थोपलब्धेः । 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षन् क्रीडन् रममाण' इत्यादिषु क्षीणकर्मण आविर्भूतस्वरूपस्यापि देहसम्बन्धाख्य-स्यार्थस्योपलब्धेः । विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकापि सर्वकर्मणां निरवशेषक्षयेपि स्वफलभूतब्रह्मप्राप्तिप्रदानाय देवयानेन पथा गमयितुं सूक्ष्मशरीरं स्थापयति, यथा लोके केनचित् तडागादिके कृते, तस्य पुंसो नाशोत्तरमप्यन्ये तडागादिकमशिथिलं कृत्वा स्थापयन्ति, तद्वदि-त्येवं व्याकुर्वन्ति । अन्यापेक्षया इदमेवातिसुन्दरम् । अस्मन्मते तु यदेतन्न विचारितं तत् 'छन्दत' इति सूत्रे भगवदिच्छायाः कारणत्वोक्त्या यादृश्येच्छया यो यादृगधिकारी तस्य तस्य तदा तदा कर्मक्षयस्तया तया विद्ययेति न कुत्रापि कल्पना, न वा श्रुतिविरोध इत्यस्य निर्णयस्यार्थादेव सिद्धिरिति बोध्यम् ॥ ३० ॥ इत्यष्टममुपपन्नाधिकरणम् ॥ ८ ॥

रश्मिः ।

विज्ञेय ऋषिब्रह्मोभयोर्महा'निति श्लोकः । **तदेति** । पर्यङ्कस्थदशायाम् । **नित्यत्वेति** । वेदनित्यत्वा-नपायात् । **प्रागेवेति** । पादारम्भे 'न वा प्रकरणभेदादि'ति सूत्रभाष्यादौ, 'सर्वाभेदादन्यत्रेमे' इति सूत्र-भाष्ये च । तर्हि 'यजूदर' इत्यस्य का व्यवस्थेत्यत आहुः **उपासकस्येति** । श्यामावदातत्वमुक्तं स चाकाशशरीरः आकाशस्य 'भूतानां छिद्रदातृत्वं बहिरन्तरमेव चे'ति लक्षणा 'छिद्रा व्योम्नीव चेतना' इति चेतनच्छिद्रकाः उपासका भवन्ति, तत्रैकस्योपासकस्य । 'स एष जीवो विवरप्रसूति'रिति श्लोकार्थमाहुः **लिङ्गशरीरेति** । **युक्तमिति** । अत्रैवं प्रतिभाति । 'तस्माद्वा एतस्मादात्मन आकाशः संभूत' इत्यादि-श्रुत्याऽत्रिवृत्कृतभूतव'च्छिद्रा व्योम्नीव चेतना' इति श्र्याचार्योक्तेरात्माकाशरूपजीवाद्वायुः पञ्चधा प्राणात्मा वायोरग्निरौदर्यादिः । अग्नेरापः शरीरे दृश्यमानाः । ताभ्यः पृथिवी अस्थिरूपा । 'यत्कठिनं सा पृथिवी'ति श्रुतेः । तस्या ओषधयः केशाः तेभ्योऽन्नं लिक्षाः । तस्मात्पुरुषो यूका इति । पुरुषोऽन्नरसमय इति । सकलसाधारणं कर्मजन्यं युक्तम् । कारणे तथा दर्शनात् । नित्यलीलास्थानां तु शरीरे भक्तम-नोरथेनात्मजन्ये, न तु कर्मजन्ये । श्रुतिरूपाणामिच्छा तु 'भद्रं कर्णेभिः शृणुयाम देवा' इति श्रुत्युक्ते-न्द्रियैः शरीरेण चेति तदुभयविषयिणीति नित्यलीलास्थभक्तानां लिङ्गशरीरवत्त्वं वेदात्मकस्थूलशरीरवत्त्वं च युक्तमिति बोध्यमित्यर्थः । **सूक्ष्मदेहस्येति** । कर्मजन्यस्य । **केवलस्येति** । जीवस्य । **स्वय-मिति** । कर्मपूर्वप्रज्ञारहिता । 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति बृहदारण्यकात् । **तडागादि-कमिति** । केनचित्कृतमेव । **श्रुतिविरोध** इति । श्रुतीनां पुण्यपापसन्निधौ देवयानपथि श्रुतिः । 'पुण्यः पुण्येन भवती'ति श्रुतिः । 'यजूदर' इति श्रुतिः । 'परं ज्योतिरुपसम्पद्ये'ति श्रुतिः । एतासां विरोधः । **सिद्धिरिति** । असन्दिग्धत्वे पर्यवसानमिति भावः ॥ ३० ॥ **इत्यष्टममुपपन्नाधिकरणम्** ॥ ८ ॥

अनियमः सर्वासमाविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥ (३-३-९)

अथर्वणोपनिषत्सु पठ्यते 'परब्रह्मैतत् यो धारयति रसति भजति ध्यायते प्रेमति शृणोति श्रावयत्युपदिशत्याचरति सोऽमृतो भवति सोऽमृतो भवती'ति । तत्र धारणादीनां समुदितानामेवामृतसाधकत्वम्, उत प्रत्येकमपीति भवति संशयः । अत्र धारणादिसाधनकलापमुक्त्वा फलमुच्यत इति समुदितानामेव मुक्तिसाधकत्वम् । उपलक्षणं चैतत् । श्रवणादिनवविधभक्तीनामप्येवमेव तथात्वमिति पूर्वपक्षे, सिद्धान्तमाह अनियम इति । समुदितानामेव तेषां फलसाधकत्वमिति नियमो नास्तीत्यर्थः । अत्रोपपत्तिमाह सर्वासामविरोध इति । 'चिन्तयँश्चेतसा कृष्णं मुक्तो भवति संसृते'रिति श्रुत्या चिन्तनमात्रस्य तथात्व-

भाष्यप्रकाशः ।

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥ एवं पुष्टिभक्तेः फलरूपत्वं तादृशभक्तस्य स्वरूपं च निरूप्य ततो न्यूनाया अपि मर्यादाभक्तेर्ज्ञानमार्गादुत्कर्षं विषयोत्कर्षात् बोधयितुं मर्यादाभक्तिसाध्यायां मुक्तौ सर्वा भक्तयः सन्निपतन्ति, किं वा प्रत्येकमेवेतरनिरपेक्षाः मुक्तिं साधयन्तीति विचारयितुमधिकरणमारभत इत्याशयेन विषयादिकमाहुः अथर्वणेत्यादि । अत्र सर्वाङ्गे मनोधारणं करोतीति धारयतिपदार्थः । रसति कीर्तयति जपतीत्यर्थः । भजति शारीरादिना सेवते । ध्यायते एकाङ्गं लीलां वा चिन्तयति । प्रेमति युधिष्ठिरादिवत् स्निह्यति । शृणोति श्रावयतीति प्रकटार्थम् । उपदिशति मन्त्रद्वारा बोधयति । आचरति भगवद्धर्मानिति शेषः । एवमत्र नवोक्ताः । अयं च शाखान्तरीयः पाठः । प्रसिद्धपाठे तु 'ध्यायति रसति भजती'ति त्रयमेवोच्यते, तदाप्युपलक्षणविधया अन्या अन्यत्रोक्ता अपि समायान्ति । संशयपूर्वपक्षौ स्पष्टौ । सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति समुदितानामित्यादि । अत्रेति । अनियमे ।

रश्मिः ।

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥ फलभक्तौ मुक्तिनैरपेक्ष्यमुक्तम्, तदग्रे मुक्तिविचारं विरुणद्धीत्यालोच्याहुः एवं पुष्टीति । गतिसूत्रे उक्तायाः उपपन्नसूत्रे फलरूपत्वम् । स्वरूपं दासदासीसुहृद्रूपम् । मर्यादेति । गतिसूत्रोक्ता या मर्यादाभक्तिस्तत्साध्यायाम् । इतरेति । स्वेतरभक्तिनिरपेक्षाः एकैकेत्यर्थः । धारयतीति । धारणां करोतीत्यर्थः । कीर्तयतीति । 'रस शब्द' इति धातुपाठात् । मानसं कीर्तनमित्याहुः जपतीति । 'जप मानसे' । सेवत इति । 'भज सेवायाम्' । एकाङ्गमिति । ध्यायतीत्यस्य ध्यानं करोतीत्यर्थाद्ध्यानस्वरूपमुक्तम्, 'वैकुण्ठलीलाभिध्यान'मिति तृतीयस्कन्धादाहुः लीलां वेति । 'ध्यै चिन्तायाम्'मिति धातुपाठादाहुः चिन्तयतीति । भगवदिति । मध्यमाधिकारे भगवद्धर्माचरणम् । अन्या इति । भक्तयः । अन्यत्रेति । श्रुत्यन्तरेषु । संशयेति । पूर्वपक्षस्तु अत्रेत्यादि । तथात्वं फलसाधकत्वम् । एवमेवेति । धारणादिकलापवदेव समुदितानां तथात्वं फलसाधकत्वम् । एवाहेति । केवलेति भावविशेषणादेवकारः । तथाच पुष्टि-

१ तथात्वम् । २ तत्र ।

मुच्यते । 'पञ्चपदीं जप'न्नित्याद्युक्त्वा 'ब्रह्म सम्पद्यते ब्रह्म सम्पद्यत' इति श्रुत्या कीर्तनमात्रस्य तथात्वमुच्यते । तथाच प्रत्येकपक्ष एव सर्वासां श्रुतीनामविरोधः स्यात् । एवं सति 'परब्रह्मैतत् यो धारयती'त्यादिषु 'सोऽमृतो भवती'ति पदं प्रत्येकं सम्बध्यत इति ज्ञेयम् ।

ननु यथा दण्डादीनां प्रत्येकं घटहेतुत्वोक्तावपि नैकस्यैव तज्जनकत्वम्, एवमत्राप्येकैकस्य चिन्तनादेस्तथात्वोक्तावपि फलसाधकत्वं समुदितानामेव तेषामिति चेत् । मैवम् । योऽर्थो यत्प्रमाणैकसमधिगम्यः, स तेन प्रमाणेन यथा सिध्यति, तथा मन्तव्यः । दण्डादेस्तथात्वं प्रत्यक्षेण गृह्यत इति तत्र तथास्तु, प्रकृते तु तेषां तथात्वमलौकिकशब्दैकसमधिगम्यम् । श्रुतिस्तूक्तैव । नचोक्तन्यायः श्रुतिष्वपि तात्पर्यनिर्णायको भवतीति वाच्यम् । अलौकिकेऽर्थे लौकिकस्यासामर्थ्यात् । अन्यथा ब्रह्मणा मनसैव प्रजाजनने निषेकादिकमपि कल्प्येत । स्मृतिरपि 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ।' 'एतावान् सांख्ययोगाभ्या'मित्युपक्रम्य, 'अन्ते नारायणस्मृति'रित्यादिरूपैवमेवाह । इममेवार्थं हृदि कृत्वाह सूत्रकारः शब्दानुमानाभ्यामिति । श्रुतिस्मृतिभ्यामित्यर्थः । ते चोक्ते ।

एतेन सूत्रकारस्यान्योऽप्यनुशयोऽस्तीति भाति । यत्रोक्तसाधनस्तोमसम्पत्तिरेकस्मिन् भक्तेऽस्ति, तत्रैकेनैव मुक्तावितरसाधनत्वबोधकश्रुतिविरोधाच्छ्रवणकीर्तनस्मरणानां मुक्त्यव्यवहितपूर्वक्षणे युगपदपि सम्भवादन्यथासिद्धिसम्भवे विनिगमकाभावादेकेनैव मुक्तिरिति न नियमः । अतः प्रत्येकसाधकत्वबोधिकानां

भाष्यप्रकाशः ।

किञ्चिदाशङ्क्य परिहरन्ति नन्वित्यादि । एवमेवाहेत्यन्तम् । एवमेवाहेति । प्रत्येकपक्षमेवाह । एवं प्रत्येकपक्षं निर्णीय यत्रासां समुदायस्तत्र कस्य कारणतेत्याकाङ्क्षायां तामप्येतेन पूरयतीत्याहुः एतेनेत्यादि । एतेनेति । अनियम इत्यादिकथनेन । तमेवानुशयं व्युत्पादयन्ति यत्रोक्तेत्यादि । युगपदपि सम्भवादित्ययं अन्यथासिद्धिसम्भवे हेतुः । विनिगमकाभावादिति । त्रयाणां मध्ये कस्यान्यथासिद्धिरित्यत्र विनिगमकाभावात् । अत इति । अनियमात् । ननु प्रत्येकपक्षे भक्तिकारणत्वश्रुतीनां मिथोविरोधाद्भक्तीनां न प्रत्येकं कारणत्वम्, तथा समुदितानामपि कारणत्वं मास्तु, ज्ञान एव तदुपक्षयस्य वक्तुं शक्यत्वात्, श्रुतीनां चोपचारेण नेतुं शक्यत्वादित्येवं तर्ह्येकेत्यादिना आशङ्क्य, तत्र भक्तीनां मुक्त्यकारणत्वे

रश्मिः ।

भावेन मर्यादाभावकैवल्यवदत्रापि प्रत्येकं कैवल्यमित्यर्थः । तामिति । आकाङ्क्षाम् । अनियम इत्यादीति । आदिना पदद्वयम् । अन्यथासिद्धीति । श्रवणजन्यमुक्तिं प्रति कारणतां ज्ञात्वैव समुदितजन्यमुक्तिं प्रति कार(ण)ताज्ञानादन्यथासिद्धिः । त्रयाणामिति । एकमुक्तिकारणानाम् । मिथ इति । तृणारणिमणिन्यायोऽत्र न, किन्तु 'विरोधे विकल्प' इति मनुस्मृतिरपि न, किन्तु मुक्तीच्छुभिः तदर्थं का भक्तिरिति विरोधो भक्तिसहानवस्थानलक्षणस्तस्मात् । न प्रतीति । सुन्दोपसुन्दन्यायेनाभावात् । ज्ञान एवेति । 'भक्त्या विमुच्यते'त्यत्र भक्त्येति करणतृतीयानिर्वाहाय तथा । 'भक्त्या जानाति चाव्यय'मिति श्रुतेरेवकारः । हेतुतृतीयाज्ञानं फलात्मकमिति श्रुतिविरोधमाशङ्क्याहुः श्रुतीनामिति । उप-

सर्वासां श्रुतीनां मिथोऽविरोधः । तर्ह्येकत्र तथात्वे सर्वत्रैव तथास्त्वित्याशङ्क्य तत्र बाधकमाह शब्दानुमानाभ्यामिति । पूर्ववत् । तत्र प्रत्येकमपि मुक्तिहेतुत्वमुच्यत इति न तथेत्यर्थः । यत्र प्रत्येकमपि तथात्वम्, तत्र किमु वक्तव्यं समुदितानां तथात्व इति भावः । तेन श्लिष्टः प्रयोगोऽयमिति ज्ञेयम् ॥ ३१ ॥

इति तृतीयाध्याये तृतीयपादे नवममनियमाधिकरणम् ॥ ९ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ (३-३-१०)

पूर्वं मुमुक्षुभिर्मुक्तिसाधनत्वेन क्रियमाणानां भगवद्धर्माणां मुक्तिसाधनप्रकारो विचारितः, अधुना तु भगवान् स्वविचारितकार्यं लौकिकैश्वर्याद्यशक्यं ज्ञात्वा, स्वैश्वर्यादिकं दत्वा, येन जीवेन तत् कारयति, स जीवस्तैर्धर्मैर्मुक्तो भवति, न वेति विचार्यते ।

भाष्यप्रकाशः ।

बाधकमाहेत्यर्थः । तत्रेति । श्रुतौ स्मृतौ च । तथाच श्रुतेरुपचारसहिष्णुत्वेपि स्मृतौ 'केवलेन हि भावेने'ति केवलपदान्नोपचारसहिष्णुत्वम्, अतस्तदुपबृंहितश्रुतावपि यथाश्रुतमेवादरणीयमित्यर्थः । ननु तर्हि पूर्वं विकल्पितस्य दोषस्य कथं परिहार इत्यत आहुः यत्र प्रत्येकमित्यादि । तथाच तादृशस्थले सर्वासां भक्तीनां सन्निपातात् फलशैघ्र्यं बोध्यमित्यर्थः । श्लिष्ट इति । 'अनियम' इत्यनेन एकमेव कर्तव्यम्, न द्वयं त्रयमित्यस्याप्यनियमस्य संग्रहान्नानार्थसंश्रय इत्यर्थः । अत्र भगवदभिज्ञानद्वारा मुक्तिजनिकानां भक्तीनां विचारेण ताभिर्ज्ञेयस्य भगवतो निर्मलत्वबोधकं विरजमिति विशेषणं प्रतिपादितं बोध्यम् ।

अन्ये तु अर्चिरादिगतिः सर्वासु विद्यासु, उत यत्र श्रूयते तत्रेति संशये, सर्वत्रेति सिद्धान्तयन्ति । अस्मिन् सिद्धान्ते तु यत्रातिकृपा, तत्र सद्योमुक्तिः । इतरत्र त्वर्चिरादिगतिरिति विशेषो गतिसूत्रादेव सिध्यतीति बोध्यम् ॥ ३१ ॥ इति **नवममनियमाधिकरणम्** ॥ ९ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ पूर्वाधिकरणसङ्गतिं वदन्तोऽधिकरणप्रयोजनमाहुः पूर्वमित्यादि । मुक्तो भवति, न वेति । सायुज्यं प्राप्नोति, न वा । तथाच यदि तैः प्राप्नोति, तदा भक्तित्वम्, न मुक्तिजनकतावच्छेदकम् । तेषु भक्तित्वाभावात् ।

रश्मिः ।

चारेणेति । हेतुतृतीयायाः करणे उपचारः फलात्मकज्ञानस्य साधनज्ञान उपचारः तेन । **पूर्वमिति** । भाष्येऽन्यानुशयपक्षे विकल्पितस्य समुदिताभिर्मुक्तिः श्रुतीनां मिथो विरोध इत्येकैकस्या मुक्तिर्नेति विकल्पितप्रायस्य दोषस्य साधनाज्ञानस्य संशयग्रन्थोक्तस्य वा साधनाज्ञानस्य । **यत्र प्रत्येकमित्यादीति** । **तथात्वमिति** । तृणारणिमणिन्यायेन मुक्तिसाधकत्वम् । **भाव इति** । कैमुतिकन्याये भावः । **एकमेवेति** । भजनम् । **संग्रहात्** सूचनात् । अनियमादिपदद्वये नानार्थसंश्रय इत्यर्थः । 'भक्त्या मामभी'-तिवाक्यादाहुः **अत्रेति** । **विरजमिति** । 'प्रवर्तते यत्र रजस्तम' इति द्वितीयस्कन्धनवमाध्यायवाक्यान्निर्मलपदसामानाधिकरण्यम् । **विशेषणमिति** । एकमित्यस्य विशेषणम् । 'अद्राक्षमेकमासीन'मिति तृतीयस्कन्धवाक्ये । **अस्मिन्निति** । प्रत्यक्षेऽसत्सिद्धान्ते । **गतिसूत्रादिति** । भक्तिमार्गस्य भगवद्वशीकारकत्वाद्भक्तेच्छया यत्रातिकृपारूपलीला, तत्र सद्योमुक्तिरित्यादि सिध्यतीत्यर्थः ॥ ३१ ॥ **इति नवममनियमाधिकरणम्** ॥ ९ ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥ **न मुक्तीति** । किंतु भगवद्धर्मत्वं

१ (ननु प्रत्येकपक्ष इत्यादिनोक्तस्योभयो. कारणत्वाभावस्य) इतः पूर्वमेव चिद्धान्तर्गतम् ।

तत्र जीवकृतभगवद्विषयकधर्माणां यत्र तत्साधकत्वम्, तत्र भगवदीयानां धर्माणां तत्साधकत्वं सुतरामेव । तेषां स्वकृत्यसाध्यत्वेनाविधेयत्वात्तत्साधनेष्वप्रवेशोपीति सन्देहे निर्णयमाह यावदित्यादि ।

यस्मिन् जीवे यत्कार्यसाधनार्थमधिकारो भगवता दत्तः, तत्कार्यसाधनक्षमास्तस्मिन् ये स्वधर्मा भगवता स्थापिताः, त आधिकारिका इत्युच्यन्ते । तत्कार्यसम्पत्तिरेव तदधिकारप्रयोजनमिति तावदेव तेषां तस्मिन् स्थितिरित्यर्थः । एवं सति तत्सम्पत्तौ सोऽपि निवर्तत इति तत्सम्बन्धिनो धर्मा अपि निवर्तन्त इति मुक्तिपर्यन्तं न तेषां व्यापारसम्भवः । भगवता तथैव विचारितत्वात् ।

भाष्यप्रकाशः ।

यदि न प्राप्नोति, तदा भगवद्धर्मत्वमपि न तथा । अत्राद्ये पूर्वोक्तश्रुतिस्मृतिविरोधः, द्वितीये भगवद्धर्माणां मुक्तिप्रतिबन्धकत्वप्रसङ्ग इत्यतो विचार्यत इत्यर्थः । एवञ्च ते भगवद्धर्मा विषयः । मुक्तिहेतवो न वेति संशयः । ते च 'यदादित्यगतं तेज' इत्यादिवाक्योक्ताः प्रतर्दनसंवाद इन्द्रेण स्वस्मिन्नुक्तास्तादृशा अन्यत्रापि ज्ञेयाः ।

पूर्वपक्षमाहुः तत्रेत्यादि । अत्र द्वौ पूर्वपक्षौ । तत्र भगवान् यदा स्वकार्यकर्तृत्वेन अङ्गीकरोति, तदा तान् धर्मान् ददातीति वरणहेतुकत्वात्तैरपि मुक्तिरित्येकः सुतरामित्यन्तेनोक्तः । तादर्थ्येन विहितत्वाभावान्नेत्यपरः अप्रवेशोपीत्यन्तेनोक्तः । एवं सत्युभयत्रापि मुक्तिसद्भावात् सन्देह एव पर्यवस्यतीत्यतः सन्देहे निर्णयमाहेत्युक्तम् ।

सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति यस्मिन्नित्यादि । भवत्वेवम्, तथाप्युक्तसन्देहस्य कथं निवृत्तिरित्यतस्तदर्थं सूत्रतात्पर्यं स्फुटीकुर्वन्ति एवं सतीत्यादि । कार्यसम्पादनाय भगवता दत्तानां धर्माणां यावत्कार्यमवस्थाने सति कार्यसम्पत्तावधिकारोपि निवर्तत इति तन्निवृत्तौ ते धर्मा अपि निवर्तन्ते । 'लोकवत्तु लीले'ति न्यायात् । अतो निवृत्तत्वादेव न मुक्तिपर्यन्तं तेषां व्यापारसम्भवः । नच तन्निवृत्तौ न्यायमात्रमेव मानम्, अपि तु 'स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वर' इत्यादीनि वाक्यान्यपि । अतो भगवता तेषां कार्यार्थताया एव विचारितत्वाद्वरणहेतुकत्वेपि नैतेषां मुक्तिहेतुत्वम् । अतो भक्त्यभावे तेषां प्रकृतौ लयः । यदि तेऽधिकारिणो भक्ताः, तदाधि-

रश्मिः ।

मुक्तिजनकतावच्छेदकम् । न तथेति । मुक्तिजनकतावच्छेदकम् । आद्य इति । प्राप्तिपक्षे । द्वितीय इति । अप्राप्तिपक्षे । स्वस्मिन्निति । 'मामुपास्वे'ति । अन्यत्रापीति । भगवान् शेषः भगवान् व्यासः भगवानग्निः भगवान्मारुत इत्यत्रापि । अङ्गीकरोतीति । 'यमेवैष वृणुत' इति श्रुतेः । ददातीति । 'तस्यैष आत्मा विवृणुते तनुं स्वा'मित्यत्र श्रुतावात्मनोप्यात्मा स्वां तनुं विवृणुते वृतभक्तात्मानं स्वां तनुं स्वतनुत्वेन प्रकाशयति । विशेषेणाङ्गीकुरुत इति वार्थः । 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'ति वाक्यात् । विहितत्वेति । भगवद्धर्माणां तथा । लोकवदिति । यथा लोके पाठको भक्तिवशाद्भगवद्गुणवान् तदा न स पाठकः, पाठकत्वस्य गतत्वात्, किंतु भक्त इत्युच्यते । भगवद्भावाच्युतौ तु पाठक इत्युच्यते तद्वत् । भगवतेति भाष्यं विवरीतुमाहुः नच तदिति । विवृण्वन्ति स्म भगवतेति । तेषामिति । भगवद्धर्माणां कार्यं भगवति व्यासे वेदशाखाविभागः, आचार्येषु मार्गप्रकटनम् । तदर्थतायाः । तावत्कार्यदर्शनादेवकारः । वरणहेतुकत्वं भगवद्धर्मेषु । प्रकाशाश्रयन्यायेन धर्माणां प्रमेयबलमाशङ्क्याहुः नैतेषामिति । प्रमाणाभावादिति भावः । प्रकृताविति ।

मुक्तिस्तु भक्त्यैवेति भावः । यच्च 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पद'मिति वाक्यम्, तत्त्वाकल्पान्तं येषामधिकारः सप्तर्षिप्रभृतीनां तद्विषयकमिति ज्ञेयम् । अन्यथा भगवद्दत्ताधिकारसामर्थ्यस्य भरतस्य स्वाधिकारसमाप्तौ मुक्तिं न वदेत् । 'कृतात्मानः' इति

भाष्यप्रकाशः ।

कारसमाप्त्यनन्तरं भक्तिः फलोन्मुखीभवतीति न भक्तित्वस्य मुक्तिजनकतावच्छेदकत्वहानिरिति मुक्तिस्तु भक्त्यैवेति भाव इत्यर्थः । ननु यद्याधिकारिकाणां न मुक्तिपर्यन्तो व्यापारः, तर्हि 'ब्रह्मणा सह ते सर्वे' इति वाक्ये अधिकारान्ते मुक्तिकथनं विरुद्धं स्यादित्यत आहुः यच्चेत्यादि । तथाच तद्भक्तेस्तदानीमेव फलोन्मुख्यस्य भगवता विचारितत्वात्तदापि तथैव तन्मुक्तिः, न त्वाधिकारिकैर्गुणैरित्यदोषः । अत्र गमकमाहुः अन्यथेत्यादि । तथाच यद्याधिकारिकैरेव गुणैर्मुक्तिः स्यात्, तदा 'स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् । उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभि'रिति तादृशोपासनया तथा मुक्तिं न वदेत् । अत एतदनुरोधेन पूर्वोक्तवाक्येपि साधनान्तरेणैव मुक्तिर्बोध्येत्यर्थः । तत्रापि गमकमाहुः कृतेत्यादि । तथाचात्रापि तथेत्यर्थः । एतेन प्रशान्तारुणलोचनत्वं विचारितम् । प्रशान्तं ज्ञानम्, अरुणं क्रिया, रजोरूपत्वात् । तदुभयविचारात्मकं लोचनम् । तेषु तेष्वधिकारिषु ज्ञानक्रिययोः कार्यार्थं प्रदानादिति बोध्यम् ।

अन्ये त्वत्र अपान्तरतमवशिष्ठप्रभृतीनां पूर्णज्ञानवतां दृष्टपरतत्त्वानामपि व्यासमैत्रावरुणादिरूपजन्मान्तरदर्शनाद्विद्याया न मुक्तिहेतुत्वमित्याशङ्क्य, तन्निरासायाधिकारस्य प्रतिबन्धकत्वात्तत्समाप्तौ पूर्वया विद्ययैव मुक्तिमाहुः ।

रश्मिः ।

नात्र भगवद्धर्मेषु तेषां लय उक्तः । प्रकृतेः स्वरूपात्मिकायाः प्रणवत्वेन नवीनभावजनकत्वात्तत्र लयेपि भगवद्धर्मत्वाभावप्रसङ्गाभावात् । 'शब्दार्थरसरूपधृ'गिति द्वादशस्कन्धात् । ओंकारस्य शब्दत्वात् । यच्चेत्यादीति । सप्तर्षीति । प्रभृतिशब्देन चतुर्दशमन्वन्तराणि दिवाभिमानिदेवता(नि) च ग्राह्याणि । तदानीमिति । अधिकारसमाप्तिकाल एव । पूर्वोक्तेति । 'ब्रह्मणा सह ते सर्वे' इति वाक्ये 'स भुक्तभोगा'मित्यस्मिन्वाक्ये वा साधनान्तरेण भक्त्या । उपासनेन वा । तथेति । साधनान्तरेणैव व्यापिवैकुण्ठे प्रवेश उच्यते, नत्वाधिकारिकगुणैरित्यर्थः । प्रशान्तेति । सूत्रेऽधिकारशब्दात्साधनाध्याये साधनानां पादे भगवद्धर्माणां विचारादधिकार उत्तमोत्तमः साधनं भक्त्यादिरध्यायार्थः भगवद्धर्मा आनन्दमयादेः तत्र 'आनन्दादयः प्रधानस्यो'क्ताः अन्येऽधिकारशब्दात्तृतीयस्कन्धीयाधिकारप्रकरणस्मरणात्' आध्यानाये'ति सूत्रस्मारितध्यानादिविषयाणां तृतीयस्कन्धादाहुः प्रशान्तेति । तेन पूर्वत्रोत्तरत्र च तृतीयवाक्योक्तधर्माणामान्यत्रिकाणां भगवत्परत्वविचार इति पादार्थस्य नाव्याप्तिः । तृतीयवाक्यानि तु 'अद्राक्षमेकमासीन विचिन्वन् दयितं पतिम् । श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् । श्यामावदातं विरजं प्रशान्तारुणलोचनम्' इति षड्विशेषणानि विचारितानि । षष्ठी कला च । अन्यास्तत्रतत्र वक्ष्यन्ते । तेषु तेष्विति । भगवद्व्यासाचार्यादिषु ज्ञानकार्यार्थं प्रदानं ज्ञानस्य । एवं क्रियावतारेषु क्रियाकार्यं प्रथमसुबोधिन्यां स्पष्टम् । अपान्तरतमेति वेदाचार्यनाम । स व्यासो जातः । मैत्रावरुणौ वशिष्ठपितरौ । आदिना मनस्तो नारदः । व्यासमैत्रावरुणादिभी रूप्यते व्यवह्रियते तादृशं

पदात्तेषामपि भगवति कृतान्तःकरणानामेव परस्य भगवतः परपदे व्यापिवैकुण्ठे प्रवेश उच्यते, न त्वाधिकारिकगुणैः ॥ ३२ ॥

इति तृतीयाध्याये तृतीयपादे दशममाधिकारिकाधिकरणम् ॥ १० ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥३३॥ (३-३-११)

ननूक्ताथर्वणोपनिषद्वाक्यैर्भगवद्धर्माणां मुक्तिसाधनत्वमुच्यते, श्रुत्यन्तरेषु 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'ज्ञानादेव तु कैवल्यम्' 'तरति शोकमात्मवित्' 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिषु ज्ञानस्यैव मुक्तिसाधनत्वमुच्यते, श्रुतित्वाविशेषादुभयोस्तथात्वे कारणवैजात्ये कार्यवैजात्यस्यावश्यक-

---

भाष्यप्रकाशः ।

सिद्धान्ते तु तादृशाधिकारस्य भगवद्दत्तत्वात्तादृशाज्ञापरिपालनस्याप्रमत्तत्वेन प्रकरणे तुष्टाद्भगवत एव कृतात्मत्वम्, ततो मुक्तिः, न तु तया विद्ययेति विशेषः । उचितं चैतत् । 'मोक्षमिच्छेज्जनार्दना'दिति वाक्याद्भगवतो मोक्षदातृत्वादिति । नच विद्ययेति युक्तम् । तस्याः सात्त्विकीत्वेन स्वप्नप्रबोधन्यायादविद्ययोपमर्दस्यापि सम्भवादिति । एवमेव ज्ञानपक्षेपि ज्ञेयम् । तेनात्र

भक्ताधिकारिणां मुक्तिरन्यथा प्रकृतौ लयः ।

पुनः सृष्टौ तथैश्वर्यं कर्मिणां पुनरागतिः ॥ १ ॥ इति सर्वोपि विषयः सूचितो ज्ञेयः ॥ ३२ ॥ इति दशममाधिकारिकाधिकरणम् ॥ १० ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥ पूर्वाधिकरणे प्रासङ्गिकविचारेणापि भक्तेरेव मुक्तिकारणत्वे दृढीकृते तदर्थं भगवद्भक्तिरेवावश्यं कार्येति सिध्यति । तथा सति श्रुत्यन्तरे अक्षरज्ञानस्यापि मुक्तिकारणत्वश्रावणात् तस्य का गतिरित्याकाङ्क्षायां तत्प्रकारं विचारयितुमधिकरणमारभत इत्याशयेन विषयसंशयौ पूर्वपक्षकुक्षावेव निक्षिप्य सूत्रमवतारयन्ति नन्वित्यादि । भगवद्धर्माणामिति । भगवद्विषयाणां श्रवणादीनाम् । अत्र उच्यते इत्यन्तेन विषयसंशयतद्बीजान्युक्तानि । श्रुतित्वेत्यादिना पूर्वः पक्ष उच्यते । तथाचैवं वैजात्यस्यावश्यकत्वात्, 'भूयश्चान्ते विश्वमायानिवृत्ति'रिति श्वेताश्वतरश्रुत्या मुक्तेः

रश्मिः ।

जन्मान्तरं तस्य दर्शनात् । कृतात्मत्वमिति । 'ब्रह्मणा सह' इति वाक्योक्तमनूदितम् । स्वप्नप्रबोधेति । एतयोरुपमर्द्योपमर्दकभावः । उपमर्दस्येति । विद्यया सः । ज्ञानपक्ष इति । अज्ञानेन ज्ञानोपमर्दस्य सम्भवात् । अन्यथा भक्त्यभावे । प्रकृतौ स्वरूपे । ज्ञानित्वात् । अन्येषां तु प्रकृतौ । ज्ञानिनां सृष्टौ ज्ञानित्वेनैश्वर्यम् । सर्व इति । भक्तज्ञानिकर्मिविषयः । यावदवस्थितिराधिकारिकाणां वाच्योर्थः । सूत्राणां विश्वतोमुखत्वात्सर्वो विषयः सूचितः ॥ ३२ ॥ इति दशममाधिकारिकाधिकरणम् ॥ १० ॥

अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥ भक्तेरेवेति । पादार्थत्वाद्भगवद्धर्मत्वेन भक्त्युपादानमित्याशयेन भगवद्धर्माणामित्यस्यार्थोयम् । भगवान्भक्तिभक्तिमानि'तिवाक्याद्भगवद्धर्मो भक्तिः । 'तस्य प्रियमेव शिर' इति श्रुतेश्च । उच्यत इतीति । द्वितीयोच्यत इत्यन्तेन । पूर्वपक्षे विषयसंशयनिक्षेपपूर्वकं विषयसंशयतद्बीजानि वदन्त एव तावद्भाष्यं विवृण्वन्ति स्म तथाचेति । वैजात्यस्येति । आथर्वणोपनिषद्वाक्येषु श्रुत्यन्तरेषु मिलितेषु विषयेषु भक्ति-

त्वान्मुक्तौ च तदसम्भवात् 'भक्त्या मामभिजानाती'ति वाक्याद्भक्तौ ज्ञानस्यापि सम्भवाज्ज्ञानेनैव मुक्तिरिति पूर्वपक्षे, ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन् पुरुषोत्तमप्राप्तेरेव मुक्तिपदवाच्यत्वात्तद्भजनस्यैव तत्प्रापकत्वमिति हृदि कृत्वाह अक्षरधियामित्यादि। तुशब्दः पूर्वपक्षनिरासे । वाजसनेयके श्रूयते

भाष्यप्रकाशः।

सर्वमायानिवृत्त्यात्मकत्वेन तस्यां वैजात्यासम्भवात्, ज्ञानकारणत्वबोधकश्रुतेः सावधारणत्वेन भक्तिकारणत्वबोधिकायां च तदभावेन 'भक्त्या मामभी'ति गीतावाक्याद्भक्तौ ज्ञानस्य सम्भवात् 'गतेरर्थवत्त्व'मित्यतीताधिकरणे मर्यादामार्गे ज्ञानस्य मुक्तिसाधनताप्रतिपादनाच्च भक्तेः परम्परया कारणतामादाय भक्तिकारणतावाक्यानां समर्थनीयतया ज्ञानेनैव मुक्तिरिति पूर्वपक्षे, ज्ञानसाधनत्वनिरूपकश्रुतितात्पर्यं निरूपयन् उक्तं हृदि कृत्वा अक्षरज्ञानस्य तां प्रति स्वरूपयोग्यतासम्पादकत्वेन कारणत्वमाहेत्यर्थः। सूत्रं व्याकुर्वन्ति तुशब्दः पूर्वेत्यादि। पूर्वपक्षनिरास इति। पूर्वोक्तरीत्या सावधारणवाक्यसिद्धत्वाज्ज्ञानेनैव मुक्तिरिति पूर्वपक्षनिरासे। तं ज्ञानकारणत्वनिरूपकश्रुतितात्पर्यनिरूपणमुखेनोपपादयन्ति वाजेत्यादि।

अयमर्थः। अस्थूलादिवाक्यस्योपसंहारे 'य एतद्विदित्वा प्रैति स ब्राह्मण' इत्यक्षरवेत्तुर्ब्रह्मत्वमुक्तम्। 'अथ परे'ति वाक्ये च परविद्याया अक्षरज्ञानजनकत्वमेवोक्तम्। तेन ज्ञानरूपे मार्गे इष्टप्राप्त्युपाये अस्थूलत्वादृश्यत्वादिगुणकं यदक्षरं तद्विषयकाण्येव ज्ञानानीष्टप्रापकतया निरूप्यन्ते, न तु पुरुषोत्तमविषयकाणीति ज्ञानविषयविशेषणबलान्निश्चीयते। तत्फलविचारे च 'ब्रह्मविदाप्नोति पर'मिति श्रुतावक्षरब्रह्मविदोऽक्षरात् परस्य प्राप्तिः फलत्वेनोच्यते। नचाक्षरमेव पुरुषोत्तम इति वाच्यम्। परपदप्रयोगवैयर्थ्यापत्तेः। 'दिव्यो ह्यमूर्त' इति मन्त्रे 'अक्षरात् परतः पर' इत्येतस्यापि विरोधापत्तेः। नच तत्राक्षरपदेन प्रकृतिर्वा, जीवात्मा वा ग्राह्य इति युक्तम्। प्रकृतविरोधात्। जगत्कारणभूतस्य चेतनस्यैव तत्राक्षरत्वेन प्रकृतत्वात्। अतस्तत्र 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः

रश्मिः।

ज्ञानरूपसाधनवैजात्यस्य। ज्ञानं भक्तिर्वा साधनमिति संशयः। भक्तिज्ञानप्रतिपादकश्रुतिद्वयं संशयबीजम्। वैजात्येति। पूर्वपक्षत्वाद्वैजात्यासंभव उक्तः। अयं समर्थनीयतयेत्यस्य। भक्तौ ज्ञानस्येति। इदमपि पूर्वपक्षत्वात्। ज्ञानं तु फलात्मकम्। परम्परयेति। फलात्मकज्ञानद्वारा। तामिति। भक्तिं प्रति। ज्ञानेनैवेति। एवकारो भक्तिव्यवच्छेदकः। तमिति। पूर्वपक्षम्। ज्ञानविषयेति। विशेषणमस्थूलत्वादृश्यत्वादिगुणकत्वम्। ब्रह्मविदितिभाष्यं विवृण्वन्ति स्म त- फलेति। भाष्यमुपबृंहणपरमिति मत्वोपबृंह्य वक्तुमाहुः नचेत्यादि। सगुणगुणानां विशेषदर्शनोत्तरमभावात्तर्कः। वाच्यमित्यस्य तर्कितव्यमित्यर्थात्। परपदेति। परिणामाद्वैतत्वाद्विशेषदर्शनोत्तरमपि परत्वादिरूपपुरुषोत्तमगुणानां विशेषदर्शनोत्तरं भावात्। एवं परपदेत्यादिः। पुरुषोत्तमपदाभावादत्राहुः दिव्य इति। 'दिव्यो ह्यमूर्तः पुरुष' इत्यत्र नामैकदेशग्रहणादस्ति पुरुषोत्तमपदमिति। 'विष्णुर्नाम महायोगी महामायो महातपाः। तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तम' इति। यस्तु 'अर्धमात्रा तु निश्चले'त्युक्त्वा 'शुद्धस्फटिकसंकाश किंचित्सूर्यमरीचिवत्। लभते योगयुक्तात्मा पुरुषोत्तमतत्पर' इति योगतत्त्वोपनिषदि। 'अर्धमात्रात्मकः कृष्णः' तस्य लाभसाधकत्वेनोक्तः पुरुषोत्तमः सोऽभेदाच्छब्दभेदेन साध्यसाधनभावः। ग्राह्य इति। एवमक्षरपरं परपदमिति भावः। प्रकृतेति। प्रकृतमक्षरं न प्रकृतिर्न जीवात्मेति भावः। तत्रेति। मुण्डके। प्रकृतत्वादिति। 'तथाक्षरात् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ती'तिश्रुत्या तथा। तत्रेति। मुण्डके।

'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूल'मित्यादि । तथाथर्वणे च 'अथ परा यया तदक्षरमधिगम्यत' इति । तेन ज्ञानमार्गेऽक्षरविषयकाण्येव ज्ञानानि निरूप्यन्ते, पुरुषोत्तमविषयकाणि नेति निश्चीयते । 'ब्रह्मविदाप्नोति पर'मिति श्रुतावक्षरब्रह्मविदोऽक्षरात् परस्य प्राप्तिरुच्यते । 'अक्षरादपि चोत्तम' इति भगवद्वाक्याचाक्षरातीतः पुरुषोत्तमः । 'भक्त्या मामभिजानाती'ति वाक्ये 'मा'मिति पदात् पुरुषोत्तमविषयकं ज्ञानमुच्यते, न त्वक्षरविषयकम् । किञ्च, ब्रह्मभूतस्य भक्तिलाभोक्तेस्तस्य चानन्दांशाविर्भावात्मकत्वात्तस्य चाविद्यानाशजन्यत्वात्तस्य चाक्षरज्ञानजन्यत्वात् पूर्वकक्षाविश्रान्तमेवाक्षरज्ञानम् । एवं सत्यक्षरविषयिणीनां

भाष्यप्रकाशः ।

परमां गतिम्, यं प्राप्य न निवर्तन्ते तद्धाम परमं ममे'ति 'कूटस्थोऽक्षर उच्यत' इति गीतास्मृत्युपबृंहित एव ग्राह्यः । तस्माचाक्षरात् परः पुरुषोत्तम एवेति गीतास्थात् 'अक्षरादपि चोत्तम' इति भगवद्वाक्यतोऽक्षरातीततया निश्चितः, अतस्तत्प्राप्तिरेव फलत्वेन निश्चीयते । तत्कारणविचारे तु श्रुतौ 'ब्रह्मवि'दित्यनेन तद्विवरणर्चि 'ब्रह्म यो वदे'त्यनेन च ज्ञानं प्राप्तृविशेषणत्वेनोच्यत इति स्वरूपयोग्यतासम्पादकमेवाक्षरविषयकं ज्ञानम् । 'भक्त्या मामभी'ति गीतावाक्ये तृतीयया भक्तेः करणत्वं 'मा'मिति पदात् तद्व्यापारभूतं पुरुषोत्तमज्ञानं चोच्यते, न त्वक्षरविषयकम् । किञ्च । यद्यधिगम्यत इत्यस्य प्राप्त्यर्थकत्वमङ्गीक्रियते, तदा तेनाक्षरप्राप्तिर्भवति, सैव 'ब्रह्म वेद ब्रह्मैव भवती'ति श्रुत्यन्तरेणोच्यते । तदापि 'भक्त्या मा'मित्यस्मात् पूर्वं यत् 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते परा'मिति वाक्यम्, तस्मिन् ब्रह्मभूतस्य भक्तिलाभोक्तेर्ब्रह्मभावस्य च स्वरूपलाभरूपत्वेनानन्दाविर्भावात्मकत्वादानन्दाविर्भावस्य चाविद्यानाशजन्यत्वादविद्यानाशस्य चाक्षरज्ञानजन्यत्वात् परप्राप्तिपूर्वकक्षारूपो यो ब्रह्मभावस्तद्विश्रान्तमेवाक्षरज्ञानम् । तेनाक्षरप्राप्तेर्मुक्तित्वं यदुच्यते, तदक्षरस्य परमधामत्वेन पुरुषोत्तमाविनाभावा-

रश्मिः ।

ग्राह्य इति । अमूर्तः पुरुषो ग्राह्यः । **तस्माच्चे**ति । उक्तोपबृंह्यात् । चकारेण भाष्यीयोपबृंहणाद्वक्ष्यमाणात् । भाष्यं संयोज्य विवृण्वन्ति स्म **अक्षरात्पर इति** । **इति निश्चीयत** इति पूर्वान्वयिभाष्यमाहुः । 'अक्षरातीततया निश्चित' इति शब्दभेदेन पूर्वान्वयि । किञ्च । भाष्यं **परस्य प्राप्तिरुच्यत** इति पूर्वान्वयीत्याहुः **अतस्तत्प्राप्तिरेवे**ति । शब्दाध्याहारेणार्थभेदेन च । **भक्त्या मामभी**त्यादिभाष्यं विवरीतुमाहुः **तत्कारणे**ति । परप्राप्तिकारणत्वेन । **ज्ञानं प्राप्त्वि**ति । 'ब्रह्मवि'दित्यत्र 'वि'दित्यत्र प्राप्तुर्विशेषणं ज्ञानम्, 'यो वेदे'त्यत्र प्राप्तुर्विशेषणं ज्ञानम् । ब्रह्मविषयकज्ञानवान् ब्रह्मविषयकज्ञानानुकूलो व्यापारो देवदत्तनिष्ठ इति क्रमेण बोधात् । भाष्यं विवृण्वन्ति स्म **भक्त्या मामभी**ति । **मामिति पदा**दिति । 'अभिजानाती'त्यत्राभिज्ञानानुकूलव्यापार इति ज्ञानस्य विषयतासंबन्धेन 'मा'मित्यस्मत्पदार्थत्वाद्भक्तिव्यापारभूतं पुरुषोत्तमज्ञानं जातम् । तदनुकूलो व्यापारस्तु देवदत्तनिष्ठः । **नत्वि**ति । भक्तिव्यापारभूतमित्यर्थः । किञ्चेति भाष्यं विवरीतुमाहुः **किञ्चे**ति । 'अथ यया तदक्षरमधिगम्यत' इति भाष्योक्तश्रुतेः अक्षरस्याधिगमो ज्ञानं यया साक्षरज्ञानजनिका तस्या भावोऽक्षरज्ञानजनिकात्वम् । टापो ह्रस्वे पुंवद्भावे वा इतोपि लोपः । 'निमित्तापाये नैमित्तिकस्याप्यपाय' इति न्यायादित्याशयेन (अ)क्षरज्ञानजनिकेत्युक्तम् । तत्र विद्या ज्ञानमित्येकस्य जन्यजनकभावो विरुद्ध इति प्रकारान्तरेण व्याख्यामाहुः **यद्यधी**ति । **ब्रह्म वेदे**ति । ब्रह्मविषयिणीं विद्यां चकार करोति वा । विवृण्वन्ति स्म **ब्रह्मभूतस्ये**त्यादिना । **पुरुषोत्तमाविने**ति ।

धियां श्रुतौ मुक्तिसाधनेषु यः अवरोधः प्रवेशनं गणनेति यावत्, स सामान्यतद्भावाभ्यां हेतुभ्याम्। पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यम् । मर्यादामार्गेऽङ्गीकृतानां 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु

भाष्यप्रकाशः ।

दुच्यते । तेनावधारणमपि जीवस्य पुनरावृत्त्यभावेन मृत्यतिक्रमेण कैवल्येनाक्षरप्राप्तेर्ब्रह्मभावात्मकत्वेन चोपपद्यमानं न विरुध्यत इति ज्ञानकारणत्वनिरूपकश्रुतिभिरुच्यत इत्यर्थः । तेन सिद्धमाहुः एवमित्यादि । एवं तदविरोधे सति अक्षरविषयिणीनां धियां तैत्तिरीयादिश्रुतौ योऽवरोधो मुक्तिसाधनेषु गणना, स सामान्यतद्भावाभ्यां हेतुभ्याम् ।

तत्र किं सामान्यमित्यपेक्षायां पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति भक्तसङ्गे सिद्धम् । 'सत्सङ्गलब्धया भक्त्या मयि मां य उपासिता । स वै मे दर्शितं सद्भिरञ्जसा विन्दते पद'मित्येकादशस्कन्धे। स च पुरुषोत्तमसम्बन्धिसम्बन्धस्त(त्त)द्धामरूपाक्षरज्ञानेप्यस्तीति तदेव सामान्यम् । तथा, 'मर्यादामार्ग' इत्याद्युक्तरीत्या तद्भावो ब्रह्मभावः ताभ्यां हेतुभ्यां अक्षरज्ञानानां मुक्तिसाधनेषु प्रवेशः। मर्यादामार्गिणां पुरुषोत्तमप्राप्तौ स्वरूपयोग्यतासम्पादकत्वेन प्रवेश इत्यर्थः ।

रश्मिः ।

रसत्वेनातिसुन्दरत्वात्परमं धाम पीठं चरणौ पुच्छं वृन्दावनम् । तदविनाभावात् । भक्तैः सह निगूढभावकरणे पीठाद्यन्यतमापेक्षा । न तु युगपत् । 'तं पीठस्थं येऽनुयजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषा'मिति श्रुतेः। 'अथ परे'त्यस्या अर्थकथने भाष्ये एवकाराच्छ्रुतौ 'ज्ञानादेव तु कैवल्य'मिति सावधारणोक्तेस्तदेकवाक्यतापन्नायामवधारणमित्याशयो ज्ञेयः । 'ब्रह्म वेद ब्रह्मैव भवती'त्यत्रोक्तश्रुतावेवकारविरोधमाशङ्क्याहुः तेनावेत्यादि । ब्रह्मभावेति । ब्रह्मभावो ब्रह्मत्वं 'बुद्ध्या विशुद्धया युक्त' इति गीतोक्त आत्मा स्वरूपं यस्याः । भावे त्वः । हलोपपुंवद्भावौ पूर्ववत् । तेन । ज्ञानेति । 'ज्ञानादेव तु कैवल्य'मित्याद्युक्ताभिः । तदविरोधेति । पुरुषोत्तमाक्षरज्ञानप्रतिपादिकयोः श्रुत्योर्विषयभेदादविरोधे सति । पुरुषोत्तमेतिभाष्यमुक्तसूत्रार्थभाष्यप्रपञ्चं विवरीतुमपेक्षामाहुः तत्र किमिति । विवृण्वन्ति स्म पुरुषोत्तमेति । सम्बन्धिनोऽक्षरभक्तप्रमेयबलानुग्रहाः । तेषां सम्बन्धोंऽशांशिभाव एकस्वामिकत्वमाधाराधेयभावौ । तन्निष्ठभगवद्भावब्रह्मभावयोर्जन्यजनकभावः सम्बन्धः । एकस्वामिकत्वं भगवद्वीर्यसंविज्जनकैकाधिकरण्य सम्बन्ध इत्याशयेनाहुः भक्तसङ्ग इति । भक्तसङ्गे सिद्धं सामान्यम् । केत्यतो वाक्यं पठन्ति स्म सत्सङ्गेति । पदं मुक्तिः । स चेति । अस्यार्थः पुरुषोत्तमेति । पुरुषोत्तमसम्बन्धिभक्तः भगवद्वीर्यसंविज्जनकः (भगवद्भावजनकः) तस्य भगवद्भावस्य सम्बन्धोऽक्षरज्ञाने जन्यजनकभावः । अन्यत्राप्याहुः तद्धामेति । तद्धाम पुरुषोत्तमसम्बन्धि तद्रूपाक्षरं तस्य ज्ञाने । परममुक्तिजनके । मम पुरुषोत्तमाधिष्ठानं हृदयमक्षरमिति ज्ञानेऽप्यस्ति । अपिनोक्तोदाहरण तस्मिन् । तदेवेति। विधेयलिङ्गम् । उक्तसम्बन्ध एव सामान्यमित्यर्थः। मर्यादेति भाष्यं विवृण्वन्ति स्म तथा मर्यादेति । इति वाक्यादिति ब्रह्मभावानन्तरं भगवद्भावसम्भवादित्यत्र हेतुः, न तु ब्रह्मभावानन्तरमित्यत्र । तेनेति वाक्याद्ब्रह्मभावस्तदनन्तरमिति नान्वेतव्यम् । परम्परोपयोगे तु प्रवेशादित्यन्तो हेतुः। साध्यार्थकभाष्येणैवं सत्यक्षरेत्याद्युक्तेन सह युवन्ति स्म अक्षरज्ञानानामिति। भाष्यीयप्रवेशनमित्यस्यार्थः । कार्यभूतहेतुना साध्यमुक्तं प्रवेशमाहुः मर्यादामार्गिणामिति । इदमुक्तं मर्यादामार्ग इत्यादिभाष्येण। स्वरूपेति। स्वरूपयोग्यतासम्पादनेन कार्येण हेतुना प्रवेशोऽक्षरज्ञानानां मुक्तिसाधनेषु

भूतेषु मद्भक्तिं लभते परा'मिति वाक्याद्ब्रह्मभावानन्तरमेव भगवद्भावसम्भवात्तेन पुरुषोत्तमे प्रवेशात्तत्र परम्परोपयोगो ब्रह्मभावस्येत्युभाभ्यां हेतुभ्यां तथेत्यर्थः। वस्तुतस्तु पुरुषोत्तमप्राप्तिरेव मुक्तिरिति भावः।

नन्वक्षरस्याविशिष्टत्वेन तदुपासकानामपि तथात्वात् केषाञ्चित् तत्रैव लयः, केषाञ्चिद्भक्तिलाभ इति कथमुपपद्यत इत्याशङ्क्य, तत्र हेतुं दृष्टान्तेनाह औपसदवदिति। उपसदाख्ये कर्मणि तानूनप्त्रस्पर्शाख्यमौपसदं कर्मास्ति। तत्रा[1]तिथ्यायां ध्रौ[2]व्यां स्रुचि चमसे वा यदाज्यं चतुरवत्तं पञ्चावत्तं वा समवद्यति, तत्तानूनप्त्रमित्युच्यते। 'अनाधृष्टमसी'ति मन्त्रेण षोडशाप्यृत्विजो यजमानेन सह तानूनप्त्रं

भाष्यप्रकाशः।

अत्र सामान्यादित्युक्ते करणतापि सम्भाव्येतेति तद्वारणाय द्वितीयो हेतुरिति बोध्यम्। अक्षरज्ञानस्य मुक्तिसाधनतावच्छेदकं यद्रूपं तज्ज्ञापनाय प्रथमः। यदि ह्यक्षरप्राप्तेः परममुक्तित्वं स्यात्, तदाथर्वणिकायामक्षरविद्यायां पुरुषस्याक्षरात् परत्वं न श्राव्येत। तत्तु श्राव्यते। अतोऽक्षरज्ञानानामक्षरप्रापकत्वेन तज्ज्ञापकत्वेन वा न परममुक्तिकारणता, किन्तूक्तरीत्या भगवद्धामताज्ञापकत्वेनेत्याशयेनाहुः वस्तुत इत्यादि। दृष्टान्तमवतारयन्ति नन्वक्षरस्येत्यादि। तत्रैव लय इति। 'ब्रह्मैव भवती'त्यवधारणादक्षर एव लयः। भक्तिलाभ इति। 'ब्रह्मविदाप्नोति पर'मिति

रश्मिः।

प्रवेश इति दृष्टान्तरहितसूत्रार्थ इत्यर्थः। करणतेति। ब्रह्मभावव्यापारो भगवद्भावः ब्रह्मभावजन्यत्वे सति ब्रह्मभावजन्यपुरुषोत्तमप्रवेशजनकत्वात्। द्वितीय इति। 'ते प्राप्नुवन्ति मामेवे'ति सावधारणवाक्याद्द्वितीयापेक्षा नास्ति, तथाप्यात्मक्लिष्टं न भगवति समर्पणीयमित्यक्षरभावस्य 'क्लेशोऽधिकतरस्तेषा'मिति वाक्यादतिक्लिष्टाक्षरभावस्य 'कृष्णायाक्लिष्टकारिणे' इति गोपालतापिनीयादभगवत्कृतत्वेन करणतापक्षस्योक्तश्रुतिविरुद्धत्वाद्द्वितीय इत्यर्थः। नचेतिहासबाधो न युक्तः श्रुत्येति वाच्यम्। 'भक्त्या जानाति चाव्यय'मिति श्रुत्युक्तफलात्मकज्ञाने भक्तिमात्रोपयोगाद्भक्तौ ब्रह्मभावस्योपयोगो हि चित्तशुद्धिद्वारा कर्मवत् पापाभाववत्। 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिः प्रसाध्यत' इति वाक्यादित्यनावश्यकत्वरूपबाधस्य सम्भवात्। एवमनेकेषु भक्तिसाधनेषु सत्सु ज्ञानकाण्डत्वादक्षरज्ञानस्य भक्तिकारणस्योक्तौ अक्षरज्ञानस्य फलत्वं अक्षरज्ञानस्य भगवद्भावसाधनत्ववत् मुक्तिसाधनत्वं चेति। पृथक्साधनतावच्छेदकं यद्रूपं तद्वक्तुमाहुः अक्षरेति। यद्रूपं पुरुषोत्तमसम्बन्धिसम्बन्धः, स चात्र तद्धामत्वेनाक्षरज्ञानेऽस्ति। भगवद्भाववान् भक्तः, भगवद्भाव आनन्दधर्मः, स चात्र पुरुषोत्तमधामत्वेनाक्षरज्ञानेनेति तथा। तेन परममुक्तिसाधनतावच्छेदकं पुरुषोत्तमधामत्वम्। पुरुषोत्तमधामत्वप्रकारकाक्षरविशेष्यकज्ञानत्वात्। मुक्तिजनकतावच्छेदकमक्षरत्वेनाक्षरज्ञानादक्षरत्वमिति विवेकः। परममुक्तिः पुरुषोत्तमप्राप्तिः। मुक्तिः स्वरूपलाभः। अयं यद्रूपप्रपञ्चः। प्रथम इति। हेतुः। तथाच ज्ञानकाण्डत्वाद्ब्रह्मभावपूर्वकभगवद्भाव इति हेतुद्वयमित्यर्थः। आथर्वणिकायामिति। मुण्डके। 'अव्यक्तात्पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति'रित्यस्याम्। नन्वक्षरज्ञानं ज्ञानविषयकं ज्ञानम्, तच्चाक्षरत्वेन शाब्दम्, तत्रैकज्ञाने साध्यसाधनभावविरोधादाहुः तज्ज्ञापकत्वेनेति। शाब्दं ज्ञानं तदक्षरत्वेनाक्षरज्ञापकं तु भवत्येवेत्यर्थः। उक्तेति। तत्र किं सामान्यमित्याद्युक्तरीत्या। इति श्रुत्युक्तेति। ब्रह्मवित् भक्त्या परमाप्नोतीति भाष्ये उक्तत्वात्तथा। व्याख्यानमिति। दृष्टान्तेन हेतुव्याख्यानम्। अतिथ्यायां चतुर्थ्याम्। ध्रौव्याम्। ध्रौव्येति पाठः। इस्सेर्डा। ध्रुवमेव ध्रौवं

---

१ अतिथ्याया इति पाठ.। २. ध्रौवात्, ध्रौवाज्यादिति पाठौ।

समवमृशन्ति, 'अनु मे दीक्षा'मिति मन्त्रेण यजमानः 'तत् समवमृशन् यं ऋत्विजं कामयेत, अयं यज्ञयशसमृच्छेदिति तं प्रथममवमर्शये'दिति श्रूयते श्रुतौ कल्पे च। अत्र सर्वेषामृत्विजां तानूनप्त्रत्वाविशेषेपि यस्मिन् स्नेहातिशयेन तथेच्छा, तत्रैव तथा कृतिः, नेतरेषु । न हि तत्राविशिष्टेषु कथमेवं कृतिरिति पर्यनुयोगः सम्भवति, एवमिहापीत्यर्थः।

ननु श्रवणादेर्यथा पुरुषोत्तमसम्बन्धित्वेन तत्प्राप्तिहेतुत्वम्, एवमक्षरस्याप्यस्त्वित्याशङ्का तु •निखिलासुरजीवतमःपुञ्जनिरासकेन यदुवंशोदयाचलचूडामणिनैव निरस्तेति न स्वतो वक्तुमुचितेत्याशयेन आह तदुक्तमिति। भगवद्गीतास्विति शेषः। तत्र 'यदक्षरं वेदविदो वदन्ती'त्युपक्रम्य, 'स याति परमां गति'मित्यन्तेनाक्षरप्राप्त्युपायमुक्त्वा, 'अनन्यचेताः सततं'मित्यादिना स्वप्राप्त्युपायं वैलक्षण्यं चोक्त्वा, भक्त्येकलभ्यत्वं स्वस्य वक्तुं पूर्वं क्षराक्षरयोः स्वरूपमाह, 'सहस्रयुगपर्यन्त'मित्युपक्रम्य, 'प्रभवत्यहरागमे' इत्यन्तेन क्षरस्वरूपमुक्त्वा, 'परस्तस्मात्तु भावोऽन्य' इत्युपक्रम्य, 'तद्धाम परमं मम'त्यन्तेनाक्षरस्वरूपमुक्तम्।

भाष्यप्रकाशः।

श्रुत्युक्तपरप्राप्तिसाधनीभूतभक्तिलाभः। हेतुमिति। भगवदिच्छारूपम्। व्याख्यानं तूत्तानार्थम्। तथाच भगवदिच्छयैव विशेष इत्यर्थः। सूत्रोक्तां सम्मतिं व्याकर्तुमवतारयन्ति ननु श्रवणादेरित्यादि। व्याकुर्वन्ति तत्रेत्यादि। तत्रेति। गीताया अष्टमाध्याये। वैलक्षण्यमिति। साधनसौकर्यं स्वप्राप्तिरूपस्य फलस्योत्कर्षं च। स्वस्य वक्तुमिति। अत्राक्षरस्वरूपकथने अक्षरस्य परमगतित्वं स्वधामत्वं चोक्त्वा 'पुरुषः स परः पार्थे'त्यादिना परस्य यद्भक्त्येकलभ्यत्वं वक्ष्यति, तदक्षरादुत्तमत्वेन वाक्यान्तरे सिद्धे स्वस्मिन्नेव परत्वविश्रान्तेः स्वस्यैव वक्ष्यति, बाधकाभावे स इति

रश्मिः।

आज्यस्थालीस्थमाज्यं तस्माद्ध्रौवाज्यात्। स्रुक् प्रसिद्धा। चमसः पात्रविशेषः। चतुरवत्तं चतुर्गृहीतम्। समवद्यति सम्यक् अवहीनं द्यति खण्डयति। 'दो अवखण्डने'। केनापि प्रकारेण। अनाधृष्टमिति। न आसमन्ताद्धृष्टम्। जिधृषा प्रागल्भ्ये। 'प्रगल्भमसि अनाधृष्टमस्यनाधृष्य'मिति मन्त्रे हे तानूनप्त्र। असन्तत्वान्मन्त्रत्वम्। समवमृशन्तीति। स्पृशन्ति। अनु म इति। अनु पश्चात् मे मम दीक्षां अवमृशेति मध्यमपुरुषान्तत्वान्मन्त्रत्वम्। तत् तानूनप्त्रम्। यं ऋत्विजमिति च्छेदः। कामयेत इच्छेत्। 'कमु कान्तौ'। कान्तिरिच्छा। यज्ञयशसं यज्ञकीर्तिं ऋच्छेत् प्राप्नुयात्। अवमर्शयेदिति। स्पर्शयेत्। एवं व्याख्यानं तूत्तानार्थमित्यर्थः। विशेष इति। 'केषांचित्तत्रैव लयः, केषांचिद्भक्तिलाभ' इति भाष्योक्तो विशेषः। सम्मतिमिति। तदुक्तमितीतिहाससम्मतिम्। ननु श्रवणादेरित्यादीति। पुरुषोत्तमेति। पुरुषोत्तमाविर्भावस्य श्रवणादेश्च जन्यजनकभावसम्बन्धोऽतः पुरुषोत्तमसम्बन्धित्वं तेनेत्यर्थः। एवमिति। अवयवावयविभावसम्बन्धः स्वस्वामिभावसम्बन्धः। निखिलेति। निखिला येऽसुरा जीवाः तेषां तमसः पुञ्जस्तस्य निरासकेन। यदुवंश उदयाचलः तस्य चूडामणिना मुख्येन। उदयाचले चूडामणिः सूर्यस्तेन। निरस्तेति। 'क्रोधस्यान्तं फलोदया'दिति वाक्यात् फलं युद्धम्। अष्टमाध्याय इति। षडध्यायी कर्ममार्गे, षडध्यायी ज्ञानमार्गे, षडध्यायी भक्तिमार्गे इति ज्ञानमार्गीयत्वं प्रमेयस्य बोधयितुमुपात्तः। स इतीति। स पर इत्यत्र स इति तच्छब्देन सन्निहितस्य 'तद्धाम परमं

अत्र पूर्वं क्षरस्वरूपमुक्तमिति 'परस्तस्मात्त्वि'त्यत्र क्षरादेव परत्वमुच्यते । तच्छब्दस्य पूर्वपरामर्शित्वात्तस्यैव पूर्वमुक्तत्वात् । अत एवाक्षरव्यावर्तकस्तुशब्द उक्तः । एतेन नित्यत्वेन क्षरणाभावादक्षरशब्देन जीव एवोच्यते, न तु पुरुषोत्तमाधिष्ठानभूतो जीवातीत इति निरस्तम् । 'यं प्राप्य न निवर्तन्त' इति वाक्यात् जीवे तथात्वासम्भवात् । नित्यमुक्तत्वापत्त्या शास्त्रवैफल्यापत्तेश्च । इत एव ज्ञानमार्गिणां तत्प्राप्तिरेव मुक्तिरिति ज्ञेयम् । ततोऽनिवृत्तेः । 'पुरुषः स परः पार्थे'त्यनेनाक्षरात् परस्य स्वस्य भक्त्येकलभ्यत्वमुक्तम् । तेन ज्ञानमार्गीयाणां न पुरुषोत्तमप्राप्तिरिति सिद्धम् । 'यस्यान्तःस्थानी'त्यनेन परस्य लक्षणमुक्तम् । तच्च मृत्स्नादिप्रसङ्गे श्रीगोकुलेश्वरे स्पष्टमुच्यते । तेनाक्षरोपासकानां न पुरुषोत्तमोपासकत्वम् । तद्विषयकश्रवणादेरभावादिति भावः । 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गति'मिति वाक्यात् 'स याति परमां गति'मित्यत्राक्षरमेव यातीत्यर्थो ज्ञेयः ।

भाष्यप्रकाशः ।

तच्छब्देन संनिहितपरामर्शाच्च स्वस्य वक्तुम् । अत्रेति । 'सहस्रयुगे'त्यादिग्रन्थे । अत्र मतान्तरमुद्भाव्य परिहरन्ति एतेनेत्यादि । एतेनेति । 'क्षरः सर्वाणि भूतानी'ति वाक्यान्तरसिद्धं भूतग्रामं व्यक्तकोटौ निवेश्य ततः परत्वकथनेन । हेत्वन्तरमाहुः यमित्यादि । तथाच भूतग्रामपदेन जडान् गृहीत्वा अक्षरपदेन जीवग्रहणे एतौ दोषौ प्रसज्जेयाताम्, अतस्तन्मतमयुक्तमित्यर्थः । अस्मादेव सन्दर्भादर्थचतुष्टयं यदन्यत् सिद्धं तदाहुः इत एवेत्यादि । ज्ञेय इत्यन्तम् । इत एवेति । अक्षरस्य भगवद्धामत्वादेव । इत्यर्थो ज्ञेय इति । ऐकशब्द्याज्ज्ञेयः । तथाचाक्षरस्य पुरुषोत्तमसम्बन्धित्वे सत्यपि पुरुषोत्तमप्राप्तिं प्रति न हेतुत्वम् । तद्धेतुतावच्छेदकस्यानन्यभक्तित्वस्य तत्राभावादित्येवमेतेन सन्दर्भेण सा शङ्का निवारितेत्यतो न कार्येत्यर्थः ।

रश्मिः ।

ममे'त्यस्मत्पदार्थस्य परामर्शाच्च स्वस्य वक्तुमन्यथा त्वक्षरस्य वक्तुम् । एताविति । तथात्वासम्भवादिति भाष्योक्तं मुक्तित्वं शास्त्रवैफल्यापत्तिश्चेत्येतौ । अर्थचतुष्टयमिति । ज्ञानमार्गिणामक्षरप्राप्तिः १ । अक्षरात्परस्य स्वस्य भक्त्येकलभ्यत्वम् २ । 'समान एवं चाभेदा'दिति सूत्रोक्तावतारे श्रीगोकुलेश्वरेप्यक्षरोपासकानां न पुरुषोत्तमोपासकत्वम्, पुरुषोत्तमविषयकश्रवणादेरभावात् ३ । 'स याति परमां गति'मित्यत्राक्षरमेव यातीत्यर्थः ४ । इत्यर्थचतुष्टयम् । ऐकेति । उभयोर्वाक्ययोरेकः शब्दः परमामिति गतिमिति च ययोस्ते एकशब्दे वाक्ये तयोर्भाव ऐकशब्द्यं तस्मात् । ननु गणनादेवार्थचतुष्टये लब्धे तदुपादानस्य किं प्रयोजनमत आहुः तथाचेति । अनन्येति । नन्ववयवावयविभावसम्बन्धे मास्तु अनन्यभक्तित्वम्, स्वस्वामिभावसम्बन्धे तु स्यादिति चेत् । न । ज्ञानमार्गस्य भिन्नत्वात् । 'उत्तमः पुरुषस्त्वन्य' इति पुरुषोत्तमस्य भिन्नत्वे तत्प्रापकस्यापि भेदात् । नन्वेवं सति पुष्टिभक्तावप्यनन्यभक्तित्वं न स्यात्, प्रतिकृतिकसम्बन्धिन्याः मूलरूपातिरिक्तविषयत्वादिति । चेत् । न । अनन्यभक्तेर्मर्यादामार्गीयत्वात् । 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी'ति गीतावाक्यस्य 'अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जव'मित्यादिसाधनप्रायपाठपठितत्वेन साधनसाध्यत्वेन तथावसायात् । तत्रेति । अक्षरसम्बन्धे । एतेनेति । अर्थचतुष्टयप्रतिपादकेन । सेति । एतेन नित्यत्वेनेत्यादिभाष्योक्ताक्षरधीपदेन जीवधीर्ग्राह्या, न तु पुरुषोत्तमाधिष्ठानभूतजीवातीतोऽक्षरधीपदेन ग्राह्य इत्याशङ्का । निवारितेति । अक्षरत्वेन

किञ्च। तैत्तिरीयोपनिषत्सु पठ्यते 'यस्मिन्निदं सञ्च विचैति सर्वं यस्मिन् देवा अधि विश्वे निषेदुः। तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्। येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च। यमन्तःसमुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजा' इति। अत्राक्षरात्मकत्वेन क्षरात्मकादाकाशात् परमे व्योम्नि भक्तानां हृदयाकाश इति यावत्। तत्र प्रकाशमानमित्यर्थात्। अत एव 'ब्रह्मविदाप्नोति पर'मित्युपक्रम्य, 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योम'न्नित्येतदुपनिषत्स्वेव पठ्यते। 'यदक्षरे परमे प्रजा' इति पदं 'अवयन्ती'त्यनेन संम्बध्यते। अत्र प्रजापदात् व्यापिवैकुण्ठात्मको लोकोऽक्षरपदेनोच्यते इत्यवगम्यते। अत एव 'न यत्र माये'त्यादिना श्रीभागवते तत्स्वरूपमुच्यते। एतेनाक्षरस्य पुरुषोत्तमाधिष्ठानत्वं निश्चीयते। इतोप्यक्षरातीतः पुरुषोत्तम इत्यवगम्यते। एवं सति सामान्यं भगवद्विभूतिरूपत्वम्, तद्भावस्तस्य

भाष्यप्रकाशः।

ननु श्रुतावक्षरात् परत्वमेव पुरुषस्योक्तम्, न तु तत्र स्थितत्वम्, तथोक्तौ परस्य स्वप्रतिष्ठत्वं च हीयेतेति गीतास्मृतिवाक्यमन्यथा नेतव्यमित्याशङ्क्याहुः किञ्चेत्यादि। अस्यां श्रुतौ सर्वाधारत्वं सर्वदेवनिषदनस्थानत्वं सर्वात्मकत्वं च पादत्रयेणोच्यते, तुरीये तदाधार उच्यते, तस्यार्थमाहुः अत्रेत्यादि। भक्तहृदयाकाशमेवात्र परमव्योमपदे परामृश्यत इत्यत्र मानमाहुः अत एवेत्यादि। ननु भवतु भक्तहृदयाकाशे प्रकाशमानत्वमक्षरस्य, तथापि कथं लोकात्मकत्वम्, अत आहुः यदित्यादि। तथाच प्रजालिङ्गादक्षरस्य लोकात्मकत्वमित्यर्थः। एतमर्थं पुराणेनोपबृंहयन्ति अत एवेत्यादि। इतोपीति। शुकवाक्यादपि। तथाच श्रुतौ पुराणे च तथा सिद्धत्वाद्गीतावाक्यं नान्यथा नेतुं शक्यमित्यर्थः। स्वप्रतिष्ठताहानिं परिहरन्ति एवं सतीत्यादि। तथाच छान्दोग्ये 'स्वे महिम्नि प्रतिष्ठित' इति श्रावणात्, तैत्तिरीये 'ब्रह्म पुच्छं प्रतिष्ठे'ति श्रावणाच्चाक्षरब्रह्मणो भगवद्विभूतिरूपत्वेन चरणरूपतया स्वाभिन्नत्वेन च भक्तिसामान्याद्भगवतस्तत्र स्थितावपि न स्वप्रतिष्ठत्वहानिरित्यर्थः। एवमत्र मुक्तिस्वरूपमस्थूलत्वादयो धर्माश्च

रश्मिः।

रूपेण पुरुषोत्तमभेदात् मार्गान्तरत्वात्। श्रुताविति। 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गति'रित्यादिश्रुतौ। **गीतास्मृतिवाक्यमिति**। ननु पुराणवन्नेतिहासः श्रुतिबाध्य इत्यत उक्तं **स्मृती**ति। इतिहासस्य स्मृतित्वपक्षे बाध्यत्वमिति भावः। **आहुरिति**। अक्षरस्य पुरुषोत्तमाधारत्वप्रतिपादिकां श्रुतिमाहुरित्यर्थः। **सर्वाधारत्वमिति**। यस्मिन् ब्रह्मणि इदं विश्वं समेति च व्येति चेति जगल्लयस्थानत्वं विरुद्धमेतीत्युत्पत्तिस्थानमित्युक्तेस्तथा। **सर्वदेवेति**। यस्मिन्ब्रह्मणि विश्वस्मिन् इति अधिविश्वं तत्र। **सर्वेति**। तृतीयपादे तत् ब्रह्म। स्पष्टमन्यत्। **तस्यार्थमिति**। सर्वाधारेऽक्षराधारत्वस्य बाधात्तुरीयस्यार्थमाहुरित्यर्थः। **भक्तिसामान्यादिति**। भक्त्या सामान्यं भगवद्विभूतित्वं भक्तिसामान्यं तस्मात्। भक्ताक्षरयोर्भक्तिसामान्यं तदत्रापीति ज्ञेयम्। स्वसमवाय्याधारसम्बन्धेन भक्तिरक्षरात्मकभक्तहृदय इति स्वं भक्तिस्तत्समवाय्यानन्दो भगवान् तदधिकरणं भक्तहृदयमक्षरात्मकमिति। चरणरूपतया स्वाभिन्नत्वेन च भगवतस्तत्राक्षरे भावः सत्ता उक्तरीत्या 'तद्धाम परमं ममे'त्युक्तरीत्या स्थितावपि। अपिना 'स आत्मा स्वाश्रयाश्रय' इत्युक्तस्वप्रतिष्ठत्वेन सह छान्दोग्योक्तस्वमहिमप्रतिष्ठत्वं समुच्चीयते। **न स्वेति**। योगिवदनेकरूपत्वाद्भक्तहृदयगामित्वं स्वप्रतिष्ठत्वमिति। तस्य हानिर्नेत्यर्थः। भाष्यं स्फुटार्थम्। पादाध्यायार्थौ सङ्गमयन्ति स्वाव्याप्तिवारणाय **एवमत्रेति**। अत्राधिकरणेऽक्षरधीरूपमपि न जन्यमुक्तिस्वरूपम्, विषयवाक्ये चास्थूलत्वादयो धर्माश्चाक्षरधर्मा अपि

पुरुषोत्तमस्य भावः सत्ता उक्तरीत्या तत्र स्थितिरिति यावत्, ताभ्यां हेतुभ्यां तथेत्यप्यर्थो ज्ञेयः ॥ ३३ ॥

भाष्यप्रकाशः ।

सफला विचारिताः । एतान् धर्मांश्चरणीयत्वेन बोधयन्तीत्यादिर्बोधकताप्रकारश्च । (तेन भगवत्प्राप्तिप्रेप्सुना भक्तिरेव कार्या, न तु पूर्वकक्षायामेव विश्रान्तव्यम्, द्वितीयस्कन्धे 'भगवान् ब्रह्मकार्त्स्न्येने'त्यत्र भगवता भक्तावेव श्रुतितात्पर्यस्य निर्धारितत्वात्, गीतायां द्वादशाध्यायेपि 'मय्यावेश्य मनो ये मा'मित्यादिना स्वोपासनयैव शीघ्रं सुखेन स्वप्राप्तिबोधनात्, अक्षरोपासनेन दुःखतः स्वप्राप्तेरुक्तत्वाच्च भक्तिरेवावश्यकीति सिद्धम् ।) अत्राक्षरस्य गणितानन्दत्वात् 'ब्रह्मविदाप्नोति पर'मित्यत्र पुरुषोत्तमज्ञानस्य 'भक्त्या मा'मिति गीतावाक्ये तदुक्तेः 'औपसदव'दिति दृष्टान्त इच्छाया एव प्राधान्यबोधनेन परम्परया कर्मणोपि क्वचित् प्रापकत्वसूचनात् क्रियया भक्त्या ज्ञानेन च सायुज्यप्राप्तिबोधकं **दोर्भिश्चतुर्भिर्विदितमिति** विशेषणं च प्रतिपादितं ज्ञेयम् ।

अत्र भट्टभास्करशङ्कररामानुजभाष्येषु पूर्वोक्तवाजसनेयकाथर्वणोक्तवाक्यद्वयमेव

रश्मिः ।

भगवद्धर्माः तदभेदात् पादार्थः । **सफला** इति । मुक्तिस्वरूपफलं भगवद्भावः । अस्थूलत्वादि धर्मफलम् । किमन्यद्ब्रह्मभावनिर्वाहकमिति जिज्ञासया 'यतो वा इमानि भूतानि जायन्त' इत्यादिजगज्जन्मादिकर्तृत्वभगवद्धर्मबोधकश्रुतिभिर्विरुद्धधर्माधारत्वम् । पूर्वाधिकरणसङ्गतिप्राप्तमर्थमाहुः **एतानिति** । 'परब्रह्मैतद्यो धारयति रसती'त्याद्युक्तान् भगवद्धर्मान् । चरणीयत्वेन आचरणीयत्वेन बोधयन्ती अस्थूलादिश्रुतिः ।

अयमर्थः । अनियमाधिकरणे भगवद्धर्मा उक्ता धारणादयः, तेषामेव मुक्तिसाधनत्वम्, नैश्वर्यादीनां भगवद्धर्माणामिति यावदधिकाराधिकरण उक्तम्, तेषां धारणादीनां विषयो विरुद्धधर्माश्रयोऽत्राधिकरण उक्तः, सोऽधोक्षज इति दशविधलीलाः धारणारसनादिविषयिण्य इति बोध्यमित्येवं तात्पर्येणास्थूलादिश्रुतयो बोधयन्ति । आदिना सूचयन्तीत्यर्थः । बोधकताप्रकारोऽधिकरणस्येति बोध्यम् । 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृत'मिति । ननु तद्भावो भगवद्भावो न भवति, वृत्तेर्द्वैविध्यात्, अतोऽक्षरधीमात्रमित्यतस्तेनेत्यादिः सिद्धमित्यन्तो ग्रन्थः प्रवर्तते । यदि च तत्परब्रह्म 'ॐतत्स'दिति गीतायाः तद्भावः पुरुषोत्तमभावः, तदा तु मूलपुस्तकेऽयं ग्रन्थो नास्तीति न व्याख्येयः । मूलपुस्तकेऽभावात् ।

षोडशाधिकरण्यां षड्विशेषणान्युक्तानि, सप्तमं 'दोर्भिश्चतुर्भिर्विदित'मित्येकस्य विशेषणं वक्तुमाहुः **अत्राक्षरस्येति** । षष्ठ्यन्तत्रयं प्राधान्यबोधनेनेत्यनेनान्वेति । **पुरुषोत्तमेति** । गौणमुख्यन्यायप्राप्तस्यागणितानन्दज्ञानस्य परम्परयेतीच्छाया इत्यनेनान्वयि । **क्वचिदिति** । 'कर्मणैव तु संसिद्धिमास्थिता जनकादय' इत्यत्र 'कर्मणा ब्रह्मैवमुच्यत' इति सुबोधिन्याम् । **चतुर्भिरिति** । दोः कर्मेन्द्रियम् । तदत्र चत्वारि । पुरुषोत्तमज्ञानं क्रिया पञ्चरात्रात् । भक्तिः क्रिया स्पष्टम् । इच्छापि क्रिया । इच्छ्यत इतीच्छा । क्रियावाचि भ्वादित्वात् धातुत्वं धातुत्वाल्लडादय इति । कर्म क्रिया लोकप्रसिद्धा । कर्मेत्यत्र कर्तरि मन् । क्रियेत्यत्र भावेशः इयङ् । कथं सामानाधिकरण्यमिति । अतश्चतुर्भिर्ज्ञानभक्तीच्छाकर्मभिः । चतुर्भिः पादसेवनादिभिश्चतुर्भिर्विशेषेण ज्ञातम् ।

१. यद्यप्ययं ग्रन्थो मूलपुस्तके नास्ति, तथाप्यस्य प्रामाणिकत्वं तु नैव सदिग्धम् । मूलपुस्तकतो लिपीकृतेऽन्यपुस्तकेऽयं ग्रन्थः शोधत्वेन श्रीपुरुषोत्तमानां श्रीहस्ताक्षरेषूपलभ्यत एवेति ।

भाष्यप्रकाशः ।

विषयवाक्यत्वेनोपन्यस्य, किमासां विशेषप्रतिषेधबुद्धीनां सर्वत्र प्राप्तिः, उत व्यवस्थेति संशये, प्रकरणावरोधाच्छ्रुतिविभागात्, विद्यान्तररूपस्य विद्यान्तररूपत्वे प्रमाणाभावान्निषेधरूपाणां गुणानामानन्दादिवत् स्वरूपावगमोपायत्वाभावाच्चेति हेतुभिर्नान्यत्र प्राप्तिरिति पूर्वः पक्षः। सिद्धान्तस्तु, प्रपञ्चपर्युदासस्य, विशेषनिराकरणरूपस्य ब्रह्मबोधनप्रकारस्य, सामान्यात्, तस्य प्रतिपाद्यस्य ब्रह्मणः सर्वत्र भावादैक्यात् सर्वत्रावरोधस्तासां निषेधबुद्धीनां परिग्रहः । तेन 'आनन्दादयः प्रधानस्ये' त्यत्र विधिमुखो विचारः, इह तु निषेधमुख इति तस्यैवायं प्रपञ्च इति भास्करं शाङ्करं च मतम् ।

रामानुजभाष्ये तु, सर्वेषूपासनेषु ब्रह्मणः समानत्वात्, अस्थूलत्वादीनां तत्प्रतीतौ भावादन्तर्भावात् । अयमर्थः । केवलानन्दादेः प्रत्यगात्मनि विद्यमानत्वेन तेषामसाधारणाकारेण ब्रह्मोपस्थापकत्वाभावादसाधारणाकारनिश्चयार्थं हेयप्रत्यनीकताज्ञानस्यावश्यकत्वेन चिदचिदात्मकप्रपञ्चवैलक्षण्यबोधनमावश्यकम् । तत्रास्थूलत्वादिना अचिद्वैलक्षण्यम्, प्रशासनेन चिद्वैलक्षण्यं च वाजसनेयके उच्यते, एवमाथर्वणेऽप्यदृश्यत्वादिकथनान्निरङ्कुशकर्तृत्वसर्वज्ञत्वादिना ज्ञेयम् । तथाचास्थूलत्वादिविशेषितज्ञानानन्दाद्याकारस्य ब्रह्मणोऽनुसन्धेयत्वादस्थूलत्वादीनामानन्दादिवदस्ति ब्रह्मप्रतीतावन्तर्भाव इति तासामस्थूलत्वादिबुद्धीनां सर्वत्रावरोध इति सिद्धान्तः । तेनेदमधिकरणं तत्सहकारित्वादत्यन्तावश्यकमिति तन्मतापेक्षयेदं मतं युक्तम् । ननु तर्हि पूर्वपक्षोक्तहेतूनां का गतिरित्याकाङ्क्षायां गुणानां प्रधानानुवर्तित्वे दृष्टान्तं तत्र प्रमाणं चाह 'औपसदवत्तदुक्त'मिति । यथा चतूरात्रे जामदग्न्याहीने पुरोडाशिनीषूपसत्सूपसद्गुणभूतः सामवेदपठितोपि 'अग्निर्वै

रश्मिः ।

विशेषेति । स्थूलत्वादीनां श्रौतानां विशेषाणां प्रतिषेधस्तद्विषयिणीनामस्थूलत्वादिप्रकारकास्थूलादिविशेष्यकबुद्धीनाम् । **सर्वत्रेति** । वाजसनेयकाथर्वणातिरिक्तेषु स्थलेष्वपि । **विद्यान्तरेति** । सगुणोपासनेषु सर्वत्र विशेषप्रतिषेधोपसंहारेण विद्यान्तरं सगुणोपासनरूपत्वे । **प्रपञ्चेति** । पर्युदासः सदृग्ग्राही । **विशेषेति** । प्रापञ्चिकस्थूलत्वादीनां निराकरणरूपस्य । **सामान्यादिति** । सर्वत्र सामान्यात् । सौत्रतद्भावशब्दव्याख्यानं तस्य **प्रतीति** । **विधिमुखेति** । विशेषाणामानन्दादीनां विधिस्तन्मुखस्तदुपायो विचारः । इहाधिकरणे तु स्थूलत्वादीनां निषेधोपायः । **तस्यैवेति** । 'आनन्दादयः प्रधानस्ये'त्यस्य । **भास्करमिति** । अत्र भेदोपि ज्ञेयः । शाङ्कर आरोपापवादः स्पष्टः । विशिष्टाद्वैतार्थं पृथगाहुः **रामानुजेति** । सामान्यहेतुं व्याकुर्वन्ति स्म **सर्वेष्विति** । तद्भावहेतुं व्याकुर्वन्ति स्म **तत्प्रतीताविति** । ब्रह्मप्रतीतौ । **प्रत्यगात्मनीति** । जीवे । **असाधारणेति** । चिदचिदात्मकप्रपञ्चवैलक्षण्याकारनिश्चयार्थम् । **हेयेति** । हेयः प्रपञ्चस्तस्य प्रत्यनीक आनन्दादिस्तत्ता वैलक्षण्यं तस्य ज्ञानस्य । **अचिदिति** । जडंशाद्वैलक्षण्यम् । स्वल्पार्थे नञ् । **चिद्वैलक्षण्यमिति** । नहि चिज्जीवः प्रशास्तीति भावः । **अस्थूलत्वादीति** । आदिना प्रशासितृत्वम् । तथाचास्थूलादिमज्ज्ञानानन्दाकारस्येत्यर्थः । **अन्तर्भाव इति** । विषयतयान्तर्भावः । **तासामिति** । सौत्रं पदम् । **तत्सहेति** । 'आनन्दादयः प्रधानस्ये'त्यस्य सहकारित्वात् । **प्रधानेति** । प्रधानविशेषणत्वे । **तत्रेति** । दृष्टान्ते प्रमाणं **तदुक्तमिति** । यथा चतूरात्र इति । तथाहि । यजुर्वेदे 'जमदग्निः पुष्टिकामश्चतूरात्रेणायजेते'त्युत्पन्ने जामदग्न्याहीने जामदग्न्यं च तदहीनं जामदग्न्याहीनम्, तत्र पुरोडाशं 'पुरोडाशिन्युपसदो भवन्ती'ति,

१. प्रथमज्ञप्तिरुत्पत्तिः ।

भाष्यप्रकाशः ।

होत्रं वेत्वि'त्यादिकः पुरोडाशप्रदानमन्त्रो विनियोगविधेर्याजुषत्वेन यजुर्वेदिनाध्वर्युणा याजुर्वैदिकेनोपांशुस्वरेण पठ्यते, न तूद्गात्रा सामगेन सामस्वरेणोच्चैस्त्वेन, तद्वत् । तदुक्तं पूर्वकाण्डे शेषलक्षणे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग' इति । अर्थस्तु, गुणमुख्ययोर्व्यतिक्रमे विरोधे सति तदर्थत्वात् गुणस्योत्पत्तिविधेः प्रधानार्थत्वान्मुख्येन याजुर्वैदिकेन विनियोगविधिना वेदसंयोगो ग्राह्य इति । एतद्दृष्टान्तव्याख्यानं पूर्वोक्तभाष्यत्रयेपि समानम् ।

शाबरभाष्ये त्वत्रान्यदुदाहृतम् । तथाहि । अस्त्याधानं यजुर्वेदविहितम्, 'य एवं विद्वानग्निमाधत्त' इति, तदङ्गत्वेन यजुर्वेद एव गानं च विहितम्, 'य एवं विद्वान् वारवन्तीयं गायति यज्ञायज्ञीयं गायति वामदेव्यं गायती'ति, एतानि च सामानि सामवेदे उत्पन्नानि, अतः केन स्वरेण पठनीयमिति सन्देहे, उत्पत्तिविधेर्विनियोगविध्यधीनतया यजुर्वेदस्वरो ग्राह्य इति ।

एवञ्चात्र विचार्यमाणे पूर्वोक्तं मतद्वयं न रुचिरम्, 'अक्षरधिया'मित्यत्राक्षरस्य धीरिति षष्ठीसमासे अक्षरस्य विशेषनिषेधसम्बन्धितया निवेशेन गौरवात् प्रशासनादेरसंग्रहात् पूर्वोक्तानावश्यकत्व-

रश्मिः ।

पुरोडाशयुक्तासूपसत्स्विष्टिषूपदिष्टासु पुरोडाशप्रधानकमन्त्राणामुद्गातृवेदोत्पन्नाना'मग्नेर्वैहोत्रं वेरध्वर'मित्यादीनामुद्गात्रा प्रयोग इति यथाध्वर्युकर्तृकपुरोडाशविशेषाणां मन्त्राणां यत्र क्वचिच्छ्रुतानामप्यध्वर्यूणां सम्बन्धः, एवमक्षरं प्रति शेषाणां निषेधानां यत्र क्वचिच्छ्रुतानामप्यक्षरेण सर्वत्र सम्बन्ध इत्यर्थः । रामानुजभाष्ये तु उद्गातृवेदोत्पन्नमन्त्राः 'अग्निर्वै होत्रं वेत्वि'त्यादयः । प्रकाशे ते उपात्ताः । वेः पक्षिणः वायोर्वाग्नेर्होत्रं पुरोडाशं वेः पूर्वार्थस्याध्वरमित्यर्थः । अग्निः वै निश्चयेन होत्रं पुरोडाशं वेतु गच्छतु । 'वी प्रजननकान्तिगत्यवसादनेषु' । पुरोडाशप्रदानमन्त्रः पठ्यत इत्यनेनान्वेति । **विनियोगे**ति । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपषट्प्रमाणान्यतमप्रमाणसहकृतो योऽङ्गसम्बन्धं बोधयति स विनियोगविधिः । यथा 'दध्ना जुहोती'त्यत्र दधिगुणवत् उपांशुस्वरो गुणो विधीयते उपसदाख्ये कर्मणि 'अग्निर्वै होत्रं वेत्वि'त्यादिमन्त्रेषु । विनियोगविधिस्तु यजुर्वेदे 'जमदग्निः पुष्टिकामश्चतूरात्रेणायजेते'त्यत्र लङ्लिङर्थ इति । श्रुतिस्तु ब्रह्मामृतवर्षिण्यां शङ्करभाष्यमतीयायाम् । 'अग्निर्वै होत्रं वेत्वि'त्यादिक इत्यत्रादिना भास्करभाष्यीया 'अग्निर्वै होत्रं वेरध्वरस्य पितरं वैश्वानरमवसेकं इन्द्राय देवेभ्यो जुहुतां हविः स्वाहे'ति ग्राह्या । अत्र जुहुतामिति विनियोगविधिर्वा । अत्र याजुषत्वं याजुषौपसदाङ्गत्वाद्बोध्यम् । याजुर्वैदिकेनेत्युपांशुस्वरविशेषणम् । **उत्पत्ती**ति । प्रथमज्ञप्तिरुत्पत्तिः । 'यथाग्नेयोऽष्टाकपालः पुरोडाश' इति । **समान**मिति । श्रुतिपाठभेदस्तूक्तः । **वारवन्तीय**मिति । वारवन्तपदयुक्तं साम वारवन्तीयम् । एवमग्रेपि । 'उच्चैः साम्नोपांशु यजुषे'ति सामयजुषोः स्वरभेदोस्ति । उत्पन्नानि प्रथमज्ञातानि । **पठनीय**मिति । गानम् । **विनियोगे**ति । यथा 'दध्ना जुहोती'ति विनियोगविध्यधीनः 'अग्निहोत्रं जुहोती'त्युत्पत्तिविधिः । दधिद्रव्यज्ञानं विना विशिष्टाग्निहोत्रज्ञानाभावात् । अत्र दृष्टान्तेन पूर्वपक्षोक्तहेतूनां गतिरुक्ता । तथाहि । श्रुतिविभागादिति शङ्करभाष्यीयो हेतुः, अग्रे द्वयं रामानुजभाष्यीयम् । तेषां गतिश्चिन्त्या । अक्षरस्य धीरित्यत्र विशेषनिषेधविषयिणीत्वं सम्बन्धोऽक्षरस्य धिया सह । तदाहुः **अक्षरस्ये**ति । विशेषनिषेधसम्बन्धो विशेष्यविशेषणभावः सोस्यास्तीति विधिनिषेधसम्बन्ध्यक्षरः तत्तयाक्षरनिवेशेन शक्यतावच्छेदके गौरवात् । व्यावहारिकसत्त्वेनाङ्गीक्रियमाणस्य जीववैलक्षण्यार्थं सोपाधिके प्रशासनद्यावापृथिवीविधारकत्वादेरसंग्रहात् । हेयप्रपञ्चप्रत्यनीकतायाः सगुणेऽभावात् पूर्वं रामानुजाचार्यमतनिरूपणे

इयदामननात् ॥ ३४ ॥

ननु संसारनिवृत्त्यानन्दाविर्भावयोरविशेषादक्षरे ब्रह्मणि लये पुरुषोत्तमे प्रवेशात् न्यूनतोक्तौ को हेतुरित्याकाङ्क्षायामाह। इयदिति परिमाणवचनम्। तस्य श्रुतौ कथनादित्यर्थः।

अत्रेदं ज्ञेयम्। तैत्तिरीयोपनिषत्सु 'सैषानन्दस्य मीमांसा भवती'त्युपक्रम्य, मानुषमानन्दमेकं गणयित्वा, तस्मादुत्तरोत्तरं शतगुणमानन्दं गन्धर्वानारभ्य, प्रजापतिपर्यन्तस्योक्त्वा, उच्यते 'ते ये शतं प्रजापतेरानन्दाः, स एको ब्रह्मण आनन्द' इति। एवं सति इयत्[1] एतावदित्यक्षरानन्दस्य सावधिकत्वेन श्रुतौ कथनादानन्दमयत्वेन निरवध्यानन्दात्मकत्वस्य पुरुषोत्तमे कथनात्तथोक्तिरिति ॥ ३४ ॥

इति तृतीयाध्याये तृतीयपादे एकादशमक्षरधियामित्यधिकरणम् ॥ ११ ॥

भाष्यप्रकाशः।

दोषापत्तेश्च। तृतीये त्वक्षरस्याक्षरत्वेन निवेशादुक्तदोषत्रयाभावात्तन्मतमुत्तमम्। तथाप्याथर्वणोदितस्य परस्मादपरत्वस्य तैत्तिरीयोक्तस्य लोकरूपत्वस्य या धीस्तदसंग्रहान्न पूर्णमित्यवधेयम् ॥ ३३ ॥

इयदामननात् ॥ ३४ ॥ सूत्रमवतारयन्ति नन्वित्यादि। व्याकुर्वन्तः परिमाणवचनं व्युत्पादयन्ति अत्रेत्यादि। आनन्दमयत्वेनेत्यादि। पूर्वानुवाकसमाप्तावानन्दमये जीवस्योपसंक्रमणमुक्त्वा, अग्रिमारम्भे 'तदप्येष श्लोको भवती'ति तच्छब्देनानन्दमेव लक्षीकृत्य, 'यतो वाचो निवर्तन्त' इति श्लोकेन वाङ्मनसागोचरत्वस्य ब्रह्मानन्दे कथनेन पुरुषोत्तमे तथा कथनादक्षरे सावधिकत्वोक्तिरित्यर्थः। ननु 'यतो वाच' इति श्लोकः 'कदाचने'ति पाठभेदेन मनोमयेपि पठ्यते, ब्रह्मोपनिषदि च 'आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुध' इति श्लोकोत्तरार्धं पठ्यते, अतः कथमेतेन पुरुषोत्तमानन्दस्य तथात्वसिद्धिरिति चेत्। उच्यते। मनोमयस्य वेदात्मकताया यजुःशिरस्त्वादिना बोधितत्वाद्वेदस्य च शब्दब्रह्मात्मकत्वात् 'सर्वे वेदा' इति श्रुतेर्ब्रह्मबोधकत्वान्मनोमयश्लोके ब्रह्मण इति पञ्चम्या शब्दब्रह्मणो वेदान्मनोमयादवाङ्मनसगोचरमानन्दं विद्वान्

रश्मिः।

उत्क्रमनावश्यकत्वं सगुणत्वस्य विशेषस्य निषेधादनावश्यकत्वदोषापत्तेरित्यर्थः। द्वितीयभास्करमते भेदोपि कार्यात्मना ज्ञेयः। उक्तेति। गौरवादित्याद्युक्तदोषत्रयाभावात्। तन्मतं रामानुजमतमुत्तमम्। परस्मादिति। नन्वक्षरधियामित्यत्राक्षरशब्दशक्यतावच्छेदकमक्षरत्वम्, परस्मादपरत्वं तु 'ऋग्वेदो यजुर्वेद' इत्यादिश्रुत्युक्तं ऋगादाविति चेत्। न। अक्षरस्यापरविद्यात्वात्तत्राप्यपरत्वं प्राप्तमिति। 'द्वे विद्ये वेदितव्ये परा चैवापरा चे'ति श्रुतेः। तैत्तिरीयेति। किंचेतिभाष्ये महानारायणोक्तस्य। तदसंग्रहादिति। 'अक्षरधिया'मित्यत्राक्षरस्याक्षरत्वेन निवेशात्, विशेषनिषेधसम्बन्धितयाप्यनिवेशात् परस्मादपरत्वेन लोकरूपत्वेनाप्यनिवेशात् तस्या असंग्रहात्। अक्षरपदशक्यतावच्छेदके न पूर्णम्, किंतु न्यूनमिति न्यूनताख्यनिग्रहस्थानमित्यर्थः ॥ ३३ ॥

इयदामननात्। नन्वित्यादीति। अविशेषादिति। 'दुःखाभावः सुखं चेति पुरुषार्थद्वयं मत'मितिवाक्यादविशेषात्। तथात्वेति। निरवध्यानन्दत्वसिद्धिः। पुरुषोत्तमेति। शब्दब्रह्मप्रति-

---

[1] इयत इति पाठः।

भाष्यप्रकाशः ।

कदाचन न बिभेतीति पुरुषोत्तमानन्दज्ञानसाधनतया मनोमय एतस्योक्ततया, ब्रह्मोपनिषदि च 'यज्ज्ञात्वा मुच्यते बुध' इति तुरीयपादे कथनेन जीवाभिन्नमानन्दमेतदित्यर्थायोगात् यस्मिन् परमात्मनि जीवात्मा संधेयत्वेन पूर्वमन्त्रे उक्तः, एतत्परमात्मस्वरूपं आनन्दं आनन्दोऽस्यास्तीत्यानन्दं जीवस्य सन्धेयत्वेन सम्बन्धि, यज्ज्ञात्वा बुधः सन् मुच्यत इत्यर्थकतया तस्य भगवदीयत्वेन तथात्वसिद्धिरिति जानीहि । अतो न चोद्यावकाश इति दिक् ।

अन्ये तु, इदमेकसूत्रमधिकरणान्तरमङ्गीकृत्य, 'द्वासुपर्णेति' मन्त्रो मुण्डके श्वेताश्वतरे च ब्रह्मप्रकरणे पठ्यते, काठके तु 'ऋतं पिबन्ता'विति । तयोराद्ये भोक्त्रभोक्त्रोर्वेद्यता, द्वितीये तु भोक्त्रोरेवेति वेद्यभेदाद्विद्याभेदे प्राप्ते, विद्यैक्यं युक्तम् । इयत एतावन्मात्रस्य द्वित्वपरिच्छिन्नस्योभयत्रामननात् । 'पिबन्ता'वित्यस्य प्रयोगस्य छत्रिन्यायेन पिबदपिबत्समुदायेपि सम्भवात् । उपक्रमोपसंहाराभ्यामेतयोर्वाक्ययोः परविद्यात्वनिश्चयेन उभयत्रापि जीवसहितस्य ब्रह्मण एव प्रतिपाद्यत्वादित्याहुः ।

तन्मतेऽधिकरणवैयर्थ्यमेव । काठकवाक्यस्य जीवद्वयपरत्वं निवार्य जीवसहितब्रह्मपरत्वस्य 'गुहां प्रविष्टा'वित्यधिकरण एव प्रतिपादितत्वात्तदपेक्षयाधिक्यस्यात्रादर्शनाचेति ।

रामानुजाचार्यास्तु, इयत् अस्थूलत्वादिविशेषितमानन्दादिकमेव गुणजातं सर्वत्रानुसन्धेयत्वेन प्राप्तम् । कुतः । आमननात् । आभिमुख्येन मननं चिन्तनमामननं तस्माद्धेतोरित्येवमर्थमाहुः । तत्राप्युदासीना वयम् ॥ ३४ ॥ **इत्येकादशमक्षरधियामित्यधिकरणम्** ॥ ११ ॥

रश्मिः ।

पाद्यपुरुषोत्तमानन्दशाब्दं ज्ञानं तस्य साधनतया । साधनत्वमुक्तविधया । **एतस्येति** । निरवध्यानन्दस्य । **इत्यर्थायोगादिति** । कर्मकर्तृभेदौचित्यादितिभावः । **पूर्वमन्त्र** इति । 'महात्मा प्रज्ञयात्मत्वं संधत्ते परमात्मनि । तेन सन्ध्याध्यानमेव तस्मात्सन्ध्याभिवन्दन'मिति मन्त्रे । **तस्येति** । निरवध्यानन्दस्य । **तथात्वेति** । निरवध्यानन्दसिद्धिः । **चोद्येति** । पुरुषोत्तमजीवमनोमयानन्दश्रुत्या प्राप्तस्य चोद्यस्य दोषस्यावकाशः । **तयोरिति** । वाक्ययोः । **भोक्त्रभोक्त्रोः** ब्रह्मजीवयोः । **भोक्त्रोरिति** । छायातपयोः । **छत्रीति** । 'छत्रिणो यान्ती'तिन्यायेन छत्री राजा, अन्ये त्वच्छत्रिणः । **उपक्रमेति** । मुण्डके तृतीयमुण्डकारम्भस्थापि द्वितीयमुण्डकस्था 'दिव्यो ह्यमूर्तः पुरुष' इत्युपक्रमेण 'आनन्दरूपममृतं यद्विभाती'ति वोपक्रमेण संपन्ना । श्वेताश्वतरे 'य एको वर्णो बहुधा शक्तियोगा' दित्युपक्रम्य 'अजामेकां लोहितकृष्णरूपा'मित्युपक्रम्य वा 'द्वा सुपर्णे'त्यस्याः कथनात् । उपसंहारस्तु मुण्डके 'नायमात्मा बलहीनेन लभ्य' इति, श्वेताश्वतरे 'ऋचो अक्षरे परमे व्योम'न्निति । **उभयत्रेति** । वाक्ययोः । **अत्रेति** । अस्मिन्नधिकरणे । अतोस्य सूत्रस्य पूर्वशेषत्वमिति भावः । **अस्थूलत्वादीति** । अस्थूलत्वादिमदानन्दादिकमित्येवं विशेषितम् । इदं पूर्वशेषमस्मिन्मते । **तत्रापीति** । अपिना पूर्वमतसमुच्चयः । एकत्राप्रवृत्तेरदूषकत्वादपरत्र विद्वन्मण्डने 'अभेदादनुपाधित्वा'दित्यनयोक्तत्वादुदासीनाः । मायागुणैः सर्वकर्मत्वादिभिश्चिन्तनीयमित्यन्ये । रामानुजास्तु मायागुणैरचिन्तनीयम् । अस्मन्मतेऽपि । 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्र'मिति द्वितीयस्कन्धात् ॥ ३४ ॥ **इत्येकादशमक्षरधियामित्यधिकरणम्** ॥ ११ ॥

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ (३-३-१२.)

अथ ज्ञानमार्गे यथा स्वात्मत्वेन[1] ब्रह्मणो ज्ञानम्, तथा भक्तिमार्गेपि भक्त्या पुरुषोत्तमज्ञाने स्वात्मत्वेन पुरुषोत्तमज्ञानं भवति, न वेति विचार्यते। सर्वान्तरत्वेन श्रुतौ कथनात् तत् भवतीति पूर्वः पक्षः। तथात्वेपि 'सर्वस्य वशी सर्वस्येशान' इत्यादिश्रुतिभिरेवमेव ज्ञानम्, न तु तथेति सिद्धान्तः। अत्र तथा

भाष्यप्रकाशः ।

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ अधिकरणमवतारयन्ति अथेत्यादि । यथा ज्ञानमार्गेऽक्षरधियः स्तूयन्ते, तथाऽभेदोपासनापीति भक्तिमार्गे अक्षरधीविनियोगविचारोत्तरम-भेदधीस्मरणाज्ज्ञानमार्गे[2] पूर्णज्ञानसम्पत्तौ यथा स्वात्मब्रह्माभेदानुभवात्मिका वृत्तिर्भवति, तथा भक्तिमार्गे सिद्धायां भक्तौ 'भक्त्या मामभिजानाती'ति वाक्यावेदिते ज्ञाने स्वात्मपुरुषोत्तमा-भेदानुभवात्मिका वृत्तिर्भवति, न वेति संशये विचार्यत इत्यर्थः ।

पूर्वपक्षमाहुः **सर्वान्तरत्वेनेत्यादि** । बृहदारण्यके कहोडप्रश्ने उषस्तप्रश्ने च 'यत्साक्षादप-रोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वे'ति, तदुत्तरवाक्ये च 'एष त आत्मा सर्वान्तर' इति याज्ञवल्क्येन सर्वान्तरत्वेन कथनात्, अन्तर्यामिब्राह्मणे च 'यः पृथिव्यां तिष्ठन् यः पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयती'त्यारभ्य, 'य आत्मनि तिष्ठ'न्नित्यन्तैर्वाक्यैः परमात्मा सर्वान्तरत्वेन श्रावितः । स च यदन्तस्तिष्ठति, तं स्वान्तः स्थापयति, वह्निरिवायोगोलकमित्यन्तर्यामिब्राह्मणे सिद्धम् । तथा सति श्रौतेन येन केनापि साधनेन तस्मिन्नभिज्ञायमाने स्वात्मनस्तद्व्याप्तत्वेन भेदास्फुरणात् स्वात्मत्वेन ज्ञानमदण्डवारितम्, अतस्तद्भवतीति पूर्वः पक्ष इत्यर्थः ।

सिद्धान्तमाहुः **तथात्वेपीत्यादि** । ब्रह्मणः सर्वान्तरतया एतदात्मनस्तदविभक्तत्वेपि 'सर्वस्य वशी'त्यादिश्रुतिभिः सर्वेशितृत्वादिरूपेणैव ज्ञानम्, उत्कटया भक्त्या तेषामेव स्फुरणात्, न तु स्वात्मत्वप्रकारकमित्येष सिद्धान्त इत्यर्थः । नन्वभिज्ञाने सर्वांशज्ञानदर्शनात्तदंशाज्ञाने को हेतुरित्याकाङ्क्षायां हेतुं गृह्णन्ति **अत्र तथेत्यादि** । **विपरीत** इति । स्वात्मत्वेन ज्ञाने । एतदेव

रश्मिः ।

अन्तरा भूतग्रामवत् स्वात्मनः ॥ ३५ ॥ **एष** इति । समीपतरवर्ती । **स्थापय-तीति** । स्वाश्रयाश्रयत्वार्थं तथा । **तस्मिन्निति** । पुरुषोत्तमे । **अभीति** । 'भक्त्या मामभिजानाती'ति वाक्यं स्मारितम् । **अदण्डेति** । यथा दण्डेन गामभ्याजेत्यत्र दुष्टायां गवि दण्डोपयोगः, तथाऽदुष्टे पूर्वपक्षज्ञानमदण्डेन वारितमित्यर्थः । **एतदात्मनः** समीपतरवर्तिजीवात्मनः । **एवेति** । श्रीगोस्वा-मिनां महाविष्णुत्वेन टिप्पण्युक्तदिक् परस्याप्यभिप्रेतेत्येवकारः । **तेषामिति** । सर्वेशितृत्वादीनाम् । अयमर्थः । टिप्पण्यां श्रीगोस्वामिभिः 'समुद्विजे भवद्धेतो'रित्यत्र ब्रह्मविद्यायां देवक्यां भक्तिमार्गीयसामग्र्या ज्ञानमार्गीयसामग्रीबाधोपपादनात्तेषामिति । अधुनापि तथैव भक्तप्रत्यक्षविषयत्वेनैवकारः । **स्वात्म-त्वेति** । स्वात्मत्वप्रकारकपुरुषोत्तमविशेष्यकं ज्ञानमित्यर्थः । **तदंशेति** । ईक्षत्यधिकरणे यावद्धर्मत्वेना-ज्ञानमुक्तमत्राभिज्ञाने तदंशाज्ञाने को हेतुरिति प्रश्नः । **अत्र तथेत्यादीति** । वृतभक्ते स्वात्मत्वेन पुरुषो-

१. स्वात्मत्वेनेति पाठ. । २. अक्षरधीविचारेणाभेदज्ञानस्मरणानन्तरं ज्ञानमार्गे इति पूर्व. पाठः श्रीहस्ताक्षरेषु ।

ज्ञानाभावस्यावश्यकत्वार्थं विपरीते बाधकमाह। पूर्वस्मिन् सूत्रे ब्रह्मानन्दात् भजनानन्दस्याधिक्यं निरूपितम्। स तु भगवद्दत्तः। तद्व्यवधायकोऽर्थश्च प्रभुणा न सम्पाद्यते। स्वात्मत्वेन ज्ञानं च भजनानन्दान्तरायरूपम्। यद्येतत् सम्पादयेत्, तं न दद्यात्, अग्रेऽन्यथाभावात्, अतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य न सम्भवतीत्याशयेनाह **अन्तरा स्वात्मन** इति। भगवता भक्तिमार्गे स्वीयत्वेनाङ्गीकृतो य आत्मा जीवस्तस्य यदात्मत्वेन ज्ञानम्, तत् भजनानन्दानुभवे **अन्तरा** व्यवधानरूपमिति भगवता तादृशे जीवे तन्न सम्पाद्यत इत्यर्थः। तत्सम्पादनस्य सर्वथैवासम्भावितत्वं हीनत्वं च ज्ञापयितुं दृष्टान्तमाह भूतग्रामवदिति। उक्तभक्तस्य विग्रहोऽप्यलौकिक इति तत्र लौकिको भूतग्रामो न सम्भवति, हीनत्वात्त-

भाष्यप्रकाशः।

विभजन्ते पूर्वस्मिन्नित्यादि। 'इयदामनना'दिति सूत्रे अक्षरस्य गणितानन्दत्वबोधनेन ब्रह्मानन्दाद्भजनानन्दस्याधिक्यं निरूपितम्। स भजनानन्दस्तु कृपाधिक्येन भगवता दत्त इति तद्व्यवधायकोऽर्थो भगवता न सम्पाद्यते। 'स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्यो मुख्यभक्तिमार्गस्य क्रीडार्थत्वावगमादभेदे च क्रीडाया असम्भवात्। स्वात्मत्वेन ज्ञानं हि 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्ये'दिति श्रुतेर्भेदविलायकत्वेन भजनानन्दान्तरायरूपं यदि स्वात्मत्वेन ज्ञानं सम्पादयेत्, भजनानन्दं न दद्यात्, अग्रे विलयेन तस्यान्यथाभावात्, अतः स्वात्मत्वेन ज्ञानं भक्तिमार्गीयस्य पूर्णदशायां न सम्भवतीत्याशयेन स्वात्मत्वेन ज्ञाने बाधकमनेन सूत्रेणाहेत्यर्थः। सूत्रं व्याकुर्वन्ति भगवतेत्यादि। अन्तरेति मध्यवाचकमव्ययम्। तथाच व्यवधायकमित्यर्थः। नन्वस्तु तस्यान्तरायत्वम्, तथापि तत्र सम्पादयतीति कथमवगन्तव्यमित्यत आहुः तत्सम्पादनस्येत्यादि। अलौकिक इति। साक्षात्सम्बन्धस्य हेये लौकिकविग्रहे असम्भवादलौकिकः। हीनत्वात्तथेत्यर्थ इति। तथाच चिकीर्षितलीलाप्रतिबन्धकत्वेन हीनत्वाद्भूतग्रामवदन्तरायत्वं दृष्टान्तेनावगन्तव्यमित्यर्थः। लौकि-

रश्मिः।

त्वमज्ञानाभावस्य। बाधकमिति। अन्तरायत्वरूपं बाधकं सूत्रकार आह दत्त इति। सर्वात्मभावो दत्त इति तत्फलं सोपि दत्तः। फलसाधने एकीकृत्य निरूपिते वा। अर्थ इति। अभेदः। नेति। भक्तवश्यत्वादिति भावः। भक्तभावस्तु 'भद्रं कर्णेभिः शृणुयाम देवा' इति श्रुत्युक्तः। एकाकीति। एतावत्पर्यन्तमेकाकी पुरुषविधः। अहंकारपाप्मदाहभयविशिष्टः। मुख्येति। भक्तिमार्गेऽहंकारादिसत्त्व एकाकित्वम्, ज्ञानमार्गे तु न, ब्रह्मातिरिक्ताहंकारादेर्लयात्। कर्ममार्गे तु कर्मरूपीश्वरः। अतोऽत्र भक्तिमार्गस्येत्युक्तम्। मुख्यत्वं त्रिषु मार्गेषु। स्वात्मत्वेनेत्यादिभाष्यं विवृण्वन्ति स्म स्वात्मत्वेनेति। भजनानन्देति। सर्वात्मभावजन्यभजनानन्दान्तरायरूपम्। ज्ञानमिति। पुरुषोत्तमज्ञानम्। भजनानन्दमिति। भाष्यीयस्य तमितिपदस्यार्थः। अग्र इति भाष्यार्थोऽग्र इति। तस्येति। भक्तैः सह निगूढभावकर्तुः श्रीपुरुषोत्तमस्यैवार्थेन भेदेन लीला अनुभ(व)वतः अन्यथाभावोऽभेदेन भावः। बाधकमिति। विभाज्यस्यानुवृत्तिः। भगवतेत्यादीति। ननु जगद्व्यापारवर्जेऽधोक्षजे स्वात्मत्वेन ज्ञानमसम्भवीत्यत आहुः स्वीयत्वेनेति। तथाच 'नायमात्मा प्रवचनेन लभ्य' इति श्रुतिविषयभक्तविषयं पुरुषोत्तमस्य स्वात्मत्वेन ज्ञानं सम्भवीति भावः। तादृश इति। वृते। नेति। अन्यत्राप्राप्तं वृत प्राप्तं नेत्यर्थः। तत्सम्पादनस्य अभेदसम्पादनस्य। उक्तेति। वृतभक्तस्य पुरुषोत्तमशरीरत्वेन तस्य विग्रहोपि

त्वेत्यर्थः । अथवा । लौकिको भूतग्रामः स्त्रीपुत्रपश्वादिर्ब्रह्मानन्दानुभवे बाधकः, तथा भजनानन्दानुभवे स्वात्मत्वेन भगवज्ज्ञानमित्यर्थः ॥ ३५ ॥

अन्यथाऽभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॥ ३६ ॥

ननु भक्तेष्वप्युद्धवादिषु ज्ञानोपदेशः श्रूयते, स चात्मब्रह्माभेदज्ञानफलक इत्यात्मत्वेन ज्ञानाभावे तद्भेदोपदेशानुपपत्तिः स्यादिति तन्मन्तव्यमेव, एवं सति भक्तिमार्गात् ज्ञानमार्गस्योत्कर्षश्च सिध्यतीत्याशङ्क्य, परिहरति उपदेशा-

भाष्यप्रकाशः ।

कशरीरस्य प्रतिबन्धकत्वं सन्दिग्धत्वादुपपादनसापेक्षमित्यरुच्या प्रकारान्तरेण दृष्टान्तं व्याकुर्वन्ति अथवेत्यादि । यत्तदोर्नित्यसम्बन्धाद्यथेति पदमर्थादेवायातीत्यतो नोक्तम् ॥ ३५ ॥

अन्यथाऽभेदानुपपत्तिरितिचेन्नोपदेशान्तरवत् ॥ ३६ ॥ स्वात्मत्वेन भगवज्ज्ञानस्य बाधकत्वे भक्तेषु तदुपदेशो नोपपद्येतेत्याशङ्क्य परिहरतीत्याशयेन व्याकुर्वन्ति नन्वित्यादि । श्रूयते इति । एकादशस्कन्धे उच्यते । आत्मत्वेन ज्ञानाभावे इत्यन्तोऽन्यथापदस्यार्थः । तद्भेदोपदेशानुपपत्तिरित्यभेदानुपपत्तिरित्यस्यार्थः । इतीत्यारभ्य, परिहरतीत्यन्त इति चेन्नेत्यस्यार्थो व्याख्यातः ।

तत्रैवमभिसन्धिः । पूर्वं उपपन्नसूत्रे दासीदाससुहृद्भेदेन त्रिविधा लीलामध्यपातिनो भक्ता उक्ताः, तत्र 'नोद्धवोऽण्वपि मन्न्यून' इति वाक्यादुद्धवोऽत्यन्तरङ्गः । आदिपदेन व्रजस्थाः, तेपि 'रामेण सार्धं मथुरां प्रणीत' इत्यादिना विगाढभावा उक्ताः, तत्रोद्धवे साक्षादुपदेशः, व्रजस्थेषु सन्देशेन साक्षाच्च । तथा सतीतरेषु तदावश्यकत्वं किं वाच्यम् । किञ्च, तेषु चेदुपदेशो विफलः स्यात्, तदा अपार्थकार्यकर्तृत्वाज्जीवतुल्यत्वं चापद्येतेति तस्य तेषु फलमवश्यमभ्युपेयम् । एवं सति पूर्वोक्तं सर्वमयुक्तमिति सूत्रांशेनाशङ्क्य, दृष्टान्तेन परिहरतीति बोध्यः ।

रश्मिः ।

'ममास्तु तव सन्निधौ तनुनवत्वमेतावता न दुर्लभतमा रतिर्मुररिपौ मुकुन्दप्रिय' इति यमुनाष्टकोक्तोऽलौकिकः । **साक्षात्सम्बन्धस्येति** । भगवत्साक्षात्सम्बन्धस्य । **चिकीर्षितेति** । 'अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छति । आहो विद्वानमुं लोकं प्रेत्य कश्चित्समश्नुता उ ।' अग्रे 'अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामती'त्यानन्दमयपर्यन्तमुपसंक्रमणमुक्तम् । तदनन्तरं चिकीर्षितलीलाप्रतिबन्धकत्वेन । **सन्दिग्धत्वादिति** । पुष्टिमार्गीयाणां भक्तानामलौकिकशरीरप्राप्तिं विनैव पुरुषोत्तमानुभव इति सन्दिग्धत्वात् । किञ्च, पुरुषोत्तमस्य स्वात्मत्वेनानुभवो लीलान्तःपात्यपि लीलान्तःपातिप्रतिबन्धकसहित इति स नोक्तः । इत्यर्थ इति । तथाच श्रुतिः 'गुहां प्रविष्टावात्माना'वित्यधिकरणे 'विशेषणाच्चे'तिसूत्रे माध्वभाष्ये 'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवारुणो मैवारुणो मैवारुण' इति पैङ्गिश्रुतिः । भेद इवशब्दार्थकः । गीतायां 'विभक्तमिवे'ति ब्रह्म(प्र)करणवाक्यात् ॥ ३५ ॥

अन्यथाऽभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३६ ॥ विगाढेति । विगाढत्वं नामाविहितभक्त्या निरन्तरपुष्टपरब्रह्मभक्तिकत्वं भावे । 'रामेण सार्धं'मितिश्लोके सिद्धम् । **तस्य तेष्विति** । उपदेशस्योद्धवादिभक्तेषु । फलं स्वात्मत्वेन पुरुषोत्तमाभेदज्ञानम् । **पूर्वोक्तमिति** । अभेदज्ञा-

न्तरवदिति । न ह्यत्राभेदज्ञानायोपदेशः, किन्तु यथाग्निमस्वर्गापवर्गाख्यपारलौकिकानन्दफलकालौकिके कर्मण्यधिकाररूपसंस्कारार्थं गायत्र्युपदेशः क्रियते, तत्संस्कारसंस्कृतं तच्छरीरादिकमपि भूतादिभिरपि नोपहतं भवति, यथा वा योगोपदेशसंस्कृतस्य वपुरग्न्यादिभिर्नोपहन्यते, तथा प्रकृते भक्तिभावस्य रसात्मकत्वेन संयोगविप्रयोगभावात्मकत्वात् द्वितीयस्य प्रलयानलादतिकरालत्वेन कदाचित्तद्भावोदये तेन भक्तवपुरादेस्तिरोधानेऽग्रिमभजनानन्दानुभवप्रतिबन्धः स्यादिति तन्निवृत्त्यर्थं ज्ञानोपदेशसंस्कारसंस्कृतं तद्वपुरादिकं भगवता क्रियते, न त्वात्माभेदज्ञानं भगवतोऽभिप्रेतमित्यर्थः । अन्यथोपदेशानन्तरं बदरीं गच्छन् विदुरं प्रति 'इहागतोऽहं विरहातुरात्मे'ति न वदेत् । एवमेवान्येष्वपि भक्तेषु ज्ञेयम् । अत्रोपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशान्तरमाहेति प्रस्तुतस्य

भाष्यप्रकाशः ।

दृष्टान्तं व्याकुर्वन्ति न हीत्यादि । अत्र प्रथमार्थे वतिः । तथाच फलान्तरार्थं यथा गायत्र्युपदेशः, तथा भजनानन्दार्थमयमुपदेश इत्यर्थः । तस्यावान्तरफलं तत्संस्कारेत्यादिनोच्यते । तत्तथा न प्रसिद्धम्, अतः प्रकारान्तरमाहुः यथा वेत्यादि । एतच्चोक्तमेकादशे 'अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपु'रिति । अभिप्रेतमिति । मुख्यत्वेन अभिप्रेतम् । तथाचोक्तरीत्या उपदेशस्य फलान्तरसत्त्वेनात्मनि तदभेदज्ञानस्य साफल्ये सति न भगवतो जीवतुल्यत्वापत्तिः, नापि ज्ञानमार्गोत्कर्ष इत्यर्थः । नन्वत्रोक्तरीत्या भजनानन्दप्रतिबन्धाभाव एवोपदेशफलम्, न ब्रह्माभेदानुभव इत्यत्र किं गमकमित्याकाङ्क्षायामाहुः अन्यथेत्यादि । एवमन्येष्वपि भक्तेषु ज्ञेयमिति । कुरुक्षेत्रप्रसङ्गस्योत्कण्ठावाक्यैः 'आहुश्च ते नलिननाभे'ति वाक्याच्च ज्ञेयम् । ननु भवत्वेवम्, तथापि सूत्रे 'अभेदानुपपत्ति'रित्युक्तम्, न त्वभेदोपदेशानुपपत्तिरिति, अतोऽत्रायमेव सूत्रकाराशय इति कथं ज्ञातव्यमित्यत आहुः अत्रेत्यादि । दृष्टान्तकोटिप्रविष्टमुपदेशान्तरपदं प्रस्तुतोपदेशभिन्नमुपदेशान्तरमाहेति प्रस्तुतस्य तस्योपदेशस्याभावादभेदानुपपत्तिपदमलग्नकं स्यात्,

रश्मिः ।

नस्य प्रतिबन्धकत्वम् । बोध्य इति । अभिसन्धिर्बोध्य इत्यर्थः । अत्रेति । सौत्रदृष्टान्ते । अयमिति । सौत्रो भेदोपदेशः । मुख्यत्वेनेति । अन्यानङ्गत्वेन । उक्तविरोधादितिभावः । उक्तरीत्येति । यथा वेत्यादिभाष्योक्तरीत्या । नेति । अपार्थकार्यकर्तृत्वात्तथा । नापीति । एवं सति भक्तिमार्गाज्ज्ञानमार्गोत्कर्ष इत्यादिभाष्योक्तज्ञानमार्गोत्कर्षो नेत्यर्थः । उक्तरीत्येति । यथा वेत्यादिभाष्योक्तरीत्या । अन्यथेत्यादीति । न वदेदिति । उपदेशानन्तरं पुरुषोत्तमाभिन्नत्वादविरहात्मेति वदेत् । अन्येष्विति । देवकीवसुदेवार्जुनेषु । एकादशसमाप्तौ 'प्राणांश्च विजहुस्तत्र भगवद्विरहातुरा' इति वाक्यम् । अर्जुने तु 'कृष्णस्य विरहातुर' इति वाक्यम् । श्रीनन्दे तु वक्ष्यमाणम् । अत्र विरहोऽविद्यया विद्योपमर्दे इत्याशङ्क्याहुः कुरुक्षेत्रेति । एकोनाशीतितमाध्याय उत्तरार्धे 'अथैकदा द्वारिकायां'मित्यारम्भके उत्कण्ठावाक्यानि । तानि च 'का विस्मरेत वां मैत्री'मित्यादीनि । वां नन्दयशोदयोः मैत्रीम् । रोहिणी देवकी च वदति यशोदां प्रति । इतोप्युत्कण्ठावाक्यमाहुः आहुश्चेति । गोप्य आहुश्च । 'आहुश्च ते नलिननाभ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यम-

१. अपिर्नास्ति क्वचित् । २. प्रकाशे एवेति नास्ति । ३. उपदेशमाहेति पाठ. ।

तस्यान्यस्याभावादभेदपदेनाभेदोपदेश एवोच्यते । एतेन भगवान् स्वीयानां भक्तिभावप्रतिबन्धनिरासायैव सर्वं करोतीति ज्ञापितं भवति ।

अथवा। उपदेशान्तरवदित्यस्यायमर्थः। शरीराद्यध्यासवतस्तद्भिन्न आत्मा तत्त्वम्, न तु शरीरादिरित्युपदेशो ज्ञानमार्गे यथा क्रियते, तेन शरीरादावात्मबुद्ध्या यः स्नेहादिः, सोऽपगच्छति, तथात्र सर्वेषामात्मनो ह्यात्मा 'य आत्मनि तिष्ठ'न्नित्यादिश्रुतिसिद्धो जीवात्मनोऽप्यात्मा पुरुषोत्तम इति बोध्यते। तेन पुरुषोत्तमे निरुपधिः स्नेहस्तत्सम्बन्धित्वेनात्मनि स सिध्यति । यद्यप्येवंभावः पूर्वमप्यासीदेव, तथापि सहजस्य शास्त्रार्थत्वेन ज्ञाने सति प्रमोदो[1] दार्ढ्यं च भवतीति तथा। नैतावता जीवाभेद आयाति। अग्रे जीवनसम्पत्तिरेवोपदेशकार्यम्, न तु तेन पूर्वभावोपमर्दः सम्भवतीति सारम्। तेन ज्ञाने सर्वाधिक्यं मन्वानाय भक्तिबलप्रदर्शनं च सिध्यति ॥ ३६ ॥

भाष्यप्रकाशः।

अतोऽत्राभेदपदेनाभेदोपदेश एव लक्षणयोच्यत इत्यभेदपदान्वयापत्त्या ज्ञातव्यमित्यर्थः। तेन सिद्धमाहुः एतेनेत्यादि। एतेनेति। उक्ताशङ्कानिरासेन।

भक्तदेहस्थितेर्योगादेशादपि सम्भवेन तदर्थमात्मब्रह्माभेदोपदेशकथनं न युक्तमित्यरुच्या उपदेशान्तरपदस्यार्थान्तरमाहुः अथवेत्यादि। तथाच स ज्ञानोपदेश एतदर्थः, न त्वात्मब्रह्माभेदज्ञानफलक इति न तेन ज्ञानोत्कर्षसिद्धिरित्यर्थः। नन्वेवं सति ज्ञानोपदेशवैयर्थ्यं नापैतीत्याशङ्क्य परिहरन्ति यद्यपीत्यादि। तथेति। अवैयर्थ्यम्। नैतावतेत्यादि। तथाचैवं ज्ञानोपदेशस्य सार्थक्यादेतावता आत्मत्वोपदेशमात्रेण न जीवस्य ब्रह्माभेद आयातीत्यर्थः। तेन सिद्धमाहुः अग्र इत्यादि। तथाच यत्र किञ्चित्कार्यार्थं विप्रयोगसहनमावश्यकम्, तत्रैवैवं प्रभुः करोति, न तु सर्वत्र। अतः पूर्वोक्तं सर्वं सारमुपपन्नमित्यर्थः। एवंकरणस्य प्रासङ्गिकं फलमाहुः तेनेत्यादि।

ननूद्धवादिषु ज्ञानोपदेशः पौराणः, स किमर्थमिह विचार्यत इति चेत्। उच्यते। 'विधिश्च प्रतिषेधश्च निगमो ही'त्यादिनोद्धवकृतप्रश्नेन 'मां विधत्तेऽभिधत्ते मा'मित्यादिना भगवदुक्तोत्तरेण

रश्मिः।

गाधबोधैः। संसारकूपपतितोत्तरणावलम्बं गेहंजुषामपि मनस्युदियात्सदा नः'। लक्षणयेति। नामैकदेशत्वादैशिकसम्बन्धो लक्षणा तया। अभेदपदेति। यथा 'गङ्गायां घोष' इत्यत्र घोषपदान्वयानुपपत्त्या लक्षणाबीजभूतया ज्ञातव्यमित्यर्थः। उक्तेति। ननु भक्तेष्वित्याद्युक्तशङ्कानिरासेन। भक्तिभावेति। विरहेण वपुराद्यभावे भक्तिभावे विरहांशप्रतिबन्धः तन्निरासाय। भ्रमरगीतसुबोधिन्यैवकारः। अपैतीति। पूर्ववत्। यद्यपीत्यादीति। पूर्वमिति। (यथाहुस्ते (उद्धवादयः) उत्पत्त्यैव भक्ता इति। तथाच जन्मना ज्ञानवन्तो जडभरतादयो ज्ञेयाः। यद्वा। युगलगीते गोपीनां सिद्धेः।) उपदेशात्पूर्वमित्यर्थः। अतीति। तेनोत्तमाधिकारोद्द्योति भाष्यारम्भकारिकायाः। अग्र इत्यादीति। देवकीवसुदेवार्जुननन्दगोपीषु। अग्रे एकादशसमाप्तौ एकाशीतितमाध्याये भ्रमरगीते च। उपदेशकार्यमुक्तम्। अतः पूर्वोक्तमिति। भक्तविषयत्वात्पूर्वोक्तं भक्तिभावप्रतिबन्धनिराकरणाय ज्ञानोपदेशः, न तु पुरुषोत्तमस्य स्वात्मत्वेन ज्ञानायेत्युक्तम्। सारमिति। स्मार्तः प्रयोगः। 'सारं सारं समुद्धृत'मिति वाक्यात्। प्रासङ्गिकमिति। प्रसङ्गो ब्रह्माभेदज्ञानफलकज्ञानोपदेशपरिहारस्य तेन जन्यते भक्तिबलप्रदर्शनं प्रासङ्गिकम्।

१. अतिप्रमोद इति पाठः।

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥

ननु 'तद्योऽहं सोऽसौ योऽसौ सोऽह'मित्यैतरेयके, तैत्तिरीयके च 'अहमस्मि ब्रह्माहमस्मी'ति पठ्यते। अत्र मध्यस्थं ब्रह्मपदमुभयत्र सम्बध्यते। तेनावृत्त्या व्यतिहारः। अतो ब्रह्माभेदः सिध्यति। तथा लीलामध्यपातिभक्तानामपि 'कृष्णोऽहमहं कृष्ण' इति भाव उल्लेखश्च श्रूयते। अतस्तदभेदज्ञानं भक्तिफलमिति पुम्फुल्यमानं[1] प्रतिवादिनं तत्स्वरूपं बोधयति। रसात्मकत्वाद्भक्तेः संयोगविप्रयोगात्मकत्वात्

भाष्यप्रकाशः।

च तस्य श्रौतत्वस्फुटीकरणात्, सन्देशेपि 'एतदन्तः समाम्नाय' इति वाक्येन तथात्वाद्विचार्येत इति जानीहि।

अत्र शाङ्करा द्विसूत्रमेतदधिकरणमङ्गीकृत्य बृहदारण्यकस्थोषस्तकहोडब्राह्मणयोर्भिन्नविद्यात्वमभ्यासादाशङ्क्य रूपाभेदादैकविद्यं साधयन्ति।

भास्कराश्च सूत्रमेकीकृत्य उपदेशवदित्येवं पठित्वा पूर्ववदेव सिद्धान्तयन्ति।

रामानुजास्तु व्यतिहारादिसूत्रद्वयमत्र निक्षिप्यैतदेव सिद्धान्तयन्ति।

तदिदमुपसंहारस्वाध्यायसूत्राभ्यामेव सिध्यतीति तेनैव गतार्थम्, अतो न पृथक् चिन्तनीयम् ॥ ३६ ॥

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥ सूत्रमवतारयन्ति नन्वित्यादि। ऐतरेयके इदं वाक्यमादित्यपुरुषं प्रकृत्योक्तम्। तैत्तिरीयके तु जलस्थं ब्रह्म प्रकृत्य। अत्रेति। तैत्तिरीयके। तेनावृत्त्या व्यतिहार इत्यादि। ब्रह्मपदस्योभयत्र सम्बन्धेन तदावृत्त्या व्यतिहारः स्वात्मनो ब्रह्मत्वविधानेन ब्रह्मणः स्वात्मत्वविधानेन व्यत्ययः। अत उक्तरूपाद्व्यत्ययाज्जीवस्य ब्रह्माभेदः सिध्यति, तथा भक्तवाक्येपीति शङ्कायां व्यतिहारस्वरूपं सूत्रेण बोधयति। तथाच यद्यभेददर्शनस्य भक्तिफलत्वं न स्यात्, तदा लीलास्थानां ब्रह्माभेदो न स्फुरेत्, स तु स्फुरतीति दृश्यत इति पूर्वोक्तः सिद्धान्तो न युक्त इत्याशङ्कायां व्यतिहार-

रश्मिः।

शैषिकः प्रत्ययः। भाष्यीयचकारार्थः। श्रौतविषयाग्रहिणः प्रत्याहुः नन्विति। श्रौतत्वेति। विधिप्रतिषेधार्थवादनामधेयमन्त्राणां श्रुतिषु दर्शनाच्छ्रौतत्वस्फुटीकरणात्। समाम्नायः श्रुतिः। 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति श्रुतिः। प्रपञ्चोयमिति। बृहदिति। 'यत्साक्षादपरोक्षं ब्रह्म, य आत्मा सर्वान्तर' इत्येवं द्विरुषस्तकहोडप्रश्नयोर्नैरन्तर्येण वाजसनेयिनः समामनन्तीति। 'अभ्यासस्य भेदकत्वं पूर्वतन्त्रसिद्धम्'। एकीकृत्येति। तेन 'अन्तरा भूतग्रामवदात्मनोऽन्यथाभेदानुपपत्तिरितिचेन्नोपदेशव'दित्येवमेकीकृत्य ॥ ३६ ॥

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥ आदित्येति। अन्तस्तद्धर्माधिकरणोक्तमादित्यपुरुषम्। जलस्थमिति। 'अम्भस्यपार' इत्यारम्भात्। अम्भसि अपारे इति च्छेदः। अत एव 'नमामि हृदये' इति सुबोधिन्यारम्भे कारिका। व्यत्यय इति। विशेष्यविशेषणभावस्य ब्रह्मजीवयोर्व्यत्ययो वैपरीत्यम्। पूर्वोक्त इति। ज्ञानोपदेशस्य भक्त्यर्थं वपुरादिधारणार्थत्वमिति सिद्धान्तः।

---

१. पम्फुल्यमानमिति पाठः।

द्वितीयभावोद्रेके यथेतरेऽश्रुप्रलापादयो व्यभिचारिभावाः, तथातिविगाढभावेन तद्भेदस्फूर्तिरप्येकः, स च न सार्वदिकः, तदा स्वात्मानं तत्त्वेन विशिंषन्ति, तं च स्वात्मत्वेन। सोऽत्र व्यतिहारपदार्थ इत्यर्थः। अपरं च। उद्देश्यविधेयभावस्फूर्तौ न ह्यद्वैतज्ञानमस्ति, किन्तु भावनामात्रम्, भक्तानां तु विरहभावे तदात्मकत्वमेवाखण्डं स्फुरति, येन तल्लीलां स्वतः कुर्वन्ति। एतद्यथा तथा श्रीभागवतदशम-

भाष्यप्रकाशः।

स्वरूपमनेन बोधयतीत्यर्थः। सूत्रं व्याकुर्वन्ति रसात्मकत्वादित्यादीति। एकः स इति। एको व्यभिचारिभावः। तथाच विरहदशायां काश्चनात्मानं तत्त्वेन विशिंषन्ति, अन्याश्च तं स्वात्मत्वेन, अतो भिन्नवक्तृको व्यतिहारपदार्थः, न तु त्वदुक्तरीतिकः, अतः कादाचित्कत्वात्र तस्य भक्तिफलत्वमित्यर्थः। सूत्रयोजना तु, **इतरवत्** अश्रुप्रलापादिवत्, भक्तानां 'अहं कृष्णः कृष्णोऽह'मिति **व्यतिहारो** विशेषणबुद्धिव्यत्ययो व्यभिचारिभावः, **हि** यतो हेतोः **विशिंषन्ति**। भगवद्दृष्टत्वेनाश्वत्थादीनिव। अनेन प्रकारेणानात्मानं कदाचिदेव विशिंषन्ति, न सर्वदा, अतस्तथेति। एतेनोदाहरणेन भक्त्युत्कर्षसिद्धिं स्फुटीकुर्वन्ति अपरं चेत्यादि। (तथाचात्र 'लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका' इति पूर्वं कथनात्, 'रिङ्गयामास काप्यङ्घ्री कर्षती'त्यादावनुकरणे स्वात्मविस्मरणेन केवलभगवत्त्वस्फूर्तेरेव बोधनात्तथेत्यर्थः। एवञ्च 'मय्येव सकलं जात'मित्यत्रापि भावनामात्रम्, चतुर्थपादे 'तद्ब्रह्मास्म्यहमेव य' इत्यत्र 'ब्रह्माह'मिति पदाभ्यामद्वयभावनामात्रस्यैव बोधनात्। एतद्यथा तथा अस्माभिः कैवल्योपनिषदर्थसंग्रहे स्फुटीकृतमिति ततोऽवधेयम्। अत्राभेदानुभवस्य विगाढभावदशास्थव्यभिचारिभावतया भक्तिमार्गे विनियोग-

रश्मिः।

रसात्मकत्वादित्यादीति। **अतिविगाढेति**। अविहितभक्तिपूर्वकशास्त्रीयस्नेहवत्त्वं विगाढत्वम्। अतिशब्दस्तु अन्याभिनवगुप्तपादादिप्रौढदृष्टत्वेनात्यन्तत्वार्थं विगाढम्। **तद्भेदेति**। रामानुजभाष्ये 'अम्भस्यपार' इत्यारम्भे 'महीया'निति पदेनानन्दवल्लीस्थो 'रसो वै स' इत्युक्तः परामृश्यतेऽतोऽत्र तदभेदस्फूर्तिः। **तमिति**। पुरुषोत्तमम्। **भिन्नेति**। ज्ञानिभिन्नभक्तवक्तृकः। **त्वदिति**। ज्ञानिवक्तृकः। 'अहं मनुरभवं सूर्यश्चे'तिवत्। **अत** इति। भक्तिमार्गीयत्वात्। **तस्येति**। पुरुषोत्तमाभेदज्ञानस्य। **विशेषणेति**। **व्यत्ययो** वैपरीत्यम्। **व्यभीति**। शान्तरसनिष्ठत्वे सति भक्तिरसनिष्ठत्वात्। **तथेतीति**। **भक्तिमार्गीयेति**। **अपरं चेत्यादीति**। परेषामैतरेयतैत्तिरीयकयोरुद्देश्यविधेयभावेऽविद्याया अगतत्वान्न ह्यद्वैतज्ञानमस्ति, किन्तु शास्त्रदृष्ट्या भावनाऽभेदस्मरणम्। एवकारार्थे मात्रच्। पूर्णज्ञानिनो वामदेवस्य 'अहं मनुरभवं सूर्यश्चे'त्येवमवयुत्य(?)निरूपणमद्वैतस्य। कर्ममार्गे सन्यासाभावाद्भक्तिमार्गे आहुः **भक्तानामिति**। सन्यासे विरहभावे। 'विरहानुभवार्थं तु सर्वत्यागः प्रशस्यत' इति वाक्यात्। **अखण्डमित्यस्य** भावाद्वैते विशेषणं **तदात्मकत्वमेवेति**। यथा 'सा सा सा सा जगति सकले कोऽयमद्वैतवाद' इति। वक्ष्यन्ति चाग्रे लिङ्गभूयस्त्वाधिकरणे। **येनेति**। अनेनाखण्डस्फुरणस्य करणत्वमुक्तम्। निरोधलीलाकरणे 'पृच्छथेमा लता' इत्यत्राखण्डं तदात्मकत्वं लतासु स्फूर्तिः करणम्। यतो भगवदीय एव भगवद्गतिं जानातीति पृच्छया भवन्ति। 'स्वयमेवात्मनात्मानं जानासी'ति वाक्यात्। तत्रापि स्वतः स्फुरणं प्रत्यक्षात्मकमिति नान्यप्रश्नापेक्षा। भक्त्युत्कर्षस्त्वेवम्। सर्वभावः पुरुषोत्तमः। गीतायां पुरुषोत्तमयोगाध्याये तथोक्तेः। स चाक्षरद्वारा, स च पाद इति अखण्डांश इदमित्थतयाक्षर एव, पुरुषोत्तमस्या-

स्कन्धविवृतौ प्रपञ्चितमस्माभिः । एवं सति मुख्यं यदद्वैतज्ञानं तत् भक्तिभावैक-देशव्यभिचारिभावेष्वेकतरदिति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमिति भावः ॥ ३७ ॥

इति तृतीयाध्याये तृतीयपादे द्वादशमन्तरा भूतग्रामवदित्यधिकरणम् ॥ १२ ॥

भाष्यप्रकाशः ।

विचारेण साधनदशायां सर्वभावेन भजने भेदोपासनवदभेदोपासनस्याप्येकदेशत्वं बोधितम् । सर्वभावेनैवाकृत्स्नत्वपरिहारे तत्र विशेषाभावादिति ।)

यत्तु शङ्करभास्कराचार्यौ पूर्वोक्तमैतरेयवाक्यं 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसी'ति जाबालवाक्यं चोदाहृत्य, किमिह व्यतिहारेणोभयरूपा मतिः कार्या, उतैकरूपेति संशये, उभयरूपमतिकरणे ईश्वरस्य निकर्षः, संसारिणश्चोत्कर्ष आपद्येतेत्येकरूपैव कार्येति पूर्वपक्षमुक्त्वा, उभयरूपैव कार्या, अन्यथा उभयाम्नानमनर्थकं स्यात् । नचोक्तदोषापत्तिः । अनेन प्रकारेणाप्यात्मैक्यस्यैवानुचिन्तनीयत्वात् । वचनप्रामाण्यात्त्वत्र द्विरूपा मतिः कर्तव्येत्युच्यते । फलतस्त्वेकत्वमेव दृढीभवति । यथा ध्यानार्थेपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यति, तद्वदित्याहतुः ।

तदसङ्गतम् । तस्या मतेर्वचनमात्रजन्यत्वे विशेष्यविशेषणभावस्फुरणेन तादृशभावनामात्रं कार्यमिति सिध्यति, न तु तेन भेदोऽपैति, आहार्यज्ञानत्वात् । नचानेन फलत ऐकात्म्यसिद्धि-रित्यपि युक्तम् । पूर्वोक्तैर्न्यायैस्तद्विषयश्रुतिभिश्च सिद्धे अंशांशिभावे तदपनोदेनैकात्म्यस्य वक्तु-मशक्यत्वात् । 'यथा ध्यानार्थेऽपी'ति भवदुक्तन्यायेनापि वाक्यप्रामाण्यात्तद्गुणकेश्वरप्रसिद्धिवद्विशेष-णविशेष्यभावबोधनबलात् तादात्म्यस्यैव सिद्धेश्च । लक्षणाग्रस्तं वाक्यैकदेशं 'तत्त्वमसी'त्यादाय

रश्मिः ।

धोक्षजत्वात् । तथाचेदमित्थतया चरणेऽखण्डत्वम्, न भक्तिलभ्ये पुरुषोत्तम इति ज्ञानाद्भक्त्युत्कर्ष-सिद्धिः । **अत्रेत्यारभ्येती**त्यन्तो ग्रन्थो मूलपुस्तके नास्ति। व्याख्या तु **सर्वभावेने**ति। पुरुषोत्तम-योगाध्याये 'यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्वविद्भजति मां सर्वभावेन भारते'तिवाक्या-त्सर्वभावेनेत्यादिः। **एकदेशित्वं**[१] वृक्षधर्मदेशित्वम्। **तत्रे**ति। अखण्डज्ञाने। **भाष्ये**। **एवं सती**त्यादि। **मुख्य**मिति । लोकाश्रयणात् । अन्यमार्गत्वाद्वा । **भक्तिभावे**ति । त्रयस्त्रिंशद्व्यभिचारिभावाः तेष्वेक-तम इति प्राप्ते महाभाष्यप्रयोगात्तरप् । **ज्ञानभक्त्यो**रिति । दृष्टान्तोऽखण्डस्फुरणेनेति अक्षरज्ञानपीत-कौशेयवासोभक्त्योस्तारतम्यं कथं वर्णनीयमिति प्रश्नः । भक्तिमार्गेऽन्तराभेदासम्पादनाद्भक्त्युत्कर्ष इत्यु-त्तरम् । ससारिणश्चोत्कर्ष इति । एकेषां जीवब्रह्मवादादपरेषां व्यापकैकजीववादादुत्कर्षः ब्रह्मज्ञानात् । व्यापकैकजीवस्य ब्रह्मणा भेदाभेदौ । **एकरूपे**ति । 'अहं वै त्व'मिति । **उक्ते**ति । निकर्षोत्कर्षदोषयो-रापत्तिः । **एकत्व**मिति । आवरणभङ्गजं बोध्यम् । **अपैती**ति । अप आ एति । बाधकालीनमिच्छा-जन्यं ज्ञानमाहार्यज्ञानम् । वेदान्तविज्ञानेनावरणभङ्गे फलतस्त्वेकत्वे भूयसां साधनप्रतिपादकानां वेदभा-गानां वैयर्थ्यप्रसङ्गमालोच्याहुः **पूर्वोक्तै**रिति । द्वितीयाध्यायोक्तैः सूत्रैः । **वक्तु**मिति । साधनैर्विना वक्तुम् । **विशेषणे**ति । 'त्वमहं अहं त्व'मिति **विशेषणविशेष्यभावः**। विशेषणस्य विशेष्यभावः । अन्यथा धर्मादित्वं स्यात्। तस्य बोधनबलात्। **तादात्म्यस्ये**ति। नीलो घट इत्यत्रेव गुणस्यांशस्य तदात्मनो भावत्वं तस्यैव सिद्धेः । घटो नील इति पक्षेपि तथा । **लक्षणे**ति । अंशांशिभावे तादात्म्यम् ।

१. रश्मौ एकदेशित्वम् ।

सैव हि सत्यादयः ॥ ३८ ॥ (३-३-१३.)

अथेदं विचार्यते । प्राप्तभक्तेः पुरुषस्य सत्यशमदमादयो विधीयन्ते, न

भाष्यप्रकाशः ।

सकलशास्त्रव्याकुलीकरणानौचित्यस्य प्रागेवोक्तत्वाच्चेति ।

रामानुजाचार्यास्तु । 'सर्वं खल्विदं ब्रह्म', 'ऐतदात्म्यमिदं सर्वं तत्त्वमसी'त्यवगतसर्वात्मभावविषयत्वादस्य वाक्यस्य नात्र प्रतिपादनार्थमपूर्वं किञ्चिदस्ति, तत्तु वक्ष्यति 'आत्मेति तूपगच्छन्ति ग्राहयन्ती'ति । नच सर्वात्मत्वानुसन्धानातिरेकेण परस्मिन् ब्रह्मणि जीवत्वानुसन्धानं जीवे च ब्रह्मत्वानुसन्धानं तथ्यं सम्भवति । तस्मादनादरणीयं तन्मतमित्याहुः । तदपि युक्तमेव ।

एतस्मिन्नधिकरणे वैराग्यतपःसमाधिपरिपाकसिद्धस्य ब्रह्मात्माभेदज्ञानस्य भक्तिमार्गीयत्व्यभिचारिभावतानिरूपणेन ब्रह्मभावप्राप्यत्वबोधकं **पीतकौशाम्बरेण च विदितमिति विशेषणं** प्रतिपादितं ज्ञेयम् । ज्ञानमार्गिणां तावतैव ब्रह्मभावात्मकफलसिद्धेरिति ॥ ३७ ॥ **इति द्वादशामन्तराभूतग्रामवदित्यधिकरणम् ॥ १२ ॥**

सैव हि सत्यादयः ॥ ३८ ॥ फलतो भक्त्युत्कर्षं साधयित्वा साधनतोऽपि तत्

रश्मिः ।

तदपेक्षया तदंशे तच्छब्दलक्षणेत्येवं एकदेशं तदिति अभेदसम्बन्धः । **सकलशास्त्रे**ति । 'ऐतदात्म्यमिदं सर्व'मित्यादिवेदशास्त्रेत्यर्थः । तन्मूलान्यन्यशास्त्राणीति सकलशब्दः । **प्रागे**वेति । द्वितीयाध्याये तदनन्यत्वाद्यधिकरणे । **सर्वात्मे**ति । सर्वस्मिन्नात्मभावः सर्वात्मभावः । तद्विषयत्वात् । **अस्ये**ति । उक्तैतरेयवाक्यस्य जाबालवाक्यस्य च । **अपूर्व**मिति । 'सर्वं खल्विद'मित्यादिप्रतिपादितं पूर्वं न भवतीत्यपूर्वम् । **वक्ष्यती**ति । फलाध्याये । **तन्मतं** पूर्वमतम् । षोडशाधिकरणीप्रतिपाद्यमाहुः **एतस्मि**न्निति । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजये'दिति भक्त्यनन्तरं योगसूत्रसिद्धमाहुः **वैराग्ये**त्यादि । 'जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय' इति । तेन साधनसिद्धमभेदज्ञानमुक्तम्, न तु शाब्दज्ञानेनापरोक्षम् । **ब्रह्मभावे**ति । अक्षरज्ञानप्राप्यत्वबोधकं सात्त्विकत्वेन सगुणाक्षरज्ञानप्राप्यः पीतकौशाम्बरो भाति । पीतकौशाम्बरं माया । गोपालतापिनीये 'माया पीताम्बर'मित्युक्तम् । अत्र ब्रह्मभावानन्तरं भगवद्भावो ज्ञेयः 'अक्षरधिया'मिति सूत्रादनुवृत्तः । तेन पीतकौशेयाम्बरो विषयो नास्थूलादिमात्रश्रुतिविषयोऽक्षरः । **ब्रह्मभावे**त्यत्र ब्रह्मभावेन प्राप्यत्वं ब्रह्मभावप्राप्यत्वं तस्य बोधकमिति करणतृतीयासमासः । ननु क्वचिद्ब्रह्मभावविषयत्वमक्षरस्य क्वचित्पीतकौशेयाम्बरस्येत्यत्र व्यवस्थामाहुः **ज्ञानमार्गिणा**मिति । मार्गभेदाद्व्यवस्थेति भावः । **तावता** अक्षरज्ञानमात्रेण । ब्रह्मभावत्वेनाक्षरात्मकत्वेन कार्यकारणभावादेवकारः । ब्रह्मभावस्य भगवद्भावद्वारत्वे तु पीतकौशेयाम्बरस्य ब्रह्मभावस्य सगुणत्वादितिभावः । अत्र सुबोधिनी । 'पीतं कौशं कौशेयं यदम्बरं तेन च विदितम् । अनेन ब्रह्मभावेपि ज्ञानमङ्गमिति तदेव विशेषणमाह **पीत**मिति । अहन्ताममताभावः । रूपत्रये शुक्ले पीतान्तर्भावात् । अहन्ताममता कृष्णा मायाकार्यत्वेन तमोरूपत्वात्तमसश्च नीलत्वात् । कौशमिति कुशसम्बन्धिनो यमनियमादयः । अम्बरमित्यवस्थापरित्यागेन निर्लेपता । एतानि ब्रह्मभावे ज्ञानसाधनानि । 'वैराग्यं च तपश्चैव समाधिरिति साधनम्' । एकमेवैतन्न प्रत्येकपर्यवसायि । चकारोऽनुक्तसमुच्चयार्थः । सर्वफलरूपो भगवानित्यर्थ' इति । अत्रालैकिकं व्याख्यानं भगवतोऽलौकिकत्वात् ॥ ३७ ॥ **इति द्वादशमन्तरा भूतग्रामवदित्यधिकरणम् ॥ ११ ॥**

सैव हि सत्यादयः ॥ ३८ ॥ फलत इति । ब्रह्मभावस्याक्षरं तद्भावस्य पुरुषोत्तम इति ।

वेति। फलोपकार्यन्तरङ्गसाधनत्वात् शुद्धौ सत्यामेव चित्ते भगवत्प्रादुर्भावसम्भवात् विधीयन्त इति पूर्वः पक्षः। तादृशस्य ते न विधीयन्त इति सिद्धान्तः। तत्र हेतुमाह। हि यस्माद्धेतोः, सैव भक्तिरेव सत्यादिसर्वसाधनरूपा। तस्यां सत्यां सत्यादयो ये ज्ञानमार्गे विहितत्वात् कष्टेन क्रियन्ते मुमुक्षुभिः, ते भक्तहृदि भगवत्प्रादुर्भावात् स्वत एव भवन्तीति न विधिमपेक्षन्त इत्यर्थः ॥ ३८ ॥

भाष्यप्रकाशः ।

साधयतीत्याशयेनाधिकरणं वदन्तोऽवतारयन्ति अथेत्यादि । यथा 'सत्यं परं पर१सत्य'मित्यादौ ज्ञानार्थम्, यथाच 'शान्तो दान्त' इत्यादौ ज्ञानोत्तरं सत्यशमदमादयो विधीयन्ते, तथा प्राप्तभक्तेः पुरुषस्य भक्त्युत्तरं ते विधीयन्ते, न वेति संशये, फलोपकार्यन्तरङ्गसाधनत्वात् फलस्य भगवत्प्राप्तेरुपकारी मुख्यं साधनं भगवदाविर्भावः, तस्यान्तरङ्गा चित्तशुद्धिः, तस्याः साधनानि सत्यादीनि, तस्मात् । एतदेव विवृणोति **शुद्धौ सत्यामेव चित्ते भगवदाविर्भावसम्भवादिति** । अतो यथा सम्परायाधिकरण उपन्यस्तैर्वाक्यैर्भक्तेः पूर्वं ते विधीयन्त इत्युन्नीयते, तथा भक्त्युत्तरमपि ते विधीयन्ते इति पूर्वपक्षः । तादृशस्य प्राप्तभक्तेस्ते सत्यादयो न विधीयन्ते, 'भक्त्या त्वनन्यये'ति वाक्ये अन्यसाधननिरपेक्षयैव भक्त्या ज्ञानदर्शनप्राप्तीनामुक्तत्वात् तयैव संसिद्धेरिति सिद्धान्तः । तत्र सिद्धान्ते युक्तिमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति हीत्यादि । 'यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि । सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसे'ति । 'धर्मः सत्यदयोपेतो विद्या वा तपसान्विता । मद्भक्त्यापेतमात्मानं न सम्यक्प्रपुनाति ही'ति च एकादशे भगवद्वाक्यात् **सैव भक्तिरेव सर्वसाधनरूपा** । अतस्तथेत्यर्थः ।

रश्मिः ।

साधनत इति । ज्ञानमार्गे साधनानि सत्यशमदमादीनि । ज्ञानानन्तरमनुवर्तनात् । वेदान्तशब्दस्तु प्रमाणं न साधनम् । प्रमाणावगतसाधने प्रवर्तते यतः । अतः सत्यशमदमादिभिः शाब्दापरोक्षं तद्वन्न भक्तिमार्गे, न सत्यशमदमादयो भगवद्रूपे फले साधनम्, किन्तु भक्तिरेवेति साधनतः सत्यशमदमादितोपि। **तत्** उत्कर्षम्। **तदित्यव्ययम्** । भक्त्युत्कर्षम्। तत्सर्वरूपत्वं भक्तेः, न तु भक्तिरूपत्वं सत्यशमदमादीनां ज्ञानसाधनत्वेप्यत्रेत्येवं साधनतोपि तत्साधयतीत्यर्थः। **यथेत्यादि** विचारो **यथे**त्यर्थः । भाष्यसूचितं विषयवाक्यमाहुः **सत्यं परमि**ति । इदं विषयवाक्यम् । 'सदेव सौम्येदमग्र आसीत्' 'सत्यं परं धीमहि' 'सत्यव्रतं सत्यपरं त्रिसत्य' मित्यादिषु सत्यज्ञानानन्तेषु सत्योपादानात् । अन्ययोरुपलक्ष्यत्वात् । 'शान्तो दान्त' इति शारीरब्राह्मणेस्ति। 'अणुः पन्था विततः पुराणः' इति द्वितीयाध्याये भोक्त्रापत्तिसूत्रेऽणुः पठितः । महत उपासनमाह । तथा चोपक्रमः । 'विरजः पर आकाशात् अज आत्मा महान्ध्रुवः'। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः'। 'नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि त'दिति । उपसंहारश्च 'स वा एष महानज आत्मा अजरोऽमरोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभय१ ह वै ब्रह्म भवती'ति । **ज्ञानोत्तरमि**ति । 'तस्मादेवंविच्छान्तो दान्त' इति पाठाविदो विशेषणीभूतज्ञानानन्तरम् । यतो वेत्तीति वित् ज्ञानानुकूलव्यापारवान् । ज्ञानं च साधनचतुष्टयसाध्यमिति विषयश्रुतौ सत्यशमदमादयः ज्ञानोत्तरं पूर्वं वा विधीयन्ते, तथा ज्ञानशब्दस्य भक्तिपरत्वे प्राप्तभक्तेर्भक्तेः पूर्वं स्वतःसिद्धसत्यशमदमादयो भक्त्युत्तरं विधीयन्ते न वेति संशय इत्यर्थः । फलेतिभाष्यं विवृण्वन्ति स्म **फलेति** । **त** इति । तर्तव्यपापादयः । **त** इति । सत्यशमदमादयः । तादृशस्येतिभाष्यं विवृण्वन्ति स्म **तादृशस्येति** । **युक्तिमिति** हेतुशब्दार्थः । **अतस्तथेति** । सैव भक्तिरेव सत्यादिसर्वसाधनरूपा ।

१. भगवदाविर्भाव इति प्रकाशपाठः ।

भाष्यप्रकाशः ।

अत्र शङ्करभास्कराचार्यौ, इदमेकसूत्रमधिकरणमङ्गीकृत्य, बृहदारण्यकोपान्ते, 'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मे'त्युपक्रम्य, 'जयतीमान् लोका'निति फलमुक्तम् । अग्रे च 'आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्ते'ति प्रकृत्यानन्तरमुच्यते, 'तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषः, यश्चायं दक्षिणेऽक्षन् पुरुष' इत्यादि, ततो 'हन्ति पाप्मानं जहाति चे'ति फलमुच्यते, तत्र फलभेदाद्विद्याभेद इति प्राप्ते, सैव पूर्वोक्तैवेयं विद्या, हिर्हेतौ, सत्यादयः पूर्वप्रकृता एवात्र 'तद्यत्तत्सत्य'मित्यनेन परामृश्यन्ते । स्थानविशेषसम्बन्धाच्चैकविद्यम् । फलं तूपनिषदो'रहरित्यह'मिति चोक्तयोः, न तु विद्यायाः, तस्माददोष इत्याहतुः ।

तदयुक्तम् । सौत्रस्यादिपदस्यासङ्गतेः । उत्तरस्मिन् वाक्ये हि 'तद्यत्तत्सत्य'मिति तत्पदेन सत्यमात्रमाकृष्यते, न त्वन्यत्किञ्चिदादिपदबोधितं तस्मात् । नच पूर्ववाक्ये स्थानविशेषोक्तिर्येन तदैक्यादैक्यं सम्भाव्यम्, किञ्च, सर्ववेदान्तप्रत्ययाधिकरणे शाखान्तराधिकरणोक्तास्त्रयो हेतव ऐकविद्यार्थमादृतास्तत्कथं तत्रानुक्तात् स्थानविशेषात् तत्सिद्धिः । नापि केवलाद्रूपैक्यात्, 'चोदनाद्यविशेषा'दित्यस्य व्यभिचारित्वापत्तेः । किञ्च, इयं सत्यविद्या पूर्वमुपनिषदोः प्रसङ्गे विचार्यमाणा पूर्ववाक्योक्तया स्वैक्यमस्मारयन्ती कथमकस्मादत्र स्मारयेत् । अतः काल्पनिक एवायं विचार इत्युपेक्ष्यः ।

रामानुजाचार्यास्तु, 'न वा विशेषा'दित्यत्राक्ष्यादित्यस्थानभेदेन विद्याभेदस्योत्तरवाक्ये साधितत्वादत्र च वाक्यद्वये फलभेदस्य दृश्यमानत्वादवस्थाभेदेन रूपभेदस्यापि सत्त्वादुत्तरवाक्य उपासनभेदे सति कथं पूर्ववाक्योक्तेनास्याभेदः सम्भवति, किञ्च, एकविद्यात्वे फलभेदस्योपनिषद्गुणनिबन्धनत्वम्, तस्य तन्निबन्धनत्वेन बाधकनिवृत्तौ चैकविद्यात्वमित्यन्योन्याश्रय इति दूषणमाहुः ॥३८॥

रश्मिः ।

बृहदिति । बृहदारण्यकचतुर्थप्रपाठकोपान्ते यक्षपूज्यम् । फलभेदादिति । लोकजयपाप्महननभेदात् । स्थानेति । स्थानविशेषसम्बन्धैक्यप्राप्तमेकविद्यमित्यर्थः । फलभेदाद्विद्याभेदं वारयतः स्म त्रय इति । तृतीयान्त एकः । अधिकारादिति द्वितीयः । चकारोक्तस्तृतीयः । एवं त्रय आदृताः । पूर्वतन्त्रद्वितीयाध्यायीयशाखान्तराधिकरणे संयोगादयश्च तस्य हेतव उक्तास्तेष्वेकं संयोगं विहाय त्रय आदृता इत्यर्थः । रूपैक्यादिति । विद्यारूपैक्यात् । प्रासङ्गिकोऽयं हेतुः । व्यभिचारित्वेति । सर्ववेदान्तप्रत्ययत्वसाध्याभावेति सत्यत्वादिधर्मवति चोदनाद्यविशेषहेतोर्वृत्तित्वेनासाधारण्यात्तथा । फल त्वित्याद्युक्तं प्रत्युत्तरयन्ति स्म किञ्चेयमिति । उपनिषदोः प्रसङ्गे सत्यविद्या पूर्वं विचार्यमाणेत्यन्वयः । पूर्ववाक्येति । हृदयब्राह्मणोक्तया हृदयब्रह्मणः सर्वत्वेन अक्षरत्वेनोपासन सर्वात्मभावरूपं त्र्यक्षरं तद्विषयकम् । पूर्ववाक्यं 'य एवं वेदे'ति । तदुक्तया हृदयविद्यया । स्वैक्यमिति । स्वस्या हृदयविद्यायाः पूर्वायाः तदुत्तरसत्यब्राह्मणीयायाः 'तद्वैतदेतदेव तदा सत्यमेवे'ति श्रुतेः प्राप्तं स्वस्याः सत्यविद्याया ऐक्यम् । श्रुतेस्तु तत् हृदयं ब्रह्म । तदाथेत्यत्र तत् ब्रह्मेत्यर्थः । अकस्मादिति । वाक्यं विना । अत्रेति । अग्रेतन 'आप एवेदमग्र आसु'रिति ब्राह्मणे । स्मारयेदिति । नच 'ता आपः सत्यमसृजन्ते'ति 'ते देवाः सत्यमित्युपासत' इति । 'तदेतत्र्यक्षरँ सत्य'मितीति प्रत्यभिज्ञानमतो नाकस्मादिति वाच्यम् । पूर्ववाक्योक्तया स्वैक्यस्यास्मारणे प्रश्नपर्यवसानात् । उत्तरवाक्य इति । 'आप एवेदमग्र आसु'रिति महावाक्ये । अत्र चेति । अधिकरणेयम् । अवस्थेति । बाल्यतदितररूपावस्थाभेदेन । पूर्वेति । सत्योपासनेन । अस्य द्वितीयवाक्योक्तोपासनस्य अभेद इत्यर्थः । फलभेदो विद्यैक्ये बाधकः । तस्य एकविद्यात्वे निवृत्तिरूपनिषद्गुणे ऐक्येपि फलभेदसाधकः । अत एकविद्यात्वे फलभेदस्य तथा । तस्येति । उपनिषद्गुणस्य फलभेदनिबन्धनत्वं तेन । बाधकेति । बाधकः फलभेदस्तस्य निवृत्तौ ॥ ३८ ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वं भक्तेरुक्तम्। तद्दार्ढ्यार्थमधुना मुक्तिप्रतिबन्धकत्वेन हेयत्वेनोक्तानां कामादीनामपि भगवत्सम्बन्धान्मुक्तिसाधकत्वमुच्यते। भक्तिस्तु विहिताविहिता चेति द्विविधा। माहात्म्यज्ञानयुतेश्वरत्वेन प्रभौ निरुपधिस्नेहात्मिका विहिता। अन्यतोऽप्राप्तत्वात् कामाद्युपाधिजा सा त्वविहिता। एवमुभयविधाया अपि तस्या मुक्तिसाधकत्वमित्याह। इतरत्र विहितभक्तेरिति शेषः। कामाद्युपाधिजस्नेहरूपायां कामाद्येव मुक्तिसाधनमित्यर्थः। भगवति चित्तप्रवेशहेतुत्वात्। आदिपदात् पुत्रत्वसम्बन्धित्वादयः। स्नेहत्वाभावेऽप्यविहितत्वभगवद्विषयकत्वयोरविशेषात् द्वेषादिरपि संगृह्यते। तेन भगवत्सम्बन्धमात्रस्य मोक्षसाधकत्वमुक्तं भवति। तत्र विहितभक्तावित्यर्थः। शास्त्रे सर्वथा हेयत्वेनोक्ता हि गृहाः। सर्वनिवेदनपूर्वकं गृहेषु भगवत्सेवां कुर्वतां तदुपयोगित्वेन तेभ्य एव मुक्तिर्भवतीत्यर्थः। एतादृशानां गृहा भगवद्गृहा एवेति ज्ञापनायायतनपदम्। तेषु तथा प्रयोगप्राचुर्यात्। आदिपदेन

भाष्यप्रकाशः।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ सूत्रप्रयोजनमाहुः पूर्वेत्यादि। तद्दार्ढ्यार्थमिति। कैमुतिकन्यायेन तदर्थम्। तेनास्य प्रासङ्गिकत्वं बोधितम्। सूत्रं व्याकर्तुं पूर्वोक्तं विभजन्ति भक्तिरित्यादि। अन्यतोऽप्राप्तत्वादिति। शास्त्रव्यतिरिक्तहेत्वन्तरादप्राप्तत्वात्। व्याकुर्वन्ति इतरत्रेत्यादि। कामादेः कथं मुक्तिसाधनत्वमित्यपेक्षायां 'कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा। नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते' इति दशमस्कन्धवाक्यानुसारेण हेतुमादिपदस्यार्थं तत्कथनतात्पर्यं चाहुः भगवतीत्यादि। सूत्रशेषं व्याकुर्वन्ति तत्रेत्यादि। एतदग्रे, चकारार्थबोधिका माहात्म्यज्ञानेत्यादिका फक्किका उक्ता, सा लेखकप्रमादात् पश्चात्पतितास्तीति ज्ञेयम्। ननु कामादीनां कथं तथात्वमित्याकाङ्क्षायां सौत्रं हेतुं व्याकुर्वन्ति शास्त्र इत्यादि। इदं चाग्रे 'गृहिणोपसंहार'सूत्रे सेत्स्यतीति ज्ञेयम्। अत्रायमेवाशय इत्यत्र गमकमाहुः एतादृशानामित्यादि। प्रयोगप्राचुर्यादिति। 'अण्डमुत्पादयामासुर्ममाय-

रश्मिः।

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ कैमुतिकेति। यत्सम्बन्धेन कामादीनां मुक्तिसाधनत्वं तत्सम्बन्धेन सत्यशमदमादीनां मुक्तिसाधनत्वे किमु वक्तव्यमित्येवं कैमुतिकन्यायेन। **पूर्वोक्तमिति**। सूत्रे पूर्वमुक्तं कामादि इतरत्रेति च। न च विभागोऽस्त्येवेति वाच्यम्। ग्रन्थप्रयोजनं प्रपञ्च्य विभागे इत्याशयात्। सौत्रकामादीतरत्रेत्यनयोः सप्रपञ्चं विभागं करे कुर्वन्तीत्यर्थः। **विहितेति**। विधिविषया। 'तं भजेदि'ति। विधिरपूर्व इति। **भाष्ये**। तदर्थमत्यन्ताप्राप्तिमाहुः **शास्त्रेति**। **तत्कथनेति**। तेन **भगवदित्यादि**भाष्येणादिशब्दकथनतात्पर्यम्। **भाष्ये**। **भगवत्सम्बन्धमात्रस्येति**। प्रमेयबलस्येति यावत्। **उक्तेति**। भाष्ये उक्ता। अत्र चकारोक्तेस्तत्सम्बन्धस्य युक्तत्वात्। **शास्त्र इत्यादीति**। 'गृहं सर्वात्मना त्याज्य'मित्यादिशास्त्रे। **गृहा** इति पुंस्त्वं स्मार्तम्। **तेभ्य** इति। आयतनादिभ्यः। 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्यात्। **एतादृशानामित्यादीति**। **भगवद्गृहा** इति। एतेनैतादृशाः महाराजोपचारेण भक्तार इत्युक्तम्। महाराजो यावत्पर्यन्तं तिष्ठति

---

१. रश्मौ उक्तेति पाठ.।

स्त्रीपुत्रपश्वादयः संगृह्यन्ते । एतेन ज्ञानादिमार्गादुत्कर्ष उक्तो भवति । बाधकानामपि साधकत्वात् । माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीति ज्ञापनाय चकारः ॥ ३९ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोदशं सैव हि सत्यादय इत्यधिकरणम् ॥ १३ ॥

भाष्यप्रकाशः ।

तनमुत्तमम् ।' 'पञ्चायतनपूजे'त्यादौ तथात्वात् । पूर्वोक्तं प्रयोजनं निगमयन्ति **एतेनेत्यादि** । एतेनेति । पूर्वसूत्रे भगवद्भक्तिबलस्य, अत्र च 'गोप्यः कामा'दित्यादिसप्तमस्कन्धवाक्यात् कामादीनामविहितभक्तिहेतूनाम्, 'भक्तिरस्य भजन'मित्युक्त्वा, 'एतदेव च नैष्कर्म्य'मिति विहितभक्तेः संन्यासरूपतायास्तापनीये श्रावणात्, 'मद्वार्तायातयामानां न बन्धाय गृहा मता' इति वाक्यात् गृहादीनां च मुक्तिसाधनत्वस्य कथनेन । चकारसूचितमर्थमाहुः **माहात्म्येत्यादि** । **इतिज्ञापनायेति** । इतिहेतोर्विहितभक्तौ कामादपीति ज्ञापनाय । अत्रोभयोर्भक्त्योः स्वरूपबलसाधनयोर्विचारेण पुष्टिभक्त्याश्रितमर्यादाभक्तिबोधकं वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहं स्थितमिति विशेषणं प्रतिपादितं ज्ञातव्यम् ।

अन्ये तु, 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाश' इत्युपक्रम्य, 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः

रश्मिः ।

तावत्पर्यन्तं तद्गृहमिति । **स्त्रीपुत्रेति** । प्रमेयबलविषया एव । **निगमयन्तीति** । तस्मात्तथेतिवत् । **अविहितेति** । अस्य मुक्तिसाधनत्वस्येत्यनेनान्वयः । **विहितेति** । भजनस्य 'तं भजे'दिति गोपालतापिनीये विहितत्वात् । **संन्यासेति** । नैष्कर्म्यं संन्यासो भवतीति तथा । निर्गतः कर्मणः निष्कर्मा संन्यासी तस्य भावो नैष्कर्म्यं संन्यासः । उपनिषद् आवर्तयेत् आरणं वेति सकलकर्मनिषेधात् । गृहा इति बहुवचनार्थमाहुः **गृहादीनामिति** । आदिपदेन स्त्रीपुत्रपश्वादयः संगृह्यन्ते । दम्पत्योः सहाधिकारात्स्त्रीः । भगवत्सेवार्थं वध्वानयनम् । 'पुत्रेण लोकं जयती'ति पुत्रः । 'पुत्रे कृष्णप्रिये रति'रिति । 'पयसाग्निहोत्रं जुहोती'ति । 'पत्रं पुष्पं फल तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मन' इति । अत्राप्यादिपदेनारामोपवनादिः । अव्ययानां द्योतकत्वमाश्रित्याहुः **चकारेति** । **विहितेति** । 'माहात्म्यज्ञानपूर्वस्तु सुदृढ' इति वाक्याद्विहितत्वम् । **कामादपीति** । **तत्र चेति** सूत्रांशात्कामादपीत्यर्थः । षोडशाधिकरण्या अर्थमाहुः **अत्रोभयोरिति** । विहिताविहितयोः । **स्वरूपबलं** साधनं च तयोः । स्वरूपबलं बाधकानां साधकत्वम् । पूर्वसूत्रे शास्त्रोक्ताखिलसाधनरूपत्वम् । **पुष्टीति** । अविहितभक्तिकामाद्याश्रिताया मर्यादाभक्तेर्विहितभक्तेर्बोधकम् । बोधकत्वं तु 'भवत्पदाम्भोरुहनावमत्रे'त्यत्र भगवत्पादयोर्भक्तित्वमुक्तम्, तत्र वाम ऊरुः पादसहित इति पुष्टिभक्त्याश्रितत्वस्य । 'दक्षिणाङ्घ्रिसरोरुह'मिति मर्यादाभक्तेः । अत्र पूर्ववाक्योक्तयेति भाष्यप्रकाश उक्तम्, तेन हृदयब्राह्मणोक्तभूमसर्वात्मभावयोरुपासनासूचि । तथाहि । 'एष प्रजापतिर्यद्धृदय'मित्युपक्रमः । अत्र हृदयस्य प्रजापतित्वं विधीयते । कथमेवं स्यात् हृदयं सर्वात्मभावत्वेन वक्ष्यमाणं प्रजापती रजोधिष्ठातेति । एवं तु स्यात् । हृदि अयं रजोधिष्ठाता । वेदान्तत्वात् योगे तु प्रजानां पतिर्भगवान् । भूमा प्रजापतिः सर्वात्मभावकरणेन सर्वात्मभावत्वाद्भूमा । 'एतद्ब्रह्मैतत्सर्व'मिति ब्रह्मलिङ्गम् । सर्वात्मभावरूपत्वमाह 'तदेतत्त्र्यक्षरꣳहृदयमिती'ति । 'हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेदे'ति । स्वाश्चेत्यत्र शसो डा । **अन्ये चेति** । हृ । सम्प्रदाने प्रत्ययः । हृञ् हरणे इत्यस्मात् । हृदः सान्निध्यात् । स्वाश्चानिन्द्रियाणि वसवोऽग्निमुखाभिहरन्त्यन्ये तदनुसारिणः । सर्वेन्द्रियाणां भगवत्परत्वं सर्वात्मभावः निरोधलक्षण-

भाष्यप्रकाशः ।

सत्यसङ्कल्प' इति छान्दोग्य आम्नायते । 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु,' 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशान' इति वाजसनेयके । तयोरैकविध्यं परस्परगुणोपसंहारो भवेन्न वेति सन्देहे, कामादिसूत्रेणैकविद्यमुपसंहारं च सिद्धान्ती-कुर्वन्ति । कामादीत्यत्र कामपदं 'देवदत्तो दत्तः' 'सत्यभामा भामे'तिवन्नामैकदेशरूपम् । तेन सत्यकामाद्या वाजसनेयके वशित्वाद्याश्छान्दोग्ये उपसंहार्याः । हृदयायतनस्य, वेद्यस्येश्वरस्य, लोकासम्भेदप्रयोजनकसेतुत्वरूपेश्वरधर्मस्य च समानत्वादिति चाहुः ।

तच्चिन्त्यम् । श्रुतौ सत्यकामपदस्य यौगिकत्वेन नामत्वाभावात् तदेकदेशस्य कामादिपदस्य नामैकदेशताया वक्तुमशक्यत्वात् । अथ रूढत्वम्, तदापि तदेकदेशेन कामादिपदेन ब्रह्मैव समर्पणीयम्, न तु तद्गुणा अपि । दृष्टान्ते तथैव दर्शनात् । अथ योगरूढत्वम्, तदापि कामपदस्य सर्वकामादिपदैकदेशतायास्तुल्यत्वान्मनोमयादिवाक्योक्ता अपि धर्मा वाजसनेयके कुतो नोपसंह्रियेरन्, कुतो वा तस्यानेनैकविद्यात्वाभावः । हृदयस्यायतनस्य वेद्यस्येश्वरस्य सत्यसंकल्प-त्वाकाशात्मत्वस्य समानधर्मस्य सत्त्वात् । किञ्च । यद्यायतनादिकमेतदैकविद्यत्वादिसम्पादकत्वेन व्यासचरणानामभिप्रेतं स्यात्, तदा कामादीतरत्र वशित्वादि तत्रेति ब्रूयुः, न त्वेवं सन्दिग्धं वदेयुः । किञ्च । सर्ववेदान्तप्रत्ययाधिकरणे 'चोदनाद्यविशेषा'दित्यनेन शाखान्तराधिकरणोक्ता-श्चत्वारस्त्रयो वा हेतवो विद्यैक्यार्थे संगृहीताः । तत् यद्यायतनादिभिरङ्गीक्रियेत, तदा

रश्मिः ।

ग्रन्थेपि । 'य एवं वेदे'त्युपासनम् । एवं 'द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेदे'त्यत्र । तथैव 'यमित्येकमक्षरमेति स्वर्गलोकं य एवं वेदे'त्यत्र । स्वर्गलोक आत्मसुखम् । व्युत्पत्तिस्तु एतीति यम् । एरच् । एकविधमित्यस्य कारण **परस्परेति** । **इति सन्देह** इति । इति सन्देहो यस्मिन् ऐकविद्य-मिति पूर्वपक्षे स तथोक्तस्तस्मिन् । नैकविद्यं कार्यं न उपसंहारं कारणमस्ति । **वाजसनेयक** इति । उपसंहार्या इत्यन्वयः । सौत्रेतरत्र पदार्थः । **छान्दोग्य** इति । सौत्रतत्रपदार्थः । आयतनादिभ्य इत्यस्यार्थः । **हृदयेति** । हृदयमायतनं यस्येश्वरस्य । आदिपदार्थमाहुः **लोकेति** । 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाये'त्युक्तो लोकासम्भेदः प्रयोजनमस्य सेतुत्वस्य तत्तथोक्तम् । तेन रूप्यते व्यवह्रियते यः स ईश्वरधर्मस्तस्य । समानत्वं छान्दोग्यवाजसनेयकयोर्ज्ञेयम् । सूत्रे कामशब्दो न नामैकदेश इत्याहुः **श्रुताविति** । **नामत्वेति** । पाचकपाठकवत् नामत्वाभावात् । विशेषणत्वात्त-थेति नोक्तम् । विष्णुरातः परीक्षित् इत्यत्र न विशेषणत्वेपि नामत्वात् । एवं वेदान्ते योगमादायोक्तम् । बाहुलकाग्रहवादिनं प्रत्याहुः **अथेति** । स्वमते रूढ्यभावः । **दृष्टान्ते** इति । 'देवदत्तो दत्त' इत्युक्ते पूर्वस्मिन् । वेदान्ते 'स्मृतेश्चे'तिसूत्रभाष्यानुरोधेन वेदत्वाग्रहवादिन प्रत्याहुः **अथ योगेति** । स्वमते योगरूढिर्वेद एव, न वेदान्ते । **सर्वकामादीति** । छान्दोग्ये पञ्चमप्रपाठके 'मनोमयः प्राणशरीरो भारूपः (सत्यकामः) सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्य-नादर एष म आत्मा हृदये' इत्यत्र सर्वकामादिपदानि तेषामेकदेशतायाः । **मनोमयेति** । वाक्यमव्य-वहितपूर्वमुक्तम् । **तस्येति** । मधुविद्यान्तर्गतस्योक्तवाक्यार्थस्य । **अनेन** वाजसनेयकार्थेन । एका विद्या एकविद्या तस्या भाव एकविद्यत्वं तस्याभावः । अत्र दहरविद्या निर्गुणविषया वाजसनेयकोक्ता सगुणविषया तयोर्भेद उपसंहारः परस्परं तत्र विद्याभेदो विरुध्यते 'अभेदादनुपाधित्वा'दित्यादिविद्वन्मण्डनेन तदवि-रोधाय सर्ववेदान्तप्रत्ययप्रपञ्चरूपत्वनिषेधमाहुः **किञ्च सर्वेति** । **चत्वार** इति । संयोगेन सह । **त्रय** इति । अत्रैव व्याख्यातम् । **तद्यदीति** । **तत्** विद्यैक्यम् । **आयतनादिभिरिति** । चोदनाद्यविशे-

आदरादलोपः ॥ ४० ॥ (३-३-१४,)

ननु नित्यानां वर्णाश्रमधर्माणां भगवद्धर्माणां चैककाले प्राप्तौ युगपदुभयोः करणासम्भवादन्यतरबाधे प्राप्ते, कस्य स्यान्न कस्येति स्यात् संशयः। तत्र कर्मणां स्वस्वकाले विहितानामकरणे प्रत्यवायश्रवणादितरत्रातथाश्रवणादन्यदापि तत्कृतिसम्भवात् सावकाशत्वेन तेषामेव बाधो युक्तः, न तु निरवकाशानामिति पूर्वः पक्षः।

भाष्यप्रकाशः।

तस्य हेतोर्व्यतिरेकव्यभिचारः प्रसज्येत, कतिपयैरङ्गीकारे यत्किञ्चिद्धेतुसत्त्वस्य यत्र क्वापि सौलभ्याद्विद्याभेदश्चोच्छिद्येत। प्रकृते च चोदना भिद्यते, एकत्र 'अन्वेष्टव्यं विजिज्ञासितव्य'मिति वाक्यात्, अन्यत्र च 'य एवं वेदे'ति वाक्यात्। आख्या च भिद्यते, वाजसनेयके दहरविद्येत्याख्याया अप्रसिद्धत्वात्। तत्तद्गुणकस्येश्वरस्य वेद्यत्वे तु रूपमपि भिद्यते इति कथं विद्यैक्यम्। अथ यथाकथञ्चित् ते चत्वारस्त्रयो वा हेतव आनेयाः, तदा तत एव ऐकविद्यसिद्धेरेतत्सूत्रसार्थक्यं दुरुपपादमित्यगतिकगतिकं तत्प्रपञ्चरूपत्वमस्येत्यवधेयम् ॥ ३९ ॥ इति त्रयोदशं सैव हि सत्यादय इत्यधिकरणम् ॥ १३ ॥

आदरादलोपः ॥४०॥ पूर्वाधिकरणेषु सात्त्विकानां वृतानां ज्ञानासक्तिवारणाय ज्ञानमार्गाद्भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः। अतः परं ये वृता राजसास्तेषां ज्ञाने रुच्यभावेपि कर्मणि रुचेर्विद्यमानत्वात्तन्निरासार्थं कर्मकरणनिर्णयायाधिकरणमारभत इत्याशयेन सूत्रमवतारयन्ति **नन्वित्यादि**। **कस्य स्यादिति**। कस्य बाधः स्यात्। **इतरत्रेति**।

रश्मिः।

षन्तर्भूतैस्तैः। **तस्य हेतोरिति**। नोदनाद्यविशेषहेतोः। अत्र सर्ववेदान्तप्रत्ययत्वाभावो न वर्तते चोदनाद्यविशेषाभावोत्रास्तीति व्यतिरेकव्यभिचारप्रसङ्गः। ततश्च व्याप्तिग्रहप्रतिबन्धः फलम्। **कतिपयैरिति**। चोदनाद्यविशेषान्तर्भूतायतनेषु कतिपयैः। सर्वैस्तु विद्ययोर्भेद इत्यङ्गीकार इत्यर्थः। **यत्किञ्चिदिति**। अभेदसाधकयत्किञ्चिद्धेतुसत्त्वस्य। **यत्र क्वापीति**। पक्षे दृष्टान्ते च। च पुनः विद्याभेदो विद्वन्मण्डनेनोच्छिन्नः पुनरत्रोच्छिद्येत। **एकत्रेति**। छान्दोग्ये दहरविद्यायां विधातव्यः। **अन्यत्रेति** वाजसनेयके। **अप्रसिद्धत्वादिति**। किन्तु ब्राह्मणमिति प्रसिद्धिः। **कथमिति**। चोदनाद्यविशेषान्तर्भूतायतनादिभिः विद्यैक्यं कथमिति प्रश्नः। **तत्प्रपञ्चेति**। सर्ववेदान्तप्रत्ययाधिकरणप्रपञ्चरूपत्वम् ॥ ३९ ॥ इति **त्रयोदशं सैव हीत्यधिकरणम्** ॥ १३ ॥

आदरादलोपः ॥४०॥ **वृत्तानामिति**। मुक्तावधिकारिणाम्। वृत्तपदं ख्याते व्याख्यातम्। 'वृत्तोऽतीते दृढे ख्याते वर्तुले विधृतेऽमृते। वाच्यवद्वर्तने वृत्तं चरित्रछन्दसोरपी'ति विश्वः। भवान्तसम्भवत्वाज्ज्ञानासक्तिस्तस्या वारणाय। तेन 'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः। भवान्तसम्भवा दैवात्तेषामर्थे निरूप्यत' इति निबन्धः स्मारितः। **फलत इति**। 'अक्षरधिया'मित्यत्र। **साधनतो** गताधिकरणे। **स्वरूपतोन्तराधिकरणे**। **सम्बन्धतो**ऽक्षरधियामित्यत्र 'सामान्यत' इति हेतुव्याख्याने। **राजसा** इति। 'राजसं कर्मबहुल'मितिवाक्यात्कर्मबहुलाः। **रुचीति**। 'सत्त्वात्सञ्जायते ज्ञान'मिति वाक्यात्सात्त्विकानां ज्ञाने रुचिः, न राजसानाम्। **नन्वित्यादीति**। **प्रत्यवायेति**। 'धर्मं चरे'ति विध्युल्लङ्घने। एकादशस्कन्धोक्त 'वेदोक्तं नाचरेद्यस्त्वि' त्याद्युक्त्वा 'मृत्योर्मृत्युमुपैति स' इति प्रत्यवायः तस्य श्रवणात्। **इतरत्रेति**। भगवद्धर्माकरणे। **अन्यदा** अन्यस्मिन् काले। **तत्कृतीति**। भगवद्धर्मकृतिसम्भवात्। **तेषामिति**। भगवद्धर्माणाम्। **निरवकाशानां** वर्णाश्रमधर्माणाम्। उच्चारयेदिति-

तत्र सिद्धान्तमाह आदरादिति । ब्रह्मयज्ञप्रकरणे तैत्तिरीयकैः पठ्यते 'ॐमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाभ्युक्तमृचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत' इति । अत्र ऋक्सम्बन्धित्वेन वर्णात्मके, वस्तुतस्तु परमव्योमात्मके अक्षरे ब्रह्मण्योङ्कारे वर्तमानं तल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद, स किं ऋचा करिष्यतीत्यनेन तदज्ञाने वेदाध्ययनस्य निष्फलत्व-

---

भाष्यप्रकाशः ।

भगवद्धर्मेषु । सिद्धान्तं विशदयितुं सूत्रं विवृण्वन्ति ब्रह्मयज्ञेत्यादि । ब्रह्मयज्ञप्रकरण इति । तैत्तिरीयाणामारण्यके स्वाध्यायब्राह्मणे ।

श्रुत्यर्थस्तु, ब्रह्मयज्ञेन यक्ष्यमाण ॐमिति प्रतिपद्यते, प्रणवाक्षरं प्रथममुच्चारयेत् । प्रतिपद्यत इति पञ्चमो लकारः । पूर्वोच्चारणे हेतुः । एतद्वै यजुस्त्रयीं विद्यां प्रति, अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्षीकृत्य प्रतिनिधिरूपो यतोऽस्ति । तच्चाथर्वणे स्फुटम्, 'तस्य वै प्रणवस्य पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदोऽथ द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेद' इति सायणभाष्ये । वस्तुतस्तु आथर्वणानां गोपथब्राह्मणे इन्द्रप्रजापतिसंवादे प्रजापतिना वेदत्रये एकाक्षरोऽथर्ववेदे मात्राभिर्युक्त इति व्यवस्थापनात्, तैत्तिरीये बृहन्नारायणे 'ॐमित्येकाक्षरं ब्रह्मे'तिश्रावणादत्रामात्र एव । नच त्रयीप्रतिनिधित्वविरोधः । द्वादशस्कन्धे 'स सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति बीजत्वबोधनात् यथा पुस्तकलिखनोत्तरं तन्मूलपुस्तके प्रतिव्यवहारः, तथा त्रयीमूलत्वात् प्रतित्वम् । एकादशस्कन्धे 'वेदः प्रणव एवाग्रे' इति प्रथमकृतयुगे तन्मात्रबोधनात्तदा सर्वं कार्यं प्रणवेनैवेति वा तस्य त्रयीप्रतिनिधित्वमित्यदोषात् । 'एषा वा'गिति सर्ववाग्बीजत्वात् सर्ववाग्रूपम् । तथाच छन्दोगा आमनन्ति 'तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्वा वाक् सन्तृण्णे'ति । 'अश्वत्थादिपत्रेषु दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवस्तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि, तद्वदोङ्कारेण सर्वा वाग्व्याप्ते'ति सायणभाष्ये । 'एतत्परममक्षर'मिति । 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं पर'मिति काठकश्रुतेः । तदेतदृचाभ्युक्तमिति । तदेतत्परमं ब्रह्मरूपमक्षरं वक्ष्यमाणयर्चा स्पष्टमुक्तमित्येवं ज्ञेयः ।

ऋचं पठित्वा व्याकुर्वन्ति अत्रेत्यादि । ऋक्सम्बन्धित्वेन वर्णात्मके, वस्तुतस्तु 'एतद्ध्येवे'ति काठकश्रुत्या 'यो वेद निहितं गुहायां परमे व्योम'न्निति तैत्तिरीयश्रुतेश्च परमव्योमात्मके ॐकारे, 'यस्मिन् देवा अधि विश्वे निषेदु'रिति देवनिषदनस्थानत्वाल्लोकात्मके अक्षरे ब्रह्मणि,

रश्मिः ।

विधिव्याख्यानादाहुः प्रतिपद्यत इति । पञ्चम इति । लेट् । तच्चेति । प्रतिनिधिरूपत्वं च । आथर्वणमाहुः तस्य वा इति । अत्रेति । तैत्तिरीयके स्वाध्यायब्राह्मणे । एकाक्षरमिति । समष्टयविकृतम् । एतदर्थं वस्तुतस्तुपक्षः । प्रतीति । प्रतिनिधिव्यवहारः । प्रतित्वं प्रतिनिधित्वम् । 'प्रतिप्रतिनिधिप्रतिदानयो'रिति सूत्रादर्थः । श्रुतौ ऋच इति षष्ठ्यन्तम् । ऋक्सम्बन्धिनि वर्णात्मके इत्यर्थः । तदाहुः ऋक्सम्बन्धित्वेनेति । अर्थपरत्वेन वस्तुतस्तु पक्षेणाक्षरे परम इति श्रुतिं व्याकुर्वन्तीत्याशयेनाहुः वस्तुतस्त्विति । एतद्ध्येवेति । 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो

मुच्यते । एवं सति तदुक्तकर्मणोपि तथात्वमायाति । एतेन 'भक्त्या मामभिजानाती'ति वाक्यात् परब्रह्मस्वरूपज्ञानं भक्त्यैवेति भक्ताः सन्तः पुरुषोत्तमविदो ये, तेषामेव वेदाध्ययनादिकं फलप्रदम्, नान्येषामित्युक्तं भवति । अत एव श्रीभागवतेप्युक्तं 'ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ति,' 'संसरन्ती'ति वा । अन्वये निदर्शनम् । ये इत् ईश्वरत्वेन तत् पूर्वोक्तं परं ब्रह्म विदुः, त इमे भक्ताः सर्वापेक्षया सम्यक्प्रकारेण भगवन्निकटे श्रीगोकुलवैकुण्ठादिष्वासत इति । तेनान्येषां सम्यगसत्त्वमर्थाक्षिप्तं भवति । पुरःस्थितार्थवाचीदंशब्दप्रयोगेण चान्येषामसत्तुल्यत्वं श्रुतेरभिमतमिति ज्ञायते । ऋक्शाखायामपि 'तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्तन, आस्य जानन्तो नाम चिद्विवक्तन

भाष्यप्रकाशः ।

उक्तश्रुतौ निहितत्वेन श्रावणादीतायां 'तद्धाम परमं मम'ेति वाक्याच्च तत्र प्रतिपाद्यत्वेन स्वरूपेण च वर्तमानम्, तं 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति गीतावाक्याल्लोकवेदप्रसिद्धं परं ब्रह्म यो न वेद, स किं ऋचा, ऋगिति वेदमात्रोपलक्षकम्, वेदेन किं करिष्यतीति । शेषं स्फुटम् । 'ऋषय' इति वाक्यं तु तृतीयस्कन्धे नवमाध्याये । अन्वये निदर्शनमिति । तदज्ञातुर्वेदाध्ययनसद्भावेपि तन्मुख्यफलाभावादन्वयव्यभिचारे निदर्शनं श्रुतिः श्रीभागवतवाक्यं चाहेत्यर्थः ।

अथवा, इदमग्रिमेण सम्बध्यते । तथाच वक्ष्यमाणेन वाक्यशेषेण श्रुतिर्ज्ञानवतां भगवत्प्राप्तिलक्षणं निदर्शनमाहेत्यर्थः । तदेव श्रुतिशेषं व्याकुर्वन्ति ये इदित्यादि । इदित्यवधारणे । तथाच प्रणवार्थभूतस्य भगवतो यज्ज्ञानं तस्यावश्यकत्वं तदज्ञानेऽध्ययनादिनैष्फल्यं च बोधयन्त्यानयर्चा भगवज्ज्ञानसाधनीभूतायां वरणसाध्यायां भक्तावादरो दर्शितः । एवं श्रुत्यन्तरे साधनभक्तावप्यादरः श्राव्यते इत्याशयेनाहुः ऋगित्यादि । अर्थस्तु, हे स्तोतारो मदुत्कर्षवर्णनपराः । इयं वेदानामुक्तिः । तं लोकवेदप्रसिद्धम्, पूर्व्यं पूर्वस्य कारणस्य सम्बन्धि सर्वकारणकारणरूपम्, यथाविदः यथावत्तत्स्वरूपवेत्तारो भवन्तः, ऋतस्य सूनृतवाणीरूपस्य वेदस्य, गर्भं अन्तर्निहितम्, जनुषा स्वस्य सम्पूर्णजन्मना यावज्जीवमिति यावत्, पिपर्तन पूर्तियुक्तं सन्तुष्टं कुरुत, सन्तोषयत । अत्र यथाविस्त्वोक्त्या पूर्णज्ञानानां देहेन्द्रियप्राणान्तःकरणजीवविनियोगं भगवत्तोषार्थं दर्शयति श्रुतिरिति भगवद्धर्मेषु श्रुतेरादरः स्फुटति । अथ भगवत्तोषाभावे किमपि न सिध्यतीत्याशयेन पूर्वोक्तकरणाशक्तावनुकल्पमाहोत्तरार्धेन । आसमन्तात् अस्य परमपुरुषस्य नाम अखण्डशब्दब्रह्मरूपत्वेन जानन्तः, विवक्तन विशेषेण वदत । नाम्नः स्वरूपं

रश्मिः ।

यदिच्छति तस्य त'दिति श्रुत्या । उक्तश्रुताविति । तैत्तिरीयश्रुतौ । शेषमिति । एवं सतीत्यारभ्य वेत्यन्तं व्याख्येयम् । अत्र तदुक्तेति । वेदोक्तकर्मणः । 'पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहे'त्यत्रेवात्रापि वेदाध्ययने वेदमात्रग्रहणम् । तथात्वं निष्फलत्वम् । एव शेषं स्फुटम् । अन्वयेति । यत्र यत्र तदज्ञातुर्वेदाध्ययनसद्भावस्तत्रतत्र पुरुषोत्तमरूपमुख्यफलमित्यन्वयः, तस्य व्यभिचारे सति निदर्शनं दृष्टान्तम् । श्रीभागवतवाक्यं कर्तृ । निदर्शनमाहेत्यर्थः । निदर्शनं त्वेवम् । यत्र भक्ते संसाराभावस्तत्र पुरुषोत्तमप्रसङ्ग इति । निदर्शनं न दृष्टान्तः, किंतु भगवत्प्राप्तिः करणव्युत्पत्त्या तत्राहुः अथवेति । अग्रिमेणेति । श्रुतिशेषेण । वाक्यशेषोऽप्ययम् । श्रुतिः 'ऋचो अक्षरे परमे व्योम'न्निति । य इदित्यादीति । य एवेश्वरत्वेन तत्पूर्वोक्तमित्यादिः । इम इतीदमः प्रत्यक्षगे रूपमत आहुः श्रीगोकुलेति । वैकुण्ठस्थेषु गोकुलस्थत्व एवेम इति प्रयोगः । प्रणवार्थेति । अयमर्थो गायत्र्यर्थकारिकासु श्रीमद्गोस्वामिभिः स्पष्टी-

महस्ते विष्णो सुमतिं भजामहे' इत्याद्यृग्भिरन्येभ्यो धर्मेभ्यः सकाशाद्भगवद्धर्मेष्वादरः श्रूयते इति तेषां अलोप एवेत्यर्थः । एतेन 'अकरणे प्रत्यवायश्रवणा'दित्यादि यदुक्तम्, तदपि प्रत्युक्तं वेदितव्यम् । करणेपि वैयर्थ्यात्तदपरिहारात् । एवं सति यदकरणे प्रत्यवायकथनम्, तेन तस्मादवकाशं प्राप्य गौणकालेप्यकरणे तथेति तस्याशय इति ज्ञायते ॥ ४० ॥

नन्वेवं तात्पर्यकत्वे श्रुतेरुपनयनादिवत् कर्मोपयोगित्वं भक्तितज्ज्ञानयोः स्यादिति कर्मण एव प्राधान्यम्, न तु भक्तेः सिध्यतीत्याशङ्क्य, भक्तितज्ज्ञानावश्यकत्वबोधकश्रुतितात्पर्यमाह ।

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥

भाष्यप्रकाशः ।

विश्वा तदेव कीर्तयत । अनुकल्पेन कथं सन्तोष इत्यतो नामस्वरूपमाह चिदिति । उपलक्षणमेतत् । सच्चिदानन्दात्मकम् । तथाच नाम्नो ज्ञानरूपत्वात्तद्द्वारा भगवतोपि ज्ञानं भविष्यति, तेन तोषोपि भविष्यतीत्यर्थः । नामस्वरूपस्याप्यज्ञाने तदुपायं गुरूपसत्तिरूपमाह । हे विष्णो ते त्वत्सम्बन्धिनं महः तेजोरूपम्, समभिव्याहारात् त्वत्तेजोरूपम्, सुमतिं निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तम् । सुबुद्धिं भक्तमिति यावत्, तं भजामहे । तथाचान्यो भजतु, मा वा, वयं तु भजामह इति श्रुतयः स्वकृतिं दर्शयन्ति । अनेन तदुपायेप्यादरो दर्शितः । तेन भगवद्धर्माणामत्याद्दतत्वं बोधितमिति ज्ञेयः । इत्याद्यृग्भिरित्यादिपदेन, 'प्रतत्ते अद्य शिपिविष्ट नामे'त्यादीनां संग्रहः । एवं श्रुतिद्वयेन भगवद्धर्मेष्वादरे श्रुतेः सिद्धे तेषामेव मुख्यकाले करणं सिद्धमिति तेन पूर्वपक्षयुक्त्युत्तरसिद्धिं सारयन्ति एतेनेत्यादि । तर्हि प्रत्यवायश्रवणस्य का गतिरित्याकाङ्क्षायां तामाहुः एवं सतीत्यादि । तेनेति । कथनेन । तस्मादिति । भगवद्धर्मात् । तथेति । प्रत्यवायः ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ सूत्रमवतारयन्ति नन्वेवमित्यादि । उक्तश्रुतिभ्यां

रश्मिः ।

कृतस्ततोऽवसेयः । वरणेति । पुष्टिभक्तौ । अनुकल्पमिति । विध्यन्तरम् । कथमिति । मुख्यकल्पानाश्रयणजदुःखसत्त्वात्क(थ)मिति प्रश्नः । 'कल्पः स्यात्प्रलये न्याये शास्त्रे ब्रह्मदिने विधा'विति विश्वः । ज्ञेय इति । पूर्वेणार्थस्त्वित्यनेनान्वेति । प्रतत्त इति । प्रनाम पूर्णम् । प्रा पूरणे । तत् सच्चिदानन्दरूपं ते तव शिपिविष्टनामेति । यथावत् शिपिविष्टनामेति ज्ञेयम् । 'शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृत' इति विश्वः । आदिनर्ग्वेदोपनिषन्मण्डूकनाम्नी । भगवद्धर्मेष्विति । क्रिया वर्णाश्रमधर्मः । ज्ञानं भगवद्धर्मः । तच्च यथावत् भगवद्धर्मविषयकम् । 'ज्ञानशक्तिः क्रियाशक्तिः सद्द्विधेते परस्थिते' इति भाष्यकारिका । ते च ज्ञानावच्छेदका धर्माः 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्याद्भक्तिप्रधानाः । भक्तयो नवविधाः प्रेम सर्वात्मभावश्च । ऐश्वर्यादयः । पादार्थाव्याप्तिरपि स्मारिता । आदर इति । उक्तश्रीभागवतवाक्यादादरः । एतेनेत्यादीति । करणेपीति । 'वेदं कृत्वा वेदिं करोती'त्यत्र 'क्षुत आचामे'दित्यत्र पूर्वं वेदिकरणे क्षुतनिमित्ताभावेप्याचमने कृते वेद्याचमनयोर्वैयर्थ्यं यथा, तथा भगवद्धर्मकाले वर्णाश्रमधर्मकरणे तस्य वैयर्थ्यं तस्मात् । तस्य प्रत्यवायश्रवणस्यापरीहारात्[1] । परेर्दीर्घः । प्रत्यवायः 'मृत्योर्मृत्युमुपैति स' इत्येकादशोक्तः । भाष्ये । तस्येति । प्रत्यवायवाक्यस्य ॥ ४० ॥

उपस्थितेऽतस्तद्वचनात् ॥ ४१ ॥ उक्तेति । 'तमु स्तोतारः' 'प्रतत्ते' इति श्रुतिभ्याम् ।

---

१. रश्मौ तदपरीहारादिति पाठः ।

तयोर्युगपत्करणेऽनुपस्थितेपि यदि पूर्वं भगवद्धर्मकरणमुच्यते, तदा त्वदुक्तं स्यात्, नत्वेवम्, किन्तूभयोर्युगपत्करण उपस्थिते बलाबलविचारे क्रियमाणे,

भाष्यप्रकाशः ।

भगवद्धर्मादरे बोधिते भगवद्धर्मकरणे श्रुत्युक्तानां कर्मणां सार्थक्यं नान्यथेत्येवं श्रुतेस्तात्पर्येण उपनयनादिवद्भक्त्यादेस्तदङ्गत्वं कर्मणश्च प्राधान्यं सिध्यतीत्याशङ्क्य भक्त्याद्यावश्यकत्वबोधनतात्पर्यमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति तयोर्युगपदित्यादि । यजुर्ब्राह्मणश्रुतौ भगवज्ज्ञानस्यावश्यकत्वं बोध्यते । तेन स्वाध्यायावर्तनदशायामपि तदावश्यकता आयाति । ऋक्संहिताश्रुतावपि 'यथाविद' इति 'जानन्त' इति च स्तोतृविशेषणाद्विधेयस्य भगवद्धर्मस्य करणे ज्ञानस्याधिकारप्रयोजकत्वं लभ्यते । मन्त्राणां विधायकत्वं तु 'वसन्ताय कपिञ्जलानालभेते'त्यत्र परैरादृतम् । 'वसन्तायेत्यादीनां न मन्त्रत्वमिति स्वपक्षेपि मन्त्राणां स्वार्थे प्रामाण्यस्याङ्गीकाराद्विधिशक्तिकौण्ठ्याभावे विधायकत्वं न हीयते । अतो मुमुक्षूणां भगवद्धर्मा आवश्यकाः । कर्माणि तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण यज्ञेन तपसा श्रद्धया अनाशकेने'ति श्रुतेर्विविदिषायामेवोपक्षीणानि । ज्ञानपर्यन्तत्वपक्षेप्यारादुपकारकाणीति विविदिषोक्त्यैव लभ्यत इति दूरापास्तं तत्प्राधान्यम् । एवं ज्ञानोत्तरं यत्र कथञ्चिद्वर्णाश्रमधर्मा भगवद्धर्माश्च युगपत्प्राप्ताः, तत्र प्रत्यवा-

रश्मिः ।

सार्थक्यमिति । 'यदेव विद्यये'तिश्रुतेः पूर्वमीमांसकाशङ्का । **श्रुते**रिति । यजुर्ब्राह्मणश्रुतेः 'ओमिति प्रतिपद्यत' इत्यादेः । **सिध्यती**ति । 'त इमे समासत' इत्यत्र यज्ञायेति शेषं पूरयित्वा सिध्यति । **भक्त्यादी**ति । भक्तितज्ज्ञानावश्यकत्वबोधनस्य तात्पर्यं ज्ञानकाण्डत्वा'त्तमेत'मिति श्रौतं ज्ञानकाण्डीयं तात्पर्यमाहेत्यर्थः । **तयो**रित्यस्यार्थं ऋक्संहितायजुर्ब्राह्मणश्रुत्योरित्याहुः **यजुर्ब्राह्मणे**ति । **बोध्यते** इति । यज्ञे बोध्यते । **आयाती**ति । ब्रह्मयज्ञत्वादायाति । **स्तोत्रि**ति । ज्ञानस्याधिकारेत्यादौ हेतुः । **विधेयस्ये**ति । पिपर्तनेतिविधिविषयस्य भगवतोऽधोक्षजत्वाद्भगवद्धर्मस्य करणे ज्ञानस्य स्तोतृविशेषणस्य । पिपर्तनेतिमध्यमपुरुषान्मन्त्रत्वम् । पूर्वतन्त्रे मध्यमपुरुषान्तस्य मन्त्रत्वोक्तेः । तदाहुः **मन्त्राणा**मिति । **स्वपक्ष** इति । भावार्थपादभाष्ये । एतावता **तयो**रित्यस्यार्थ उक्तः । **अत** इति । कर्मणा पूर्तियुक्तं कुरुतेति पिपर्तनेत्यस्यार्थेपि ज्ञानकाण्डत्वेन 'तमेतं वेदानुवचनेने'ति श्रुतिविषयत्वेन सेवाख्यकर्मणा पूर्तियुक्तं कुरुतेत्यर्थादित्यर्थः । भगवद्धर्मा उक्ता ज्ञानविषयाः । आभासे श्रुतेरुपनयनादिवदित्यादि यदुक्तं तत्राहुः **कर्माणि त्वि**ति । 'विविदिषन्ती'त्यत्र रामानुजाचार्यवत्सनर्थाविवक्षायामाहुः **ज्ञानपर्यन्तत्वे**ति । आरात् समीप उपकारकाणि कर्माणीति । विविदिषोक्तिर्व्यञ्जनया । सनर्थाविवक्षोक्तेः । **तत्प्राधान्यं** कर्मप्राधान्यम् । भाष्यविवरणं तु **अनुपस्थितेपी**ति । अपिनोपस्थिते । **त्वदुक्तं** कर्मणः प्राधान्यं स्यात्, शास्त्रस्य प्राथम्यात्, **नत्वेवम्**, शास्त्रप्राथम्यापेक्षया श्रुतिद्वयस्य प्राबल्यात् । 'तमेतं वेदानुवचनेने'ति 'यदेव विद्यये'ति श्रुतिद्वयम् । **प्रकृते** । **किन्तूभयो**रिति भाष्यविवरणमाहुः **एवं ज्ञाने**ति । कर्माप्राधान्यज्ञानोत्तरम् । **कथञ्चि**दिति । कारणत्वेन प्रकारेण भगवति लोकसंग्राहका वर्णाश्रमधर्माः क्रियाशक्तिरूपाः भगवद्धर्मा ज्ञानशक्तिविषयभक्तिरूपाः । 'भगवान्भक्तभक्तिमानि'तिवाक्यात् । ज्ञानशक्तेः सविषयत्वात् भगवान्विषय इति चेद्भक्ता अपि सन्तु, 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपी'ति वाक्यात् । **प्राप्ता** इति । भगवति प्राप्ताः । जीवे कथञ्चिन्मार्गाग्रहेण प्राप्ताः । **प्रत्यवाये**ति । यथा बलदेवे सूतवधानन्तरम् । आदिना 'मृत्योर्मृत्युमुपैति स' इति जीवविषये

अत आदराद्वेनोक्तद्वचनाद्भगवद्धर्माणां बलवत्त्वेनालोपवचनात् न कर्माङ्गत्वमेतेषां सिध्यन्तीत्यर्थः ॥ ४१ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

भाष्यप्रकाशः ।

यादिबोधकवाक्यैः प्रबलदुर्बलभावे वैपरीत्येन भाते तदपवादायादरः प्रकाश्यते । ततश्च भगवद्धर्माणां बाधाभावः सिध्यति । तथा सतीतरेषामादराभावेपि प्रत्यवायश्रवणवैयर्थ्यपरिहाराय तेषां गौणकाले करणमर्धाधानवद्व्यवस्थाप्यते, अतो न भक्त्यादीनां कर्माङ्गत्वमित्यर्थः । अत्र कर्मणामनादरव्युत्पादनेन भगवद्धर्माविरुद्धरीत्या तत्करणस्य व्युत्पादनेन च निष्कामनित्यकर्मकृतिबोधकं अपाश्रितार्भकाश्वत्थमिति विशेषणं प्रतिपादितं ज्ञेयम् ।

रश्मिः ।

एकादशवाक्योक्तस्वसुप्राप्तेनिन्दा । वैपरीत्येनेति । बलाबलविचारे ज्ञानकाण्डत्वादुपनयनादिवदित्याभासोक्तं वैपरीत्यम्, तेन 'यदेव विद्यये'ति श्रुत्या भाते 'तमेत'मितिश्रुत्या ज्ञानकाण्डत्वेन च तस्य वैपरीत्यस्यापवादाय 'ऋषयोपि देव युष्मत्प्रसङ्गविमुखा इह सञ्चरन्ती'त्युपष्टम्भाद्भगवद्धर्मेष्वादरः प्रकाश्यते, नतु वर्णाश्रमधर्मे । इतरेषामिति । वर्णाश्रमधर्माणाम् । अर्धाधानेति । अर्धाधाने कृते कानने समाप्तावपि विधिबलादर्धाधानं क्रियते तस्यैव । गौणकालोऽनधिकारकालो विधिलभ्यः । तदेतत्षष्ठस्य द्वितीयपादे तृतीयाधिकरणे स्पष्टम् । सूत्राणां न्यायरूपत्वात् । 'असमाप्य समाप्यं वा काम्यं कामे निवर्तिते । आद्यः प्रयोजनाभावादन्त्यो निन्दादिसश्रवा'दिति । अत्र 'चित्रया यजेत पशुकामः' 'कारीर्या यजेत वृष्टिकामः' इत्यादिषु कामप्रेरितेन पुरुषेण कर्मोपक्रान्तम् । तस्य च समाप्तेः प्रागेव केनापि निमित्तेन तत्तत्फलप्राप्तौ दोषदर्शनेन कामो निवर्तते । तदा कर्मानुष्ठाने प्रयोजनाभावात् न समापनीयमिति चेत् । मैवम् । प्रक्रान्तस्य कर्मणोऽसमाप्तौ निन्दाप्रायश्चित्तयोः श्रवणात् । 'देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते' 'त्रैधातवीयेन यजेत न देवताभ्य आवृश्च्यते'ति तदुभयं श्रुतं तस्मात्समापनीयमित्यर्थः । ओ व्रश्चू छेदने । अत्र इति । वैपरीत्यापवादात् । तत्करणस्य कर्मकरणस्य । **निष्कामेति** । 'कर्माणि साधनत्वेन निरूपयतो'ति सुबोधिन्याभासात् । 'अपाश्रितः आश्रितः अर्भकाश्वत्थो येन । आश्रितः पश्चादिति वा । अर्भाणां क सुखं यस्मात् । बालकसुखदायी । अर्भकरूपः कोमलः अश्वत्थो वा । तस्यैवारणी भवतः । कर्माणि सर्वाणि तत्साधनान्येव । अपाश्रयपदेन च साधनत्वेनैव कर्मणामपेक्षा, नतु तद्गतं फलमप्यपेक्षत इति सूचितम् । अपाश्रिता अर्भका यस्मिन्निति बालाधिकारः कर्मणि सूचित' इति सुबोधिनी । आभासे साधननिरूपणं लोकसंग्रहार्थम् । पश्चादिति । मायाया निवृत्तेः पश्चात् । स चाश्वत्थो धर्मरूपोपि ह्यैश्वर्यधर्मरूपः अन्यथाकरणसमर्थः । अन्यथा ब्रह्मणा प्रार्थितोपि न स्वरूपमन्यथयेत् । वीर्यं तु नास्थेयम् । 'नैच्छद्वपु'रितिवाक्यात् । ननु नित्यानन्दे प्रभासलीलानुपपन्नेत्यत आहुः **अर्भानामिति** । ऐश्वर्यविशिष्टोऽधोक्षजो बाल इति न नित्यानन्दत्वविरोधः । धर्मोऽश्वत्थः 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येक' इति । स एवैश्वर्यमित्यर्भकरूपः । अधुना लोकसंग्रहार्थं कर्माश्रयणरूपं तेन बृहदारण्यकोक्तोऽश्वत्थः कालात्मा भगवाञ्जातोऽश्वत्थादग्निरूपोपि, अश्वत्थे धर्मे तन्निष्ठाश्वे च तिरोभवतीत्यश्वत्थाश्रयणेच्छाया आहुः **तस्यैवेति** । महीधर्या वेदटीकायामश्वत्थगर्भशमीशाखाहरणोक्तेः । तत्साधनानीत्यरणिकाष्ठानयनसाधनानि साक्षात्परम्परयेति बोध्यम् । अपाश्रित आश्रित इत्यर्थ उक्तोऽपपरी अनर्थकाविति सूत्रात् । अधुनाऽपार्थं हीनं वदन्ति **अपाश्रयेति** । **कर्मणा-**

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ (३-३-१५.)

अथेदं विचार्यते । पुरुषोत्तमविदः कर्म कर्तव्यम्, न वेति ।

तत्र मार्गत्रयफलात्मके तस्मिन् सम्पन्ने पुनस्तस्य स्वतोऽपुरुषार्थस्य करणमप्रयोजकमिति न कर्तव्यमेवेति पूर्वपक्षः ।

तत्र सिद्धान्तमाह तन्निर्धारणेत्यादिना । अत्रेदमाकूतम् । भक्तिमार्गे हि मर्यादापुष्टिभेदेनास्ति द्वैविध्यम् । तत्र मर्यादायां पुष्टौ चैतादृशस्य न कर्मकरणं सम्भवति । अत एव तैत्तिरीयकोपनिषत्सु पठ्यते 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति । 'एत९ ह वा व न तपति किमह९ साधु नाकरवं किमहं पापमकरवमिती'ति । श्रूयते चोभयविधानामपि कर्मकरणमम्बरीषोद्धवपाण्डवा-

भाष्यप्रकाशः

शङ्करभास्कराचार्यौ तु वैश्वानरविद्योक्तस्य प्राणाग्निहोत्रस्य भोजनलोपे लोपो न वेति शङ्कायां लोपं सिद्धान्तयतः । तत्रोदासीना वयम् ।

रामानुजाचार्यास्तु, इदं सूत्रद्वयं कामादिसूत्रशेषत्वेनाङ्गीकृत्य तत्र मोक्षार्थिनां निर्विशेषोपासकानां सत्यकामत्वादिवद्वशित्वादिकमपि लुप्यते इति शङ्कानिवृत्तये आद्यम्, छान्दोग्योक्तं 'सर्वेषु लोकेषु कामचार' इति फलं सांसारिकमिति शङ्कानिरासाय द्वितीयमिति मन्यन्ते । अयं च परविषयो विचार इति पूर्वोक्तमतद्वयापेक्षयायमेव युक्तः ॥ ४१ ॥ इति चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ ननु यद्येवं तर्हि गौणमुख्यन्यायेन कर्मणामप्रयोजकत्वात् परमहंसेष्विव भक्तेष्वपि तत्प्राप्तिरेव न सम्भवतीति व्यर्थः पूर्वोक्तो विचार इत्याकाङ्क्षायां पाक्षिकप्राप्तिं हृदिकृत्य तत्प्रयोजनबोधनायेदमधिकरणमित्याशयेन संशयपूर्वपक्षौ वदन्तस्तदवतारयन्ति अथेत्यादि । तस्मिन्निति । पुरुषोत्तमज्ञाने । सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति अत्रेदमित्यादि । एतादृशस्येति । पुरुषोत्तमविदः सर्वदा भगवदानन्दमनुभवतो वा । श्रूयते चेति । गोपालोत्तरतापनीयेऽतिथिपूजारूपो गृहस्थधर्मो

रश्मिः ।

मिति । अश्वत्थरूपधर्माश्रयणरूपकर्मात्र । बहुवचनमन्यापेक्षम् । हीनाश्रयणान्नतु तद्गतं फलमप्यपेक्षत इत्यर्थः । अपाश्रिता इति । मुख्यतया तु वैदिका आश्रिताः । अतो बालस्यैश्वर्याविष्टस्याधिकारः प्रभासलीलायां कर्मणि सूचित इत्यर्थः । वैश्वानरेति । प्राणाग्निहोत्रोपनिषदि स्फुटम् । उदासीना इति । पूर्वतन्त्रे द्वारलोपात्कार्यलोपस्य सिद्धत्वे तत एव सिद्धेरुदासीनाः । परविद्ययोरिति[1] । 'अथ परा यया तदक्षरमधिगम्यत' इति श्रुतेः पूर्वा परा । छान्दोग्य तु नारदसनत्कुमारसंवादस्थं सर्वात्मभावविद्याविषयमिति परविद्या ॥ ४१ ॥ इति चतुर्दशमादरादलोप इत्यधिकरणम् ॥ १४ ॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥ पाक्षिकेति । कर्मकरणे भगवदिच्छानिर्धारणपाक्षिकेत्यर्थः । तत्प्रयोजनेति । अग्रे स्फुटम् । भाष्ये । मार्गेति । कर्ममार्गेण चित्तशुद्धौ ज्ञानं ज्ञानिनो भक्तौ सत्यां 'भक्त्या जानाति चाव्यय'मितिश्रुत्युक्ते फलात्मके । आकूतमिति । ..... । प्रकृते । 'अम्बरीषोद्धवपाण्डवादी'नामित्यत्रादिपदार्थत्वेन शुकजडादयो भाष्ये व्याकृतप्रायाः । गोपालेत्यादि । गान्धर्वीप्रभृतीनां पुष्टिमार्गीयत्वं स्फुटम् । 'अह्नयापृतं निशि शयान'-

१. परविषय इत्यत्र परविद्ययोरिति पाठः रश्मौ ।

दीनाम्। एवं सत्युभयविधानां मध्ये, मम कर्मकरणे प्रभोरिच्छास्तीति यो निर्धारयति, स करोति। य एतद्विपरीतम्, स न करोति। यथा शुकजडादिः। एतन्निर्धारश्च भगवदधीनः, अतो भक्तेष्वपि तन्निर्धारणानियमः, अतः कर्म कर्तव्यमेवातन्निर्धारणे त्वाधुनिकानाम्। एवं सतीच्छाज्ञानवता तत्सन्देहवता च कर्म कर्तव्यमिति सिद्धम्। तत्रोभयोः फलं वदन्नादावाद्यस्याह तद्दृष्टेः। तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्य स तथा। तस्य जीवकृतकर्मफलात् पृथक् भिन्नमीश्वरकृतकर्मणो यत्फलं वेदमर्यादारक्षा लोकसंग्रहश्च तत्फलमित्यर्थः। हिशब्देन 'सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत। कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रह'मिति भगवद्वाक्यरूपोपपत्तिः सूचिता। द्वितीयस्य मध्यमाधिकारात् कालसङ्गादिजनितचित्तमालिन्येन भगवत्सांनिध्ये प्रतिबन्धः स्यात्, तन्निवृत्तिस्तत्कृतकर्मणः फलमित्यर्थः।

भाष्यप्रकाशः।

गान्धर्वीप्रभृतीनाम्। चकारात् स्मृतौ। उभयविधानामिति। मर्यादायां पुष्टौ चाङ्गीकृतानां भक्तानाम्। एतद्विपरीतमित्यत्रापि निर्धारयतीति सम्बध्यते। तथाच निर्धारणानियमपदस्य हेतुगर्भतया एवं कर्मप्रसक्तेर्विद्यमानत्वान्न पूर्वाधिकरणोक्तविचारवैयर्थ्यमित्यर्थः। ननु भवत्वेवं पुरुषोत्तमविदः कर्मकरणम्, तथापि किं तस्य फलमिति विचारणीयम्, न तावल्लौकिकम्, तदनभीष्टत्वात्। नापि प्रत्यवायपरिहारादिः, 'स्वपादमूलं भजत' इति वाक्याद्भगवतैव तत्सिद्धेरित्याकाङ्क्षायां सूत्रशेषमवतारयन्ति तत्रेत्यादि। एवं सिद्धे कर्मकरणे ज्ञातेच्छतत्सन्देहवतोः फलं वदन्निश्चितेच्छस्य फलं तद्दृष्टेः पृथगित्यनेन पूर्वमाहेत्यर्थः। द्वितीयस्य विवृण्वन्ति द्वितीयस्येत्यादि। तथाच तादृशोरपि कर्मणः साफल्यस्य सत्त्वान्न पूर्वोक्तविचारवैयर्थ्यमित्यर्थः।

रश्मिः।

मितिवाक्यात्। तथाच पुष्टिमर्यादामार्गीया भक्ता अप्यादिपदार्थः। अत्र गान्धर्वीप्रभृतीनां श्रूयते चेत्यन्वयो न भवति। गोपालतापिनीये गान्धर्वीप्रभृतिष्वम्बरीषादीनामग्रहणात्। तथाच श्रूयते चेत्यस्य वेदोपाख्यानेष्वित्यर्थः। अन्वयान्तरमाहुः स्मृताविति। स्मृतौ श्रूयते श्रावणविषयीक्रियते। नच स्मर्यते चेति पठनीयमिति वाच्यम्। 'इतिहासः पुराण वेदानां पञ्चमो वेद' इति श्रुत्या पुराणेष्वपि स्मर्यते चेत्यस्य बाधात्। स्मृतयस्तु नवमस्कन्धे 'स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः। स्वधर्मेण हरिं प्रीणन्सङ्गान्सर्वान् शनैर्जहा'वित्यम्बरीषस्य कर्मकरणे। दशमस्कन्धे 'क्रतुराजेन गोविन्द राजसूयेन पावनीः। यक्ष्ये विभूतीर्भवत' इति पाण्डवानां कर्मकरणे। एकादशस्कन्धे 'यथोपदिष्टं जगदेकबन्धुना तपः समास्थाय हरेरगाद्गति'मित्युद्धवस्य कर्मकरणे एकोनत्रिंशाध्यायस्था। मर्यादायामिति। मर्यादायामम्बरीषादयः। पुष्टिमर्यादायां गान्धर्वीप्रभृतयः। पुष्टौ 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः। येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'तिवाक्योक्ता गोप्यादयः। 'स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतित कथंचिद्धुनोति सर्वं हृदि सन्निविष्ट' इति। मर्यादेत्यादि। मर्यादायामम्बरीषादयः भक्तेः ससाधनत्वात्। पुष्टौ गोप्यादयः निःसाधनभक्तिमत्त्वात्। पुष्टिमर्यादायां गान्धर्वीप्रभृतयः गोपालतापिनीये ससाधनभक्तेः, 'अह्नयापृत'मिति निःसाधनभक्तेश्च कथनात्। शुकजडादयो ज्ञानिभक्ताः। प्रथमस्कन्धे शुकस्य पञ्चमस्कन्धे जडस्य ज्ञानित्वेन प्रसिद्धेः।

१ एतावन्निर्धारणमिति पाठ। २. कामसङ्गेति पाठ.।

अथवा । पूर्वसूत्राभ्यां भगवद्धर्मकृतेरावश्यकत्वमुक्तम् । सर्वात्मभाववतो

भाष्यप्रकाशः ।

अत्र भगवत्स्वरूपविषयकपूर्णज्ञानवतामेव तदिच्छया वर्णाश्रमधर्मकरणतदकरणयोर्विभजनात् पूर्णज्ञानप्राप्यत्वबोधकं अकृशमिति विशेषणं प्रतिपादितं ज्ञेयम् । न कृशं यस्येति तदर्थादिति ।

एवमेतत्सूत्रव्याख्याने प्रत्यवायश्रवणादिना गौणकालेऽप्यवश्यकर्तव्यतया पूर्वाधिकरणे साधितानां कर्मणां वैयर्थ्यपरिजिहीर्षया फलस्य वक्तव्यत्वेन पृथग्घ्यप्रतिबन्धः फलमिति सूत्रभागसार्थक्यमायाति, न सम्पूर्णस्य सूत्रस्येत्यरुच्या व्याख्यानान्तरार्थं सूत्रमवतारयन्ति अथवेत्यादि । पूर्वसूत्राभ्यां भगवद्धर्माणां मोक्षफलानां श्रवणादीनां कृतेः करणस्यावश्यकत्वमुक्तम्, यः पुनः सर्वात्मभाववान्, तस्य तूक्तभगवद्वचनात्, तं प्रति मोक्षसाध-

रश्मिः ।

भगवदिति । इच्छाया भगवन्निष्ठत्वेन तन्निष्ठसत्ताया अपि परम्परया भगवन्निष्ठत्वेन विषयविधया भगवदधीनत्वम्, मुख्यत्वात्, इतरयोश्च विशेषणत्वात् । ननु प्रभोरिच्छास्तीत्यत्र प्रभुसम्बन्धीच्छानिष्ठः सत्तानुकूलो व्यापार इति वैयाकरणबोधोतः कथमितरयोर्विशेषणत्वमिति चेत् । न । अनौचित्याद्भगवतो विशेषणत्वे सखण्डब्रह्मवादेन । एतद्भगवदधीनपदेन सूच्यते । एतत्फलमाहुः **अतो भक्तेष्विति** । येषां पुनर्भगवान् साधनं फलं च तेष्वपीत्यर्थः । तादृशेष्विच्छासत्तयोरभावात् । तथा चैतन्निश्चयस्य ज्ञानरूपस्य सकलभक्तसाधारणं भगवदधीनत्वमुररीकार्यमिति भावः । नचान्योन्याश्रयः भगवदधीनो निर्धारः निर्धाराधीनो भगवान् साधनमिति ज्ञानमिति वाच्यम् । पूर्वं कर्मकरणनिर्धारेण कार्येणाधीनस्य भगवान्साधनमस्ति कारणं विना कार्याभावादिति भगवान्साधनमिति पश्चाज्ज्ञानस्य सम्भवेनान्योन्याश्रयाभावात् । **भाष्ये । चेदेत्यादि ।** इदं गीतातृतीयाध्याये 'लोकसङ्ग्रहमेवापि संपश्यन्कर्तुमर्हसी'ति लोकसङ्ग्रहः । 'यद्यदाचरति श्रेष्ठ' इत्यारभ्य 'उपहन्यामिमाः प्रजा' इत्यन्तेन वेदमर्यादारक्षा । ननु 'न कुर्यां कर्म चेदह'मितीश्वरं प्रति व्यतिरेकमुखेन विधिरस्ति तत्र गीतायां अर्जुनं प्रति लोकसंग्रहकथनवद्वेदमर्यादारक्षाप्युक्ता न सर्वान्प्रत्याज्ञेत्याकाङ्क्षायां हिकारस्यार्थमाहुः **हीति** । अत्र विद्वांसं प्रत्याज्ञास्तीति नोक्तदोष इत्यर्थः । भगवद्वाक्येन रूप्यते व्यवह्रियत इति भगवद्वाक्यरूपा उपपत्तिः युक्तिः । यदीदं भगवद्वाक्यं न स्यात्, उक्तदोषः स्यादिति अव्ययानां वैयाकरणमते द्योतकत्वात्सूच्येतेति । **प्रकृते । भगेत्यादि । पूर्णेति ।** 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत' इति श्रुत्या पूर्वं पूर्णं भगवता भक्तमनोरथानुरूपं पूर्तिकर्मज्ञानं तद्वताम्, **विभजनात्** अम्बरीषाद्युदाहरणसमर्थितात् । **अकृशमिति** । (अकृशमिति ज्ञानम्, पूर्णत्वात्, अन्येषां परिच्छेदरूपत्वात् । अनेन पूर्णमेव ज्ञानं साधनमिति, न तु खण्डब्रह्मज्ञानानि शारीरकादीनि । सर्वेषां भक्तानामुपसंहृतत्वात् दौर्बल्यमाशङ्क्य निराकृतम् । भक्तानां तत्रैव प्रवेशात् । अनेनान्येपि दैहिका धर्मा निवारिताः । उत्पत्तिकार्यतपस्यादीनि चाक्षरसाम्यात् निवारितानि । 'अस् भुवि' 'डुकृञ् करणे' 'शम उपशमे' इति धात्वादयो गृहीताः । प्रपञ्चकर्मज्ञानानि वा ज्ञानसाधनानि, ततः ससाधन ज्ञानमुक्तं भवति ।) तथाचायं सूत्रार्थः । मम कर्मकरणेऽकरणे वा भगवदिच्छास्तीति निर्धारणानियमादाधुनिकानाम्, अतस्तैर्निष्कामतया कर्म कर्तव्यमेव । तद्दृष्टेः । तस्या भगवदिच्छाया दृष्टिर्ज्ञानं यस्याम्बरीषोद्धवयुधिष्ठिरादेस्तस्य पृथक् जीवकृतकर्मणो यत्फलं तस्माद्भिन्नं सन्मार्गरक्षालोकसङ्ग्रहादिकं तदेव फलम्, न तु स्वर्गादिकम् । पूर्वोक्तनिष्कामकर्मकर्तुस्तु अप्रतिबन्धः कर्मजप्रतिबन्धाभावः फलं युक्तमिति । इदानीं मुख्यायाः एकादशसर्वस्वत्वेन सर्वनिर्णये उक्तायाः न्यूनताख्यनिग्रहस्थाननिवारिकायाः प्रसङ्गतः प्रस्तावनामाहुः **य इति** । **उक्तेति** । भाष्योक्तभग-

'न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिहे'ति भगवद्वचनाद्विधेयाभावादसम्भवाच्च कर्मज्ञानयोर्विहितभक्तेश्च करणं न सम्भवतीति तस्य किं फलमित्याकाङ्क्षापूरणाय तदनुवदन्ति तन्निर्धारणेत्यादिना। तस्मिन् धर्मिण्येव, न तु धर्मेष्वपि दृष्टिर्यस्य स तथा। दृष्टिपदेन ज्ञानमात्रमुच्यते। तेन अन्यविषयकदर्शनश्रवणादिज्ञानाभाव उक्तो भवति। एतादृशस्य प्रभुसङ्गमात्रमपेक्षितम्। तत्र भगवदुक्तस्वसङ्गमावधिकस्य भक्तस्य सङ्गमसमयनिर्धारो भवति। अतादृशस्य तस्य स नेति तन्निर्धारणानियमः। एतेन फलप्राप्तेः प्रागवस्थोक्ता भवति। फलस्वरूपमाह पृथक्फलमिति। अस्यानिर्वचनीयत्वादनुभवैकवेद्यत्वान्मोक्षान्तं यत्फलं शास्त्र उक्तं तस्माद्भिन्नमित्युक्तम्। अन्यत्र हि धर्माणां साधनत्वम्, यत्र फलमेव साधनम्,

---

भाष्यप्रकाशः।

नानामविधानस्य सत्याद्यधिकरण उपपादितत्वेन विधेयानां तेषामभावात्, तद्भावस्वभावेन तेषां कर्तुमशक्यतया असम्भवाच्च कर्मज्ञानविहितभक्तीनां करणं सर्वात्मभाववतो न सम्भवति, तदभावे च न मोक्षोपीति तस्य किं फलमित्याकाङ्क्षायां तस्य यत्फलं तदनेन सूत्रेणानुवदतीत्यर्थः। व्याकुर्वन्ति तस्मिन्नित्यादि। एतेनेति। तन्निर्धारणानियमपदेन। अन्यत्रेति। मोक्षपर्यन्ते फलान्तरे। तथाच भगवत्सङ्गमाभिलाषौत्कट्येन तदेकतानस्य भगवतानुक्तस्वसङ्गमावधिकस्य 'यतो वाचो निवर्तन्त' इति श्रुत्युक्तमगणितानन्दरूपं फलम्, तत्प्राप्तिपूर्वदशायां तद्भावप्रति-

रश्मिः।

वद्वचनात्। **विहितभक्तीति**। तेन सर्वात्मभावेऽविहितभक्तेः कामाद्युपाधिना चिन्तनरूपायाः करणं सम्भवतीत्युक्तम्। **भाष्ये**। नन्वत्र पक्षे इदं सूत्रं नाधिकरणमिति वक्ष्यते। तथाच तस्याः श्रुतेर्दृष्टिदर्शनम्। तस्या इति षष्ठीतत्पुरुषोस्त्विति चेत्। सत्यम्। सर्वात्मभावे 'यत्र नान्यत्पश्यती'त्यादिश्रुतेर्दर्शनं वर्तते, तथापि यत्र यस्मिन्नधिकरणेऽन्यधर्मादिदर्शनादिनिषेधाद्धर्मिण्येव दृष्टिः सूच्यते इत्याशयेनाहुः **तस्मिन्निति**। श्रुतावन्यदर्शननिषेधाद्विग्रहवाक्ये एवकारः समासघटको न। **ज्ञानमात्रमिति**। मात्रं कार्त्स्न्ये। **प्रभ्विति**। प्रभोः सम्यक् गमः अपर्यालोचितोऽध्वा पुष्टिमार्गस्तन्मात्रम्। मात्रमवधारणे। 'मात्रं कार्त्स्न्येऽवधारण' इति कोशात्। **अपेक्षितमिति**। विप्रयोगभावोदय एव स भावो ज्ञातो भवतीति। तत्र प्रभुसङ्गमातिरिक्तमनपेक्षितम्। **स्वसङ्गमेत्यादि**। वैराग्य न श्रेयो भवेदित्युक्ते विषयवैतृष्ण्यसंज्ञं वैराग्यं न श्रेयः विषयतृष्णा श्रेयः भगवदुक्तः स्वस्य सङ्गमस्यावधिः पूर्वावस्था विषयतृष्णारूपा यस्य भक्तस्य तादृशस्य अपर्यालोचिताध्वनः पुष्टिदास्ययुक्तप्रेम्णः समयः कालः तस्य निर्धारो निश्चयः भगवत्सङ्गकालनिश्चयो भवति। यदि भगवत्सङ्गकालनिश्चयो न स्यात्, 'सत्सङ्गान्मामुपागता' इत्येकादशे द्वादशाध्याये भगवान्न वदेत्। अतादृशस्य धर्मादिदृशेः सङ्गमसमयनिर्धारो न, सर्वात्मभावैकलभ्यत्वात्तस्य। **प्रागवस्थेति**। यथा 'वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले' इति प्रागवस्था, 'परामृतात्परिमुच्यन्ति सर्वे' इति फलस्य। **शास्त्र इति**। मर्यादाभक्तिशास्त्रेपीत्यर्थः। **फलमित्यादि**। ननु कथं फलमेव साधनं फलत्वसाधनत्वयोर्विरोधादितिचेन्न। फलं भगवान् स्वस्यानन्दावेशं तिरोभाव्य कृपावेशं कृतवानित्यविरोधात्। 'कृपाविष्टः साधनम्, आनन्दाविष्टः फल'मिति भाष्यात्। **प्रकृते**। **अगणितेत्यादि**। अगणितानन्देनागणित आनन्दो यत्र विषयतया सोऽगणितानन्दः पूर्वोक्तरसात्मकपुरुषोत्तमभजनानन्दानुभवस्तेन रूप्यते व्यवह्रियतेऽर्थादुत्तरकाले

तत्फलस्यानिर्वाच्यता युक्तैवेति हिशब्देनाह। ज्ञानमोक्षादिना तद्भावाप्रतिबन्धश्च फलमित्यर्थः। प्रासङ्गिकमेतत्सूत्रम् ॥ ४२ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

भाष्यप्रकाशः ।

बन्धाभावश्च फलमिति भक्तिविचारे मुख्यभक्तेरपि स्मृत्या प्रसङ्गत उक्तमित्यर्थः। अस्मिन् इदं केवलं सूत्रमेव, न त्वधिकरणम्। एतज्ज्ञापनायोक्तमेतत्सूत्रमिति।

अत्रान्ये तु, 'ओमित्येतदक्षरमुद्गीथमुपासीते'त्यादीनि कर्माङ्गान्युपासनानि तत्तत्कर्मसु जुहूपर्णतादिवन्नित्यं क्रतुसम्बन्धीनि न वेति शङ्कायां न नित्यानीति सिद्धान्तयन्ति। 'अङ्गेषु यथाश्रयभाव' इत्यन्तिमाधिकरणं चैतस्यैव प्रपञ्च इत्याहुः। तत्तेनैवास्य गतार्थत्वाद्वैयर्थ्यमस्य सूत्रस्य तन्मते दुर्वारमिति ज्ञेयम् ॥ ४२ ॥ इति पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

रश्मिः ।

ज्ञायते यदकुतोभयं तदगणितानन्दरूपं फलमित्यर्थः। भगवदुक्ताकुतोभयपदस्येत्याद्यग्रेतनसूत्रभाष्यात्। तद्भावेति। तद्भावे सर्वात्मभावे प्रतिबन्धो ज्ञानमोक्षादिना ज्ञानमैक्यज्ञानं मोक्षः सायुज्यं आदिना वैराग्यं पुरुषोत्तमज्ञानस्य तैरपकर्षवत्तया ज्ञान तदभावरूपं च फलम्। मुख्यभक्तेरिति। मुख्यत्वं 'तस्मात्त्वमुद्धवोत्सृज्य नोदने' त्युपक्रम्य 'याहि सर्वात्मभावेने'त्युक्त्वा 'आत्मानं च स्वयं वेद तस्मादन्यवचो मृषे'ति निबन्धोक्तैकादशसर्वस्वत्वम्। स्मृत्या न्यूनताख्यनिग्रहस्थाननिवृत्त्यै स्मृत्या। तथाचैष सूत्रार्थः। तद्दृष्टेः पुरुषोत्तमदृष्टेः सर्वात्मभाववत इति यावत्। तन्निर्धारणानियमः सङ्गमसमयनिर्धारणानियमोऽतः पृथक्फलं अप्रतिबन्धश्च फलं हि फलस्यानिर्वाच्यता युक्तैवेति। 'उपस्थितेऽतस्तद्वचना'दिति सूत्रादत इत्यनुवर्तते। 'कामादीतरत्रे'ति सूत्राच्चकारः। ननु पुरुषोत्तमदृष्टेस्तन्निर्धारणानियमः कथं सङ्गमसमयनिर्धारो भवतीति भाष्यविरोधादिति चेत्। न। पुरुषोत्तमस्य सर्वात्मभावरूपत्वेन सर्वात्मभावे चाहङ्कारादेशस्य सत्त्वेन तद्दृष्टेरित्यत्राहङ्काररूपधर्मदृष्टेः कादाचित्क्या अपि सत्त्वेन तामादाय तन्निर्धारणाभावात्तन्निर्धारणानियमः, सार्वदिकस्तु तन्निर्धारात्तन्निर्धारणनियम इति भाष्याविरोधात्। अहङ्कारस्य दैन्यविरुद्धत्वेन दैन्यजपुरुषोत्तमात्मकसङ्गमसमयनिर्धाराविर्भावविरोधः। एतत्सूत्रमितीति। तेनात्र न षोडशकलाषोडशाधिकरणीप्राप्तं विशेषणमुक्तमिति भावः। नन्वत्रान्यादृतः सूत्रार्थः कुतस्त्यक्त इत्याकाङ्क्षायामाहुः अत्रान्ये त्विति। विषयमाहुः ओमित्येतदिति। छान्दोग्येऽस्ति। विशयमाहुः तत्तदिति। जुह्वित्यादि। यथा जुह्वां पर्णता पर्णमयीता। 'यस्य पर्णमयी जुहूर्भवती'ति श्रुतेः। आदिना गोदोहनम्। 'गोदोहनेन पशुकामस्ये'ति श्रुतेः। यथा गोदोहनं तथा नवेति योजना। नित्यानि अप्रकरणपठितानामपि जुह्वादिद्वारेण क्रतुप्रवेशात्प्रकरणपठितवन्नित्यतैवमुद्गीथाद्युपासनानामिति पूर्वपक्षः। सिद्धान्तमाहुः नेति। तन्निर्धारणानियमः। उद्गीथादिकर्मगुणयाथात्म्यनिर्धारणानि रसतमप्राप्तिः समृद्धिर्मुख्यप्राण इत्येवमादीनि नैतासां नित्यवत्कर्मसु नियमः। कुतस्तद्दृष्टेः। तस्या नियमस्य दर्शनात्। 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदे'त्यविदुषोपि क्रियाभ्यनुज्ञानात्। अपिचैवञ्जातीयकस्य कर्मव्यपाश्रयस्य विज्ञानस्य पृथगेव कर्मणः फलमुपलभ्यते। कर्मफलसिद्ध्यप्रतिबन्धं तत्समृद्धिरतिशयविशेषः कश्चित्। 'तेनोभौ कुरुतः नाना तु विद्या चाविद्या च यदेव विद्यया करोती'ति। तत्र नाना त्विति विद्वदविद्वत्प्रयोगयोः पृथक्करणात् वीर्यवत्तरमिति च, तरप्प्रत्ययप्रयोगाद्विद्याविहीनमपि कर्म वीर्यवदिति गम्यत इति सिद्धान्तयन्तीत्यर्थः ॥ ४२ ॥ इति पञ्चदशं तन्निर्धारणाधिकरणम् ॥ १५ ॥

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ (३-३-१६.)

अथेदं विचार्यते। सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यः, न वेति। तत्र पुराणे 'तस्मात् त्वमुद्धवोत्सृज्ये'त्युपक्रम्य, 'मामेकमेव शरणमात्मानं सर्वदेहिनाम्। याहि सर्वात्मभावेन यास्यसे ह्यकुतोभय'मिति वाक्ये मुक्त्यात्मकाकुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यते। अतः साधनसाध्य इति पूर्वः पक्षः।

तत्र सिद्धान्तं वक्तुं तदुपदेशस्वरूपमाह प्रदानवदिति। यद्ययं साधनोपदेशः स्यात्, स्यात्तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वम्, न त्वेवम्, किन्तु, तदुक्तं भगवदुक्तम्। प्रदानवत्। प्रकृष्टं दानं प्रदानं वरदानमिति यावत्, तद्वदेवेत्यर्थः। वरेण हि स्वकृत्यसाध्यमपि सिध्यतीति तथा। शत्रुसंहारभयादिनापि शरणाप्तिर्भवति, तत्र न तस्याः पुरुषार्थत्वम्, किन्तु तन्निवृत्तेरेव। प्रकृतेपि सर्वात्मभावे स्वरूपप्राप्तिविलम्बासहिष्णुत्वेनार्त्यातौ स्वरूपातिरिक्ता-

भाष्यप्रकाशः।

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ एवं राजसानां कर्मासक्तिवारणायाधिकरणद्वयं प्रणीय मुख्यभक्त्युत्कर्षज्ञापनेन तदभिलाषोपजननाय तत्कृतकर्म फलं च प्रदर्शितम्। अतः परं मुख्यभक्तिः केन भवतीत्याकाङ्क्षायामिदमधिकरणमारभत इत्याशयेनावतारयन्ति अथेत्यादि। व्याकुर्वन्ति यदीत्यादि। स्यात्तदा साधनत्वेनेत्यादि। सर्वात्मभावकरणकशरणप्राप्तिसाधनत्वेन रूपेण सर्वात्मभावस्य स्वकृतिसाध्यत्वं स्यात्। तन्निवृत्तेरिति। शत्र्वादिभयनिवृत्तेः। नन्वेतद्वाक्योक्तस्यार्थस्य कथं प्रदानतुल्यत्वमित्याकाङ्क्षायां तदुपपादयन्ति प्रकृतेपीत्यादि। एतच्चेति। एतादृशं शरणगमनम्। नन्वेवं स्वकृत्यसाध्यत्वेऽस्य भावस्य प्रदानत्वमेव सिध्यति, न तु

रश्मिः।

प्रदानवदेव तदुक्तम् ॥ ४३ ॥ एवमिति। पूर्वोक्ताधिकरणद्वयपरामर्शेनेत्यर्थः। चात्रेति। मुख्यभक्तिफलं चकारार्थः। अत्राधिकरणद्वये। प्रवृत्त्यर्थं दर्शितम्। प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनसम्बन्धाधिकारिणां सर्वत्र प्रदर्शनात्। भाष्ये। तत्रेति। तादृशसंशये सतीत्यर्थः। विषयवाक्यं तु 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति छान्दोग्यस्थम्। तेन सर्वात्मभावोक्तेः। अत्र च 'सर्वात्मभावो विहिते'त्यादिभाष्येण तत्प्रतिपादकोक्तश्रुतिस्मारणात्। पुराणस्य श्रुत्युपबृंहकत्वेन पुराणेन श्रुतिमुपबृंहयन् पूर्वपक्षमाह पुराण इत्यादि। प्रकारत्वेनेति। सर्वदेहिनामेकमात्मानं मां सर्वात्मभावेनैव शरण याहीत्येवं विशेषणत्वेन याहीति क्रियापदे गमनानुकूलव्यापारसाध्यत्वं गम्यत इत्यर्थः। ननु गमनं शरणनिष्ठ तदनुकूलव्यापारश्चोद्धवनिष्ठ इति कथं सर्वात्मभावस्य स्वप्रयत्नसाध्यत्वमिति चेत्। न। सर्वात्मभावेन शरणनिष्ठ गमनं तदनुकूलव्यापार इत्यर्थात्। अतएव गम्यत इत्युक्तम्, नतूच्यत इति। तदुपेति। तस्य सर्वात्मभावस्य उपदेशः कथनं तस्य स्वरूपम्। (याहीति लोटाज्ञा प्रतीयते तद्विषयत्वेन शरणगमनं प्रतीयते, तत्र प्रकारत्वेन सर्वात्मभावः। स च 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोग'मिति वाक्यात्कस्मैचिदेव दानेन सिद्ध इति तस्य स्वरूपमित्यर्थः। नच कदाप्यदाप्यदानमिति वाच्यम्। सर्वात्मभाववद्भक्तानां दर्शनात्। न चेदं सर्वात्मभावाविषयमिति वाच्यम्। मर्यादाभक्तेः साधनतोपि सिद्धया पुष्टेरनुग्रहेणैव सिद्ध्या दानानपेक्षणादस्य वाक्यस्य निर्विषयत्वापत्तेः।) तदुक्तमिति व्याख्येयम्। भगवतैकादशसर्वस्वत्वेन रूपेणोक्तम्। निबन्धे सर्वनिर्णये स्फुटम्। प्रदानवदिति व्याकुर्वन्ति

१. चात्र दर्शितमिति रश्मौ पाठः।

स्फूर्त्यां तद्भावस्वाभाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ स्वाशक्यत ज्ञात्वा प्रभुमेव शरणं गच्छति, एतच न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानव दिति । भक्तस्येप्सितोऽर्थो हि वरो भवति । सर्वात्मभावस्यानुभवैकवेद्यत्वे

भाष्यप्रकाशः ।

तत्तुल्यत्वमित्याकाङ्क्षायामाहुः भक्तस्येत्यादि । स्पष्टम् । नन्वेवमपि शरणगतेरेव स्वकृत्यसाध्यत

रश्मिः ।

स्म प्रकृष्टमिति । अयं न विग्रहः एकादशसर्वस्वत्वेनोक्तार्थजातस्य प्रकृष्टदानकर्मत्वेन प्रकृष्टदानतुल्यत्वाभावादत आहुः वरेति । वरस्य सिद्धस्य न तु साधनसाध्यस्य दानं वरदानमिति षष्ठीतत्पुरुषः । तथाच वरस्य सिद्धस्य कथनरूपदानमिव तदुक्तं भगवदुक्तं भगवत्कथनमिति यावदित्यर्थः । नच प्रकृष्टस्य दानमिति भाष्यापत्तिरिति वाच्यम् । प्रकृष्टं दानं वरस्य दानमित्यनयोः पर्यायत्वात् । एवेति । 'आत्मानं च स्वयं वेद तस्मादन्यवचो मृषे'ति निबन्धात् । ननु वरदानं साधनमेव तेनापि फलवता वर्त्यंत इति चेत्, तत्राहुः वरेणेति । स्वकृतिसाध्यसाधनत्वं साधनत्वम् । स्वकृत्यसाध्यसाधनत्वं तु न । अनुग्रहवद्वरदानस्यापि भगवद्धर्मत्वात् । सर्वात्मभावे स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पादनं दानं न यतः । प्रकृष्टं अभीष्टमिति यावत् । भगवतोऽभीष्टम् । 'ईप्सितत्वासम्भवेपी'ति वक्ष्यमाणभाष्यात् । तथेति । साधनेतरत्वप्रकारेण वरकथनरूपं दानम् । 'युक्तं भगैः स्वैरितरत्र चाध्रुवै'रिति वाक्यात् । वरदानं भगवन्निष्ठं साधनं भक्तनिष्ठमिति विभेदः । प्रायस्तत्तत्फलं प्रति तत्तन्निष्ठस्यैव साधनत्वम् । क्वचिदेव पितृनिष्ठप्रायश्चित्तेन पुत्रनिष्ठा शुद्धिः । ननु मुख्यभक्तावपि दार्ढ्यार्थं 'कामादीतरत्र'सूत्रोक्तकामादीनां तेभ्य एव मुक्तिसाधकानां का गतिरिति चेत्, तत्राहुः शत्रिवत्यादि । शत्रुसंहाराभ्यां भयं तदादिना, आदिना द्वेषः । न पुरुषार्थत्वमिति । किन्तु क्रत्वर्थत्वम्, क्रतुपौष्कल्याय विधीयते, या प्रयाजादिवत् शरणाप्तिः, सा क्रत्वर्था भगवत्सम्बन्धरूपक्रत्वर्था । मुख्यभक्तिदार्ढ्यार्थत्वेन मुख्यभक्तिरूपक्रत्वर्था वा । ननु क्रतुर्धर्मो यज्ञ इति यावत्, तत् कथं मुख्यभक्तेः क्रतुत्वमिति चेत्, न, 'अप्रतीकालम्बन'सूत्रे तत्क्रतुपदस्य 'प्राचीनभगवद्भजनलक्षणक्रतुश्च नीयत' इति भाष्यात् । नहि भयादिना शरणाप्त्या पुरुषस्य कश्चित् प्रीतिविशेष उत्पद्यते, येन पुरुषार्था भवेत् । मुख्यभक्तिलक्षणक्रतुस्तु न क्रत्वर्थः, स्वस्यैव क्रतुत्वात् । पुरुषप्रीतये विधीयमानाः पुरुषार्थाः यथा मुख्यभक्त्यादयः । प्रकृते । शत्र्वादीति । पुरुषार्थत्वमित्यन्वयः । यथा गोदोहनादेः पुरुषार्थत्वम्, न क्रत्वर्थत्वम्, चमसेनापि क्रतुपौष्कल्यसिद्धेर्गोदोहनाभावेपि । एवं शत्र्वादिभयनिवृत्त्यभावेपि तद्भयेन मुख्यभक्तिलक्षणक्रतुपौष्कल्यसिद्धेः । एतच्च पूर्वमीमांसायां चतुर्थाध्याये स्फुटम् । अर्थस्येति । सर्वात्मभावेन मुक्त्यात्मकाकुतोभयसाधनरूपशरणप्राप्तिकथनरूपसुप्तिङ्चयरूपवाक्यस्योक्तं कथनं स एवार्थस्तस्य । एकतिङ्वाक्यमिति पक्षे वाक्यद्वयोक्तार्थस्य । प्रदानेति । वरस्य यद्दानं तत्तुल्यत्वम् । यथा वरस्य सिद्धस्य दानं कथनं 'मयेमा रंस्यथ क्षपाः' इति कथनम् । तथा तादृशशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनमिति प्रदानतुल्यत्वम् । एतादृशमिति । 'तानि पर' इति सूत्रभाष्योक्तं भगवन्मतसिद्धं च शरणगमनं सर्वात्मभावस्य स्वकृत्यसाध्यत्वेन तत्पूर्वकरीत्या, न स्वकृतिसाध्यमित्यर्थः । प्रदानवदित्यत्र । डुदाञ् दाने भावे घञ् । प्रथमान्ताद्वतिः । तेन सर्वात्मभावेन मुक्त्यात्मकाकुतोभयसाधनरूपशरणप्राप्तिकथनरूपवाक्यस्योक्तं कथनम्, स एवार्थो वरदानेन 'मयेमा रंस्यथ क्षपा' इति वरस्य कथनेन तुल्यः । अस्येति । भावस्यास्येति योजना । भावस्य सर्वात्मभावस्य सम्बन्धिनोऽस्य प्रत्यक्षस्य कथनस्येत्यर्थः । प्रदानत्वं वरस्य दानत्वं कथनत्वरूपम् । स्पष्टमिति । ईप्सितत्वासम्भवे भक्तेन मह्यं सर्वात्मभावं देहीति स्वानुभ-

पूर्वमज्ञानेनेप्सितस्यासकृभवेपि स्वत एव कृपया दानमिति यदिदमुक्तम्। अथवा। 'सर्वात्मभावेन मां याही'ति सम्बन्धः।

यद्वा। प्रदानवदित्यस्य पूर्ववदेव व्याकृतिः। तत्र साधनासाध्यत्वे प्रमाणमाह तदुक्तमिति। 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्य' इति श्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति तत्तथैवेत्यर्थः।

भाष्यप्रकाशः।

सिध्यति, न तु सर्वात्मभावस्येत्यतो वाक्यस्य योजनान्तरमाहुः अथवेत्यादि। शरणपदं मामित्यस्य विशेषणम्। तथाच सर्वात्मभावस्यैव प्रदानतुल्यत्वं निराबाधमित्यर्थः। यद्यपि 'गतेरर्थवत्त्व'मित्यारभ्य सर्वोपि वरणश्रुतेरेव प्रपञ्चः, तथाप्यत्र पुराणवाक्यमात्रस्य विषयत्वेनोपन्यासेनापाततः पौराणत्वशङ्का अस्य विचारस्य स्यादिति तन्निरासाय सूत्रांशं प्रकारान्तरेण व्याकुर्वन्ति यद्वेत्यादि। तत्तथैवेत्यर्थ इति। परमात्मनो लभ्यत्वं वरणजन्यसर्वात्मभावसाध्यमेवेति सर्वात्मभावो वरणैकलभ्यः, न त्वितरसाधनसाध्य इत्यर्थः। तथाच सर्वात्मभाव-

रश्मिः।

त्यप्रकाशनात्तस्मै न दद्यादित्यदानम्, तथापि स्वानुमत्यप्रकाशनेऽपि कृपया दानं दानवद्भवत्येव। न च भाष्ये स्वानुमतिप्रकाशन कुतो नोक्तमिति चेत्, न। भगवतो भक्तमनोरथपूरकत्वात्, भक्तस्य चेप्सीतत्वाभावात्। ईश्वरस्य नियमो नास्ति यद्भक्तेष्टव्यतिरिक्त न देयमेवेति। एवं स्पष्टमित्यर्थः।

एवमपीति। एवमिति तृतीयान्तम्। पूर्वोक्तविमर्शे एतच्चेत्यस्य शरणगमनमिति विमर्शेनेत्यर्थः। नन्वेतादृशमिति शरणगमनविशेषणम्, तत्र सर्वात्मभावस्यापि सर्वात्मभाव इत्यादिना सत्त्वेन कथ शरणागतेरेव स्वकृत्यसाध्यत्वमिति चेत्, न। सर्वात्मभावे सतीत्यर्थे सति सप्तम्या सामानाधिकरण्यबोधनात् तत्समानाधिकरणकान्यत्यार्तिस्वरूपातिरिक्तास्फूर्ति-गुणगानादिसाधनकरण-प्रभ्वप्राप्ति-स्वाशक्यत्वज्ञान-प्रभुशरणगमनानि, न तु सर्वात्मभावादिविशेष्य शरणगमनमिति शरणागतेरेव स्वकृत्यसाध्यत्वात्। शरणपदमित्यादि। 'मुमुक्षुर्वै शरणमनुव्रजे'दिति श्रुतेर्वक्ष्यमाणरीत्याप्युपपत्तेरस्मत्पदार्थस्य विशिष्यत्वोपपत्तेश्च शरणपदं मामित्यस्य विशेषणमित्यर्थः। सर्वात्मभावदानं प्रकृष्टदान न स्वानुमतिप्रकाशनाभावात्, किन्तु एकदेशविकृतत्वात् प्रदानतुल्यत्वं निराबाधमित्यर्थः। आपाततं इति। शाबरभाष्याद्यनवलोकनकालत्वमासाद्य स्यादित्यर्थः। 'आपातस्तदात्व' इति विश्वात्। ल्यब्लोपे पञ्चमी। शाबरभाष्ये षष्ठाध्याये द्वितीयपादे 'तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्' इत्यधिकरणे प्राङ्मुखो भुञ्जीत, उदङ्मुखो मूत्रं कुर्यात्' इत्येवमादयः। तत् प्रभुरूपसर्वात्मभावः। तथैव वरणलभ्यत्वप्रकारेणैवेत्यर्थमाहुः परमात्मन इति। परमात्मनः लभ्यत्वमितिप्रयोगोऽवैदिकः। दृशि चेत्यस्याप्राप्तिः। आद्गुण इत्यस्य च वाक्यत्वेन संविधाया विवक्षाभावात्। श्रुतौ सर्वात्मभावनिवेशो वाराहे भक्तिनिवेशस्य 'आत्मा वा अर' इति श्रुतौ कृतत्वात् क्रियते स्म वरणजन्यसर्वात्मभावेति। तथा च वाराहीयचातुर्मास्यमाहात्म्ये सप्तविंशाध्याये 'श्रवणानन्तरं कार्यं मननं भक्तिपूर्वकम्' इति। वरण स्वीयत्वेन स्वीकारः। तस्याधिकारः स दानपात्र तस्मै सर्वात्मभावादिकथनम्, प्रदानवत् वरस्य दानवत्। ननु वरकथनवदित्यनुक्त्वा यत् प्रदानवदित्युक्तम्, तेन दानस्य स्वस्वत्वेत्यादिपूर्वोक्तलक्षणमपि क्वचिदभिप्रेतमिति चेत्। न। यत्र महावाक्योपदेशादौ स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पादनमनुभूयते, तादृशवरदा-

---

१. वरदानादौ।

भाष्यप्रकाशः ।

साधनकसर्वप्राप्तिबोधकमेकादशस्कन्धीयं भगवद्वाक्यं वरणलभ्यत्वबोधकश्रुत्यर्थनिर्णायकत्वादुपन्यस्तम्, अतो न विचारस्याश्रौतत्वमित्यर्थः । एवं चात्र सर्वात्मभावोक्तिसन्दर्भे 'रामेण सार्ध'मित्यत्र 'मय्यनुरक्तचित्ता' इति भक्तविशेषणादिभ्योऽनुरागात्मा भगवददर्शने तीव्रवियोगाधिप्रभृतिजनको विगाढभावः परमासक्तिरूपो य उक्तः, स सर्वात्मभावः शरणागतिकारणत्वे-

रश्मिः ।

नाभिप्रायकत्वात् । वरणेत्यादि । वरण(लभ्य)लभ्यत्वं मध्यमपदलोपी समासः । उक्तवाराहवाक्यात् । तद्बोधकश्रुत्यर्थनिर्णायकत्वादित्यर्थः । ननु 'याहि सर्वात्मभावेने'ति वाक्ये सर्वात्मभावपदेनैकादशसर्वस्वकथनान्तर्गतेनैकेन कथं श्रुतीनां बह्वीनां सर्वात्मभावपरत्वम्, सर्वात्मभावपदस्य समासान्तरैरन्यविधसर्वात्मभावपरत्वे प्रकृतसर्वात्मभावानुपोद्बलकत्वादित्याशङ्कायामेकादशद्वादशाध्यायसन्दर्भमाहुः एवं चेत्यादि । तथा च सर्वात्मभावोक्तिसन्दर्भो वर्तत इत्यदोषः । उपपादयांबभूवुः रामेणेति । अत्र समासनिश्चयोपि भविष्यति। परमासक्तिरूप इति । 'आसक्तिः प्रेम्णो भावकन्दलरूपादुत्तरं तादृशे प्रेम्णि तत्करणेन तदुत्कर्षावस्था रागादिरूपे'ति भक्तिवर्धिनीविवृतौ श्रीपुरुषोत्तमकृतायाम् । 'स्वविषये विविधमनोरथजनको भाव आसक्ति'रिति श्रीकल्याणरायाः । बद्धधीर्वा अत्र सन्दर्भ इति पदद्वये द्वादशाध्यायोक्तेः । अत्रातिव्याप्तिवारणाय परमेति । परमत्वं परज्ञानकरणत्वं अनुषङ्गत्वं वा 'अनुषङ्गबद्धधिय' इति द्वादशाध्यायवाक्यात् । एवमपि परज्ञानकरणाक्षरज्ञानासक्तावतिव्याप्तिः । द्वितीयपक्षे अतिव्याप्तिः स्फुटा । 'क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसा'मिति गीतायाः अक्षरासक्तिरस्ति । तद्वारणायानुरागात्मेति 'मय्यनुरक्तचित्ता' इति वाक्यविशेषणोक्तः । 'सा परानुरक्तिरीश्वर' इति शाण्डिल्यसूत्रात् । परेति न लक्षणघटकमिति श्रीगोकुलनाथजिट्टीकायां भक्तिवर्धिन्या एव । एवमपि सयोगभक्तावतिव्याप्तिस्तन्निराकरणाय भगवदित्यादि । अदर्शने तीव्रवियोगाधयो मनःपीडा विप्रयोगे । वैकुण्ठस्थाक्षरब्रह्मादर्शनेपि पूर्वोक्त भवतीति । भगवददर्शन इति । विप्रयोग उक्तः । मे तीव्रवियोगाधय इति विशेषणात् । विप्रयोगेतिव्याप्तिस्तद्वारणाय विगाढभाव इति । विशेषेण गाढो दृढः कामादिभिः भावः प्रेमा । विगाढभावेनेत्युक्तेः । पुष्टिमार्ग उक्तः । भाष्यमत्र 'कामादी'ति सूत्रस्य 'माहात्म्यज्ञानपूर्वकस्नेहे सत्येव भर्तृत्वेन ज्ञाने कामोपि सम्भवतीति ज्ञापनाय चकार' इति ।एवं पुष्टिमार्गस्य दृढविप्रयोगेऽतिव्याप्तिः । तद्वारणायार्तिं प्रापयेत् । अतिविगाढभाव इत्यर्थः। 'अतिविगाढभाव' इति लिङ्गभूयस्त्वसूत्रभाष्यात् । 'धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चने'ति भ्रमरगीतवाक्यात् । भ्रमरगीतेपि सर्वात्मभावोक्तेः सत्त्वात् । एवं चातिविगाढभाववत्यः अतिकृच्छ्रवतीत्वादित्यनुमेयमिति । एवमप्यतिव्याप्तिस्तदवस्थैवेति विशेष्यमाहुः स इति । 'न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाये'ति वाक्येऽन्यविषयकदर्शननिषेधेन 'स यत्र नान्यत्पश्यती'ति श्रुतिप्रसिद्धः स सर्वात्मभाव इत्यर्थः । अत्रातिविगाढभावज्ञाप्यत्वेन सर्वस्मिन्नात्मभाव आत्मत्वमात्मस्फूर्तिरिति यावत् । अस्य समासस्य विरोधं स्वयं परिहरिष्यन्ति तेनेत्याद्यग्रिमग्रन्थेन । श्रीधरोक्तसमासस्तु क्रियाकलापविशेषणत्वे । सर्व आत्मा सर्वात्मा तस्य भावस्त्वतल्वाच्यः । प्रकृतिजन्यबोधे प्रकारात्मा स सर्वात्मभावः प्रेमकारणमेकादशैकोनविंशे 'सर्वभूतेषु मन्मति'रित्युक्त्वा, 'एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्, मयि सञ्जायते भक्ति'रिति वाक्यात् न प्रदानसाध्यः कारणात्मा, अयं तु फलकारणाभ्यां व्यतिरिक्तः । सर्वेषामात्मभाव इत्यस्य पूर्वोक्तसमासार्थाभेदेन पूर्वसमासपर्यायत्वात् । सर्वे आत्मनां भाव इत्यपि वक्ष्यमाणसमासप्रायः । सर्वश्चात्मा च सर्वात्मानौ जडजीवौ तयोर्भाव आत्मरूप इति द्वन्द्वगर्भितषष्ठीतत्पुरुषे 'अभ्यर्हितं पूर्वम्'

भाष्यप्रकाशः ।

नोपदिष्ट इति सिध्यति । तत्र परमासक्तिश्चानन्दजन्यैव । लोके आनन्दजनक एवासक्तिदर्शनात् । एवं च यत् यज्जनकम्. तत्तद्गुणकं तत्तदात्मकं चेति व्याप्तेः पूर्वं सिद्धत्वात् । 'सर्वोपि आत्मनो भाव' इति सुबोधिन्यां व्याख्यानात् । श्रुतौ निरवध्यानन्दरूपत्वेन रसरूपत्वेन पुत्रादिभ्योपि प्रेयस्त्वेन च सिद्धस्यात्मनो यो भावो धर्मः प्रियत्वाख्य आनन्दात्मा, यन्मात्रां सर्वे उपजीवन्ति, स सर्वस्तदंशिभूतो भगवद्धर्म ऐश्वर्यादिवदतिरिक्त एव ज्ञेयः । तस्य दानं चानुभावनम् । युक्तं चैतत् । अन्यथा सर्वेषामेव तथा स्फुरेदिति । अतो विगाढभावेन

रश्मिः ।

इति सूत्रेण आत्मसर्वभाव इत्यापत्तिः । सर्वं च आत्मा च भावश्चेत्येतेषां समाहार इति समाहारद्वन्द्वोपि न । नपुंसकत्वापत्तेः । अव्ययीभावोपि न । अव्ययीभावश्चेत्यव्ययप्रसङ्गात् । द्विगुरपि न । सङ्ख्यापूर्वत्वाभावात् । शरणेति । पूर्वोक्तशरणेत्यर्थः । अधिभौतिकं नवमस्कन्धोक्तं भाष्ये वक्ष्यमाणं च सुबोधिन्युक्तं च सर्वात्मभावं प्रपञ्चयन्ति स्म तत्रेत्यादिना । दानलक्षणं सङ्घटयितुं स्वस्वत्वं ध्वंसप्रतियोगि व्युत्पादयाम्बभूवुः परमेति । अनुषङ्गवद्धीरूपा परमासक्तिः । चकारात् श्रुतिप्रसिद्धो निरोधलक्षणोक्तः । उभयोपादानम् । निरोधस्कन्धे स श्रुतिप्रसिद्धः 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः' इति श्रीनन्दवाक्ये प्रसिद्धः प्रपञ्चविस्मृतिपूर्वकभगवदासक्तित्वेन रूप्यते व्यवह्रियते इति परमासक्तिरूप उपात्तः । श्रुतिप्रसिद्धश्च अपरिहेय इत्युभयमुपात्तम् । आनन्दजनके पुंसः स्त्रियां स्त्रियाः पुंसि । सर्वात्मभावान्तर्गतसर्वपदार्थानाहुः एवं चेत्यादि । यत्स्त्र्यादिकं यस्य सुखादेर्जनकं तत्स्त्र्यादिक तत्सुखादयो गुणा यस्य तत्तत्तद्गुणकं च पुनस्तदात्मकं तत्सुखादिकमात्मा स्वरूपं यस्य तादृशम् । पूर्वमिति । समन्वयाधिकरणे । सुबोधिन्यां 'सर्वात्मभावोधिकृतो भवतीनामधोक्षज' इत्यस्य भ्रमरगीते । श्रुताविति । जात्यभिप्रायेणैकवचनम् । 'यतो वाच' इत्यस्यां 'रसो वै स'इत्यस्यां रसरूपत्वेन मैत्रेयीब्राह्मणे पुत्रादिभ्योपि प्रेयस्त्वेन धर्मस्तद्वृत्तिः । आनन्देति । आनन्दधर्मत्वादिति भाव । 'प्रकाशाश्रयवद्वा तेजस्त्वा'दिति व्याससूत्रात् । तदंशीति । मात्रारूपांशांशिभूतो भगवद्धर्म इत्यनेन शुद्धस्नेहस्तत्र स्वस्य भगवतः सत्त्वमिति दानलक्षणघटक ध्वंसप्रतियोगि व्युत्पादितम् । अतिरिक्त इति । न च गौरवं शङ्क्यम् । 'परास्य शक्तिर्विविधैव श्रूयत' इति श्रुतौ धर्मासङ्कोचात् । सर्वपदार्थश्चोक्तः । व्युत्पादितस्य स्वस्वत्वस्य ध्वंसपूर्वकपरस्वत्वोत्पादनं सघटयितुमाहुः तस्येति । सर्वात्मभावस्यानुभावने स्फूर्त्याख्यानुभवस्य प्रेरणे हि स भक्तनिष्ठ इति स्वस्वत्वध्वंसपूर्वकपरस्य भक्तस्य स्वत्वोत्पादनाद्दानत्वमित्यर्थः । भक्तनिष्ठत्वे सर्वस्मिन् आत्मभावः सर्वात्मभाव इति प्रियत्वाख्यसर्वात्मभावस्य स्फूर्तौ समासः । वरकथनवत्सर्वात्मभावकथनरूपं दान तु स्फूर्तिरहितस्य सर्वात्मभावस्य । युक्तिमाहु युक्तमिति । एतत् । स्फूर्तिमादाय दानसमर्थनम् । युक्तिमाहुरन्यथा ज्ञानरूपां अन्येति । अन्यथा अनुभावनस्य दानत्वाभावे प्रकारे सति । स्फुरेदिति । यतो न स्फुरति, अतोऽनुभावने दानत्व प्रकार इत्यर्थः । एव सर्वात्मभावपदस्य द्वेधा व्युत्पन्नस्य प्रथमव्युत्पन्नो भक्तनिष्ठो दानेन यदा भवति, तदा विगाढभावसञ्ज्ञो भवति, तदाहुः अत इत्यादि । लिङ्गभूयस्त्वाधिकरणभाष्याद्भगवन्निरोधात्मकसर्वात्मभावविरहेतिविगाढभावेन तत्स्फूर्तेर्निरोधादुत्तरकालिकत्वेन साधनमुख्यत्वात् प्रदर्शितात् । तादृशस्तत्सदृशोऽनुभवभिन्नत्वे सत्यनुभवगतभूयोधर्मवान् । प्रियत्वं भगवद्धर्मस्तदाविर्भावितविगाढभावाविर्भावितोऽनुभवः प्रियत्वानुभवः मध्यमपदलोपी समासः । तेन भग-

भगवदुक्ताकुतोभयपदस्य न मुक्तिरर्थः, किन्तु 'यतो वाच' इत्यादिनानन्दस्य स्वरूपमुक्त्वा 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने'ति श्रुत्युक्तं यत्पूर्वोक्तं रसात्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीनमकुतोभयं तदर्थः ॥ ४३ ॥

इति तृतीयध्याये तृतीयपादे षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥

भाष्यप्रकाशः ।

सर्वत्र तथानुभवरूपं यत्कार्यं तादृशः प्रियत्वानुभवः सर्वात्मभाव इति फलति । तेन भगवद्धर्मविगाढभावतथास्फूर्तिषु सर्वात्मभावप्रयोग आधिदैविकादिभावो ज्ञेयः । ननु पूर्वोक्तवाक्ये अकुतोभयसाधनत्वेन शरणागतेर्वा सर्वात्मभावपूर्वकस्वप्राप्तेर्वोपदेशः । अकुतोभयं चाक्षरप्राप्तिरूपा मुक्तिरेव । 'अभयं वै जनक प्राप्तोऽसी'त्यादिश्रुत्या निश्चीयते । एवं सति सर्वात्मभावस्यापि मुक्तिसाधनत्वमेव पर्यवस्यति, वामदेवादिसार्वात्म्ये तथा दर्शनात्, पुरुषोत्तमप्राप्तेरपि साधनकोटिनिवेशेन तदपेक्षया मुक्तेरेवोत्कर्षश्च सिध्यतीति पूर्वोक्तं सर्वं द्रविडमण्डकन्यायमनुसरतीत्याशङ्कायामकुतोभयपदार्थमाहुः भगवदुक्तेत्यादि । तथाचास्याः श्रुतेरानन्दमीमांसायां ब्रह्मानन्दस्य गणितानन्दत्वकथनोत्तरमानन्दमयश्लोकेपूक्तत्वादानन्दमीमांसातः पूर्वानुवाके परस्य

रश्मिः ।

वद्धर्मविगाढभावानुभवेषु सर्वात्मभावपदमिति फलितम् । तदेवाहुः तेनेत्यादि । तेन भगवद्धर्मविगाढभावयोः सुबोधिन्युक्ता व्युत्पत्तिः, तथा भगवत्त्वेन स्फूर्तौ तु सर्वस्मिन्नात्मभावः सर्वात्मभाव इति । ननु विग्रहे भावपदं भक्तिवाचकं 'भक्तिः प्रवर्तिते'ति वाक्यात्, अत्र त्वनुभवपदमिति वैरूप्यमिति शङ्क्यम् । भावादीनां सर्वात्मभावे सत्यनुभूतानां भक्तिहंसोक्तदिशा भावत्वात् । ननु विरहे मुख्यलक्षणे तु भावपदं तदनुरोधेन तस्मिन्सति भक्तिहंसदिगवकाशोऽन्यत्र लक्षणगतभावपदाननुगमेऽसम्भव इति चेन्न । भक्तिमार्तण्डे विस्तरात्सर्वात्मभावनिरूपणे । परन्तु विगाढभावरूपसर्वात्मभावो विजातीययोगादिसंवलितो ज्ञेयो भक्तनिष्ठ एव । मार्गत्वात् । 'याहि सर्वात्मभावेने'ति वाक्यात् । एकादशस्कन्धसुबोधिन्यां शुद्धस्य भगवद्धर्मत्वं न मार्गत्वमित्युक्तेः । आधीति । स्तोश्नुनाश्चुरित्यस्याप्राप्तिः । स्मृतिष्वेतादृशप्रयोगबाहुल्यात् । तदनुकरणेन । एवं सुबोधिनीसमासो विगाढभावस्फूर्तौ व्याकृतो भ्रमरगीते विरहनिरूपणात् । यत्त्वग्रे भाष्ये तत्प्रकाशे च सर्वात्मभावस्य कार्यस्वरूपलक्षणे तत्रापीदं सुबोधिनीव्याख्यानं प्रकारान्तरेण योज्यम् । आत्मन इति श्लिष्टप्रयोगात् । 'स्वर्गकामो यजेते'त्यत्र स्वर्ग इति श्लिष्टप्रयोगवत् । यथा तत्र स्वर्गात्मसुखरूपमर्थद्वयमेवमत्रापि विगाढभावस्फूर्तिलिङ्गभूयस्त्वसूत्रोक्तयद्दर्शनादिकयदन्यादर्शनादिकरूपमर्थद्वयम् । तद्भक्तिमार्तण्डे स्फुटम् । अग्रे भाष्यप्रकाशे च स्फुटम् । सुबोधिनीस्थात्मन इत्यस्य मनस इत्यर्थात् । संयोगे । सयोगविप्रयोगभेदेन सुबोधिन्या द्वेधा व्याख्यानम् । नन्वनुभवो ज्ञानमिति सर्वात्मभावो ज्ञानं किं तस्मादिति चेन्न । भक्त्यन्तःपातित्वात् । यथापेक्षितसमर्पणं दर्शनं दास्यम् । एतच्च भक्तिहंसे स्फुटम् । विहितकर्मज्ञानभक्त्यसाध्योपि सर्वात्मभावो भक्तिरेव । भक्तिमुपक्रम्य भ्रमरगीते 'सर्वात्मभावोऽधिकृत' इति वाक्यात् । 'सर्वात्मभावरूपाया मुख्यभक्ते'रिति भाष्यप्रकाशाच्च । अन्यत् भक्तिमार्तण्डे स्पष्टम् । वामदेवेति । पुरुषविधब्राह्मणेऽस्ति । सर्वात्मभावनिरूपणे ज्ञानप्रकारविशेषनिरूपणाशङ्कायाः पूर्वविकल्पसूत्रे भाष्ये वक्ष्यमाणत्वा'दहं ब्रह्मास्मी'ति प्रकारस्य वामदेवसार्वात्म्ये दर्शनात्तद्वदत्रापि ज्ञानप्रकारविशेषनिरूपणे भवतु हीत्यर्थः । द्रविडेति । व्यर्थक्रमबोधकन्यायमित्यर्थः । द्रविडदेशे गोधूमाभावान्मण्डका न भवन्ति इति तद्देशीयास्तं भोक्तुं कर्तुं च न विदन्ति । मध्यदेशादावागतो द्रविडः कथं मण्डका भोज्या इति पृष्टे केनचिदुपहसितः पदयोर्मध्यात्पृष्ठाच्च हस्तपरिवर्तनं कृत्वा पश्चाद्दर्वं मुखं विधाय भोज्या इति । तृतीयसुबोधिन्यां षष्ठाध्यायेऽस्ति

भाष्यप्रकाशः ।

रसरूपतायाः प्रतिपादितत्वादस्याः श्रुतेरुक्तविध एवार्थ इति निश्चीयते । ततश्च तत्र योऽर्थो 'न बिभेति कुतश्चने'ति वाक्येनोक्तः, सोऽत्राकुतोभयपदेनोच्यत इति नात्र त्वदुक्तमुक्तिगन्धोपि । किञ्च । भगवद्वाक्येपि 'अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखे'ति तादृशेऽधिकारिणि परमगोप्यकथनं स्वत एव प्रतिज्ञाय, 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'ति श्लोके भावेन बहूनां स्वप्राप्तिमुक्त्वा, ततः को भाव इत्याकाङ्क्षायाम्, 'रामेण सार्धं मथुरां प्रणीत' इत्यादिश्लोकचतुष्टयेन भावस्य भक्तिरूपं स्वरूपं ज्ञापयितुं विगाढभावात्मिकां तत्काष्ठाम्, तया काष्ठया परब्रह्मरूपस्वप्राप्तिं स्वरूपज्ञानाद्यभाववतां बहूनामुक्त्वा, तदनन्तरं 'तस्मा'दित्यादिवाक्यद्वयेन स्वप्राप्त्यकुतोभयाप्ती अवदत् । तेनोक्तश्रुत्युक्तरसात्मकब्रह्मानुभवोत्तरकालीनतैवाकुतोभयस्य स्फुटतीति न पूर्वोक्तार्थे द्रविडमण्डकमित्यर्थः । अत्र सर्वात्मभावस्य वरणातिरिक्तसाधनासाध्यत्वनिरूपणेन इतरत्र वैराग्यबोधकस्य त्यक्तपिप्पलमित्यस्य विशेषणस्यार्थो बोधितो ज्ञेयः ।

अन्ये तु । वाजसनेयकादौ व्रतमीमांसादावध्यात्माधिदैवतयोः श्राविती प्राणवायू पृथगुपगन्तव्यावपृथग्वेति सन्देहे, तत्त्वाभेदादपृथगिति प्राप्तौ, आध्यानार्थादुपदेशभेदात् पृथगिति सिद्धान्तयन्ति । स च निरूपणप्रकारभेदेन 'नानाशब्दा'दिति सूत्रेण च सिध्यतीति नेदं सूत्रमाकाङ्क्षतीति दिक् ॥ ४३ ॥ इति षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥

रश्मिः ।

तल्लेखे विवृतोऽयं न्यायः । **रसरूपताया** इति । 'रसो वै स' इति श्रुत्येत्यर्थः । 'रस आस्वादने' इत्यस्य रूपम् । व्याख्यानान्न तु 'रस शब्द' इत्यस्य । अस्तु । ईश्वरत्वात् । **तादृशे** भृत्यादिसदृशे । **स्वत एवेति** । उद्धवप्रश्नं विना प्रतिज्ञा कृपालुत्वं द्योतयति । **तत्काष्ठामिति** । भावप्रकर्षम् । 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयो'रिति विश्वात् । **परब्रह्मेति** । 'मत्स्वरूपाविदोबलाः । ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः' इति वाक्याद्बहूनां शतसहस्राणामित्यर्थः । **नेति** । मुक्तिस्कन्धसर्वस्वत्वाच्च । **वरणेत्यादि** । वरणजसर्वात्मभावातिरिक्तानि साधनानि तैरसाध्यत्वनिरूपणेनेत्यर्थः । मध्यमपदलोपी समासः । **इतरत्रेति** । साधनेषु षोडशाधिकरण्या विशेषणमाहुः **त्यक्तेति** । त्यक्तं पिप्पलं कर्मफलं येन वैराग्यमेतत् । कर्मफलत्वं पिप्पलस्य सुबोधिन्यामुक्तम् । **अन्ये त्विति** । शङ्कराचार्यादयः । **तत्त्वेति** । 'यः प्राणः स वायु'रितिश्रुतेः । **आध्यानेति** । आध्यानार्थो ह्ययमाध्यात्मिकाधिदैवविभागोपदेश इति शङ्करभाष्यात् । ननु निरूपणं प्रकारभेदेपि 'यः प्राण' इत्युक्तश्रुतेः प्राणवाय्वोर्निरूपणप्रकाराभेदान्न सिध्यतीति पाक्षिकदोषशङ्कायामाहुः **नानेति** । इदं सूत्रं वक्ष्यमाणम् । न च नानाशब्दादिभेदादिति सूत्रे यः प्राणः स वायुरितिवदुपास्यभेदो नास्तीति शङ्क्यम् । तत्रोपास्याभेदेपीति भाष्यात् । सूत्रार्थस्तु प्राणवायू आध्यानार्थं पृथगुपगन्तव्यौ एकादशकपालप्रदानवत् । यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ' इत्यत्र पुरोडाशिन्यामिष्टौ राजादिगुणभेदात् यथान्यासमेव देवतापृथक्त्वात् प्रदानपृथक्त्वं भवति । एवं तत्त्वाभेदेपि आध्येयांशपृथक्त्वात् आध्यानपृथक्त्वम् । तदुक्तं **संकर्षे** 'नाना वा देवता पृथग्ज्ञाना'दिति । संकर्षो देवताकाण्डं तत्रेत्यर्थः । वाकारोऽवधारणे ॥ ४३ ॥ **इति षोडशं प्रदानवदित्यधिकरणम् ॥ १६ ॥**

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ (३-३-१७.)

ननु प्रतिबन्धककालादृष्टादिसद्भावेपि वरणकार्यं स्यात्, उत तन्निवृत्ताविति संशये, प्रतिबन्धकाभावस्य सर्वत्र हेतुत्वात् तन्निवृत्तावेव तथेति पूर्वपक्षे, सिद्धान्तमाह लिङ्गेत्यादिना ।

सामोपनिषत्सु नवमे प्रपाठके सनत्कुमारनारदसंवादे प्रथमत एव मुख्या ब्रह्म-

---

भाष्यप्रकाशः ।

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ पूर्वाधिकरणे सर्वात्मभावरूपाया मुख्यभक्तेर्वरणैकलभ्यत्वं स्थापितम्, वरणश्रुतौ तु परमात्मनो वरणैकलभ्यत्वमुच्यते, न तु सर्वात्मभावस्येति कथमस्य तत्प्रपञ्चत्वमिति शङ्कायां तस्य वरणैकलभ्यत्वं पुनर्दृढीकर्तुं तत्स्वरूपं च श्रुत्या विवेक्तुमधिकरणान्तरं प्रणयतीत्याशयेन तदवतारयन्ति **नन्वित्यादि** । प्रतिबन्धका ये कालादृष्टस्वभावाः तेषां विद्यमानत्वे वरणकार्यभूतः सर्वात्मभावो जीवस्य भवेत्, नवेति संशये, वरदानस्यापि तपआदिभिः साधनैस्तोषे सत्येव प्रसिद्धेः पूर्वाधिकरणोक्तरीत्या सर्वात्मभावस्य भगवता वरवद्दानेपि तत्कारणस्यावश्यवक्तव्यतया प्रतिबन्धकाभावस्य सर्वत्र कारणत्वदर्शनात् प्रतिबन्धकसत्तायां च कार्यादर्शनात्तन्निवृत्तिरवश्यं मृग्येति प्रतिबन्धकानां निवृत्तावेव वरणात् सर्वात्मभावो भवतीति तस्य वरणैकलभ्यत्वं न साधीय इति पूर्वपक्षे, सिद्धान्तमाहेत्यर्थः । सूत्रं व्याकर्तुं लिङ्गभूयस्त्वबोधिकां श्रुतिं प्रदर्शयन्तस्तदर्थं प्रकटयन्ति **सामोपनिषत्स्वित्यादि** । प्रसिद्धस्थलनिर्देशो विप्रतिपत्तिनिरासाय । स च संवादो 'अधीहि भगव इति होपससाद सनत्कुमारं नारद' इत्यारभ्यान्तं ज्ञेयः । तत्र 'अधीही'त्यन्तर्भावितण्यर्थः । अध्यापय । 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णे'रिति ण्यन्तादिङः परस्मैपदम् । णिजर्थेऽप्यत्र पदव्यत्ययः । अत्र सर्वात्मभावस्य वरणैकलभ्यत्वमुपपादयन्तः 'तं होवाचे'ति सनत्कुमारवाक्यस्य तात्पर्यमाहुः **प्रथमत इत्यादि** ।

रश्मिः ।

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥ कारणत्वेन कारणानां सर्वात्मभावे त्यक्त्वार्थासिद्धत्वमुक्त्वा प्रतिबन्धकाभावत्वेन कारणानामन्यथासिद्धत्वमाहुः तथापि कारणत्वात् पूर्वाधिकरणेनैव प्रतिबन्धकाभावस्यापि विचारितप्रायत्वात् सर्वात्मभावस्वरूपं संयोगसामयिकमाहुः **पूर्वेति** । **अस्येति** । सर्वात्मभावप्रतिपादकस्यास्य लिङ्गभूयस्त्वाधिकरणस्य तस्या वरणश्रुतेः सर्वात्मभावाप्रतिपादिकायाः प्रपञ्चत्वं कथमिति प्रश्नः । **तस्य** सर्वात्मभावस्य । **प्रसिद्धेरिति** । कठवल्ल्यां 'तिस्रो रात्रीर्यदवात्सीत् गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्य' इति अनशनरूपतपसा तुष्टाग्नि वरप्रसिद्धेः । वृकासुरप्रसङ्गे श्रीभागवते ब्रह्माण्डपुराणे उत्तरस्थाने खिले च स्तुतितुष्टं भगवन्तं प्रति । 'यदि देयो वरो हि न' इति वाक्यात् । आदिपदेन तपआदिभिरित्यत्र होमस्तुत्योर्ग्रहणात् । **प्रसिद्धेति** । प्रथमतृतीयपादस्थभूमाधिकरणप्रसिद्धस्थलनिर्देशो विप्रतिपत्तिः । **प्रतिपत्तिः** प्रबोधो भूमत्वेन सर्वात्मभावप्रबोधः तस्य विरुद्धोऽभावस्तन्निरासाय । अस्य विस्पष्टस्य प्रपाठकस्य उपनिबन्धो 'न सामान्यादप्युपलब्धेर्मृत्युवत् नहि लोकापत्ते'रिति वक्ष्यमाणसूत्रे अस्य प्रपाठकस्य लोकमृत्युवददर्शनात् । भगवद्रूपत्वात् सर्वात्मभावस्येति वक्ष्यमाणभाष्यात् । **आन्तमिति** । अन्तं चरमवर्णध्वंसं आ मर्यादीकृत्य आन्तम् । **णिजर्थ** इति । इङ् अध्ययने अदादिरात्मनेपदी अनिट् । उक्तसूत्रात् आत्मनेपदव्यत्ययः परस्मै-

विद्योपदेशार्हो न भवतीति ज्ञात्वा, सनत्कुमारो नारदाधिकारं च ज्ञातुं 'यद्वेत्थ तेन मोपसीदे' त्युक्तो नारदः स्वयं विदितमृग्वेदादिसर्पदेवजनविद्यान्तमुक्त्वा, 'सोऽहं भगवो मन्त्रविदेवास्मी'ति स्वाधिकारमुक्त्वा, आह 'नात्मविच्छ्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामि तं

भाष्यप्रकाशः

'उपसीदे'ति श्रौतस्य पदस्य 'तं होवाचे'ति श्रौतेनैव पदेनान्वयः । 'यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति होवाच ।' यत्त्वं जानासि तत्कथनेन मदुपसन्नो भव, स्वाधीतं वद, ततोऽतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान् । तदा इत्युक्तः सनत्कुमारेण नारदः स्वविदितं ऋग्वेदादिसर्पदेवजनविद्यान्तं आह । अत्र ऋग्वेदादिपुराणान्त प्रसिद्धम्, अग्रे तु वेदानां वेदो व्याकरणम्, पित्र्यं श्राद्धकल्पः, राशिर्गणितम्, दैवं उत्पातज्ञानम्, निधिर्महाकालादिनिधिशास्त्रम्, वाकोवाक्यं तर्कशास्त्रम्, एकायनं नीतिशास्त्रम्, देवविद्या निरुक्तम्, ब्रह्मविद्या शिक्षाकल्पछन्दश्चितयः, भूतविद्या भूततन्त्रम्, क्षत्रविद्या धनुर्वेदः, नक्षत्रविद्या ज्योतिषम्, सर्पविद्या गारुडम्, देवजनविद्या गन्धर्वोक्तयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि ज्ञातव्यानि । 'एतद्भगवोऽध्येमि' । एतत्पूर्वोक्तं हे भगवन् अध्येमि, स्मरामीत्युक्त्वा, 'सोऽहं भगवो मन्त्रविदेवास्मि', शब्दार्थमात्रवित्त्वादापाततः परोक्षज्ञानवानेवास्मीति स्वाधिकारमुक्त्वा, 'अनात्मवि'दित्यादि 'तारयत्वि'त्यन्तमाह, तथाचाप्तवाक्यप्रामाण्याच्छोकेन लिङ्गेन स्वस्यानात्मवित्त्वमनुमायात्मज्ञापनेन शोकतारणायोपसन्नोऽस्मीत्याशयवता नारदेनोक्तः सनत्कुमारस्तदधिकारमवगत्य, मुख्यब्रह्मविद्योपदेशयोग्यत्वसम्पादनाय 'यद्वै किञ्चाध्यगीष्ठा नामैवैत'दित्यादिना नारदोक्तानां सर्वेषां नामत्वबोधनपूर्वकं नाम्नो ब्रह्मत्वेनोपासनमुपदिश्य, 'यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवती'ति तत्फलं शोकतरणायोक्तवान्, तदा नारदः केवलं नामोपासने उक्तफलाभावम्, तस्य ब्रह्मत्वेनोपासने तूक्तं फलम्, तदपि नामगतिपरिच्छिन्नमिति विमृश्य, तेन शोकातरणं च निश्चित्य, ततोऽधिकं जिज्ञासमानः 'अस्ति भगवो नाम्नो भूय' इति पप्रच्छ, तत्र 'नाम्नो वाव भूयोऽस्ती'-त्युत्तरिते, 'तन्मे भगवान् ब्रवीत्वि'त्येवं नारदेन पूर्वस्मात् पूर्वस्मा'द्भूयो भूयो वदे'ति पृष्टः सनत्कुमारो 'वाग्वा नाम्नो भूयसी'त्यादिना नामरूपविज्ञापकत्वं वाङ्माहात्म्यमुक्त्वा, वाचो

रश्मिः ।

पदम् । **उपेति** । अन्वयमाहुः **यद्वेत्थेति** । 'ततस्ते ऊर्ध्वं वक्ष्यामी'ति वाक्यान्तरितोऽन्वयः । **ब्रह्मविद्येत्यादि** । चितिर्ज्ञानं शिक्षाकल्पच्छन्दसां ज्ञानानि । 'छन्दोविचिति वेदिभि'रित्यत्र वृत्तरत्नाकरे प्रस्तावे व्याख्यातम् । अध्येमि परस्मैपदकथनादिक्स्मरणे ईत् इत्यस्य अदादेः परस्मैपदिनो रूपमित्याहुः **स्मरामीति** । **तथाचेति** । आप्तवाक्य 'तरति शोकमात्मवि'दितिश्रुतिः । **अनुमायेति** । अहं नात्मवित् शोकात्, शूद्रवत् इत्येवं प्रयोगः । अहमनात्मविदित्यनुमाय स्वार्थानुमानेन यत्र यत्र शोकः, तत्र तत्र अनात्मवित्त्वमिति व्याप्तिज्ञानात्मकेनानुमितिं विधाय । **मुख्येत्यादि** । मुख्यब्रह्मविद्योपदेशार्थम् । श्लिष्टप्रयोगेणाधिकजिज्ञासासम्पादनाय 'यत् वै किञ्च अध्यगीष्ठा नाम एव एतत्' इति पदच्छेदः । उक्तफलं यथाकामचारस्तदभावम् । **विमृश्येति** । श्रुतिप्रामाण्याद्विमृश्य । **निश्चित्येति** । 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवती'ति श्रुत्यामेवकाराभावेप्यश्रुतकल्पनस्य दोषत्वान्निश्चित्येत्यर्थः । **नामेत्यादि** । नामरूपयोः शाब्दज्ञानविषयकारकत्वम् । 'वाग्वा ऋग्वेदं ज्ञाप-

ग्रां भगवाञ्छोकस्य पारं तारयत्वि'ति नारदेनोक्तः सनत्कुमारः पूर्वस्मात्पूर्वस्मात् भूयो वदेति पृष्टः, भूयःपदमधिकार्थकम्, नामवाङ्मनःसङ्कल्पचित्तध्यानविज्ञान-बलान्नापस्तेजआकाशस्मराशाप्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा, प्राणो-

भाष्यप्रकाशः ।

ब्रह्मत्वेनोपासनं तत्फलं च पूर्ववदुवाच, तत्र भूयःपदं न बाहुल्यार्थकम्, नापि पुनरर्थकम्, किन्त्वाधिक्यार्थकम्, आधिक्यमुत्कर्षस्तदर्थकमिति तत्तन्माहात्म्यकथनादवसीयते, एवं नामवाङ्म-नःसङ्कल्पचित्तध्यानविज्ञानबलान्नापस्तेजआकाशस्मराशा उक्ताः । तत्र नामवाचौ प्रसिद्धौ, मनो मननव्यापारविशिष्टमन्तःकरणम्, मननव्यापारश्च विवक्षाद्यात्मकः । सङ्कल्पोपि कर्तव्या-कर्तव्ययोर्विषयसमर्थनरूपस्तादृशान्तःकरणस्यैव वृत्तिविशेषः । चित्तं चेतयितृत्वं प्राप्तकालानुस-न्धानवत्त्वम्, अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च । ध्यानं शास्त्रोक्तदेवतालम्बनो विजातीयानन्तरितः प्रत्ययसन्तान एकाग्रतापरपर्यायः । चिरकालस्थायिज्ञानवादे तु तादृश एक एव प्रत्ययो बोध्यः । विज्ञानं शास्त्रार्थविषयकं विशिष्टज्ञानम् । बलं अन्नभक्षणजनितं मनसो विज्ञेयविभावनसामर्थ्यम् । अन्नमापस्तेज आकाशश्च प्रसिद्धाः । स्मरः स्मरणं अप्रयत्नश्चित्तव्यापारः । आशा अप्राप्तवस्त्वाकाङ्क्षा तृष्णाकामाद्यपरपर्याया । एवमेतेषां स्वरूपमुपनिषद्व्याख्यानादवग-न्तव्यम् । एतेषामत्र ब्रह्मत्वेनोपासनमुक्तम्, प्राणस्य त्वाशातो भूयस्त्वं माहात्म्यं चोक्त्वा, 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी'त्यनेन तद्दर्शनादिमतोऽतिवादित्वं यद्यप्युक्तम्, तथापि तत्र विद्याया अपर्यवसानादग्रे जन्यप्रायपाठे 'आत्मतः प्राण' इति श्रावणाच्च सोत्र परत्वेन नाभिप्रेतः, किन्त्वासन्यत्वेन । स चोक्तमाहात्म्यवत्त्वादपहतपाप्मत्वाच्चान्येभ्य उक्तेभ्य उत्कृष्ट इति तेभ्योऽस्योत्कृष्टवादित्वमेवातिवादित्वम्, न तु परमकाष्ठापन्नोत्कृष्टवादित्वरूपं तदिति सोऽपि ब्रह्मत्वेनोपास्यतयैवाभिप्रेतः । तदेतदभिसन्धाय भाष्ये प्राणोपि तथोपास्य-मध्ये गणितः प्राणान् ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वेति । श्रुतौ तथानुक्तिस्तु नारदस्य मुख्यविद्याग्रहणयोग्यता जाता न वेति परीक्षार्थम् । अत एवाग्रे 'तं चेत् ब्रूयुरतिवाद्यसीति, अतिवाद्यसीति ब्रूयान्नापह्नुवीते'त्युक्त्वा, 'एष तु वा अतिवदति, यः सत्येनातिवदती'ति

रश्मिः ।

यती'ति श्रुतेः । 'दिवं च पृथिवीं च वायुं चाकाशं चे'ति श्रुत्या रूपविज्ञापकत्वम् । वाङ्माहात्म्यं वाग्देवत्वम् । ब्रह्मत्वेनेति । 'तत्रास्य कामचारो भवति, यो वाचं ब्रह्मेत्युपास्ते' इति श्रुतेः । अत्र भूयःपदं 'भूयः पुनः पुनः स्यातं प्रभूतार्थे त्वनव्ययम् । निश्चये च निषेधे च साकल्यातीतयोरपी'ति विश्वादनेकार्थकमिति तदर्थं निश्चिक्युः तत्रेति । अत्रेति । तथा च श्रुत्या पूर्वोक्तार्थबाधात् नाम-नारायणादितो लक्षणया वोत्कर्षार्थकमिति भावः । विषयेति । विषयो यस्य यो ज्ञातः स तस्य प्रयोजनं फलम् । प्रत्ययसन्ताने स्वमतमाहुः चिरेति । बलमिति । विज्ञानानन्तरं स्नेहरूपबलस्यापि वक्तुं शक्यत्वेपि ह्यनुग्रहादीनां विशेषकारणानामनुक्तेः प्रसिद्धमेव बलमुरीकृतम् । तथा च भाष्यम् । ज्ञात एव स्नेह इति । बलं भक्तिरिति च । यद्वा । अन्नातेजआकाशस्मरणाशाकाङ्क्षाणामग्र आधिक्येन वक्ष्यमाणत्वात् तेषां चानन्दमयाधिकरणोक्तरीत्या वक्तव्यत्वात् बलं भक्तिर्वा । जगति भक्तिः स्वांशब-लत्वेन भवति । च प्रसिद्धा इति । चकारेणानन्दमयाधिकरणे प्रसिद्धाः । न चाप्रयोजकत्वम् । शास्त्रार्थविषयकविशिष्टज्ञानाद्भूयस्त्वात् । माहात्म्यमिति । देवत्वम् । अतिवादित्वमिति । अग्रे स्पष्टम् । अपरीति । अग्रे ततोपि भूयः प्रश्नोत्तराभ्याम् । तथेति । ब्रह्मत्वेन । वदानीति तदर्थं लोट्

पासकस्यातिवादित्वं सत्यवादित्वेनोक्त्वा, विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिश्रद्धानिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्त्वा, सुखस्वरूपजिज्ञासायामाह 'यो वै भूमा तत्सुख'मिति । भूम्नः स्वरूपजिज्ञासायामाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति ।

भाष्यप्रकाशः ।

प्राणोपासकस्यातिवादित्वं सत्यवादित्वेनोक्तम् । यद्येवं श्लिष्टप्रयोगेऽस्याधिकजिज्ञासोत्पत्स्यते, तदा योग्यः, नो चेदयोग्य इत्येतदर्थमेवमुक्त्वा, ततो नारदेन प्राणस्य तत्त्वं न प्राणः, किन्त्वन्यदिति बुद्ध्वा, 'सोऽहं भगवः सत्येनातिवदानी'ति स्वाभिप्राय उक्तः, तत्र 'अतिवदानी'त्यन्तर्भावितसनर्थः । सत्येनातिविवक्षामीत्याशयात् । तदा सनत्कुमारः 'सत्यं त्वेव विजिज्ञासितव्य'मित्यादिना तस्य सत्यादिजिज्ञासामुत्पाद्य, विजिज्ञासितव्यत्वेन सत्यविज्ञानमतिनिष्ठाकृतिसुखानि पूर्वपूर्वकारणत्वेनोत्तरोत्तराण्युक्तवान् । तत्र सत्यं अर्थमनतिक्रम्य स्थितं वस्तुस्वरूपम्, विज्ञानं तद्विषयकं विशिष्टज्ञानम्, मतिस्तर्केण तदर्थस्वरूपविचारः, श्रद्धा आस्तिक्यबुद्धिः, निष्ठा तद्विषयक आदरस्तत्परत्वरूपः, कृतिस्तद्विषयसाधनानुकूल इन्द्रियव्यापारः, सुखं अनुकूलबुद्धिवेद्य आन्तरो धर्म इत्येवं लौकिकसमानाकारं तत्स्वरूपं ज्ञातव्यमिति सत्यादिषु कृत्यन्तेषु विशेषाकथनादायातीति तथोक्त्वा, ततः सुखे विशेषं वक्तुं सुखस्वरूपजिज्ञासायामाह । 'यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य' इति भूम्नो विचार्यत्वमुक्तम् । तेन प्राणस्य सत्यवदनादीनां च स एव कारणं तत्त्वं च, अतस्तमेव कृत्यादिप्रणाड्या ज्ञात्वा, सत्यवदनेऽतिवादित्वम्, नान्यथेत्यवगत्य, किंस्वरूपो विचार्य इत्याकाङ्क्षायां पप्रच्छ 'भूमानं भगवो विजिज्ञास' इति । एवं नारदस्य भूमस्वरूपजिज्ञासायामाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'ति । इह यच्छब्दगतसप्तम्या अधिकरणार्थत्वे ब्रह्मणो व्यापकत्वेन सर्वेषां तदुपश्लिष्टतया तद्व्याप्यतया च सर्वेषां सर्वदान्यज्ञानाभावापत्तेः सप्तम्याः सत्यर्थत्वेपि ब्रह्मणः सर्वत्र सत्त्वेन सर्वस्य तथात्वापत्तेश्चात्र कश्चिद्विशेषो वाच्यः । तथाच यस्मिन् दृष्टे श्रुते विज्ञाते सति द्रष्टुः

रश्मिः ।

छान्दसः । विवक्षामीति व्याख्यानात् । उपनिषद्व्याख्यानाच्च । **कृत्यादीति** । कृतेरादिभूतया प्रणाड्या । **ज्ञात्वेति** । 'भूमा त्वेव विजिज्ञासितव्य' इत्यत्रैवकारः सर्वत्र, नत्वेवंकारः । अतः कृत्यादिप्रणाड्या तदुक्तिवैयर्थ्यपरिजिहीर्षया ज्ञात्वा विजिज्ञास इत्यत्रेच्छाविषयज्ञानं यत् तद्विषयीकरणं भूम्नः प्रतीयत इति । **आहेति** । भूमलक्षणमाह । औपश्लेषिकवैषयिकाभिव्यापकाधारेषु वैषयिकाधाराङ्गीकारो न सम्भवति, ह्यन्यपदार्थस्य विषयत्वादिति शङ्कायां यत्रेति सप्तम्याः सतिसप्तमीत्वं समर्थयाम्बभूवुः **इहेत्यादिना** । **अन्यज्ञानाभावापत्तेरिति** । न च ब्रह्मणो ह्युपश्लिष्टत्वेपि व्याप्यत्वेपि 'पश्यन् चक्षुर्भवती'त्यादिरीत्या चिक्रीडिषया वा पुराणमते मायया वा न सर्वेषां सर्वदान्यज्ञानाभावापत्तिरिति वाच्यम् । भूमाधिकरणे भूम्नो ब्रह्मत्वेन सिद्धस्यात्र ज्ञानप्रकारविशेषनिरूपणे ज्ञानेनाज्ञाननिवृत्त्या तथात्वापत्तिः जीवस्य ब्रह्माभेदात् । भेदे तु अचलत्वसूत्रोक्ताभासे भक्तमनोरथपूरकत्वात् भगवतश्चक्षुर्भवनादीनां नित्यलीलास्थाना'मात्मत आविर्भावतिरोभावा'विति श्रुतेर्भक्ताधीनात्मतो भवनाद्ब्रह्मसरूपस्यात्मनो लीलास्थसकलपदार्थरूपत्वेन लीलास्थानां सर्वेषां सर्वदान्यज्ञानाभावापत्तिः, न तु प्रपञ्चस्थानामपीत्यदोषात् । **तथात्वे** । पूर्वोक्तदिशा सर्वस्य निरविद्यस्य नित्यलीलास्थस्य च तथात्वं सर्वदान्यज्ञानाभावापत्तिमत्त्वं तस्यापत्तेः । **कश्चिद्विशेष** इति । आशोकतरणोपपादनं वाच्यः । **तथा चेति** । पूर्वोक्तप्रकारे सति । **सतीति** । न च 'फले सप्तमी यत्रे'त्यत्र यत्फलकोन्यदर्शनाभाव इति कर्मणोऽ-

भाष्यप्रकाशः ।

श्रोतुर्विज्ञातुरन्यविषयकदर्शनश्रवणविज्ञानाभावो भवति, स भूमेति लक्षणकथनेन नित्यनिरवधिसुखरूपं तत्स्वरूपं स्वेतरस्मिन् सुखत्वसुखसाधनत्वज्ञानाभावजननं तत्कार्यं चेति सिध्यति । तेनैवं स्वरूपकार्यलक्षणयुक्तं विचार्यमिति फलति । तत्र भूम्नि दृष्टे श्रुते विज्ञातेऽन्यदर्शनादिकं कुतो न भवति, किं विशेषदर्शने रजतादिकमिवान्यन्नश्यति, उत कारणे कार्यमिव भूम्न्यन्यल्लीयते, अथवा सूर्यतेजोनक्षत्रादिकमिव भूमा अन्यत्तिरस्करोतीति शङ्कायामाह 'अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्, यो वै भूमा तदमृतम्, अथ यदल्पम् तन्मर्त्य'मित्यनेन । अनित्यत्वे सति सावधिसुखरूपत्वे सत्यन्यत्र सुखत्वसुखसाधनत्वज्ञानजनकत्वमल्पसुखत्वमिति सिध्यति । तथाच न पूर्वविकल्पितं किञ्चिद्भवति, अपि तु भूम्नि दृष्टे श्रुते विज्ञाते तदानन्दैकतानतया अन्यदल्पं न सुखत्वेन सुखसाधनत्वेन च पश्यति, न शृणोति न विजानातीत्यर्थः सिध्यति । तत्र ननु यदि भूम्नो दर्शनश्रवणविज्ञानेष्वन्यतमेनैवं भाव आनन्दैकतानत्वरूपः, तर्हि शृण्वतो मम कुतो नास्ति । अथ समुदितैस्तैस्तदा यत्र भूमा स्वरूपं स्वकार्यं च प्रकाशयँस्तिष्ठति, तस्यैव भावो नान्यस्येत्याशयः, तदा स आधारो वक्तव्य इत्याशयेन पृच्छति 'स भगवः कस्मिन् प्रतिष्ठित' इति, उक्तरीत्या कमभिव्याप्य स्थित इत्यर्थः । तत्रोत्तरमाह 'स्वे महिम्नी'ति । स्वविभूतौ । अत्रापि को महिमेत्याशङ्का भविष्यतीति तद्वारणाय स्वयमेवाह

रश्मिः ।

न्यस्य फलेन यच्छब्दार्थेन समवायादिति वाच्यम् । अन्यदर्शनाभावस्य सुषुप्तावपि सत्त्वेनात्मा फलं स्यादिति तत्फलं तु भक्त्येकसाध्यत्वात् । न च भक्तिप्रकरणादन्यदर्शनाभावो भक्तिरेवेति तस्यात्मा फलं कथं न भवतीति वाच्यम् । अत्रार्थेऽन्येषां रामानुजाचार्यादीनामसंमतेर्वक्ष्यमाणत्वात् । 'सर्वं हि पश्यः पश्यती'ति श्रुतिविरोधाच्च । न च सुषुप्तिलक्षणे दृष्टे विज्ञाते इति कुतो लब्धमिति वाच्यम् । एतादृशविशेषमन्तरा कस्मिन्नर्थे सप्तमीत्यपि वाच्यम् । सत्यर्थे सप्तमीति चेत् । सुषुप्तिर्व्याक्रियताम् । ननु सुषुप्तौ व्याक्रियमाणायां शङ्करभाष्यपूर्वपक्षस्य सिद्धान्तीकरणात् सम्प्रदायप्रदीपोक्ता भगवदाज्ञा सेत्स्यति शङ्कराचार्यमतस्था मन्मतं पूर्वपक्षयन्ति तत्त्वं सिद्धान्तयेत्याकारिकेति चेत्, न । अहङ्कारादेशात् । 'अथाहङ्कारादेश' इति वक्ष्यमाणश्रुतेः । तस्य तुरीयग्राहकत्वं प्रतिभाति । चित्तस्य सुषुप्तिग्राहकत्वात् । तथाच 'अशक्ये हरिरेवास्ति मोहं मा गाः कथञ्चन' इति वाक्यान्न दोषः । किञ्च । सर्वस्य तथात्वापत्तेश्चेत्युक्तदोषाच्च । तथाच श्रुतिः 'सर्वं हि पश्यः पश्यती'ति । अत्र रामानुजमाध्वभास्कराचार्यौ भिक्षुशैवौ च भगवन्तौ 'यत्र नान्यत् पश्यत्यादे'र्भूमातिरिक्तयावद्दर्शननिषेधो नार्थः, किन्तु निरवधिसुखरूपे ब्रह्मण्यनुभूयमाने ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वात् कृत्स्नस्य वस्तुजातस्यैश्वर्यविशिष्टब्रह्माभिन्नत्वेन न पश्यतीति । एतदेवोपपादयति वाक्यशेषः । 'स वा एवं पश्यन्नेवं मन्वान' इत्यादिः । अग्रे 'न पश्यो मृत्युं पश्यति, न रोगं नोत दुःखताम्, सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश' इति मन्त्रश्चेति वदन्ति । पूर्वोक्ताविरुद्धमेतत् । भूमाधिकरणभाष्यप्रकाशे एतदुक्तम् । इतीति । इति स्वरूपलक्षणं कार्यलक्षणं च सिध्यतीत्यर्थः । किमित्यादि । **विशेषदर्शनम्** । नेदं रजतमित्याकारकं रजतादिकम्, शुक्ताविदं रजतमिति । आदिना रज्जौ सर्पोऽयमिति । नायं सर्पः, रज्जुरेवेति विशेषदर्शनम् । कारणे जले कार्यं पृथिवी । स्वेति । विभूत्यध्यायोक्तायाम् । **अत्रापीति** ।

१. संपद्यते । २. तदेकतानताऽरूपः ।

भाष्यप्रकाशः।

'यदि वा न महिम्नीति गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानी'ति। तथाचैतेषु तत्प्रतिष्ठाया अदर्शनात्कथमेतदिति शङ्कां मा कृथाः। तत्र हेतुमाह 'नाहमेवं ब्रवीमी'ति। एतादृशे महिम्नि प्रतिष्ठित इत्यहं न ब्रवीमि। तर्हि क्व प्रतिष्ठित इत्यत आह 'ब्रवीमीति होवाच अन्यो ह्यन्यस्मिन् प्रतिष्ठित' इति। अत्र 'इति होवाचे'ति श्रुतिवाक्यम्, शेषं सनत्कुमारस्य। तथाच गोअश्वादिभ्योऽन्यो महिमा तस्मिन् प्रतिष्ठित इति। तथाच लौकिकमहिमभिन्नः स्वे आत्मीये वृते भक्ते योऽथवा स्वाभिन्नो यो महिमा तस्मिन्नुक्तरीत्या स्थित इत्यर्थः। अतस्तेनापि प्रकारेण विचार्य इत्यर्थतः सिध्यति। तर्हि स कीदृग् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति 'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्व'मित्यारभ्याग्रेऽहंकारादेशं तत आत्मादेशं च पूर्ववत् 'आत्मैवेदं सर्व'मितीत्यन्तम्। तथाच यस्य पूर्वं 'स एवाधस्ता'दित्याद्युक्तरीत्या सर्वदिक्षु भूमभानं सर्वं परिदृश्यमानं भूमेति च भानम्। अथ तदनन्तरम्, अत एतस्माद्भानाद्धेतोरहङ्कारादेश एव पूर्ववद्भूमाभिन्नस्वभानम्। अथ तदनन्तरम्, अतस्तादृशभानाद्धेतोरात्मादेश एव पूर्ववद्भूमाभिन्नात्मभानमिति। एवंप्रकारकभानवान् यः स पुरुषस्तत्र यो महिमा

रश्मिः।

विभूतिष्वपीत्यर्थः। अस्येति। नारदस्य। स्वयं सनत्कुमारः। यदि वा नेति। यदि वा परमार्थत आधारं पृच्छसि तर्हि ब्रूमः। महिम्नि गो अश्व गवाश्वं तदादिरूपे महिम्नि। नेति। न प्रतिष्ठित इतीत्यर्थः। कथमेतदिति। कथं केन प्रकारेण। 'स्वे महिम्नी'ति श्रुतिवाक्यमित्यर्थः। न ब्रवीमीति। अन्ये ज्ञानिनस्तु ब्रुवन्तीत्यर्थः। अन्यज्ञानिनां परमार्थः गीताविभूत्यध्याये। 'धेनूनामस्मि कामधुक्' 'उच्चैःश्रवसमश्वानाम्' 'ऐरावतं गजेन्द्राणाम्' 'श्रीमदूर्जितमेव वा' 'रुद्राणां शङ्करश्चास्मि' 'देवर्षीणां च नारदः' 'सिद्धानां कपिलो मुनिः' 'कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा। विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्येतेषु वाक्येषु गवाश्वादीनां श्रीकृष्णजिदभेदः। अत एव 'ह्यन्यो ह्यन्यस्मिन् प्रतिष्ठित' इति श्रुतेर्ज्ञानिनो भूमा तु स्वतो न भिन्न इति भावं वदन्ति। सर्वात्मभावरूपमुख्यभक्तिप्रकरणाद्भक्तानामुक्तश्रुतिप्रतिपाद्यपरमार्थमाहुः तथा चेति। गवाश्वादिभ्योऽन्यो महिमा यस्तस्मिन् तद्रूपेऽन्यस्मिन् प्रतिष्ठित इति। हि युक्तश्चायमर्थः। ज्ञानमार्गीयादर्थाद्भिन्नः। ननु ज्ञानमार्गीयार्थो भक्तिमार्गीयो वेति चेत्। न। महाभाष्ये 'चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्ये'ति श्रुतेर्निरुक्तावाशुशुक्षणिपरत्वेन व्याख्यातापि शब्दपरत्वेन व्याकरणादत्रापि ज्ञानमार्गपरत्वेन व्याकृता भक्तिमार्गपरत्वेन व्याकृतेति। स्वाभिन्न इति। स्व भगवान्। उक्तेति। उक्ता 'अन्यो ही'त्यादिश्रुत्योक्ता रीतिस्तया। श्रुतिप्रामाण्यात् स्वस्मिन्नपि (स्वयं) स्थित इत्यर्थः। अस्मिन् पक्षे 'अन्यो ही'त्यादिश्रुत्यर्थः स्पष्टः। भूमा तु स्वतो न भिन्न इति भावः। स इति। महिमा। श्रुतौ स इति भूमा। पूर्ववदिति। 'अहमेवाधस्ता'दित्यादिपूर्ववत्। 'आत्मैवाधस्ता'दित्यादि पूर्ववच्च। भूमेति। यथाधस्ताद् घट इत्यत्राधस्तनघटभानम्। इदम्पदार्थमाहुः परीति। इदमस्तु प्रत्यक्षगे रूपमिति। स्वेति। भूमाभिन्नानां स्वेषां भानम्, 'कृष्णोऽहं पश्यत गति'मित्यत्र यथा भूमा भगवान् तत्त्वेन स्वेषां भक्तानां भानम्। हेतोरिति। सञ्चारिभावरूपादित्यर्थः। आत्मपदं मुख्यात्मपरम्। अहङ्कारादेशस्य सञ्चारिभावत्वज्ञापनाय पुनर्भूमाभिन्नात्मज्ञानमित्यर्थः। एवमग्रे भाष्ये स्फुटम्। महिमेति। सस्फूर्तिसर्वात्मभावस्तस्मिन् प्रसिद्धे

एतेन सर्वात्मभावस्वरूपमेवोक्तं भवति । तत्र विरहभावेऽतिविगाढभावेन

भाष्यप्रकाशः ।

तस्मिन् भूमा प्रतिष्ठित इत्यर्थः सिध्यति । तस्य तत्र प्रतिष्ठितत्वे गमकमाह 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवती'ति । तथाचोक्तप्रकारकदर्शनमननविज्ञानवानुक्तप्रकारकरत्यादिमान् भवतीत्येते धर्मास्तत्र भूमप्रतिष्ठागमका इत्येतैर्लक्षणैर्भूममहिमाधारः पुमान् ज्ञातव्य इत्यर्थः । एतच्च महिमस्वरूपमग्रे अनुबन्धादिसूत्रभाष्ये स्फुटीभविष्यति । एवं तत्स्वरूपं निष्कृष्य तादृशस्य शोकतीर्णत्वं पूर्वपृष्टोत्तरत्वेनाह 'स स्वरा'डित्यादिना । सः भूमात्मरत्यादिमान् स्वस्मिन्नेव राजते, स्वस्मिन् भूमानं रञ्जयति वा, तस्य नामाद्याशाप्राणपर्यन्तलोकेषु कामचारः स्वातन्त्र्यं भवतीति सर्वप्राप्त्या शोकपारतीर्णो भवतीत्यर्थः । एवमेतं परिचाययित्वा तेनैव शोकतरणादितरोपायवतो निन्दति 'अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति, तेषां सर्वेषु लोकेष्वकामचारो भवती'ति । रञ्जयतीति राजा । अन्यो रञ्जयिता येषां तेऽन्यराजानः । तथाच ये इतोऽन्यथा विदुरन्यासक्तास्ते तथेतिसन्दर्भार्थः ।

एतस्य तात्पर्यं स्फुटीकर्तुं गृह्णन्ति एतेनेत्यादि । एतेन भूम्नः कार्यलक्षणवाक्ये-

रश्मिः ।

वृतभक्ते भूमा भूमाधिकरणोक्तो भगवान् प्रतिष्ठित इत्यर्थः । भगवतो भूमत्वेनोपादानं सुखरूपत्वाय । ननु भगवति सर्वात्मभावरूपा भक्तिः, भक्तौ तु न भगवानिति चेत् । न । महिम्नीति सप्तम्या अभिव्यापकाधारोऽर्थः । न त्वौपश्लेषिक आधारः । तथा च महिमानं सस्फूर्तिसर्वात्मभावमभिव्याप्य प्रतिष्ठित इत्यर्थात् । न च महिमपदं 'एतावानस्य महिमा' इत्यत्र विश्ववाचकमिति वाच्यम् । विश्वान्तर्गतसस्फूर्तिकैतादृशभावे विश्ववाचकस्य सङ्कोचात् । 'सर्वे ब्राह्मणा भोजयितव्या' इत्यत्र सर्वपदवत् । **तथा चोक्ते**ति । 'अनुबन्धादिभ्य' इति सूत्रभाष्योक्तप्रकारकेत्यादिः । **एत** इति । उक्तप्रकारकरत्यादिरूपा धर्माः । उक्तप्रकारकदर्शनादिधर्मास्तु भूमगमकाः, न तु भूमप्रतिष्ठागमका इत्यनुबन्धादिभ्य इति सूत्रभाष्यात् । **महिमे**ति । 'स एवाधस्ता'दित्युक्तम् । 'स वा' इत्युक्तं च । व्याकरणस्य वेदाङ्गत्वात् श्रीभागवतस्य वेदत्वात् तच्चतुर्थस्कन्धोक्त लक्षणमाहुः **स्वस्मिन्नि**ति । 'रञ्जयतीति राजे'ति पृथुचरित्रे व्युत्पत्तिः । **तेनैवे**ति । भूम्नैव । **इत** इति । श्रुत्यन्तर्गतस्मात इत्यस्यार्थः । **कार्यलक्षणे**ति । स्वरूपलक्षणं तु 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे'ति ब्रह्मोपनिषदुक्तम् । **सर्वात्मभावे**ति । ननु विगाढभावस्य विरह एव भाष्ये उक्तेः 'यस्मिन् दृष्टे श्रुते विज्ञाते' इति लक्षणश्रुतिविवरणे प्रकाश एवोक्तसंयोगे सर्वात्मभावपदस्यैकदेशविरह एव प्रवृत्तस्य कथं जीवेश्वरभेदेनाधिभौतिकादिभेदेन संयोगविप्रयोगभेदेन च द्वादशप्रकारेषु प्रवृत्तिरिति चेत् । न । भाष्येऽतिविगाढभावपदेति पदार्थस्य विवक्षितत्वात् । तथा च वि विशेषेण गाढो दृढः बलं बलपदवाच्यो भावः प्रेमा विगाढभावः । तस्य ज्ञापको निरोधलक्षणग्रन्थोक्तो निरोधः । तदुक्ते तु सर्वात्मभावे सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भाव इति । आत्मनो भाव इति षष्ठीतत्पुरुषं विधाय सर्व आत्मभाव इति कर्मधारयः । 'सर्वेन्द्रियाण्यन्तःकरणस्य वृत्तय' इति पञ्चमस्कन्धे निरूपितम् । 'एकादशामी मनसो हि वृत्तय आकूतयः पञ्चधियोऽभिमान' इति । तदुक्तमाचार्यैः 'सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे । विरहेण महाभागा महान् मेऽनुग्रहः कृत' इति श्लोके 'सर्वोऽप्यात्मनो भावो भगवत्येवाधिकृत उत्तरोत्तरं वृद्ध्यर्थं आरब्ध इवे'ति सुबोधिन्या । ननु विरहेणेत्युक्तौ पुष्टिमार्गीयत्यागवतीनां विरहसामयिकसर्वात्मभावपदनिर्वचनम्,

सर्वत्र तदेव स्फुरतीति 'स एवाधस्ता'दित्यादिनोक्त्वा, कदाचित् स्वस्मिन्नेव भगवत्त्वस्फूर्तिरपि भवतीति 'अथाहङ्कारादेश' इत्यादिना तामुक्त्वा, एतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भगवत्स्फूर्तिमाह 'अथात

भाष्यप्रकाशः ।

न यदुद्धवं प्रति सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मकं भगवतोक्तं तदेवोक्तमित्यर्थः । कथमित्याकाङ्क्षायामेतदग्रिमोक्तकार्यान्यथानुपपत्त्यार्थादुक्तं भवतीति वक्तुमेतद्विभजन्ते तत्रेत्यादि ।

रश्मिः ।

न तु संयोगसामयिकसर्वात्मभावपदनिर्वचनमिति संयोगीयान्यन्निर्वचनमिति चेत् । न । संयोगविप्रयोगभेदेनैकस्या एव भक्तेर्द्वैविध्यात् । न च संयोगे मानाभाव इति वाच्यम् । विहितभक्त्यसाध्यत्वेन भक्तिपदं सर्वात्मभावेऽर्धदलवाचक स्यादिति । न चास्त्वेवमिति वाच्यम् । विशिष्टे शक्तिवादिनां घट इत्युक्ते हि न घटत्वाविषयकप्रत्ययो भवतीति तथा वक्तुमशक्यत्वात् । तथा च प्रत्ययः । प्रतिमादिं पश्यतो भगवन्तं पश्यामीति चक्षुःसयोगे । विप्रयोगे तु दैहिकपारतन्त्र्य देशैक्येपि । तदा न पश्यामीति प्रत्ययः । तथा च प्रयोग. । विगाढभाववान् निरोधादाचार्यवदिति । एवं सर्वस्मिन् भाव इति सर्वात्मभाव इति लालूभट्टकृतसर्वात्मभावविवेके । सा व्युत्पत्तिरतिविगाढभावेन वक्ष्यमाणस्फूर्तौ । तथा चैतादृशः सर्व आत्मनो भावो यत्र विगाढभावे स विगाढभावः सर्वात्मभावः । द्वितीयदले त्वतिविगाढभावः अतिपदार्थोऽनुभवसाक्षिको विरहे सयोगापेक्षयातिशयरूपः । तत्र सर्वस्मिन्नात्मभावो यत्रातिविगाढभावे स सर्वात्मभाव. । तदुक्त **सर्वात्मभावस्वरूपं स्वस्मिन् विगाढभावात्मक**मिति । अन्यस्मिन् कामुकेऽय भाव. सर्वात्मभावः स्यात्, तद्व्यावृत्त्यर्थं **स्वस्मि**न्निति । विगाढभावात्मकसर्वात्मभावान्निरोधात्मकस्तस्मादतिविगाढात्मके स्फूर्त्यात्मकः सर्वात्मभावः । एव संयोगे द्विविधोपि त्रिविधः आध्यात्मिकाधिदैविकयोरभेदात् । अतिविगाढभावतदुद्भवस्फूर्तिरूपो द्विविधोपि विरहे त्रिविधः । उक्ताभेदात् । एवं षड्विधो जीवे । ईश्वरेप्येव षड्विधः कारणरूपः । तदुक्त प्रदानवत्सूत्रभाष्यप्रकाशे 'तेन भगवद्धर्मे'त्यादिना । व्युत्पत्तिस्तु सुबोधिन्या एव 'सर्वोप्यात्मनो भावः' इत्यस्याः श्रुतौ निरवध्यानन्दरूपत्वेन रसरूपत्वेन पुत्रादिभ्योपि प्रेयस्त्वेन च सिद्धस्य आत्मनो यो भावो धर्मः प्रियत्वाख्य आनन्दात्मा यन्मात्रां सर्व उपजीवन्ति स सर्वस्तदशिभूतो भगवद्धर्म ऐश्वर्यादिवदतिरिक्तः । ननु स दत्तो जीवेष्वपि तादृश इति चेत् । न । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'ति श्रुत्या प्रदानवत्सूत्रोक्तरीत्या भगवद्धर्मात्मकसर्वात्मभावदानेपि भगवद्धर्मसर्वात्मभावस्योक्तविधत्वमपि । मात्रारूपत्वेन परिणामात् । एतेन प्रदानवत्सूत्रोक्तभाष्यप्रकाशोक्तलक्षणकसर्वात्मभावनिर्वचनाभावात् तद्विरोध इत्यपास्तम् । तत्र भगवद्धर्मात्मकसर्वात्मभावनिर्वचनात् । आध्यात्मिकाधिभौतिकस्फूर्तिविगाढभावयोर्मात्रात्वादुक्तविधत्वम् । पुराणमतेन तु प्रदानवदेवेति सूत्रभाष्यप्रकाशेऽनुरागात्मेत्यादिविशेषणविशिष्टः सर्वात्मभावो ज्ञेयः । तथा चैतेन श्रुतिवाक्येन सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भावः 'कामः सङ्कल्प'इत्यादिश्रुत्युक्तस्तस्य विद्यारूपस्य स्वरूपं 'दर्शनाच्चे'ति वक्ष्यमाणसूत्रादुक्तमित्यर्थः । निरोधलक्षणोक्तविद्यारूपमिति यावत् । श्रीवल्लभजित्कृतसर्वात्मभावनिरूपणे सर्वात्मभावपदस्यायमर्थकः । भक्तिमार्तण्डे च । 'नन्दगोपव्रजस्त्रीणां' नन्दगोपसर्वात्मभावत्वेन 'मनसो वृत्तयो नः स्यु'रिति भ्रमरगीतीयवाक्योक्तेन सर्वात्मभावनिरूपणस्य युक्तत्वात् । उक्तश्रुतेश्चेति

भाष्यप्रकाशः ।

अयमर्थः । अत्र व्याख्यातरीत्या यो भूमममहिमाधाररूपः पुमान् परिचाययिष्यते, तस्य या स्फूर्तिः, सा नाखण्डब्रह्मज्ञानरूपा, 'तत् केन कं पश्ये'दित्यादिवत्तदाकाराभावात्, किन्तु सखण्डतद्रूपा, षण्णां दिशां परिदृश्यमानस्य सर्वस्य चानुवादपूर्वकं तत्स्फूर्तिकथनात् । सापि न वामदेवादिस्फूर्तिव'न्महमनुरभवमहं सूर्यश्चे'त्यादिसर्वत्राहङ्कहरूपा, अहङ्कारादेशोत्तरं पुनरात्मादेशकथनेन तस्याः व्यभिचारबोधनात् । अतः सा द्विविधाया अपि ज्ञानिस्फूर्तेर्विलक्षणेति तद्वानपि तेभ्यो विलक्षणः । 'स यदि पितृलोककामो भवती'त्यादिवदस्य कामानामनुक्तत्वाद्दहराद्युपासकेभ्योपि विलक्षणः । मर्त्यसुखानभीप्सुत्वाल्लौकिकोपि विलक्षणः । किन्तु सत्यवदनादिकारणभूतकृत्यादिजनकसुखलाभवत्त्वस्य भूमप्रतिष्ठाप्रश्नोत्तराभ्यां तन्महिमाधारत्वेनोक्तत्वात् पूर्वं भूमलाभवानुक्तः, तेन दृष्टश्रुतविज्ञातभगवत्कः परमभक्तस्तत्र ततोऽन्यदर्शनादिराहित्यस्योक्तत्वाद्विरहभावे प्रपञ्चविस्मारकपरमासक्तिरूपो योऽतिविगाढभावस्तेन सर्वत्र तदेव आसक्तिविषयं

रश्मिः ।

भाष्यार्थः । भाष्यीयैवकारव्यावर्त्यमाहुः अयमर्थ इति । 'सा सा सा सा जगति सकले कोऽयमद्वैतवाद' इत्यत्राय भावः कामुकस्योपवर्णितः । क्वचित् तत्रापि संभोगविगाढभावनिरोधविप्रयोगातिविगाढभावस्फूर्तीनां सत्त्वात् लौकिकः सर्वात्मभावो रूपप्रपञ्चान्तर्गतो बन्धको रूपप्रपञ्चस्य बन्धकत्वात् 'सर्वग्रन्थीनां प्रविमोक्ष'इति श्रुतिविरोधाच्चेत्यत आहुः मर्त्येति । तथाच लौकिके सर्वात्मभावे मर्त्यसुखाभीप्सुरधिकारी, अलौकिके तु शुद्धाहारी । 'प्राणपोषको ह्याहारः, तस्य सदोषत्वे तु न किञ्चित् सिध्यती'ति भाष्यात् । 'न पश्यो मृत्युं पश्यती'ति मृत्यवस्पृष्टसुखत्वात् सर्वात्मभावस्यामर्त्यसुखाभीप्सुरधिकारी । एतेन वैष्णवस्य स्वस्त्रियामेतादृशभाववतो भावेपि न क्षतिः । आत्मविषयत्वाच्च । न चायोग्ये भावकल्पनमिति वाच्यम् । 'यद्यदिष्टतम'मिति वाक्यात् । 'लोकवत्तु लीलाकैवल्य'मिति सूत्राच्च । आत्मविषयकः कैवल्यरूपः । स्त्र्यादिविषयकोऽकैवल्यरूपः । सत्येत्यादि । सत्यवदनविज्ञानमतिश्रद्धानिष्ठाः सुखादयः तासां कारणीभूता कृतिरादिः कृत्यादिसुखस्यादिः । तस्या जनकेत्यर्थः । ननु सत्यवदनादिजनकेत्येतावतैव चारितार्थ्ये कारणभूतकृत्यादीत्यधिकमिति चेत्, न । एतदनुक्तौ सत्यवदनादिसकलजनकेति भ्रमः स्यात्, तन्निवृत्तये कारणभूतायाः सुखस्यादिरूपायाः कृतेर्जनकत्वनिश्चयार्थं कारणभूतकृत्यादीत्यस्यानाधिक्यात् । उक्तत्वादिति । 'यदा वै सुखं लभतेऽथ करोती'ति श्रुत्येत्यर्थः । दृष्टेति । भूमलक्षणश्रुतिव्याख्याने विशेषरूपेण लब्धः । परमेति । दृष्टश्रुतविज्ञातभ(ग)वत्कत्वमेव परमभक्तत्वम् । संयोगविगाढभावयोस्तु प्राकृतयोरनुवादात् । सयोगविगाढभावनिरोधानां वक्ष्यमाणत्रयप्रतिपादकग्रन्थानुरोधेन वक्तव्यत्वात् । अत्र सत्यवदनादीनां सनिवेशप्रकारः । सर्वात्मभावे 'भक्तिः प्रवर्तिता दिष्ट्ये'ति वाक्य भ्रमरगीते, भक्तिवर्धिन्यां च 'सेवायां वा कथायां वे'ति वाक्यं विविदिषोर्भक्तस्य सत्यवदनादिजनककृतिर्गुरूपसत्तिः । अस्य पुष्टित्व सन्दर्भस्यैकादशद्वादशाध्यायोक्तस्यैतन्निबन्धे उक्तत्वात् स्फूर्तिनिरोधयोः सर्वात्मभावपद भाष्ये श्रीभागवते चोक्तमिति । अनुग्रहमात्रेण कृतिः पुष्टित्वात् । ततो निष्ठा, ततः श्रद्धा, ततो मतिः, ततो विज्ञानम्, ततः सत्यं सत्यवदन कथा कथनादिरूपमुक्तश्रुतिप्रमाण्याज्ज्ञेयम् । तत्र भूमलक्षणे । ततः दर्शनश्रवणविज्ञानाद्यनन्तरम् । उक्तेति । एतस्य विरहभावलिङ्गत्वम् । न च प्रेमलक्षणे सयोगे वियोगवर्तन प्रेमेत्युक्तत्वात् वियोगवर्तनं संयोगेऽस्त्विति शङ्क्यम् । प्रेमलक्षणत्वात् । सर्वात्मभावस्य प्रदानमात्रसाध्यत्वात् । परमासक्तीति । परः सर्वोत्कृष्टो मीयते ज्ञानस्य स्फूर्त्यात्मकस्य विषयीक्रियते यस्यामेतादृश्यासक्तिरनुषङ्गबद्धधीरूपा तया

भाष्यप्रकाशः।

भगवत्स्वरूपमेव सर्वत्र स्फुरतीति 'स एवाधस्तादित्या'दिनोक्त्वा, एतेषां विरहभावकृततत्तत्स्फूर्तिरूपाणां ज्ञानानां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनरहङ्कारादेशात् पूर्वं निरूपित-

रश्मिः।

व्यवह्रियते ज्ञायते इति तद्रूपोऽतिविगाढभाव इत्यर्थः। 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया' इति भ्रमरगीतोक्तसर्वात्मभावे निरोधस्कन्धोक्ते निरोधस्य प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिरूपस्य सन्निवेशो भाष्यस्य आवश्यकः। तेनातिविगाढभावे वक्तव्येऽस्य विशेषणस्य किं प्रयोजनमिति कुचोद्यं निरस्तम्। व्यभिचारीति। विरहेत्यादितत्तत्स्फूर्तयोऽधःस्थत्वादिप्रकारकास्मद्विशेष्यका बोध्याः। ते तु त्रयस्त्रिंशत्। 'चिन्ता स्मृतिर्हर्ष औत्सुक्यमपस्मारो विबोधो मतिरुन्मादो मरण'मित्येतेषु मतिरत्र सम्भवति। तस्या लक्षणं शास्त्रोपदेशमन्त्राद्यैरर्थनिर्धारणं मतिरिति। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत' इति गीतातः व्यभिचारित्वमस्या भक्तिरसात् पूर्वभावित्वेनोत्तरभावित्वेन च, भक्तिमार्गे उन्मादो वा। तस्य लक्षणम्, 'सन्निपातग्रहादित उन्मादश्चित्तविभ्रमः।' तदुक्तं 'उत्तमानां विप्रलम्भो भवेत् प्रियवियोगतः। नीचानां विभवभ्रंशात् सर्वेषां सन्निपातत' इति। अत्रापि वाक्यं 'इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः' इति। अत्र भक्तिपदवाच्यत्वात् षट्सु सर्वात्मभावपदव्युत्पत्तिः। सयोगः परस्परालिङ्गनपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इत्येक एव। सर्व आत्मनो भाव· परम्परया यत्र संयोगे स तथोक्तः। सयोगे परम्परया निरोधकारणत्वात्। वि विशेषेण गाढो दृढः बलपदवाच्यो भावः प्रेमा। 'दृढः स्थूलबलयो'रिति पाणिनिसूत्रात्। न च भावपदार्थो रतिर्वाच्य इति वाच्यम्। रतेर्भगवद्ग्राहकत्वात्। 'वशे कुर्वन्ति मां भक्त्ये'ति वाक्यात्। 'तं भजे'दिति श्रुतेश्च। न च प्रेमपदोपसन्दाने विहितकर्मज्ञानभक्तिसाध्यो न वेति शङ्कित्वा प्रदानसाध्यत्वं सर्वात्मभावस्योक्तम्, तद्भङ्गः, प्रेमपदेन विहितभक्तिलाभो न, अन्यसाधनसाध्यत्वादिति वाच्यम्। भाष्ये विहितपदाच्चित्तशुद्ध्यादीनां मर्यादाभक्तिसाधकत्वे पुष्टौ प्रदानसाध्यत्वे बाधकाभावात्। न च प्रदानसाध्यत्वेऽनुग्रहासाध्यत्वापत्त्या भक्तिहेतुविरोध इति वाच्यम्। सर्वात्मभावोक्तिसन्दर्भरूपे द्वादशाध्याये पुष्टिमार्गकथनानन्तरं 'याहि सर्वात्मभावेने'ति वाक्यात् पुष्टिभक्तित्वेपि सुबोधिन्याः सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भावः, 'कामः सङ्कल्प' इतिश्रुत्युक्तो वा, 'एकादशामी मनसो हि वृत्तय' इति पञ्चमस्कन्धोक्तो वा भवनं भगवति सत्ता वर्तनं तत्परत्वेनावस्थापनं वेत्यर्थिकायाः सिद्धस्य वक्ष्यमाणस्य विद्यारूपस्य निरोधस्य दानेनाभ्युपगमात्। इतरस्याध्यात्मिकाधिभौतिकस्यानुग्रहसाध्यस्य पुष्टित्वादनुग्रहेणोपगमात्। श्रौतस्य प्रदानसाध्यता, पौगण्डस्य तु अनुग्रहसहकृतप्रदानसाध्यता सर्वात्मभावस्य निरोधात्मकस्य। वक्ष्यमाणनिरोधात्मकस्य। विगाढभावे सर्वं आत्मनोऽन्तःकरणस्य भाव उक्तो यत्रेतिव्युत्पत्तिः। 'नासतो विद्यते भावो नाभावो विद्यते सत' इति गीतायाः। निरोधे व्युत्पत्तिः। सर्वः सर्वेन्द्रियसम्बन्धी भाव· 'काम· सङ्कल्प' इति श्रुत्युक्तः। भाष्ये मूलपदवाच्यो यः। 'एतेन सर्वात्मभावस्वरूपमेवोक्तं भवती'ति भाष्यात्। भाष्यमते इयं मुख्या व्युत्पत्ति· सर्वात्मभावस्य। मूललक्षणश्रुतिसिद्धत्वात्। पञ्च तु सर्वात्मभावव्युत्पत्तिजन्या· सर्वात्मभावान्तःपातित्वात् सर्वात्मभावा इत्युच्यन्त इति भक्तिहंसदिशा ज्ञायते। अथापि व्युत्पत्तिर्विरहे। विशिष्टो रहो विरहः। अन्तःसंवेदनम्। विरहो, 'विरहे ये विविधा भक्तिभावा उत्पद्यन्ते. ते न सङ्गमेपी'ति वैशिष्ट्यम्। स च चक्षूरागः। प्रथममित्यवस्थाप्रकारेण [illegible]रूपः। नन्वन्तःसंवेदनेपि चक्षूराग इति चेत्। न। 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदा-

भाष्यप्रकाशः।

स्वावृत्त्या सर्वत्र भगवत्स्फूर्तिमाह 'अथात आत्मादेश' इत्यादिना।

विधात्रयसमाप्तौ च 'स वा एष एवं पश्य'न्नित्यादि कथयति। तत्र 'स' इत्यनेन पूर्वोक्तं परामृश्य, 'एष' इत्यनेन महिमानं निगमयति। तत्रायमर्थः। पूर्वं विधात्रयस्योक्तत्वात्तासां प्रत्येकमहिमरूपत्वे, 'स वा एष' इत्यत्र बहुवचनापत्तिः। समुदितस्य तथात्वे पूर्वविधापरामृष्टस्य भूम्नोपि महिमत्वापत्तिः, अतस्तदुभयमत्र नाभिप्रेतम्, किं'न्त्वेवं पश्य'न्नित्यादिनोक्तासु दर्शनादिक्रियासु पूर्वोक्तविधात्रयं कर्मत्वेनैवाभिप्रेत्यैवंपदेन परामृशति, दर्शनादिमतश्चाग्रे फलं

रश्मिः।

वृत्तचक्षुरमृतत्वमिच्छ'न्नितिश्रुत्यान्तःसंवेदने चक्षूरागोक्तेः। आत्मदर्शनं 'सा परानुरक्तिरीश्वरे' इति शाण्डिल्यसूत्रेण रागमन्तरासम्भवच्चक्षूरागरूपां भक्तिमाह। द्विषति चक्षुःस्वकारणनिर्वाहाय। न चास्तु चक्षूरागः संयोगवद्विरहेपि, रागस्य भक्तिलक्षणत्वात्, परन्तु सम्यक् ज्ञानं तस्य श्रुतौ न सम्भवति, प्रत्याशादिभिस्तिरस्कारादिति बोध्यम्। 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचि'दित्यस्मात्। 'दुस्त्यजस्तत्कथार्थं' इत्यस्माच्च रागप्राप्तेः। लक्षणोक्तस्य भानावश्यकत्वाच्च। अन्यथा लक्षणत्वापलापप्रसङ्गः। ननु 'कामाद्रोप्यः', 'अलमन्यविचारेण, प्रेमेच्छेति स्थितं मत'मिति वाक्याभ्यां इच्छा ममेति चेत्। न। 'अनाविष्कुर्वन्नन्वया'दितिसूत्रे भक्तिरसस्य गुप्तस्यैवाभिवृद्धिस्वभावत्वेन कामादीनां गौणप्रेमत्वात्। अतः 'कामस्तस्य दिदृक्षैवे'ति 'नैव इच्छा तु साधारण्या'दिति कारिकाशाण्डिल्यसूत्रयोरिच्छायां विशेषस्य दूषणस्य चोक्तेः। अतः बहुविधोपि विरहोत्रैक एव गण्यते, संयोगवदिति सिद्धम्। ननु विप्रलम्भ इति वक्तव्ये तदेकदेशोपादानं भाष्ये कुत इति चेत्। न। विप्रयोगस्याभिलाषविरहेर्ष्याप्रवासशापहेतुकत्वेन पञ्चविधस्य सङ्गमप्रत्याशाकालीनास्तदनुत्पादो विप्रलम्भ इति लक्षणलक्षितस्याद्यावयवोऽभिलाष इच्छारूपः द्वितीयो विरहः। देशैक्येपि गुर्वादिपारतन्त्र्यम्। अन्यासङ्गिनि प्रिये कोप ईर्ष्या। प्रवासो वैदेश्यम्। उत्पादिकोपनियन्त्रणं शापः वाग्दण्डः। विप्रलम्भलक्षणे प्रत्याशा प्राप्तिनिश्चयः। तत्रोद्धवस्य 'अत्रागतोऽहं विरहातुरात्मे'ति वाक्याद्विरहेऽन्तर्भावि सर्वं भवतीति विरहस्य भागवतमते मुख्यत्वात्। अन्यथा प्रवासहेतुके विप्रलम्भे विरहहेतुकत्वं विरुद्धमुक्तं स्यात्। सर्वस्मिन्नात्मभावः परम्परया यत्र विरहे स सर्वात्मभावः। संयोगवद्विप्रयोगेपि सर्वात्मभावं वक्तुं **तत्रे**त्यारभ्य **इत्यादिने**त्यन्तं भाष्यं **ततः संयोगभाव** इत्यादिभाष्येण सुखान्वितमपि ह्यग्रेतनश्रुत्या तदेव भाष्यं संयोज्य 'सर्वात्मभावस्वरूपमेवोक्तं भवती'ति भाष्यमावृत्त्या पुनर्योजयन्तिस्म **विधे**ति। विधात्रयमात्मादेशाहङ्कारादेशात्मादेशरूपम्। अहङ्कारस्य पुरुषविधब्राह्मण आत्मतः प्रथममुत्पत्तिदर्शनात्। जीववाचकस्याहङ्कारस्य प्रयोगः, न तु सन्निपातलक्षणैकदेशस्यास्मत्पदवाच्यस्य हेयस्य। लक्षणं तु 'सन्निपातस्त्वहमिति ममेत्युद्धव या मति'रिति। न चोक्तोन्मादोत्पादकः सन्निपातोऽस्त्विति शङ्क्यम्। भेदांशे तस्याविरोधात्। भक्तानामन्तराभूतस्याभेदस्यादानादयं ब्रह्माभिप्रेतोऽहेय एव। तदुक्तं सुबोधिन्यां 'कृत्वाऽतरन् वत्सपदं स्म यत्प्लवा' इत्यस्य। भेदः संसारः। सुबोधिन्यां **भूम्नोपी**ति। न च निरोधलक्षणोक्तनिरोधस्य भूमपदवाच्यत्वेन स्फूर्तिविषयस्य कथं भूमपदवाच्यत्वमितिशङ्क्यम्। भक्तिहंसोक्तदिशा सर्वात्मभावान्तःपातिनोपि स्फूर्तिविषयस्य भूमत्वात्। **पूर्वोक्ते**ति। एवंपदेन पूर्वोक्तेत्यादिरित्यन्वयः। पूर्वपसमशार्थिक एवकारः। **फल**मिति। 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः, स स्वराड् भवती'ति श्रुत्या

आत्मादेश' इत्यादिना। ततः संयोगभावे सति पूर्वभावेन सर्वोपमर्दिना स्वप्राणादिसर्वतिरोधानेनाग्रिमलीलानुपयोगित्वं न शङ्कनीयम्, यतो भगवत एव सर्वसम्पत्तिरित्याशयेन 'तस्य ह वा एतस्यैवं पश्यत' इत्युपक्रम्य 'आत्मत एवेदꣳ सर्व'मित्युक्तवान्। ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाह 'आहारशु-

भाष्यप्रकाशः।

वदति, तेन 'कर्म फलार्थत्वा'दिति न्यायात्तादृशफलजनकं यद्विधात्रयकर्मकं ज्ञानं तदत्र महिमत्वेन फलति। तथाचात्राग्रे आत्मरत्यादिपदे रतिक्रीडामिथुनानन्दानां रसरूपं भगवन्तं भजत एव धर्माणामुक्तत्वात् दृष्टश्रुतविज्ञातभगवत्को रसस्य संयोगविप्रयोगाभ्यां द्विधानुभवविषयत्वाद्विरहभावेऽतिविगाढभावेनोक्तरीत्या सर्वत्र तत्स्फूर्तिमान् भक्तो भूममहिमाधारत्वेन सिद्ध इति तस्य या स्फूर्तिः सोक्तरीतिकसर्वात्मभावव्यभिचारिभावरूपैव, नान्यविधेति तेन भगवति विगाढभावरूपं तत्स्वरूपमेवात्रोक्तं भवतीत्यर्थः।

एतदेव फलतोपि निगमयितुं, 'तस्य ह वा एतस्ये'त्यादेर्ग्रन्थस्य तात्पर्यमाहुः तत इत्यादि। तथाच विरहभावानन्तरं संयोगभावे असति पूर्वभावेन विरहात्मकेन तथैति वृथैवेदं सर्वमिति शङ्कानिरासाय 'तस्य वा एतस्ये'त्यादिना भगवत एव सकाशात् सर्वस्थितिमुक्तवान्, अतो विरहेण सर्वोपमर्दाभावाल्लीलोपयोगसिद्धिरिति, सापि तादृशभक्ततद्भावयोर्गमिकेत्यर्थः। एतदेव सङ्ग्रहग्रन्थतात्पर्यकथनेन दृढीकुर्वन्ति ततः श्लोकैरित्यादि। श्लोकास्तु 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्। सर्वꣳ हि पश्यः पश्यति सर्वमाप्नोति सर्वश इति। स एकधा भवति त्रिधा भवति पञ्चधा। सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः। शतं च दश चैकश्च सहस्राणि च विꣳशतिः। आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिप्रतिलम्भे

रश्मिः।

फलमित्यर्थः। न्यायादिति। अयं न्यायः पूर्वमीमांसायां तृतीयाध्याये वर्तते 'कर्माण्यपि जैमिनिः फलार्थत्वा'दिति सूत्रसिद्धः। कर्माण्यपि शेषाणि फलार्थत्वात् पारार्थ्यस्य शेषलक्षणत्वादिति जैमिनिः सिद्धान्तवक्ता आहेति सूत्रार्थः। विधात्रयेति। 'एव पश्य'न्नित्यस्य विधात्रयं पश्यन्नित्याद्यर्थात् विधात्रयेत्यादिः। ज्ञान क्रिया कर्मेति यावत्। ननु कथं ज्ञान कर्मेति चेत्। न। 'भूवादयो धातव' इत्यस्य सूत्रस्य 'क्रियावाचिनो भ्वादय' इत्यर्थात्। अत्रेति। विरहे। उक्तेति। भाष्योक्तरीतिकनिरोधात्मकसर्वात्मभावेत्यर्थः। तेनेत्यादि। विगाढभावस्यातिविगाढभावस्य रूप व्यवहारो ज्ञानं येन सर्वात्मभावेनेति बहुव्रीहिः। विरहभावेपीत्याद्युक्तग्रन्थात्। विरहभावेऽतिविगाढभावेनेति पाठः। तत्र विरहभावेऽतिविगाढभावेनेति भाष्यात्। तत्स्वरूपं सर्वात्मभावस्वरूपम्। एवकारेण 'सर्वात्मभावं विदध'दिति नवमस्कन्धवाक्ये 'सर्वस्मिन्नात्मभावो यत्र क्रियाकलाप' इति श्रीधरीग्रन्थेन सर्वस्मिन्नात्मभाव इति समासावेदकश्रीभागवतेन चास्यार्थस्येतरार्थापेक्षया प्रामाणिकत्वादितरेऽर्था व्यावर्त्यन्ते। यथैतेनेत्यादिभाष्ये एवकारेण 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रया' इत्यादिना भ्रमरगीतोक्तश्रीनन्दसर्वात्मभावस्य 'वन्दे नन्दव्रजस्त्रीणा'मित्यत्र नन्दव्रजस्त्रीत्वेन तासामपि वक्तुं शक्यत्वेन 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति श्रुत्या च सर्वः सर्वेन्द्रियसम्बन्धी आत्मनोऽन्तःकरणस्य भाव इति षष्ठीतत्पुरुषगर्भितकर्मधारयार्थस्येतरार्थापेक्षया प्रामाणिकत्वादितरेऽर्था व्यावर्त्यन्ते, तद्वत्। अर्थ इति। तत्रायमर्थ इत्यत्रत्यार्थमुद्दिश्यैतादृशार्थत्वं विधीयत इति तत्रायमर्थ इति न वाक्यान्तरमिति न वाक्यभेदः। गमिकेति। तादृशभक्तभाववान् आत्मतः पुष्टिमार्गीयप्राणादिसर्वसम्पत्तेः।

द्वा'वित्यादिना । प्राणपोषको ह्याहारः, तस्य सदोषत्वे तु न किञ्चित् सिध्यति ।

भाष्यप्रकाशः

सर्वग्रन्थीनां प्रविमोक्ष' इति । अर्थस्तु, पश्यः उक्तविधया भूमदर्शनवान् मृत्युरोगौ न, दुःखभावं च न पश्यति, उतेति पादपूरणे, अथवा पक्षान्तरे, दुःखसत्तामेव न पश्यति, का वार्ता मृत्युरोगयोः । तत्र हेतुमाह । हि यतो हेतोः सर्वं भूमात्मकं पश्यो भूमद्रष्टा पश्यति । तेन दुःखादिकं न पश्यतीति । तस्य फलमाह । सर्वशः सर्वेण सर्वमाप्नोतीति न तस्य पुनः शोकः । प्राप्तौ, प्रकारमाह 'स एकधे'त्यादि । अनेन 'आत्मत आविर्भावतिरोभावा'विति यत्पूर्वमुक्तम्, तस्य प्रकार आविर्भावप्रकारोक्तिद्वारा विवृतः । स भूमैव उक्तप्रकारैः प्रकटो भवन् पश्यस्य सर्वं प्रापयतीति । अथवा । पश्य एव भगवतः सकाशात्तत्तदनुभवार्थं तथा प्रकटीभवतीति बोध्यः । मध्ये, द्विधा चतुर्धा षोढा अष्टधा दशधेत्यादिप्रकारत्यागस्तु तिरोभावप्रकारबोधनार्थः । विशेषतस्तु तादृशाधिकाराभावान्न विवेचितुं शक्य इति नोच्यते । तेन विरहसामयिकदशैव बोध्यत इति हृदयम् । एवमग्रेपि भगवत्कृपया बोध्यम् । एतस्य सर्वस्य मूलकारणमाहारशुद्धिः । सा च 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमही'तिप्रकारेण भगवद्दत्तप्रसादेन भवन्ती सत्त्वं शोधयति । तच्छुद्धौ सत्यां ध्रुवा पूर्वावस्थास्मृतिः । तस्याः प्रतिलम्भे अविद्याकामकृतानां सर्वासां ग्रन्थीनां प्रकृष्टो ज्ञानितोऽप्यधिको विमोक्ष इति ज्ञेयः । अतः परं श्रुतिरेतस्य ज्ञानस्य यस्मैकस्मैचिददेयत्वायाह 'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमार' इति । तथाच सोपि दर्शयति, न

रश्मिः ।

आत्मसृष्टौ ह्यात्मतस्तादृशभक्तभावरहितानामप्यात्मतः प्राणादिसर्वसम्पत्तेर्हेतोः साधारण्यवारणाय **पुष्टिमार्गीयेति** । 'निपातः पादपूरणे' इति निरुक्तेनोतपदार्थमुक्त्वा ग्रन्थान्तरानुरोधेनाहुः **अथवेति** । भूमात्मकं सुखात्मकम् । **सर्वेणेति** । उपनिषद्व्याख्यानेपि 'बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' इति पाणिनिसूत्रात् सर्वदाता सर्वशःपदार्थो बहुशःपदार्थ इति सर्वेणेत्यस्य सर्वदातृत्वेनापि प्रकारेणेत्यर्थः । **तिरोभावेति** । श्रुतार्थापत्त्या तिरोभावप्रकारबोधकः । पूर्वमाविर्भावादेकधा सत्यज्ञानानन्तानन्दरूपम् । इह तु 'सच्चिदानन्दता स्वत' इति निरोधलक्षणग्रन्थवाक्यादेकधा । पश्चाद्द्विधा सत्यानन्दत्वप्रकाराभ्यां तिरोभावः । ज्ञानमात्रप्रकाराभ्यां स्थितिः । एकधायां लीलाविशिष्टत्वविधाभक्तिविशिष्टविधयोः प्रवेशे त्रिधा । तेजोऽबन्नरूपेण वा । सर्वात्मभावे संयोगोपि वर्तत इति गौरत्वश्यामत्वातिश्यामत्वप्रकारैर्वाविर्भवति । एवमग्रेपि । न च 'स्वप्राणादिसर्वतिरोधानेने'ति भाष्यात् प्राणादिप्रकारो वक्तुं योग्य इति शङ्क्यम् । पूर्वं भक्तस्य सायुज्यादिदशायां तथात्वेन पञ्चधा भवनादौ तन्निवेशस्य सुकरत्वाददृष्टः कथं कल्प्येत । **विवेचितुमिति** । महाकविप्रयोगोऽयं काव्यप्रकाशे । अतो विवेक्तुमिति नोक्तम् । विगतं वं सुखं यस्मिन्निति विवः प्रपञ्चः तस्मिन् अचितुं पूजयितुमिति वा । **नोच्यते** इति । विशेषाकाङ्क्षायां 'सदा सर्वात्मभावेन भजनीयो व्रजाधिप'इति वदद्भिः प्रभुभिस्तथैव सेवित इति तद्ग्रन्थात् तर्कणीयो विशेषः । **तेनेति** । प्राणादिसर्वतिरोधायकप्रकारबोधनेन । **पूर्वेति** । 'जातिं स्मरति पौर्विकी'मिति मनुः । 'सोऽह' मित्याकारिका व्युच्चरणात् पश्चादविद्यासम्बन्धात् पूर्वेति **प्रस्थानरत्नाकरे** 'जीवस्यानुस्मृतिः सती'ति वाक्यात् । 'स्मृतिर्भक्ति'रिति रामानुजाचार्याः । **ग्रन्थीनाम**विद्याजनितरागादिग्रन्थीनाम् । सर्वात्मभावफलत्वेन 'स स्वराट् भवती'ति श्रुत्युक्तोऽर्थो व्याख्यातः, पूर्वं 'सर्वग्रन्थीनां प्रविमोक्ष'स्तु सिद्धान्तमुक्तावल्यां 'ततः संसारदुःखस्य निवृत्ति' रित्यनेनोक्तः ।

एवं सति भगवदतिरिक्तस्य स्वतो निर्दोषत्वाभावाद्भगवानेव चेत्प्राणपोषको भवेत्, तदा सर्वं सम्पद्यते। स च सर्वात्मभावे सत्येव भवति। स च तथा तद्वरणं विना न भवति। तचोक्तकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावः, तस्यैव

भाष्यप्रकाशः।

तु दातुं शक्नोति, एतस्य भगवत्परमकृपाप्राप्यत्वात्। तर्हि कथनमपि कुत इत्याकाङ्क्षायां सनत्कुमारस्य कृपालुत्वमाह 'तं स्कन्द इत्याचक्षत' इति। योऽसौ वरदानेन शिवस्य पुत्रोपि जातस्तेन तथेत्यर्थः। द्विरुक्तिः समाप्त्यर्था। तदेतत् सर्वं हृदिकृत्य आहुः एवं सतीत्यादि। एवं श्रुतितात्पर्यमुक्त्वा सूत्रं व्याकर्तुमाहुः स चेत्यादि। स भगवांश्च प्राणपोषकः सर्वात्मभावे सत्येव भवति। स सर्वात्मभावश्च तथा अत्यनुग्रहेण तस्य जीवस्य वरणं विना न भवति, तत् वरणं च भगवत्कृतप्राणपोषणानुमितसर्वात्मभावरूपकार्यानुमेयमिति वरणलिङ्गं सर्वात्मभावः

रश्मिः।

सोऽवान्तरफलमिति तट्टीकायाम्। परमेति। विरहसामयिकसर्वात्मभावदातृत्वं पारम्य कृपायाम्। तथा च श्रद्धानवत्सूत्रभाष्यम्, 'सर्वात्मभावस्यानुभवैकवेद्यत्वेन पूर्वमज्ञानेनेति तत्त्वासम्भवेपि स्वत एव कृपया दान'मिति। वरदानेनेति। क्वचित् प्रसिद्ध पुत्रभवनम्। द्विरिति। 'वाक्यादेरामन्त्रितस्यासूयासमतिकोपकुत्सनभर्त्सनेष्वि'ति सूत्रेण सम्मतौ द्विर्वचन वाक्यादेरामन्त्रितस्य। 'स्कन्दिर् गतिशोषणयोः'। भ्वादिरनिट्। स्कन्दस्य शिवपुत्रत्वे। वरदातुः पितुर्वा शोकशोषकत्वम्। तद्योगरूढ्या। रूढ्यभावे तु नागयज्ञोपवीतिन्यपि स्कन्द इति प्रयोगापत्तिः पुराणमते, श्रौते तु मते वेदान्तत्वेन योगमात्रादरणात् स्कन्दति प्रकरणात् शोकम्, शोषकः 'तरति शोकमात्मवि'दिति श्रुतेः शोकस्य। इति न रूढ्यपेक्षा। इत्थं च द्विरुक्तिश्चरमवर्णध्वंसरूपसमाप्त्यर्था, श्रौतपौराणमतातिरिक्तमताप्रतिपाद्यत्वात्। श्रुतितात्पर्यमिति। यथाहुरुपनिषद्व्याख्यानकारा विश्वेश्वराः 'पूर्वप्रपाठके श्रेष्ठाधिकारिणं प्रत्येवं ब्रह्मात्मतत्त्वमुपदिष्टम्, अथोत्तरप्रपाठके मध्यमाधिकारिणः प्रति शाखाचन्द्रन्यायेन ब्रह्मणि बुद्धिस्थिरीकरणार्थं सोपानारोहणन्यायेन बोधनार्थं नामादिप्राणान्तसङ्कीर्तनद्वारा भूमाख्यं निरतिशयं तत्त्वं निरूप्यते' इति प्रपाठकाभासे। तद्भाष्ये पूर्वविकल्पसूत्रस्य निराक्रियते, तथापि 'अधीहि भगवो ब्रह्मे'त्यादिप्रपाठके नामादिप्राणान्तसङ्कीर्तनेन माहात्म्यज्ञानस्याक्षुण्णतया पूर्वप्रपाठकेनात्माभेदज्ञानस्य जातत्वेन सर्वात्मभावरूपमुख्यभक्तौ तात्पर्यम्। 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया, तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवे'दिति शास्त्रार्थनिरूपके द्वितीयस्कन्धे वाक्यात्। न च यत्र 'नान्यत् पश्यती'त्यादेस्तु श्रुतेर्मुख्यभक्तावभिधावृत्तिरस्तु, किं तात्पर्येणेति चेत्, न। उक्तश्रुत्यभिधावृत्तिप्रतिपाद्यसर्वात्मभावेऽन्यासां श्रुतीनां तात्पर्यमुक्त्वेत्यर्थात्। अन्तीति। सर्वात्मभावोक्तिसन्दर्भे पुष्टिभक्तेरपि सत्त्वात् पुष्टिभक्तिकारणं सर्वात्मभावस्यापीत्याशयेनोक्तं सामान्यतो विशेषाकाङ्क्षायाम्। परमकृपयेति बोध्यम्, 'स्वत एव कृपया दान'मित्युक्तभाष्यात्। क्वचिद्भाष्ये तेन प्रकारेणेत्यर्थ इति तथापदार्थोपि दृश्यते। विनेति। 'यमेवैष वृणुत' इति श्रुतेः। भगेत्यादि। सर्वात्मभाववान् भगवत्कृतप्राणपोषणात्। इत्येवमनुमितः भक्तः सर्वात्मभाववानित्यनुमितिविषयीकृतः सर्वात्मभावस्तद्रूपं कार्यं तेनानुमेयं वरणवान् सर्वात्मभावादित्येवमनुमातुं योग्यमिति हेतोस्तथा। तस्येत्यादिभाष्य विवृण्वन्ति स्म। 'प्रभूतार्थे त्वनव्यय'मिति विश्वादाहुः सर्वेत इत्यादिभाष्यार्थम्। भूयस्त्वादिति। पदेनानेन भूधातुघटितेन 'फलमत उपपत्ते'रिति सूत्रसंवाद्यर्थं एकादशसर्वस्वसर्वात्मभावमनुभवतां भूम-

भूयस्त्वात् सर्वतोऽधिकत्वात्तद्वरणमेव सर्वतः कालादेर्बलीय इत्यर्थः । यल्लिङ्गमेव सर्वतोऽधिकम्, तस्य तथात्वे किं वाच्यमिति कैमुतिकन्यायोपि सूचितः ज्ञानमार्गीयज्ञानेन प्रतिबन्धशङ्कायामाह तदपीति । उक्तमिति शेषः। 'अन्तर भूतग्रामवत्स्वात्मन' इति सूत्रेण । तच्चोपपादितमस्माभिः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥

तत्राह, नात्र वरणलिङ्गभूयस्त्वं निरूप्यते, किन्त्वात्मज्ञानप्रकारविशेष एव । तथाहि । पूर्वप्रपाठके आत्मना सहाभेदः सर्वस्य निरूपितः श्वेतकेतूपाख्यानेन, अग्रिमे च 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मवि'दित्यादिना नारदस्यात्मजिज्ञासैवोक्ता । एवं सत्युत्तरमपि तद्विषयकमेव भवितुमर्हति, अत आत्मप्रकरणत्वादुभयोः प्रपाठकयोः पूर्वस्मिन् यदभेद उक्तः, तस्यैव स्वरूपं 'आत्मत एवेदꣳ सर्व'-

---

भाष्यप्रकाशः ।

सर्वतोऽधिक इति तस्य वरणमेव कालादिभ्यो बलिष्ठम् । अतः कालादिरूपप्रतिबन्धकसद्भावेपि तत्कार्यं भवत्येवेत्यर्थः । एवमत्र प्रदानवत्सूत्रोक्तसर्वात्मभावस्वरूपं सफलं श्रुत्या विवेचितं बोध्यम् । हिशब्दसूचितमर्थमाहुः यल्लिङ्गेत्यादि । सूचित इति । निश्चयार्थकहिशब्दप्रयोगेण सूचितः । सूत्रशेषमवतारयन्ति ज्ञानमार्गीयेत्यादि । आत्मादेशे 'आत्मैवेदं सर्व'मिति सर्वस्यात्मत्वेन भानं श्रावितम् । तथा सति स्वात्मन्यपि तदभेदो भासत्येव । भाते च तस्मिन् विरहभावप्रतिबन्धादुक्तरूपः सर्वात्मभावो ज्ञानमार्गीयज्ञानप्रतिबद्धो नोदेष्यतीति शङ्कायामाहेत्यर्थः । समाधिं व्याकुर्वन्ति अन्तरेत्यादि । पूर्वं भजनानन्दरूपफलदित्सायां सत्यां हि भगवता विरहभावः सम्पाद्यत इति तत्प्रतिबन्धकं न क्रियत इति तस्मिन्नधिकरण एवोपपादितमिति सा शङ्का तदनुसन्धानेनैव निवार्येत्यर्थः ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ पूर्वोक्तमर्थं दृढीकर्तुं सूत्रद्वयेनाशङ्कते इत्याशयेनावतारयन्ति तत्राहेत्यादि । उक्त इतीत्यन्तम् । तत्राहेति । उक्तेऽर्थे पूर्वपक्षी चोदयति निरूपित इति । 'ऐतदात्म्यमिदं सर्व'मिति महावाक्ये निरूपितः । उक्त-

रश्मिः ।

लक्षणं स्मार्यते । तेन विषयः प्रपाठको भवति । भूमपदस्य भूधातुघटितत्वात् । सर्वत इति । इतिर्हेतौ । तस्य भक्तस्य तत् वरणमेव वक्ष्यमाणकैमुतिकन्यायप्राप्तमेव । कालादिभ्य इत्यत्रादिपदेनादृष्टशीघ्रबोधोक्तसेवाचक्रादि संगृह्यते । भवत्येवेत्येवकारोऽन्यत्रादृष्टसिद्धान्तेऽयोगव्यवच्छेदकः । नीलं सरोजं भवत्येवेतिवत् । एवमित्यादि । विवेचितमिति । महाकविप्रयोगादिदं । विवे अचितमिति वा । 'अञ्चु गतिपूजनयोः ।' 'अच इत्येके' इत्यस्य सेट्त्वात् । हीति । ननु सर्वात्मभावनिरूपणस्योपक्रान्तत्वात् सर्वात्मभावस्य कालादिभ्यो बलिष्ठत्वेन तत् सर्वात्मभाव एव कालादेर्बलीय इति भाष्यपाठापत्तिः, सा च सर्वात्मभावस्य पुलिङ्गत्वादयुक्ता । तत्पदस्याव्ययत्वेन तदनुरोधेन बलीय इत्येव नपुंसकत्वसमर्थने बलीयःपदस्य विशेष्यनिघ्नत्वेन बलीयानिति भाष्यपाठापत्तिरिमामाशङ्कां परिजिहीर्षवो हीत्यादिः । सूचितमिति । वाच्यार्थं तु निश्चयात्मकं स्वयमेव वक्ष्यन्ति तस्मिन्निति । सायुज्यात्मकाभेदातिरिक्तेऽभेदे । ज्ञानमार्गीयेति । ज्ञानविशेषणाद्भाष्ये ॥ ४४ ॥

पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ॥ ४५ ॥ तत्राहेति । क्वचिद्भाष्येऽत्राहेति पाठः । अर्थस्त्वेक एव । चोदयतीति । स्मेति शेषः । भाष्ये आहेति लिडन्तप्रयोगात्

मित्यन्तेनोक्तमिति पूर्वोक्तप्रकारादन्येन प्रकारेणात्माभेद एव सर्वस्योक्तः । तदेवाह । पूर्वस्य पूर्वप्रपाठकोक्तात्माभेदज्ञानस्य विकल्पः प्रकारभेद एवाग्रेपि निरूप्यते । तत्रोपपत्तिमाह प्रकरणादिभिः तत्पूर्वादिवत् । अत्र सिद्धान्तिसम्मतमेव दृष्टान्तमाह तद्वदयसंवादार्थं क्रियाज्ञानवदिति । यथा पूजनप्रकरणे बाह्यं तत्क्रियारूपमुच्यते, आन्तरं तु मनोऽध्यासरूपमुच्यते । न ह्येतावतान्यतरस्य तद्भिन्नत्वं वक्तुं शक्यम् । प्रकरणभेदात् । तथेहापीत्यर्थः ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥

नामरूपात्मकं हि जगत्, तत् पूर्वं सर्वशब्देनानूद्य तस्मिन् ब्रह्माभेदो निरूपितः, अग्रे तु ऋगादिविद्या अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते ।

भाष्यप्रकाशः ।

रमिति । सनत्कुमारोक्तं प्रत्युत्तरम् । व्याकुर्वन्ति तदेवाहेत्यादि । अग्रेपीति । नवमेऽस्मिन् प्रपाठके । उपपत्तिमिति । अवतारणग्रन्थ उपपादितम् । बाह्यं तदिति । बाह्यं पूजनम् । तद्भिन्नत्वमिति । पूजनभिन्नत्वम् ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥ व्याकुर्वन्ति नामेत्यादि । नामरूपात्मकं हि जगत्, तत् पूर्वं पूर्वस्मिन् प्रपाठके 'एतदात्म्यमिदं सर्व'मिति सर्वपदेनानूद्य, तस्मिन् ब्रह्माभेद ऐतदात्म्यपदेन निरूपितः । अग्रे अस्मिन् प्रपाठके तु, 'यद्वै किञ्चाध्यगीष्ठा' इत्यादिना नारदोक्ता ऋगादिविद्या

रश्मिः ।

अस्य च तद्व्याख्यानत्वात् । धातूनामनेकार्थत्वात् । मध्ये । अन्येनेति । शाखासदेशे चन्द्रशाखाशब्दवज्जीवान्तर्यामितया जीवसदेशे ब्रह्मणि त्वमिति व्यपदेशः । 'य आत्मनि तिष्ठ'न्नित्यादिश्रुतेरिति प्रकारेणेत्यर्थः । यद्वा । 'ब्राह्मणोऽस्य मुखमासी'दितिवत्ततो जातत्वात्तदिति व्यपदेशः । 'इग्यणः सम्प्रसारण'मित्यत्र 'काकात् जातः काकः, श्येनात् जातः श्येनः, एवं सम्प्रसारणात् जातो वर्णः सम्प्रसारण'मिति महाभाष्योक्तेः । 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः' इति वाक्यशेषाच्च । 'ब्राह्मणो मुखमित्येवं मुखात् जातत्वहेतुतः । यथावदच्युतिस्तद्वज्जीवो ब्रह्मेति वा भवे'दितिस्मृतेश्चेति प्रकारेणेत्यर्थः । अन्येपि प्रकारा भक्तिमार्तण्डे सन्तीति ततोऽवधेयाः । परन्तु शाखाचन्द्रन्यायः शाङ्कराणां प्रसिद्धः । ततो जातत्वनिबन्धनं तदिति पक्षोपि 'आत्मत एवेद९ सर्व'मिति श्रुतिमापातत उपजीवति । ततो द्वौ प्रकारौ युक्तौ ।

प्रकृते । नवम इति । नवमप्रपाठक इति वाक्यात् । अङ्कतः सप्तमः । अथेति । तत्राहेत्याद्यवतारणग्रन्थ इत्यर्थः । क्वचित्पुस्तके 'तथाचायमर्थ इत्याद्याहे'त्यन्तो ग्रन्थः, स उपेक्ष्यः, मूलपुस्तकेऽदर्शनात् । सर्वात्मभावप्रकरणानादरे बीजाभावात् । ज्ञानप्रकरणस्य पूर्वपक्षिसम्बन्धित्वेपि 'हि आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति समाप्तिस्थश्रुतेः 'एतज्ज्ञानमिति प्रोक्त'मित्यव्यभिचारिणीं भक्तिं मध्येकृत्य गीतावाक्याच्च 'यत्र नान्यत् पश्यती'त्यस्या असन्दिग्धत्वान्महाप्रकरणाविरोधात् सर्वात्मभावस्य गीतामते ज्ञानत्वेन । एतदेवेति । महाप्रकरणत्वमेव । स्पष्टत्वान्न व्याक्रियते ॥ ४५ ॥

अतिदेशाच्च ॥ ४६ ॥ ऋगादिविद्येति । अत्र छान्दोग्ये विद्यापदाभावेपि मुण्डके 'द्वेविद्ये

---

१ 'तथाचायमर्थ । अत्र हि वरणलिङ्ग सर्वात्मभावो न भूमलक्षणवाक्यमात्रेण सिध्यति, येन प्रकरणमनादृत्य स गृह्येत, किन्तु तदारभ्य 'आत्मत एवेद सर्व'मित्यन्तेन सन्दर्भेण, अत' सन्दर्भो यथा सर्वात्मभावबोधकमवान्तरप्रकरणम्, तथा प्रपाठकद्वयात्मबोधकं महाप्रकरणम् । तदा भूमलक्षणवाक्यस्य सन्दिग्धत्वात् प्रपाठकद्वयरूपं महाप्रकरणमेवानुसर्तव्यमित्यर्थ । एतदेव दृढीकर्तुं हेत्वन्तरमाह ।' अयं भाग. श्रीपुरुषोत्तमै. स्वयमेकवार लिखित्वा पश्चात् लोपितो मूलपुस्तके दृश्यते ।

'नामैवैतन्नामोपास्स्वे'ति। इतोपि हेतोर्ज्ञानप्रकारभेद एवाग्रे निरूप्यत इत्यर्थः ॥४६॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति । यदुक्तं सनत्कुमारनारदसंवाद आत्मज्ञान-प्रकारविशेष एव निरूप्यत इति, तन्न, किन्तु विद्यैव निरूप्यत इति ।

अत्रेदमाकूतम् । 'नायमात्मे'ति श्रुतिरितरसाधननिषेधपूर्वकं वरणस्य

भाष्यप्रकाशः ।

अनूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते । तथैव मनःप्रभृतिरूपात्मकं जगत्तत्तच्छब्देनानूद्य तत्त-दात्मकब्रह्मत्वं तत्रादिश्यते । अतो यथा कौण्डपायिनां सत्रे 'मासमग्निहोत्रं जुहोती'त्यग्निहो-त्रनाम्ना प्राकृताग्निहोत्रधर्मास्तत्रादिश्यन्ते, तथात्र 'नामोपास्स्वेति स यो नाम ब्रह्मेत्युपास्त' इत्या-दिवाक्यैर्नामादीञ्जगद्रूपाननूद्य नामादिशब्दैस्तत्तदात्मकब्रह्मत्वं तेष्वतिदिश्यत इत्यतिदेशादपि हेतोर्ज्ञानप्रकारविशेष एवाग्रेऽस्मिन् प्रपाठके निरूप्यत इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥ उक्तं पूर्वपक्षं सूत्रव्याख्यानेन निरस्यन्ति तुशब्द इत्यादि । ननु विद्याशब्दो ज्ञानसामान्ये प्रसिद्धः, सर्वात्मभावस्वरूपे ज्ञानविशेषे कथं नियम्यत इत्या-काङ्क्षायां तदुपपादनाय वरणादिश्रुत्येकवाक्यतया प्रकृतश्रुतितात्पर्यं वक्तुं पूर्वं वरणश्रुतिं व्याकु-र्वन्ति अत्रेत्यादि । अस्यां उक्तायां श्रुतौ वरणश्रुत्यविरुद्धं तात्पर्यं तस्माद्वरणश्रुत्यर्थ उच्यत इत्यर्थः । वरणश्रुतिस्तु 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते

रश्मिः ।

वेदितव्ये' इत्युपक्रम्य, 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद' इति श्रुतेर्विद्यापदप्रयो-गोऽस्ति । अतिदिश्यत इति । 'नामैवैतन्नामोपास्स्वे'ति श्रुत्यातिदिश्यत इत्यर्थः । नन्वत्र नामत्व-मतिदिश्यते, न नामात्मकब्रह्मत्वमिति चेत् । न । 'स यो नामब्रह्मेत्युपास्त' इति पूर्वार्थानुवादकश्रुत्या नामोपासनस्य नामात्मकब्रह्मोपासनत्वात् । अतिदेशस्तु अन्यत्र । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति प्रतिपाद्ये ब्रह्मणि प्रतीतस्य ब्रह्मत्वस्यान्यत्र नाम्नि कार्यत उपासनायाः प्राप्तिः । तदुक्तं पूर्वाचार्यैः । 'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः । अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयत' इति । प्राकृताद्ब्रह्मोपासना-ख्यात् तत्समानेषु नामोपासनकर्मसु धर्मप्रवेश आज्ञाविषयप्रवेशो 'नामैवैतन्नामोपास्स्वे'त्यनेन स्यात् स वेदो वातिदेशः । 'प्राकृतात् कर्मणो यस्मात् तत्समानेषु कर्मसु । धर्मप्रवेशो येन स्यात् सोतिदेश इति स्मृत' इति तैरेव । तत्तच्छब्देनेति । मनःप्रभृतिशब्देन तच्छब्दस्य द्विरुक्तावप्यर्थस्यैक्यात् । स च स चेति विग्रहे एकशेषापत्तिः । तत्तदिति । मनःप्रभृत्यात्मकब्रह्मत्वम् । अत इति । अतिदेशात् । मासमिति । अत्यन्तसयोगे द्वितीया । अग्निहोत्रेति । द्वितीयलक्षणादरेणातिदेशरूपेण । तत्रेति । मासाग्निहोत्रे । अतिदिश्यन्त इति । प्रथमलक्षणेन पूर्वतन्त्रे सप्तमस्य तृतीये पादे उक्ताधिकरणेऽति-देशा धर्मनिष्ठाः क्रियन्ते । सूत्रं तु उक्तम्, 'क्रियाभिधान तच्छ्रुतावन्यत्र विधिप्रदेशः स्या'दिति । चतुःसूत्रमिदमधिकरण भाष्ये प्रसिद्धम् । भाष्ये 'सायमग्निहोत्रं जुहोती'ति पपाठ भाष्यकृत् । ज्ञाने-त्यादि । ब्रह्मत्वप्रकारकनाममनःसङ्कल्पादिविशेष्यकज्ञानप्रकारविशेष इत्यर्थः ॥ ४६ ॥

विद्यैव तु निर्धारणात् ॥ ४७ ॥ इदम्पदार्थमाहुः वरणेति । आकूतपदार्थमाहुः तात्पर्यमिति । भिन्नवाक्यत्वार्थं शेषं पूरयन्ति स्म तस्मादिति । उक्त्वेति । श्रुतिरुक्त्वा वृत-

साधनत्वमुक्त्वा वृतलभ्यत्वे हेतुं वदन् वरणविषयमप्याह 'तस्यैष आत्मा वृणुते तनुं स्वा'मिति । तस्य वृतस्यात्मन एव भगवानात्मा, अत एव तत्तनूरूपः स जीवात्मा । तद्वरणस्यावश्यकत्वज्ञापनाय स्वामिति । सर्वो हि स्वकीयां तनुमात्मी-

भाष्यप्रकाशः ।

तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति मुण्डके कठवल्ल्यां चास्ति । विवृणुत इति पाठान्तरं चास्ति । उक्त्वेति पादत्रयेणोक्त्वा । अत एवेति । भगवतो वृतात्मात्मत्वादेव । तथाच तस्यैष आत्मा तदर्थं स्वां तनुं वृणुत इत्यन्वयः । ननु माध्यन्दिनानामन्तर्यामिब्राह्मणे 'यस्यात्मा शरीर'मिति सामान्यत आत्ममात्रस्य ब्रह्मशरीरत्वश्रावणात् कथं वृतस्यैव तत्तनूरूपत्वमित्याकाङ्क्षायामाहुः तद्वरणस्येत्यादि । तथाच यद्यपि तत्र सामान्यत आत्ममात्रस्य शरीरत्वं श्रावितम्, तथापि 'य आत्मानमन्तरो यमयती'ति नियन्तव्यत्वायैव साधारण्येनैव श्रावितम्, न तु स्वकीयत्वकथनपूर्वकम् । अतः सर्वेषु शरीरत्वे साधारणेपि यं स्वीयत्वेनालोचितवाँस्तमेव वृणुत इत्यर्थः । विवृणुते इति पाठेपि विशेषेण वृणुत इत्यर्थः ।

ननु विवरणपदस्य प्रकाशनार्थकत्वाद्विवृणुत इति पाठेऽयमर्थो न लभ्यते, किन्तु यं वृणुते तस्य स्वां तनुं प्रकाशयतीत्येवार्थो लभ्यत इति चेत् । मैवम् । तस्मिन्नपि पक्षे तनुविवरणलिङ्गेनोक्तस्यार्थस्य लाभात् । तथाहि । सर्वेषां जीवानां तौल्येऽप्यत्र 'यं वृणुत' इति विशेषकथनाद्वरणीये कश्चिद्विशेषो विवक्षितः । सोपि न जीवे साधारणशास्त्रीयसाधनजन्मा, पूर्वाधासङ्गत्यापत्तेः । नापि साधनाभावजन्मा, पामरपशुकीटमात्रेषु तदापत्तेः, साधनशास्त्रवैयर्थ्यापत्तेश्च । अतोन्यथानुपपत्त्या भगवदालोचनजन्मैव वाच्यः । सोपि न ज्ञानिभक्तसाधारणः । भावभेदानुपपत्तेः । 'स्वं विवृणुत' इत्येतावतैव चारितार्थ्येन तनुपदवैयर्थ्यापत्तेश्च । अतस्तनुपदानुरोधात् साकारस्यैव प्रकाशो वक्तव्यः । स तु प्रायो भक्तानामेवेति वरणविषयतया सुखेनैव भक्तो लभ्यते ।

रश्मिः ।

लभ्यत्वे हेतुं स्वात्मत्वम्, स्वात्मा ज्ञानिप्रभृतिभिर्लभ्यत इत्यलभ्यस्य लाभो वृतभक्तस्योक्तः । वदन्निति छान्दसं पुंस्त्वम् । श्रुतीनां वा सर्वात्मभावकरणात् भगवत्सेवानुकूल्यरूप पुंस्त्व जातमिति लीलायां प्रसादशक्तेः श्रुतिषु सत्त्वेन स्त्रीत्वविशिष्टशक्त्यवच्छिन्नश्रुतिः पुस्त्वविशिष्टवदनकर्त्री समानाधिकरणेत्यर्थः । तादृशं पुस्त्व टिप्पण्यां तदादाय वेदाः प्रमाणम्, शतं ब्राह्मणा इतिवदुपपाद्यम् । सामानाधिकरण्यं च भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वम् । 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति सूत्रेण वदन्नित्यत्र शता शाब्दबोधेपि सामानाधिकरण्यमुपपादयति । वरणविषय तनुम् । द्वितीयाया विषयार्थकत्वात् । अत्रैव श्रुतिर्वदन्निति प्रयोगः साधुः । अन्यथा मर्यादाभङ्गप्रसङ्गात् । भाष्यप्रामाण्याद्वैतादृशः प्रयोगः । वृणुत इत्यर्थ इति । न च सिद्धान्तान्तर एकव्यापकजीवपक्षस्योक्तत्वादवृतानामप्यात्मनां शरीरत्वेन वृतलभ्यालभ्यलाभापत्तिरिति शङ्क्यम् । अरूपवत्सूत्रसिद्धसिद्धान्तान्तरेपि वृतत्वाच्छेदेनालभ्यलाभाङ्गीकारात् । स्वमिति । आत्मीयम् । स्वामित्युक्ते स्त्रीत्वविशिष्टस्य स्यात्, तनुविशेषणत्वे तु भिन्नलिङ्गस्यादर्शनेन स्वामित्येव । सामान्ये नपुसकत्वस्या(स)गतिकगतित्वात् । प्राय इति । सिद्धान्तमुक्तावलिटीकाप्रामाण्यात् 'ज्ञानिभक्तौ चेद्विशेषतोऽनुगृह्णाति पुष्टिमार्गीयां भक्तिं प्राप्नुतः । आदाविति भक्त्या व्यवधानम्, तथापि नलकूबरमणिग्रीववत् कदाचित् तयाऽव्यवधानेपि साकारप्रकाशः । कर्मठस्य सुरज्येष्ठस्यासुरव्यामोहलीलासामयिकसाकारप्रकाशः, अतः प्राय इत्युक्तम् । एवकारो 'नैषा

१. हेतुत्वम् ।

प्रत्वेनात्मत्वेन च वृणुते, तद्विशिष्ट एव भोगान् भुङ्क्ते । अत एव तैत्तिरीयकोपनिषत्स्वपि 'ब्रह्मविदाप्नोति पर'मिति सामान्यतो ब्रह्मविदः परब्रह्मप्राप्तिमुक्त्वा, अग्रिमर्चा विशेषतोऽवदन् । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति परब्रह्मस्वरूपमुक्त्वा, 'यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'त्युक्तम् । एतद्यथा तथानन्दमयाधिकरणे प्रपञ्चितमस्माभिः ।

भाष्यप्रकाशः ।

यत्तु केचिदस्मिन् मन्त्रे 'यमेव परनात्मानमेष विद्वान् वृणुते प्राप्तुमिच्छति, तेन वरणेन एष परमात्मा लभ्यः, नान्येन साधनान्तरेण । नित्योपलब्धस्वभावत्वात् । कीदृशोऽसावात्मलाभ इति, उच्यते । तस्य एष आत्माऽविद्यासंछन्नः स्वां परां तनुमात्मतत्त्वस्वरूपं प्रकाशयति । प्रकाशे घटादिरिव विद्यायां सत्यामाविर्भवतीति मुण्डके व्याचक्रुः । यदपि काठके यमेव स्वमात्मानमेष साधको वृणुते प्रार्थयते तेनैवात्मना वरित्रा स्वयमात्मा लभ्यः ज्ञायते इत्येतत् । निष्कामश्चात्मानमेव प्रार्थयते । आत्मनैवात्मलाभ इत्यर्थः । कथं लभ्यत इति । उच्यते । तस्यात्मकामस्यैष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनुं स्वां स्वकीयाम् । स्वं याथार्थ्यमित्यर्थ इति । तत्रापि तनुपदवैयर्थ्यस्य दुर्वारत्वात् वरणीयवरित्रोरभेदाङ्गीकाराच्च व्याख्येयविरोधः स्फुट एव । किञ्च । गीतायां 'एवं सततयुक्ता य' इत्यर्जुनप्रश्ने, भगवता 'मय्यावेश्य मनो ये मा'मित्युत्तरेण, 'चतुर्विधा भजन्ते मा'मिति भजनमुपक्रम्यैव, 'ज्ञानी त्वात्मैव मे मत'मिति ज्ञानिभक्तस्यैवात्मकत्वकथनेन, 'तपस्विभ्योऽधिको योगी'ति सन्दर्भे शुष्कज्ञान्यपेक्षया योगिन उत्कर्षमुक्त्वा, 'श्रद्धावान् भजते यो मां स मे युक्ततमो मत' इति भक्तोत्कर्षकथने चासदुक्तार्थस्यैवोपोद्बलनाच्च तदसङ्गतम् । अतो विवरणपदस्य प्रकाशनार्थकत्वपक्षेपि तनुप्रकाशलिङ्गेन भक्तस्यैव वरणविषयत्वं निश्चीयत इति तेष्वेव स्वीयत्वं सिध्यतीति पूर्वोक्तप्रकारे न कश्चिद्दोष इति हृदिकृत्योक्तार्थदार्ढ्याय श्रुत्यन्तरमाहुः अत एवेत्यादि । तथाच यदि लाभपदार्थः प्रकाशनरूपः श्रुत्यभिप्रेतः स्यात्, तदास्यामृचि प्राप्तिपदार्थः कामभोगरूपो नोच्येत । अतो न पूर्वोक्तेऽर्थे विप्रतिपत्तव्यमित्यर्थः । एतच्छ्रुतावपि विप्रतिपत्तिश्चेत्, तदा पूर्वग्रन्थमवलोक्य सा निरसनीयेत्याशयेन आहुः एतदित्यादि । आनन्दमयाधिकरणे अक्षरादुत्तमस्य रसरूपस्यैव

रश्मिः ।

तर्केण मतिरापनेये'ति विरोधकम् । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इत्यादिश्रुतौ वाराइवाक्याद्भक्तिप्रवेशवत् वरणश्रुतावपि भक्तिप्रवेशस्य न्याय्यत्वेन तर्काभावाद्भूते । 'वृङ् सम्भक्तौ' क्र्यादिः संविभजनार्थ इति स नोपात्तः । ननु परेषामयमर्थः, न तु वैयाकरणानाम्, सम्यक् सेवारूपसर्वात्मभावः सम्भक्तिपदार्थोऽस्तु, श्रुतौ विकरणव्यत्ययोऽस्त्विति चेत् । न । भक्तिमार्गे यद्वरणं स्वीयत्वेनाङ्गीकाररूपमिति भाष्ये विकरणव्यत्ययानङ्गीकारात् । न चेदमप्रयोजकमिति वाच्यम् । 'आचार्यवान् पुरुषो वेदे'ति श्रुतेः । इच्छतीति । ज्ञानवान् इच्छात इति ज्ञानमनुमेयम् । य इच्छति, स यतिष्यत एव । इतीति । इमं प्रश्नरूपं हेतुं विचार्य श्रुत्योच्यते इत्यर्थः । प्रकाश इति । सति सप्तमी । घटादिरिति । पूर्वं विद्यमान एवात्मतत्त्वं प्रकाशयति, तद्वत् । घटादेरुपादानविषमसत्ताकान्यथाभावरूपविवर्तत्वात् । अभेदेति । ननु भवतामप्यभेदाङ्गीकारोऽस्त्येवेति चेत् । न । भावाद्वैतेन पटस्तन्तव इत्यभेदप्रत्ययेपि तन्तवः पट इत्यप्रत्ययात् तादृशभेदमादायोपपत्तेः । नन्वभेदमादाय पाक्षिको दोष इति चेत् । न । उपष्टब्धत्वादित्याहुः किञ्चेति । रसरूपस्येति । एतेनानन्दमयाधिकरणोक्तः प्राप्तिपदार्थः, न

भाष्यप्रकाशः ।

परशब्दार्थत्वेन निर्णीतत्वात् परमव्योमत्वेन चाक्षरस्य तद्धाम्नो निर्णीतत्वाद्वरणेनैव तत्प्राप्तेरपि विचारितत्वात्तथेत्यर्थः ।

ननु वरणश्रुतिः काठके 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वदे'ति प्रश्ने, 'सर्वे वेदा यत्पदमामनन्ती'त्यादिना, 'एतद्ध्येवाक्षरं ब्रह्मे'ति प्रकृत्य पठिता । मुण्डकेपि 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्य'मित्यक्षरमेवोपक्रम्य पठिता । एवं सति पुरुषोत्तमप्रसङ्गस्य कुत्राप्यदर्शनात् कथमत्रैवं भगवत्परत्वेन व्याख्यायत इति चेत् ।

अनवधाय वदसि । काठके सर्ववेदवेद्यत्वं परस्यैवोच्यते । तच्च वाच्यवाचकाभेदविवक्षया प्रणवे वक्तुमक्षरपदेन प्रणवं परामृश्य, तत्र ब्रह्मत्वमुपासनासाधनत्वाय विधीयते मन्त्रद्वयेन । ततो 'न जायते न म्रियते वे'ति मन्त्रद्वयेनोपासकस्वरूपमुक्त्वा, 'अणोरणीयान् महतो महीया'नित्यादिमन्त्रत्रयेण तस्य परस्यात्मनो विरुद्धधर्माश्रयत्वादिकमुक्त्वा, तस्य ज्ञानं कथमित्याकाङ्क्षायां 'नायमात्मे'ति पठ्यते । अतो नात्र तद्गन्धः । मुण्डकेपि प्रथमे मुण्डके 'यत्तदद्रेश्यमग्राह्य'मित्यादिना सर्वकारणत्वेनाक्षरं प्रस्तुतम्, द्वितीयेपि 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गा' इति मन्त्रेण तस्मात् सजातीयविजातीयसृष्टिमुक्त्वा, 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर' इति मन्त्रे पूर्वोक्तादक्षरात् परतः परोऽतिरिक्त उक्तः । तृतीयेपि 'द्वा सुपर्णे'त्यनेनान्तर्यामितया तमेव परामृश्य ततो 'जुष्टं यदा पश्यत्यन्यमीश'मित्यादिना तद्दर्शनफलमुक्त्वा, ततो 'ज्ञानप्रसादेने'त्यनेन निष्कलध्यानात्तद्दर्शनमुक्त्वा, ततो ज्ञानप्रसादेपि न स्वसा-

रश्मिः ।

तु व्यापनरूप इति ध्वन्यते । न च कामिनामालिङ्गने कामिन्यादिव्याप्तीच्छासत्त्वा'दश्नुत' इत्यत्र रसरूपत्वेपि व्याप्त्यर्थोऽस्त्विति वाच्यम् । 'लोकवत्तु लीलाकैवल्य'मिति सूत्रात् तावत्याः शरीरप्रतिबद्धाया व्याप्तेः स्वीकारात् । अनवेति । 'एतद्ध्येवाक्षर ब्रह्म, एतद्ध्येवाक्षर पर'मिति श्रुतौ ब्रह्मपरयोः शब्दवैलक्ष्याहितवैलक्षण्यमनवधाय । परस्यैवेति । अनिदमित्थतयेति शेषम् । ईक्षत्यधिकरण उपपादनादेवकारोऽवधारणे । न'न्वेतद्ध्येवाक्षरं ब्रह्मे'त्यनेन सर्ववेदवेद्यत्वमक्षरेपि श्रुत्योच्यते, तत्राहुः तच्चेत्यादि । प्रणव इति । 'नवीनभावजनक' इत्यादिगायत्र्यर्थकारिकातस्तादृशोऽर्थो ध्वन्यते । अकार उकारो मकारोऽर्धमात्रा चेत्येतच्चतुष्टयात्मके ब्रह्मरुद्रविष्णुकृष्णरूपे वाचक इत्यर्थः । विधीयते, नत्वारोप्यते । तथा च परस्येक्षत्यधिकरणे कृष्णस्य 'यतो वाचो निवर्तन्ते' इति श्रुतिप्राप्ताशब्दत्वं निषिध्यते तद्द्वारानिदमित्थतया सर्ववेदवेद्यत्व इतरत्र तु वर्तत एवेदमित्थतया सर्ववेदवेद्यत्वम् । श्रुतिश्च 'ॐमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षरं पर'मिति । पर कृष्णरूपम् । परपदार्थस्यानन्दमयाधिकरणे निरूपणात् । एतच्चादृश्यत्वाधिकरणे समन्वयाध्यायद्वितीयपादे निपुणतरमुपपादितम् । मन्त्रेति । 'एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षर परम् । एतद्ध्येवाक्षर ज्ञात्वा यो यदिच्छसि तस्य तत् । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बन ज्ञात्वा ब्रह्मलोके महीयते' इति मन्त्रद्वयेन । तस्य प्रणवार्धमात्राप्रतिपाद्यस्य । ज्ञानमिति । फलात्मकम्, न तु साधनात्मकम् । सर्वेति । तथा च सर्वकारणे निरङ्कुशजगज्जन्मादिकर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपलक्षणसङ्गत्या परमे ब्रह्माक्षरात्मकं प्रस्तुतमित्यर्थः । अतिरिक्त इति । गोकुले नित्यलीलाकर्ता । 'तानि परे तथा ह्याहे'ति व्याससूत्रात् । इत्नीति । शङ्करभाष्ये प्रतिपाद्यान्तराभावादिति भावः । छान्दोग्ये सामशाखायां काठकं यजुःशाखायां मुण्डक शाखान्तरम् ।

किञ्च । पुरुषोत्तमलाभे हेतुभूतं तु भक्तिमार्गे यद्वरणं स्वीयत्वेनाङ्गीकाररूपं

भाष्यप्रकाशः ।

मर्थ्येन पश्यति, किन्तु तत्सामर्थ्येनैवेत्याशयेन 'नायमात्मे'त्यादिकं पठ्यते । तेनोभयत्रापि पुरुषोत्तम एव प्रकृत इत्यनवद्यम् ।

एतदेव गीतायामुपबृंहितम् । 'द्वाविमौ पुरुषौ लोक' इत्यारभ्य, 'प्रथितः पुरुषोत्तम' इत्यन्तेन ।

ननु तथापि शाखान्तरस्थस्य वाक्यस्य कथमेतच्छेषत्वमिति चेत्, ऐकार्थ्यादिति ब्रूमः । 'हानौ तूपायने'ति सूत्रे, कुशाच्छन्दःस्तुत्युपगानदृष्टान्तेषु भाल्लविनां 'कुशा वानस्पत्या स्थिता मा पाते'ति निगमस्थवाक्यशेषत्व'मौदुम्बर्यः कुशा' इति शाट्यायनिवाक्ये सर्वैर्भाष्यकारैरादृतम् । जैमिनिना च बाधलक्षणे 'अपि तु वाक्यशेषः स्यादन्याय्यत्वात् विकल्पस्य विधीनामेकदेशः स्या'दिति सूत्रे 'नानुयाजेष्वि'ति वाक्यस्य 'आश्रावयाऽस्तु श्रौषड् यज ये यजामहे वष'डिति-दूरस्थवाक्यशेषत्वमादृतम् । तस्मान्नात्र शङ्कालेशः ।

ननु तथापि तेषु तेषु भक्तेषु वरणमपि तत्तदनुरूपमनेकविधमिति रसमार्गीयमेवात्र कथं ग्रहीतुं शक्यत इत्याकाङ्क्षायामाहुः किञ्चेत्यादि । तथाचाग्रिमश्रुत्या तथावसीयत इत्यर्थः । श्रुतिस्तु

रश्मिः ।

कुशेति । 'कुशा च छन्दश्च स्तुतिश्चोपगानं च कुशाच्छन्दस्तुत्युपगानानि तेषु तद्वत् । सप्तम्यन्ताद्वतिः । अयं सूत्रैकदेशस्य भाष्यकाराणां समासः । भाल्लविनामिति । एतेषां क्वचित् प्रसिद्धा शाखा । कुशेति । 'भो कुशा यूयं वानस्पत्या वनस्पतियोनयः ख्याता इत्थंभूता यूयं मा मां पात रक्षते'त्यर्थः । शाट्येति । खाण्डिकेयानां पञ्चभेदा भवन्ति । कालेताः शाट्यायनी हिरण्यकेशी भारद्वाज्यापस्तम्बी चेति । शाट्यायनिनस्तैत्तिरीयशाखास्थाः । छन्द आदिषु तु श्रुत्यन्तरगतविशेषान्वयो वक्ष्यते । यथा 'नवाक्षराणि छन्दांस्यासुराणि, अन्यानि दैवतानि, तेषां क्वचित् छन्दोभिः स्तुवते' इत्यत्राविशेषप्राप्तौ 'देवछन्दांसि पूर्वाणी'तिपैङ्ग्याम्नानाद्विशेषग्रहः प्रतीयत इत्यर्थः । यथातिरात्रे षोडशिनो ग्रहस्याङ्गभूतं स्तोत्रं कदेति छान्दोगादीनामाकाङ्क्षायामुदयसमयाविष्टे सूर्ये षोडशिनः स्तोत्रमिति समयाध्युषिते सूर्ये इत्यार्चश्रुतेः कालविशेषग्रह इत्यर्थः । ऋचो धीयत इत्यार्चाः । 'यथार्त्विज उपगायन्ती'ति विशेषश्रुतेर्नाध्वर्युरुपगायतीति श्रुत्यन्तरादध्वर्युभिन्ना ऋत्विज उपगायन्तीत्यर्थविशेष इति भाल्लविनः । ननु भवद्भिः किं विचारितमित्यत आहुः जैमिनिनेति । इदं सूत्र दशमस्याष्टमे पादेऽस्ति । पर्युदासाधिकरणसिद्धान्तसूत्रम् । सूत्रार्थस्तु, यज्ञमात्रे ये यजामहे इति प्रयोक्तव्यमिति श्रुतम् । नानुयाजेषु ये यजामह करोतीत्यपि श्रुतम् । तत्र नकारस्य निषेधार्थकत्वेऽतिरात्रे षोडशिग्रहणाग्रहणयोरिवानुयाजेषु यज्ञत्वाविशेषात् प्रयोक्तव्यम्, निषेधान्न प्रयोक्तव्यमिति विकल्पः स्यात्, तस्यान्याय्यत्वाद्ये यजामहविधेरेव नानुयाजवाक्यमेकदेशः स्यात्, पर्युदासवृत्त्या विधिवाक्यशेषः स्यादिति यावत् । तथा चानुयाजभिन्नेषु यागेषु 'ये यजामह' इति प्रयोक्तव्यमित्येकवाक्यतेति । ननु ये यजामहे वषडिति वाक्ये 'ये यजामहे' इति प्रयोक्तव्यमिति कथं श्रुतमिति चेत् । न । नानुयाजेष्विति निषेधस्य प्राप्तिपूर्वकत्वेनानुयाजसम्बद्धेन नेत्यनेन शब्देनानुयाजव्यतिरिक्तेषु 'ये यजामहः कर्तव्य' इति श्रुत्यर्थे ये यजामहस्य कर्तव्यतानुयाजेषु प्राप्तानुयाजव्यतिरिक्तयागेषु प्राप्यत इति ये यजामह इति प्रयोक्तव्यमित्यस्य लाभात् । न च नेत्यर्थशब्दः करोतिना सम्बध्नात्विति वाच्यम् । तदा ये यजामहं न करोतीत्येवं प्रतिषेधः स्यात्, तस्यानिष्टत्वात् । पर्युदासः सदृग्ग्राही तदर्थको नञ्शब्दः । करोतीत्यस्याधिकरणमालायां कर्तव्य इति

बलस्य तथात्वं च न वदेत्। एतादृशस्य हृदि भगवत्प्राकट्यं भवतीत्याह 'एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधामे'ति। अस्यार्थस्त्वेष आत्मा आत्मनोऽप्यात्मा पुरुषोत्तमः ब्रह्म अक्षरब्रह्मात्मकं धाम विशते इति। धामपदं पुरुषोत्तमस्याक्षरं ब्रह्म सहजं स्थानमिति ज्ञापनार्थमुक्तम्, अन्यथा न वदेत्। तेन तद्धृदये स्वस्थानमाविर्भावयित्वा स्वयं तत्र प्रकटीभवतीति

भाष्यप्रकाशः।

दीनां जीवकृतयावत्साधनोपलक्षकत्वे सिद्धे बलाभावानुपपत्तितादवस्थ्येऽस्मिन् बलाभावनिषेधमुखेन बलहेतुताबोधनात्तद्बलं लौकिकमार्यादिकबलाभ्यामतिरिक्तं भगवदनुग्रहजन्यं पुष्टिमार्गीयमेव ग्राह्यम्। तच्चोक्तरीत्या भक्तिरूपमेवेत्यतः सैवात्र गृह्यते। बलपदस्य सामर्थ्यसामान्ये शक्तत्वेऽप्युक्तयुक्त्या तद्विशेष एव पर्यवसानादित्यर्थः। एवञ्चैतदग्रे प्रमादस्यालिङ्गतपसश्च यो निषेधः, तेनाप्रमादस्य सलिङ्गतपसश्च सहकारिता बोध्यते। तत्राप्रमादो भगवदिच्छानुरूपसेवाकरणादिरूपः। सलिङ्गं तपश्च सर्वात्मभावसहितविरहभावरूपं ज्ञेयम्। एतदुत्तरार्धमवतार्य व्याकुर्वन्ति एतादृशस्येत्यादि। तद्धृदय इति। तस्यैवं यतमानस्य हृदये। ननु भवत्वेवं श्रुतिद्वयार्थः, तथापि पूर्वसूत्राभ्यां यदस्यात्मप्रकरणादिना जीवब्रह्माभेदपरत्वमाशङ्कितम्, तस्य कथं परिहार इत्याकाङ्क्षायां

रश्मिः।

इत्यत्र यमेव वृणुते तेन लभ्य इत्यर्थः, तदुक्तम्, 'केवलेन हि भावेने'त्युपक्रम्य, 'येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'ति, तस्मान्नायमवकारान्वय इति शङ्क्यम्। एवमन्वये पुष्टिभक्तिमात्रसङ्ग्रहे मार्यादिकानां भक्तानामसङ्ग्रहापत्तेः। नन्वेवमेव विवक्षितं सिद्धान्तमुक्तावलीटीकायाम्—'ज्ञानिभक्तौ चेद्विशेषतोऽनुगृह्णाति, तदा पुष्टिभक्तिं प्राप्नुतः आदा'विति ग्रन्थात्, वक्ष्यन्ति च 'फलमत उपपत्ते'रिति सूत्रभाष्ये इति चेत्। न। येन केनापि लभ्य इति प्राप्तौ तदर्थं वृणुत इत्यस्यावश्यवक्तव्यत्वेन तत्रान्वयौचित्यात्। न चैवमपि वरणकर्त्रान्वयोस्तु, तावतापि पुष्टिभक्तिप्राप्तेर्वृणुत इत्यस्य 'वरण कुरुत' इत्यर्थाद्वरणरूपप्रकृत्येकदेशान्वयोऽनुचित इति शङ्क्यम्। यमेव वरणमेव वरणकर्त्रैवेति त्रेधान्वयेपि वरणस्यैव मुख्यत्वात्। 'वरणमात्रस्य हेतुत्वमुक्त्वे'ति भाष्यात्। **अस्मिन्निति**। 'नायमात्मा बलहीनेन लभ्य' इति वेदे। **उक्तेति**। अन्यथानुपपत्तिरूपकारणकजन्यावलम्बभक्तिरूपमेवेत्याकारकप्रमेत्युक्तरीत्येर्थः। **उक्तेति**। भाष्योक्तयुक्त्येत्यर्थः। 'पुनर्बलाभावनिषेधं न कुर्यात्', 'बलस्य तथात्वं न वदे'दित्यन्यथाज्ञानरूपयेत्यर्थः। 'स्वामिनः फलश्रुतेरित्यात्रेय' इति सूत्रे भाष्ये बल सर्वात्मभाव इत्यात्रेयः। **बोध्यत** इति। 'भक्त्या जानाति चाव्यय'मित्यादौ भक्तौ कारणता, इतरयोः भक्त्या सहकारितेत्यर्थः। प्रमादोऽनवधानता, तदभावोऽप्रमादः स ईदृशो विवक्षित इत्याहुः **तत्रे**त्यादि। सेवाकरणकथास्वस्थित्यादिरपि प्रमादकः। भगवदिच्छानवधानात्। अतो विशेषणं **भगवदिच्छेति**। मतान्तरीयोऽर्थो लौकिकपुत्रपश्वादिविषयासङ्गनिमित्तात् प्रमादादिति 'शमदमाद्युपेतः स्या'दिति सूत्रे स ज्ञानमार्गीयः। भजनस्य द्वितीयदलमाहुः **सलिङ्गमिति**। 'भक्त्याहमेकया ग्राह्य' इति वाक्ये एकपदेन मुख्यभक्तेरुक्तेः। भाष्येऽप्यादिपदेनास्या अप्युक्तेः। अतो विशेषणं **सर्वात्मभावेत्यादि**। अत्र सर्वस्मिन्नात्मभाव इति समासः स्फूर्त्या विवक्षितत्वात् सा लिङ्गं भवति, तया तपोरूपविगाढभावानुमानात्। विगाढभाववान् स्फूर्तेरिति। इतरद्व्याख्यानं तपोत्र ज्ञानं लिङ्गं सन्यास इति। तत्तु ज्ञानस्य सञ्चारिभावत्वेनात्मलाभाहेतुत्वेन सन्यासस्य 'दर्शनाच्चे'ति सूत्रे व्रजसीमन्तिनीनामुदाहरणेन तासां त्यागोऽङ्गमिति सर्वात्मभावाङ्गत्वेन पूर्वं सिद्धत्वात् ज्ञानमार्गीयम्। 'सोऽध्यक्ष' इति सूत्रे भाष्येऽभ्युप-

ज्ञाप्यते । प्रकृते श्वेतकेतूपाख्याने परोक्षवादेन ब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते । अग्रे तु न ह्येतावतैवाधिष्ठानात्मकाक्षराविर्भावो भवति, पुरुषोत्तमस्य वा । तथा सति ज्ञानिनां सर्वेषां परप्राप्तिः स्यात्, नत्वेवम्, 'भक्त्याहमेकया ग्राह्य' इत्यादिवाक्यैः, किन्तु भगवदनुग्रहेण भक्तसङ्गेन च भक्तौ सत्यामिति ज्ञापनाय भक्त एव तद्बोधाधिकारीत्यपि ज्ञापयितुं भक्तस्य नारदस्य भगवदावेशयुक्तस्य सनत्कुमारस्य च संवाद उक्तः । तत्रात्मशब्देन पुरुषोत्तम उच्यते । भक्तिमार्गे तु निरुपधिस्नेहविषयः स एव यतः । स तु सर्वात्मभावैकसमधिगम्य इति सर्वात्मभाव एव विद्याशब्देनोच्यते । परमकाष्ठापन्नं यद्वस्तु, तदेव

भाष्यप्रकाशः ।

पूर्वस्यास्य च तात्पर्यमाहुः प्रकृत इत्यादि । प्रकृते छान्दोग्यस्य आत्मवाक्ये श्वेतकेतूपाख्याने, अन्यार्थमन्यकथनरूपो यः परोक्षवादस्तेन जीवस्याक्षरब्रह्माभेदबोधनेन पुरुषोत्तमाधिष्ठानत्वयोग्यता ज्ञाप्यते, अग्रे तदग्रिमप्रपाठके तु 'न ह्येतावते'त्युक्तरीत्या योग्यतामात्रेण न सः, किन्तु भगवदनुग्रहभक्तसङ्गाभ्यां जातायां भक्तौ स इति ज्ञापयितुं तयोः संवाद उक्तः, तस्य च संवादस्य भक्तिमार्गीयलिङ्गवत्तया तथात्वात् तत्रत्यात्मशब्देन तन्मार्गे निरुपधिप्रीतिविषयः पुरुषोत्तम एवोच्यते, न जीवात्मा, नाप्यक्षरब्रह्म, पुरुषोत्तमस्तु सर्वात्मभावैकप्राप्य इति स एव सर्वात्मभावो विद्याशब्देनोच्यते । किञ्च, 'परमकाष्ठापन्न'मित्याद्युक्तरीत्या वेदान्तस्यापि पुरुषोत्तम एव तात्प-

रश्मिः ।

गमादिभ्य' इत्यत्रादिपदात् भगवद्वशीकरणसमर्थः स्नेहः । प्रभ्वनिङ्गितार्थत्यागस्तदनुरूपं भजनं चाप्रमादसलिङ्गतपो बलपदार्थत्वेन व्याकृतम् । तत्र भगवद्वशीकरणसमर्थः स्नेहो बलं सर्वात्मभावपदवाच्यमुख्यभक्तिः । प्रभ्वनिङ्गितार्थत्यागस्तदनुरूपं भजनं च बलमप्रमादः । इङ्गितपदेन कोशे काल उक्तः, अत्र त्विच्छोक्ता । कोशे कियतां शब्दानां नामनारायणादिकोशेषु पाठात् । **पूर्वस्ये**ति । जीवब्रह्माभेदपरत्वस्य । **परोक्षे**ति । आनन्दमयाधिकरणे विवृतः । **पुरुषोत्तमे**ति । भक्तिरसत्वात् स्पष्ट नोक्तम् । **भगवदि**त्यादि । भक्तिहेतौ स्पष्टम् । **अग्रे त्वि**त्यादिभाष्यं विवृण्वन्ति स्म **अग्रे तदि**ति । **भक्ते**ति । ननूपासनामार्गीया भक्तिः 'सत्सङ्गलब्धया भक्त्या मयि मां य उपासिते' इति वाक्यादिति चेत् । न । उपासनामार्गस्य गोपालतापिनीय उक्तवात् गोपालतापिनीयस्य सर्ववेदान्तप्रत्ययाधिकरणादावुदाहृतत्वात् पाठक्रमस्य भक्तिनिरूपणोत्तरमुपासनानिरूपणात् तथात्वात् । यद्वा । मुख्यभक्तिप्रकरण उपासनाया अयुक्तत्वात् 'सत्सङ्गान्मामुपागता' इति पुष्टिप्राकरणिकवाक्योक्तसत्सङ्गो गृह्यते, अत एव सत्सङ्गपदं विहाय भक्तसङ्गपदम् । **स त्वि**त्यादिभाष्यं विवृण्वन्ति स्म **पुरुषोत्तम** इति । **तथे**ति । उक्तज्ञापकत्वात् । **तयो**रिति नारदसनत्कुमारयोः । **तत्रे**त्यादि भाष्यं विवृण्वन्ति स्म **तस्य चे**त्यादिना । **यत** इति भाष्यीयपदस्यार्थोऽयम् । विद्यापदमक्षराधिगमके मुण्डके उक्तं पुरुषोत्तमाधिगमके सर्वात्मभावपदे विद्यापदं कुत इत्यपेक्षायां **परमे**त्यादिभाष्य विवृण्वन्ति स्म **किञ्चे**ति । इत्यादिवक्ष्यमाणभाष्योक्तरीत्या । **तात्पर्य**मिति । 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतौ हीदमित्थतया निरूपण 'यतो वाच' इति श्रुतिविरुद्धम्, अतोऽनिदमित्थतया 'सर्वे वेदा' इत्यादि । अतः परमकाष्ठापन्ने पुरुषोत्तमाख्ये वस्तुनि तात्पर्यवृत्तिः, अन्यत्राभिधा । तथा च **प्रतिपाद्य**मिति भाष्यं तात्पर्यवृत्त्येदमित्थतया प्रति-

: वेदान्तेषु मुख्यत्वेन प्रतिपाद्यम् । अक्षरब्रह्मादिकं तु तद्विभूतिरूपत्वेन तदुप-
।गित्वेन मध्यमाधिकारिफलत्वेन च प्रतिपाद्यते । तेन तत्र विद्याशब्दप्रयोग
ौपचारिकः, सर्वात्मभाव एव मुख्यः । युक्तं चैतत् । अक्षरविषयिण्या विद्यायाः
काशात्तत उत्तमविषयिण्यास्तस्या उत्तमत्वम् । एवं सति पूर्वप्रपाठकस्याक्षर-
करणत्वादुत्तरस्य पुरुषोत्तमप्रकरणत्वात्त्वद्धेत्वसिद्धिश्च, अत उक्तन्यायेन विद्यै-
ग्रिमप्रपाठके निरूप्यते, न तु पूर्वोक्तात्मज्ञानप्रकारविशेषः । अत्र हेतुमाह

भाष्यप्रकाश. ।

् । यद्यपि मुण्डके 'अथ परा यया तदक्षरमधिगम्यत' इत्यक्षरविद्यायाः परविद्यात्वमुक्तम्, तथा-
ग्रे 'अक्षरात् परतः पर' इति पुरुषस्य ततः परत्वश्रावणात्तद्विद्यायामेव परविद्यात्वं विश्राम्यती-
क्षरविद्यायां नान्तरीयकतया विद्याशब्दप्रयोगः परत्वोपचारादेवेति सर्वात्मभाव एव विद्यापदप्र-
।गो मुख्यः । तस्या एव च विद्याया उत्तमत्वम् । एवं सत्युभयत्र प्रतिपाद्यभेदेन प्रकरणभेदात्त्व-
कस्य प्रकरणैक्यस्वरूपस्य भवदभिमतात्मविद्याप्रकारविशेषतासाधकस्य हेतोरसिद्धिरित्यस्मदभिप्रेत-

रश्मिः ।

द्यार्थकम् । पुरुषोत्तमे तात्पर्यवृत्तिः इति भक्ति(मार्तण्डे स्पष्टम्) ....। तदुक्तं 'भगवान् ब्रह्म
त्स्न्येने'त्यत्रात्मपद पुरुषोत्तमपरमिति । श्रावणादिति । न च शङ्करभाष्योक्तोऽर्थोऽस्त्विति शङ्क्यम् ।
तायामक्षरपदस्य तत्राशक्तेः । ननु पुराणमत भवदुक्तार्थेऽक्षरात् परत्व श्रीभागवते ततः परत्वं वाराहे
ते चेत् । न । अदृश्यत्वाधिकरणोक्तश्रुत्या 'तानि परे तथा ह्याहे'तिसूत्रोक्तश्रुत्या चास्य विषयस्
ौतत्वात् । कियतामर्थानां पौराणिकसदृशत्वात् । अक्षरेत्यादिभाष्य विवृण्वन्ति स्म यद्यपीति ।
त्र भाष्ये तद्विभूतिरूपत्वेनेत्यादि । तत्र विभूतिरूपत्वमुत्कृष्टत्वे सत्यवरत्वरूपमुक्तश्रुतावेव विभू-
निरूपणाध्याये 'अक्षराणामकारोऽस्मी'ति 'अकारो विष्णु'रित्यन्यत्र कोशादौ । अदृश्यत्वाधिकरणोक्त-
।)स्य साधिष्ठानत्व उपयोगित्वेन 'अक्षरधिया'मिति सूत्रोक्तरीत्या मध्य(म)ाधिकारी ज्ञानाधिकारी तस्य
लत्वेनेति त्रयाणां तृतीयान्तपदानामर्थान्वयः । विश्राम्यतीति । आधिदैविकादिभेदेन विश्राम्यति ।
क्तमित्यादि । विषयिण्या इत्यन्तभाष्यार्थः । एतेन भाष्यीयाक्षरब्रह्मादिकमित्यादिपद व्याकृतम् ।
न्तरीयकेति । गौणतया । परत्वोपचारः सिंहो माणवक इतिवत् । उत्तमत्वमिति । विद्यानामनि-
त्वादुत्तमविषयिण्या उत्तमत्वमुचिततरमेव । तेन तत्रेति भाष्यार्थमाहुः इत्यक्षरेति । इतीति तेन
ार्थकः । सर्वात्मभावसमासो लक्षणश्रुत्युक्तः प्रसिद्धः । 'नातः परतरा विद्ये'ति निरोधलक्षणवाक्यात् ।
त्तरीयशीक्षायां 'अथाधिविद्य'मित्यादि आयुष्ये अव्यय विभक्तीतिसूत्रेणाव्ययीभावः । विद्यास्विति
ग्रहः । आचार्यः पूर्वरूपम् । आचार्यः सनत्कुमारः । अन्तेवास्युत्तररूपम् । अन्तेवासी नारदः । विद्या
न्धः । विद्या सर्वात्मभावः । प्रवचनंसन्धानम् । प्रवचनं प्रपाठकः । विद्या प्रायपाठपठितत्वाच्च
द्या । एवं सतीत्यादिभाष्यमवतारयामासुः एवं सतीति । प्रतिपाद्येति । प्रतिपाद्येत्यादिकं
तत्रे द्वितीयाध्यायेऽस्ति । हेतोरिति । प्रपाठक आत्मविद्याप्रकारविशेषवान् प्रकरणैक्यात्, नात्मवि-
प्रकारविशेषवान् प्रकरणभेदादिति सत्प्रत्यनुमानेन साध्यसाधकत्वेनासिद्धिः । न चासिद्धिरूपहेत्वाभासः-
र्थः शङ्क्यः । 'प्रकरणभेदा'दिति भाष्यप्रकाशेनास्य हेतोः सत्प्रतिपक्षत्वस्फोरणात् । अस्मदिति ।
स्मदभिप्रेतः सर्वात्मभावो विद्योच्यते निरूप्यते उक्तन्यायेन प्रकृतसूत्रेण प्रमाणेन । एवकारेण
नु प्रसिद्धा ब्रह्मविद्योपनिषदुक्ता विद्याधिकरणविषयवाक्यमस्तु, स्पष्टत्वात्, किमनेन प्रपाठ-

निर्धारणादिति । 'सुखं त्वेव विजिज्ञासितव्य'मित्युक्त्वा, सुखस्वरूपमाह 'यो वै भूमा तत्सुखम्, नाल्पे सुखमस्ति, भूमैव सुखम्, भूमा त्वेव विजिज्ञासितव्य' इति । अक्षरपर्यन्तं गणितानन्दत्वात् पुरुषोत्तमस्यैवानन्दमयत्वेन निरवधिसुखात्मकत्वात् स एव भूमा, तस्यैव विजिज्ञासितव्यत्वेन निर्धारणादित्यर्थः । भूम्नो

भाष्यप्रकाशः ।

मेवात्रोच्यते, न तु त्वदुक्तमित्यर्थः । एवं प्रकरणभेदे सत्यतिदेशोऽप्यकिञ्चित्कर एव । अतिदेशमात्रेण तदवान्तरभेदत्वस्य क्वाप्यसिद्धत्वादिति । हेतुं व्याकुर्वन्ति सुखं त्वेवेत्यादि । तथाच पूर्वत्र 'सदेव सौम्ये'ति सद्रूपमात्मानं प्रकृत्य तदभेदज्ञानमुपदिष्टम् । इह तु भूमपदोक्तं निरवध्यानन्दरूपं जिज्ञास्यत्वेन निर्धारयति । यद्यत्र पूर्वप्रकृत आत्मा बोधनीयः स्यात्, तदात्रापूर्वं भूमशब्दं न वदेत्, वदति तु भूमपदम् । अतः शब्दान्तरेण पूर्वस्मादात्मनः सकाशाद्भूमपदोक्तस्य भेदे सिद्धे विषयभेदान्नात्र पूर्वोक्तं ज्ञानमुच्यते, किन्तु मुख्या सर्वात्मभावरूपैव विद्योच्यते । यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिश्रावणात्त्रयाणामविनाभावः, तथापि सावधिनिरवधित्वाभ्यामानन्दस्य भेदात् पूर्वत्र गणनापरिच्छिन्नस्यैव तस्य सिद्धिः, न तु निरवधेः । अतो भूमपदेनात्र तस्यैव निर्धारणात् तथेत्यर्थः । ननु भूमात्र जिज्ञास्यत्वेनोच्यते, तावता सर्वात्मभावः कथं लभ्यत इत्याकाङ्क्षायामाहुः भूम्न इत्यादि । तथाच भूमलक्षणस्थेन 'यत्रे'तिपदेन पूर्वोक्तरीत्या भूमज्ञानसत्तासूच-

रश्मिः ।

केने'ति शङ्काव्यवच्छेदः । सन्दिग्धानामेव श्रुतिवाक्यानामधिकरणविषयवाक्यत्वात् । **अतिदेशेति** । 'अतिदेशाच्चे'ति सूत्रोक्तः । तदिति । ज्ञानप्रकारविशेषरूपस्य । भेदपदं विशेषवाचकम् । 'भेदो द्वैधे विशेषे स्या'दिति विश्वात् । प्रपाठको ज्ञानप्रकारविशेषप्रतिपादकोऽतिदेशादिति । ज्ञानप्रकारावान्तरभेदो विद्यतेऽस्य प्रतिपाद्यत्वेन स प्रपाठकः ज्ञानप्रकारावान्तरभेदस्तस्य भावस्तत्त्वम् । **क्वाप्यसिद्धत्वादिति** । ननु वैकृताङ्गेषु यत्रातिदेशो वर्तते, तत्र वैकृताङ्गत्वेन ज्ञानप्रकारविशेषो वर्तते एव, उक्तानुमाने च वर्तते, अतः कुत उच्यते क्वापीति चेत् । न । अतिदेशमात्रेणेत्युक्तेः । तथाहि । सर्वात्मभावनिरूपकत्वे प्रपाठकस्य सिद्धे प्रपाठको न ज्ञानप्रकारावान्तरभेदप्रतिपादकः, अतिदेशादिति पूर्वोक्तहेतोर्विरुद्धत्वात् साध्याभावसाधको हेतुर्विरुद्ध इति । तथा विकृतावतिदेशो वर्तते, तत्रातिदिष्टानामेव वैकृताङ्गत्वेन ज्ञानप्रकारविशेषाभावात् । विकृतावुद्दिष्टानामङ्गानामपि वैकृतत्वेन ज्ञानात् । तत्र चातिदेशाभावात् । **हेतुमिति** । अन्यहेतूक्तेः सौत्रं हेतुमित्यर्थः । **तथा चेति** । पूर्वत्रप्रपाठके । कृष्णस्य सदानन्दत्वादानन्दांशमाहुः सदंशस्योक्तत्वात् **इहेति** । **पूर्वेति** । 'स आत्मा तत्त्वमसि श्वेतकेतो' इत्येवं पूर्वप्रपाठके प्रकृत आत्मा । **अपूर्वमिति** । न पूर्वप्रपाठकेऽभिधायकत्वेनास्तीत्यपूर्वो भूमशब्दस्तम् । **किन्त्विति** । एवकारेणान्यविद्याव्युदासः । यथा 'कर्ण एव दाते'त्यत्र । न च विद्यापदं ज्ञानसामान्यवाचकमित्युक्तत्वात् ज्ञानकाण्डत्वाच्च कथं सर्वात्मभावो विद्येति चेत् । न । मुख्यभक्तेरपि सर्वात्मभावरूपायाः छान्दोग्ये विद्याप्रायपाठपठितत्वात् ज्ञानकाण्डपठितत्वाच्च विद्यात्वमविरुद्धम् । भक्तिप्रायपाठपठितत्वादर्चनस्य कर्मणो भक्तित्वमिव । अक्षरेत्यादिभाष्यमवतारयांबभूवुः **यद्यपीति** । **तस्य** आनन्दस्य । **तस्यैव** निरवध्यानन्दस्यैव । तथा तत्प्रापिका सर्वात्मभावरूपप्रकारिकैव विद्योच्यते, 'फलमत उपपत्ते'रिति सूत्रे सर्वात्मभावस्यैव तत्प्रापकत्वोक्तेः । **भूमेति** । 'आनन्दमयोऽभ्यासा'दितिसूत्रोक्तः । 'पुरुषोत्तमस्यैवे'त्याद्युक्तभाष्यात् । **सर्वात्मेति** । पूर्वोक्तः । **पूर्वेति** । लिङ्गभू-

लक्षणमग्रे उच्यते 'यत्र नान्यत् पश्यती'त्यादिना । यस्मिन् ज्ञाते सति नान्यत् पश्यतीत्यर्थः । तथा सति सर्वात्मभाववतः प्रभुदर्शने सत्यपि लीलोपयोगिवस्तुदर्शनादिकमनुपपन्नमिति शङ्का तु 'तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणा' इत्यादिना निरस्ता वेदितव्या । तैः सह लीलां चिकीर्षतः प्रभुत एव सर्वं सम्पद्यते, न तु भक्तसामर्थ्येनेति भावेन तदुक्तेः ॥ ४७ ॥

भाष्यप्रकाशः ।

नात्तज्ज्ञानरूपस्य सर्वात्मभावस्य लाभ इत्यर्थः । ननु भूमलक्षणे तदितरदर्शनं निषिध्यते, सर्वात्मभाववतां तु तत् दृश्यते इति कथं तेन तल्लाभ इत्यत आहुः तथा सतीत्यादि । तथा सतीति । सर्वत्र भूमदर्शने सति । तैः सहेति । प्राणादिभिर्धर्मैः सह । तथाच तादृशलीलोपयोगिपदार्थदर्शनं प्रभुसामर्थ्यकारितम्, भगवदिच्छाया एव तथात्वात्, न तु स्वकृतम्, अतस्तेषां भगवदेकद्रष्टृत्वं निर्बाधम्, अतः सुखेन तल्लक्षणात्सर्वात्मभावलाभ इत्यर्थः ॥ ४७ ॥

रश्मिः ।

यस्त्वसूत्रोक्तरीत्या । भूम्नेति । यत्रेति सति सप्तम्या दर्शनादिविशेषे व्याख्याते भूम्नो ज्ञानं चाक्षुषादित्वस्य सत्तासूचनात् । तज्ज्ञानेति । तस्य भूम्नो ज्ञान भूमा ज्ञायतेऽनेन तत् तद्रूपस्य । **लाभ** इति । **यत्रेति** भूमलक्षणश्रुतौ 'भगवद्रूपत्वात् सर्वात्मभावस्ये'ति भाष्यादेकरूपत्वाल्लाभ इत्यर्थः । ननु 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्मे'ति श्रुतेर्ब्रह्मैतादृक्, स भूमा सर्वात्मभावस्तु सर्वोप्यात्मनो भावरूप आनन्दधर्म इति कथमुभयोरेकरूपतेति चेत् । न । प्रकाशाश्रयन्यायेनैक्यात् । तथा च भूमाधिकरणभाष्यं 'भावशब्दस्यापि सर्वत्वात् भगवति वृत्तेरदोष' इति । मन्प्रत्ययार्थस्य भावत्वेन भाववाचकशब्दस्यापीत्यर्थः । ननु लक्षणसङ्गमन कथम्, इत्थम् । भूम्नि स्पष्टत्वात् सर्वात्मभाव उच्यते । यत्रेति यच्छब्दार्थस्य भूमत्वेप्यानन्दमयत्वात् तस्य स्वरूपात्मकात्मना ग्रहणम्, 'स्वयमेवात्मनात्मान वेत्थ त्व पुरुषोत्तम' इति वाक्यादानन्दमयत्वे सर्वात्मभावस्य यच्छब्दार्थता । ननु पृथगेव लक्षण कुतो न कृतमिति चेत् । न । 'उत्तमश्लोकजनेषु सख्य'मिति वाक्यात् । अत्र शास्त्रार्थरूपभगवान् भक्तसवलित एव फलतीत्येकलक्षणलक्षितत्वम् । इद पुष्टिमार्गीयमोक्षनिरूपणे उपपादितम् । ननु निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपं ब्रह्मलक्षणं कथम् । एतस्यैव जिज्ञास्यत्वेन 'अथातो ब्रह्मजिज्ञासे'त्यत्राप्यस्यैव ब्रह्मपदार्थत्वात् । अरूपवत्सूत्रेप्येव प्रतिपादितमिति विद्वन्मण्डने स्पष्टम् । 'यदेकमव्यक्तमनन्तरूपमि तिश्रुतेः । सर्वात्मभावे यथायोग्य . . ... । **तदितरेति** । भूमेतरेत्यर्थः । सुषुप्ताविव । **तत्** भूमेतरत् । **तेनेति** । भूमपदेन सर्वात्मभावस्य लाभः दर्शनसहितस्य कथमित्यन्वयः । **तथेति** । एतस्यैव विवरणं 'प्रभ्वि'त्यादिभाष्ये भाष्यत्वात् स्वपदानि वर्णितानि । **भाष्ये । अनुपपन्न**मिति । 'नान्यत् पश्यती'तिश्रुतेः । **प्रकृते । स्वकृत**मिति । आत्मीयभक्तकृतम् । लीलाविष्करणमात्रं भक्तेच्छाकृतम् । 'अचलत्वं चापेक्ष्ये'ति सूत्राभासात् । यद्वा । 'न तु भक्तसामर्थ्येने'(ति)भाष्ये भक्तबलं निषिद्धम्, न तु भक्तेच्छा, तेन नाचलत्वसूत्राभासविरोधः । **भगवदित्यादि** । स्वेच्छाविर्भावितलीलोपयोगिपदार्थकभगवदेकद्रष्टृत्वमित्यर्थः । तथा च स्वेच्छाविर्भावितलीलोपयोगिपदार्थेऽन्तरदर्शनादिकं 'नान्यत् पश्यती'त्यादिना निषिध्यते इति भाव । **तदित्यादि** । तस्य भूम्नो लक्षणात् तदितरदर्शनरहितात् तदितरदर्शनरहितसर्वात्मभावलाभः सुखेनेत्यर्थः ॥ ४७ ॥

---

१. आत्मन ।

दर्शनाच्च ॥ ४८ ॥

दृश्यते च सर्वात्मभाववतां भक्तानां व्रजसीमन्तिनीप्रभृतीनां पूर्वमितरविस्मृतिर्भगवत्स्पर्शादिनाग्रे सर्वसामर्थ्यमिति व्यासः स्वानुभवं प्रमाणत्वेनाह । उक्तं च श्रीभागवते ताभिरेव 'चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये, पादौ पदं न चलतस्तव पादमूला'दित्यादिना । तेन ज्ञानशक्तिक्रियाशक्तितिरोधानमुक्तं भवति । अग्रे तदाविर्भावादिकं स्फुटमेव ॥ ४८ ॥

ननु सनत्कुमारनारदसंवादात्मकमान्तमेकं[1] वाक्यम्, तत्रोपक्रमे 'मन्त्रविदेवास्मि नात्मविच्छुतᳪ ह्येवं मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति, सोऽहं भगवः शोचामी'त्यादिना स्वात्मज्ञानस्यैवोपक्रमादुपसंहारोपि तमादायैवोचितः । अग्रे चेत् आत्मपदानामीश्वरपरत्वं स्यात्,वाक्यभेद उपक्रमविरोधश्च स्यात्, तस्माद्वाक्यानुरोधात् पूर्वज्ञानप्रकारविशेष एवायमिति मन्तव्यमित्यत उत्तरं पठति ।

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥

भाष्यप्रकाशः ।

दर्शनाच्च ॥४८॥ शब्देनान्यादर्शनं साधयित्वा प्रत्यक्षेणापि साधयतीत्याशयेन व्याकुर्वन्ति **दृश्यते** इत्यादि । **स्वानुभवमिति** । स्वयं समाधावनुभूतम् । शेषं निगदव्याख्यातम् ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ सूत्रमवतारयन्ति **नन्वित्यादि** । ननु मास्त्वस्य पूर्वप्रकरणशेषत्वम्, तथाप्यस्य प्रपाठकस्यान्तमेकवाक्यत्वं तु निःसन्दिग्धम्, विषय-

रश्मिः ।

दर्शनाच्च ॥ ४८ ॥ **शब्देनेति** । 'नान्यत् पश्यती'त्यादिशब्देन । **दृश्यत** इत्यादि । सर्वात्मभावो व्रजसीमन्तिनीनां 'सर्वात्मभावोऽधिकृतो भवतीनामधोक्षज' इत्यत्र भ्रमरगीते 'गोपगोपाङ्गनावीत'मिति गोपालतापिनीये 'गोप्यो नाम विष्णुपत्न्यः स्यु'रिति गोपीचन्दनोपनिषदि । पुराणहृदयैरत्र सर्वेन्द्रियव्यापारा भगवत्परा उन्नेयाः । ननु दर्शन शाब्दं व्यासानामस्त्विवति चेत् । न । पुनरुक्त्यापत्तेः । **समाधाविति** । 'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षज' इति समाधिभाषोक्तभक्तिः समाधावनुभूता, तत्प्रपञ्चः 'चित्तं सुखेने'त्यादिस्तदात्मक एव । भाष्ये ज्ञानशक्तितिरोधानं चित्तहरणेन । न च 'मनसैवानुद्रष्टव्य' इति श्रुतेर्मनसः क(ा)रणत्वमिति शङ्क्यम् । 'नेह नानास्ति किञ्चने'त्यग्रेतनश्रुत्या तस्याभेदज्ञानकरणत्वात् । अतो ज्ञानमार्गीयं करणं विहाय चित्तं सुषुप्तिग्राहकं भूम्नः सुषुप्तित्वाद्भूमाधिकरणपूर्वपक्षे तद्ग्राहकं गृहीतम् । 'करावपी'त्यादिना क्रियाशक्तितिरोधानम् ॥ ४८ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४९ ॥ व्यवहारे वयं भाट्टा इति वदतां वेदान्तिनां मायावादिनामाशङ्कामाहुरित्याशयेनाहुः **नन्वित्यादि** । **आन्तमित्यादि** । अन्तं आ अभिव्याप्य आन्तम् । एकवाक्यत्वं स्वार्थबोधे समाप्तानां 'नात्मवित्, तरति शोकमात्मवि'दित्यादीनां वाक्यानां 'यत्र नान्य'द्दिति भूमलक्षणवाक्यस्याङ्गाङ्गित्वाद्यपेक्षया पुनरेकवाक्यत्वं संहत्य जातं पूर्वतत्त्रिणं निःसन्दिग्धं तृतीये तृतीयपादे निःसन्दिग्धम् । विषयस्य श्रीपुरुषोत्तमस्य भेदौ क्षराक्षरात्मकौ, तयोरत्र निरूपणीयत्वेनाभावात् । विषयनिष्ठोऽक्षरस्य वा भेदस्तस्याभावात् । विषयोऽक्षरो नेत्यन्योन्याभावविषयिणी प्रतीतिः ।

---

१. एकमेव ।

भाष्यप्रकाशः ।

भेदाभावात्, तत्र चोपक्रमे 'सोऽहं भगव' इत्यादिनात्मैव पृष्टः, उपक्रमश्चासञ्जातविरोधत्वादुपसंहारात् प्रबल इति पूर्वतन्त्रे स्थितम्, अत उपसंहारोऽप्युपक्रममादायैव नेतुमुचित इति तत्रत्या आत्मशब्दास्तत्परा एव युक्ताः, अग्रे चेत् 'अथात आत्मादेश' इत्यादीनामात्मपदानामीश्वरपरत्वं स्यात्, तदा ऐकार्थ्याभावात् 'अथात आत्मादेश' इत्यादिकं भिन्नं वाक्यं स्यात्, उपक्रमविरोधश्च स्यात्, अत उपक्रमगतात्मवाक्यानुरोधात् पूर्वप्रकरणोक्तात्मज्ञानस्य प्रकारविशेष एवारब्धिः ।

आत्मैवेति । परमतप्रतिपन्नः । श्रीपुरुषोत्तमश्चात्मपदार्थः । आत्मशब्दा 'आत्मतः प्राण' इत्याद्याः । तत्परा निर्गुणब्रह्मपराः । अग्रे चेदिति भाष्य विवरांचक्रुः अग्रे चेदिति । ईश्वरेति । न च कोशादीश्वरः शिव इति शङ्क्यम् । कोशस्य 'वेदाः श्रीकृष्णवाक्यानी'त्यत्र निबन्धे सर्वथा प्रामाण्याभावात् । भिन्नमिति । अर्थभेदात् ब्रह्मविषयात्मभिन्नात्मप्रतिपादकमुत्तरवाक्यं भिन्न स्यात् । शङ्करभाष्येऽस्य सूत्रस्याभासे प्रकरणात् लिङ्गमपास्य क्रियाशेषत्वमध्यवसायितम् । तत्र क्रियास्थले ज्ञानप्रकारविशेष निवेशयाम्बभूवुः किञ्चेति ।

अत्रैव ज्ञेयम् । भाष्ये वाक्यमात्र वाक्यानामेकवाक्यतात्मकं जगृहुराचार्याः, तत्प्रसिद्धग्रन्थानुरोधेनोदाहरणमात्रम्, अन्यथा 'वाक्याद्बलीयस्त्वाच्च न बाध' इति सूत्रकरणापत्तेः । अतो वाक्यप्रकरणाभ्यां बलीयस्त्व लिङ्गस्य बोध्यते इति । न च स्थानसमाख्ययोरग्रहणे 'वाक्यप्रकरणाभ्यां बलीयस्त्वाच्च न बाध' इति सूत्रकरणापत्तिरिति वाच्यम् । स्थानस्य देशसामान्यरूपस्यानुष्ठानदेशसामान्याभावात् पाठदेशसामान्य भवति । पाठदेशसामान्येपि यथासख्यरूपपाठदेशसामान्य नास्ति । यथासङ्ख्यमनु(ष्ठान)देशः समानां(श)स्तस्याभावात् । सन्निधिपाठरूपपाठदेशसामान्यस्यानारभ्याधीतविषयत्वाभावात् । वाक्यस्यानारभ्याधीतकविषयत्वात् । एव स्थानस्याग्रहणम् । समाख्याया यौगिकशब्दरूपायाः स्ववाच्यपदार्थानामङ्गाङ्गित्वबोधिकात्वाद्वाक्येऽनुपयुक्तत्वात् । एव समाख्याया अग्रहणम् । उभयाकाङ्क्षाप्रकरणम् । तस्य तु 'नात्मवित्, तरति शोकमात्मवित्', 'यत्र नान्यत् पश्यति, नान्यत् शृणोती'त्यादीनामन्योन्याकांक्षा वर्तते एव, सर्वात्मभावस्योपकारकस्यात्मज्ञानस्योपकार्यस्य चाकांक्षा । परन्त्विद क्रियामात्रविषयम्, न ज्ञानप्रकारविशेषविषयम् । तथा च भाट्टभास्करे राणकः तेन सिद्धस्य समिधादेः क्रियाद्वारेण ग्रहणेन तेन क्रियाया एव प्रकरणेन ग्रहणम् । तत्राप्यारादुपकारिकाया एव प्रयाजादिरूपायाः यस्याः श्रुतिलिङ्गवाक्यैर्नान्यसयोगो यागार्थत्वात् । सन्निपत्योपकारिकायास्त्ववघातादिरूपायाः द्रव्यदेवतार्थत्वेन श्रुतिलिङ्गवाक्यैर्विनियोगान्न प्रकरणग्रहणमिति । न च क्रियास्थाने ज्ञान प्रक्षिप्य उक्तन्यायेन ज्ञानप्रकारविशेषविषय प्रकरणमस्त्विति शङ्क्यम् । देवताविषयत्वेन प्रकरणाग्रहणात् । अववातादिक्रियावत् । परन्तु वाक्याद्बलीयस्त्वादिसूत्रप्रसङ्गात् प्रकरणमुपात्तम् । न च वाक्यस्यानारभ्याधीतवाक्याङ्गाङ्गिभावोपयोगितयात्र प्रपाठके आरभ्याधीतत्वेन 'नात्मवित्, तरति शोकमात्मवि'दित्यादिवाक्यानां नाङ्गाङ्गिभावो भूमलक्षणवाक्येनेति वाच्यम् । नामादिप्राणपर्यन्तं ब्रह्मत्वेनोपासनाविषयत्वेनोक्त्वा जिज्ञासितव्यत्वेन सत्यादिसुखान्तमुक्तम् । 'यो वै भूमा तदमृतम्, अथ यदल्पं तन्मर्त्य'मिति श्रुतावथेति भिन्नप्रक्रमेणाल्पानां मर्त्यत्वविधानात् नामादीनामुपासनाप्रकरणेन शोकतरणमनुपलभमानः सत्यादीनां जिज्ञासाविषयाणां शोकतारकत्वं 'स स्वराड् भवती'त्यादि 'न पश्यो मृत्युं पश्यति, न रोगम्, नोत दुःखता'मित्यनयोक्तमिति सर्वात्मभावबोधकया 'यत्र नान्य'दिति श्रुत्याङ्गाङ्गिभावो 'नात्मवित्, तरति शोकमात्मवि'दित्यादिश्रुतीनां भवत्येव ।

नैवं वाक्यानुरोधाद्वरणजसर्वात्मभावलिङ्गभूयस्त्वं बाधितव्यम् । वाक्यापेक्षया श्रुतिलिङ्गयोर्बलीयस्त्वात् । एतद्बलीयस्त्वं तु 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य'मिति जैमिनीयसूत्रे सिद्धम् । प्रकृत इतरसाधननिषेधपूर्वकं 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति श्रुतिर्वरणमात्रलभ्यत्वमाह । एतदग्रे च 'नायमात्मा बलहीनेन लभ्य' इत्युपक्रम्य, 'एतैरुपायैर्यतते यस्तु विद्वाँस्तस्यैष आत्मा विशते ब्रह्मधामे'ति श्रुतिः पठ्यते ।

भाष्यप्रकाशः ।

यमिति मन्तव्यम् । किञ्च, अत्र हि वरणलिङ्गं सर्वात्मभावो न भूमलक्षणवाक्यमात्रेण सिध्यति, येन प्रकरणमनादृत्य स गृह्येत, किन्तु तदारभ्य 'आत्मन एवेदं सर्व'मित्यन्तेन सन्दर्भेण । अतः सन्दर्भो यथा सर्वात्मभावबोधकमवान्तरप्रकरणम्, तथा प्रपाठकः सर्व आत्मबोधकं महाप्रकरणम्, मतो भूमलक्षणवाक्यस्य सन्दिग्धत्वात् प्रपाठकरूपं महाप्रकरणमेवानुसर्तव्यमित्यत उत्तरं सूत्रं पठतीत्यर्थः । सूत्रं व्याकुर्वन्ति नैवमित्यादि । भूयस्त्वमिति । परमोत्कर्षः । तत्र किं श्रुत्यादिकमित्यपेक्षायां पूर्वं श्रुतेरुक्तत्वात्तां स्मारयन्तो लिङ्गं स्फुटीकुर्वन्ति प्रकृते इत्यादि ।

रश्मिः ।

आत्मशब्दानां 'नात्मवि'दित्यादीनां 'आत्मैवाधस्ता'दित्यादिश्रुत्युक्तात्मविषयत्वात् । ननूक्तमनारभ्याधीतत्वमङ्गाङ्गिभावे तन्त्रमिति चेत् । न । अनारभ्याधीतत्ववदेकार्थविषयत्वस्यापि तन्त्रत्वात् । यथा चातुर्मास्यप्रकरणपठितस्य 'द्वयोः प्रणयति द्वाभ्यामग्निं प्रणयती'ति वाक्यस्य शाखान्तरीयस्य वा 'आहवनीयादध्वर्युप्रतिप्रस्थातारौ सहाग्नी प्रणयत' इति वाक्यस्यैकवाक्यतया चातुर्मास्यान्तर्गतयोर्वरुणप्रघाससाकमेधसञ्ज्ञयोः पर्वणोरीदृश प्रणयनमङ्गत्वेन ज्ञायते । 'सामर्थ्यमालोच्य प्रणयनेन पर्वद्वयं भावये'दिति । द्वयोरित्यस्यैतत्पर्वद्वयविषयत्व तस्मात् । तदेतदेकवाक्यत्वमुक्त तन्निर्धारणानियमाधिकरणे 'तस्मात् त्व'मित्युपक्रम्य, 'याहि सर्वात्मभावेने'त्यत्र, 'सर्वात्मभावेन मां पुरुषोत्तमं याहि, अभयं यास्यस' इति । पुरुषोत्तमप्राप्तिस्तु फलात्मकज्ञानद्वारा, तदुक्त 'तरति शोकमात्मवि'दिति । तदेकवाक्यतयोपसहारस्य 'स स्वराड् भवती'त्यस्य बलेन निर्णयाद्वाक्यविनियोगोऽयम् । अधिकरणमालायां जैमिनीयन्यायमालाविस्तरोपनामिकायां तु उक्ततन्त्रविशेषः कश्चिन्नोपगतः । तृतीयस्य तृतीयपादारम्भे उपक्रमोपसंहारैकवाक्यताबलेन निर्णयाद्वाक्यविनियोगो भवतीति विशेषातिरिक्तः । तेन वाक्यप्रकरणे उभे गृहीते । प्रसिद्धग्रन्थानुरोधात् ।

तदाहुः **किञ्चेति** । **वरणेति** । इदं भाष्ये स्पष्टीभविष्यति । **सन्दिग्धत्वादिति** । 'सर्वात्मभावोऽधिकृतो भवतीनामधोक्षज' इत्यस्य पुराणमतत्वात् । न च 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति छान्दोग्यसमाप्तिस्थश्रुतिविचारेणासन्देह इति वाच्यम् । 'आत्मनि हार्दे ब्रह्मणि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'त्यर्थेन 'कृष्णमूर्तिः सदा ध्येये'त्याद्यर्थाभावात् । **उत्तरमिति** सूत्रविशेषणम् । उत्तरसूत्रेण पठतीत्यस्य पर्यायत्वम् । यदि चैवं व्याख्यातपूर्वपक्षोत्थानमेव न सम्भवति, पूर्वतन्त्रिणां मायावादिनां च लिङ्गभूयस्त्वं श्रुत्वा वाक्यचिन्तास्फुरणात् श्रुतिचिन्ता तु स्यात्, तेषां लिङ्गाच्छ्रुतेः प्राबल्याद्वाक्यस्य तु लिङ्गात् दुर्बलत्वादिति विभाव्येत, तदा तु ह्युपनिषद्व्याख्यान्तर्गतस्य कस्यचित् तर्कितुः शङ्कया व्याख्यानमित्युन्नीयेत । **भाष्ये** । **जैमिनीयसूत्र** इति । तृतीयस्य तृतीयपादस्थे । **पूर्वमिति** । विधैवेति सूत्रे श्रुतेर्वेदरूपायाः लिङ्गं शब्दसामर्थ्यम् ।

१. किञ्चेत्यारभ्य, अनुसर्तव्यमित्यन्त पाठ. ३७८ पृष्ठे टिप्पणे निवेशितस्तत उद्धृत्य श्रीपुरुषोत्तमैरत्र योजित इति ।

भाष्यप्रकाशः।

अयमर्थः। सत्यमिदमात्मबोधकमान्तमेकं वाक्यम्, उपक्रमश्च बलीयान्, तथापि स नाश्वप्रतिग्रहेष्टिवाक्य इव निःसन्दिग्धः। तत्रत्यात्मपदस्य जीवाक्षरपुरुषोत्तमसाधारण्यात्। तथा सति तत्र को वा ग्राह्य इति विमर्शे, नारदस्य शोकतारकात्मज्ञानार्थं प्रष्टुं प्रवृत्तत्वेन तादृश एवात्मा ग्राह्यः। स च निरवधिसुखरूपत्वात् पुरुषोत्तम एव, न जीवः, नाप्यक्षरम्। आद्यस्य दुःखित्वादन्यस्य गणितानन्दत्वात्। अतो निरवधिसुखरूपात्माभिधायिका या भूमश्रुतिः, सा वाक्यात् बलीयसी। बुभुत्सितात्मस्वरूपनिर्णायकत्वात्। किञ्च। 'आत्मलाभान्न परं विद्यत' इति श्रुत्यन्तरे आत्मलाभस्य परमलाभत्वश्रावणाच्छोकतारकोऽप्यात्मा लभ्यमान एव शोकं तारयति, न त्वलभ्यमानः। लाभश्च न ज्ञानमात्रम्, किन्तु स्वाधीनतापुरस्कृतम्। प्रकृते च 'यदा वै सुखं लभत' इत्यादिकथनाल्लभ्यमानस्यैव निरवधिसुखरूपस्य भूम्नः शोकतारकत्वमभिसंहितम्। तस्य च 'इतरनिषेधे'त्याद्युक्तरीत्या वरणश्रुतिस्तन्मात्रलभ्यत्वमाह। एतदग्रे च 'नायमात्मे'ति भक्तिलभ्यत्वबोधिका श्रुतिः पठ्यते। अत आत्मज्ञानस्य ज्ञायमानस्यात्मनो वा शोकतारकत्वसम्पादिका 'लभत' इति लाभश्रुतिश्च तादृशी। तथा 'यमेवैष' इति श्रुतिर्वरणमात्रलभ्यत्वमात्मन आह। तदग्रिमा च भक्त्यादिलभ्यत्वम्। तानि च वरणस्यैव व्यापारभूतानि। एत-

रश्मिः।

इतरेत्यादिभाष्ये कस्य इतरनिषेधेत्यादीत्यपेक्षायां भूम्नः सर्वात्मभावरूपस्येत्याहुः **अयमर्थ** इति। **अश्वेति**। इयं तृतीयस्य चतुर्थचरणे चतुर्दशाधिकरणेऽस्ति। **भूमेति**। 'नायमात्मे'त्यत्र बलं निरपेक्षरवरूपं भूमश्रुतिः 'तपसो वाप्यलिङ्गा'दित्यत्र निरपेक्षरवरूपं वा भूमश्रुतिः, प्रकृते तु 'स भूमे'ति भूमरूपा निरपेक्षरवरूपा श्रुतिः उपक्रमगतात्मवाक्याद्बलीयसी। न च विनियोगविधेरभावात् कारणाभावे सहकारिषण्णां कारणानां कथमुपयोग इति वाच्यम्। पूर्वतन्त्रवत् कारणत्वाभावात्। तत्रत्यबलाबलमात्रादरणात्। न च श्रुतिर्वेदः सूत्र इति शङ्क्यम्। जैमिनेर्व्यासशिष्यत्वेन फलाध्याये 'परं जैमिनिर्मुख्यत्वा'दित्यादिसूत्रे तन्नामग्रहणात्। अन्यथा वेदादिबलीयस्त्वादित्येव सूत्रयेत्। **बुभुत्सितेति**। बोद्धुमिष्टस्यात्मनः। 'सुखं भगवो विजिज्ञास' इति श्रुतेः। **शोकमिति**। ननु पञ्चम्या भाव्यम्, तरणेऽपादानत्वात्। मैवम्। जीवः शोकं तरति, तं जीवं शोकं तारयतीति प्रेरणायां णिच्। तारयतीत्यस्य हारयतीत्यर्थात्। 'दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम्। कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहा'मित्यत्र निञादीनां चतुर्णामर्थग्रहणात्। एवमपेक्षितोक्त्या सिद्धापेक्षितेन समं भाष्यान्वयमाहुः **तस्य चे**त्यादि। आत्मज्ञानस्यालाभत्वादाहुः **ज्ञायमानस्येति**। **लाभेति**। लाभप्रतिपादको निरपेक्षो रवः। **तादृशी** 'यदा वै सुखं लभत' इति वाक्याद्बलीयसी। भूमपदस्य सर्वात्मभावार्थकत्वपक्षमुक्त्वा तस्य भगवदर्थकत्वपक्षमाहुः **तथेति**। **आत्मनो** भगवतः 'भगवद्रूपत्वात् सर्वात्मभावस्ये'ति भाष्यात्। 'यमेवे'ति सावधारणश्रुत्या भक्त्यादीनामप्रयोजकत्वमाशङ्क्याहुः **तानीति**। प्रमादाभावसर्वात्मभावसहितविरहभावबलानि भक्त्यादीनि। **एतदिति**। वरणमात्रलभ्यत्वं सर्वात्मभावदानद्वारा लिङ्ग शब्दसामर्थ्यरूपम्, 'फलमत उपपत्ते'रित्यत्र तथा व्याख्यानात्। सर्वात्मभावस्य तु वरणमात्रलभ्यत्वं प्रदानवदधिकरणे सिद्धम्। अर्थद्वयं भगवत्सर्वात्मभावरूपं बहुषु स्थलेषु वर्तते। तत्रत्ये विचारे मात्रपदं

एतच्च 'विद्यैव तु निर्धारणा'दित्यत्र निरूपितम् ।

अपरं च, 'नात्मवित्, तरति शोकमात्मवि'दितिनारदवाक्यानुवादयो-

भाष्यप्रकाशः ।

दपि पुरुषोत्तमस्य लिङ्गम् । 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यये'ति गीतावाक्यात् । एतल्लिङ्गं चकारात् भूमादिश्रुतिः उभयमपि 'विद्यैवे'ति सूत्रे निरूपितम् । अत्र श्रुतिबोधको ग्रन्थः प्रायस्त्रुटित इति प्रतिभाति ।

पूर्वोक्तस्य लिङ्गस्य श्रुत्यन्तरस्थत्वात् प्रकृतसन्दर्भस्थं लिङ्गं दर्शयन्ति अपरं चेति । नारदवाक्यानुवादयोरिति । नारदवाक्ये तदनुवादे च । उत्तमप्रश्नात्मकेनेति । 'अस्ति

रश्मिः ।

कार्त्स्न्यें एकत्र, अन्यत्रावधारणे बोध्यम् । गीतेति । सर्वात्मभावस्य लिङ्ग तु 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यात् । भूमेति । भूमरूपनिरपेक्षो रवः आदिना पुरुषोत्तमरूपनिरपेक्षो रवः । विद्येतिसूत्रे पुरुषोत्तमरूपनिरपेक्षो रवो नास्ति । सर्वात्मभावरूपो रवश्चेत्याहुः अत्रेति । 'नायमात्मे'ति आत्मरवः पुरुषोत्तमवाची, 'तपसो वाप्यलिङ्गा'दिति सर्वात्मभाववाची । तथाप्युपपादनसापेक्ष इति प्राय इत्युक्तम् । श्रुत्यन्तरेति । मुण्डकश्रुत्यन्तरेत्यर्थः । काठकश्रुत्यन्तरेत्यर्थश्च । अत्र 'नायमात्मे'त्यादिवाक्यस्यात्मलाभसामर्थ्य 'लभ्य' इति पदादालोचितम् । तनुविवरणसामर्थ्य 'विवृणुत' इति शब्दादालोचितम् । द्वितीयस्य 'नायमात्मे'त्यादिवाक्यस्य धामवेशनसामर्थ्यं 'विशत' इति शब्दादालोचितम् । तयोः स्वार्थबोधे समासयोर्वाक्ययोः पुनराकाङ्क्षावशेनैकवाक्यतया वरणाल्लिङ्गं सर्वात्मभावः 'वरणजसर्वात्मभावे'ति भाष्यात् । तथा च निःसाधनो यः कोप्युक्तभक्तेरङ्गम् । वरणमात्रस्य साधनत्वमुक्त्वा पुनर्बलाभावनिषेधेनात्मलाभवाक्यस्य बलाप्रमादयोर्वाक्यस्य च सामर्थ्यमालोच्य परस्पराकाङ्क्षयैकवाक्यतया 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यत' इति वाक्याद्विविधश्रेयोवानुक्तभक्तेरङ्गम् । 'एतैरुपायै'रिति श्रुतावुपायपदान्न पुष्टिमार्गीयः, अपि तु मर्यादामार्गीयः । भक्तिहंसे स्पष्ट एवायमर्थः । तथा च यः कोपि वरणेन सर्वात्मभावं लभेतेति श्रुतिं कल्पयति पूर्वं लिङ्गम् । द्वितीय तु लिङ्गं विविधश्रेयोवान् बलाप्रमादाभ्यामात्मान लभेतेति श्रुतिं कल्पयति । एवञ्च यत्पूर्वपक्षिणोक्त वाक्यात् ज्ञानप्रकारविशेषः प्रकरणाल्लिङ्गस्य सन्दिग्धस्य बाध इति । तन्नोपपद्यते । लिङ्गस्यासन्दिग्धत्वात् तेन दुर्बलवाक्यान्न ज्ञानप्रकारविशेषः, प्रकरणं तु दुरापास्तम् । तथा च यथा तृतीयस्य तृतीयपादेऽष्टमाधिकरणे 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान' इति । अस्य मन्त्रस्यार्थः । भोः पुरोडाश ते तव स्योनं समीचीनं सदनं स्थानं कृणोमि । विकरणव्यत्ययान्न तनादिकृञ्भ्यउः, किन्तु जुहोत्यादिभ्यः श्लुः शपोपवादः । करोमीत्यर्थः । तच्च स्थानं घृतस्य धारया सुष्ठु सेवितुं योग्य सुशेवं कल्पयामि । भो व्रीहिसारभूत त्वं व्रीहीणां मेध सुमनस्यमानः समाहितमनस्कस्तस्मिन् समीचीने उपविश तत्र स्थिरो भवेत्यर्थः । तत्र 'तस्मिन्' इत्यनेन पूर्वोत्तरयोरेकवाक्यत्वे सति सर्वोप्यय मन्त्रः स्थानकरणस्याङ्गम् । तत्र विनियोजिका श्रुतिरेव कल्पनीया सर्वेणानेन मन्त्रेण स्थान कर्तव्यमिति । तथा सर्वेण मन्त्रेण पुरोडाशः स्थापनीय इत्यपि कल्पनीया । सदनाङ्गत्ववत् प्रतिष्ठापनाङ्गत्वस्यापि तद्वाक्यबोधितत्वात् । तथा सति सदनस्थापनयोरस्य मन्त्रस्य विकल्पः समुच्चयो वा स्वेच्छया भविष्यतीति प्राप्ते, सिद्धान्तितम् । यदेतत्पूर्वोत्तरार्धयोः परस्परान्वयेन सम्पन्नैकवाक्य तदेतदुत्तरार्धस्य

रात्मपदमुत्तमप्रश्नात्मकेन लिङ्गेन पुरुषोत्तमपरमिति ज्ञायते । स हि सर्वेभ्य उत्तमोऽतो ब्रह्मेत्युपास्यत्वेन सनत्कुमारोक्तमलिङ्गं ततस्ततो भूयोऽस्तीत्य-

भाष्यप्रकाशः ।

भगवो नाम्नो भूय' इत्यादिरूपाधिक्यप्रश्नात्मकेन । एतदेव विभजन्ते स हीत्यादि । स पुरुषोत्तमो हि निश्चयेन 'स उत्तमः पुरुष' इति श्रुतेः 'अतोऽस्मि लोके वेदे चे'ति स्मृतेः

रश्मिः ।

सदनकरणे शक्तिमकल्पयित्वा कृत्स्नं मन्त्रं सदने विनियोक्तुं नार्हति । तथा पूर्वार्धस्य स्थापने शक्तिमकल्पयित्वा न तत्र प्रभवति । तथा सति लिङ्गेन वाक्यबाधादर्धद्वयमुभयोर्व्यवस्थितमिति व्यवस्थापितम् । तद्वत् 'नायमात्मे'तिवाक्यद्वयं स्वार्थबोधसमाप्तम् । तत्र पूर्वं वरणमात्रलभ्यत्वमाह श्रुतिः । भाष्ये भक्तिहेतुग्रन्थस्योद्देशात् तत्र चानुग्रहस्य वरणकारणत्वेन निवेशादनुग्रहेण वरणमात्रलभ्यत्वमाह भक्तिहेतुः । भाष्यत्वाद्वरणानुग्रहयोः कार्यकारणभावः । अत्रेतरसाधननिषेधपूर्वकवरणादिमात्रलभ्यत्वात् पुष्टिः । अत्रापि स्वरूपबलेन मुक्तिः, ज्ञानभक्त्यादि दत्वा मुक्तिः । तत्र द्वितीयपक्षे पुष्टावपि सर्वात्मभावप्रवेश इति सर्वात्मभावमपेक्षते । स द्वितीयश्रुतौ लिङ्गपदेन श्रुतोऽश्रुतापेक्षया प्रबलोऽनुकृष्यते । 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययात् ।' 'मुख्यभक्तिरि'ति सर्वात्मभावसमाख्या । 'याहि सर्वात्मभावेने'त्येकादशसर्वस्व निबन्धोक्तं श्रीभागवते एकादशस्कन्धे द्वादशाध्याये पुष्टिमार्गनिरूपणे यतः । श्रुतयश्च 'भक्तिरहस्यभजन'मित्यादि । अत्र मन.पदादेकादश मनसो वृत्तयो ग्राह्याः । 'आत्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्ये'ति । 'यत्र नान्यत् पश्यती'ति । 'श्रुतेश्चे'तिसूत्रमत्रैव चतुर्थचरणे । द्वितीयस्यां मर्यादाभक्तिः । 'न च प्रमादा'दिति भक्त्युपायकथनात् । अप्रमादाद्बल तपश्च । लिङ्गं तु प्रदानवत्सूत्रोक्तरीत्या प्राप्यते । अत्रापि वरणमनुग्रहश्च योज्यः । किञ्च, 'पुरुषोत्तमलाभहेतुभूतं तु भक्तिमार्ग' इत्यादि 'विद्यैवे'ति सूत्रभाष्यात् । भक्तिहेतुग्रन्थरीत्यानुग्रहोपि । श्रुतयोपि 'आत्मा वा अर' इत्यादि 'त भजत् तं रसेत्' 'भक्त्या जानाति चाव्ययम्' । तथा च दृष्टान्तानुरोधात् यथा 'स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यती'त्यत्र स्रुवादीनां सामर्थ्यमालोच्य 'द्रवं मांस कठिन'मिति श्रुतिं कल्पयित्वा स्रुवस्य द्रवावदाने स्वधितेर्मांसावदाने हस्तस्य कठिनावदानेऽङ्गत्वं विधिरर्थगतसामर्थ्यरूपलिङ्गमालोच्य बोधयति, तथा प्रकृते 'तदज्ञाने सर्वमौढ्यं तेन तद्धृदयं स्मृत'मिति निबन्धात् पुराणविदो विगतसर्वमोहा यावद्वाक्याभ्यामुभयश्रुतिभ्यां एक मार्गमुपगच्छन्ति, तावत् 'मार्गास्त्रयो मया प्रोक्ताः' इति वाक्याद्वरणसामर्थ्यं तस्यान्मलाभहेतुत्वं ज्ञात्वात्मा लभ्यो भक्तिमार्गात्, सा भक्तिरपि पुष्टिः सर्वात्मभावरूपा, श्रुतौ वरणमात्रोपादानात् । अतः स्वेन वृतेन सर्वात्मभावेनात्मा लभ्य इति श्रुतिं प्रकल्प्य पुष्टिमार्गीयस्य पूर्वश्रुत्युक्तमार्गाङ्गत्वम् । द्वितीयश्रुतौ भक्त्यादेर्बलादिपदवाच्यस्य सामर्थ्यमालोच्य तस्य वरणमन्तराऽसम्भवं 'भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित् स्म न भक्तियोग'मिति वाक्यादालोच्य वरणेन बलादि भक्तिरिति श्रुतिं प्रकल्प्य मर्यादामार्गीयस्य द्वितीयश्रुत्युक्तमार्गाङ्गत्वं च बोधयतीति । **लिङ्गस्येति** । वरणसामर्थ्यस्य भक्त्यादेर्बलादिपदवाच्यस्य सामर्थ्यस्य च । **लिङ्गमिति** । आत्मपदस्य उत्तमप्रश्नात्मकत्वं लिङ्गम् । सर्वात्मभावस्य 'स एवाधस्ता'दित्यादिनोक्तो भावो लिङ्गम् । स भगवतो नारदस्योत्तमत्वं 'यो यच्छ्रद्धः स एव स' इति वाक्यात् पुरुषोत्तमप्रयुक्तं उपनिषदि, अन्यथा नित्ये वेदेऽस्तीति अनित्यस्य नारदस्य श्रीभागवते मध्यमाधिकारिण उत्तमत्वानवच्छिन्नस्य संयोगापत्त्या स नारद इत्यर्थमनादृत्य भाष्यं व्याकुर्वन्ति स्म **स पुरुषोत्तम** इत्यादि ।

पृच्छत् । अन्ते सर्वाधिकत्वेन सुखात्मकत्वेन भूमानं श्रुत्वा तथा नापृच्छत्, किन्तु तत्प्राप्त्यर्थमत्यार्त्या 'कस्मिन् प्रतिष्ठित' इत्यपृच्छत् । तदा सर्वात्मभाववत्स्वेव प्रतिष्ठित इत्याशयेन सर्वात्मभावलिङ्गात्मकं भावं 'स एवाधस्ता'दित्यादिनोक्तवान् ॥ ४९ ॥

भाष्यप्रकाशः

सर्वेभ्यो नामादिप्राणपर्यन्तेभ्योऽक्षराच्चोत्तमः । अतो नामाद्याशान्तेषु ब्रह्मेत्युपास्यत्वेन कथनात् सनत्कुमारोक्तप्रतिरूपं सनत्कुमारेण 'नाम्नो वाव भूयोऽस्ती'त्याद्युक्ते 'तन्मे ब्रवीतु भगवा'नित्येवं तल्लक्षितरूपं तत'स्ततो भूयोऽस्तीति'ति ज्ञात्वा अपृच्छत् । अन्ते पश्चात् सर्वाधिकं भूमानं श्रुत्वा, तथा 'अस्ति ततोऽपि भूय' इत्येवं नापृच्छत्, किन्तु तदधिष्ठानमपृच्छत् । तथाचैतत्प्रश्नद्वयसामर्थ्येनाप्युपक्रमगतमात्मपदं पुरुषोत्तमपरमिति निश्चीयते । वाक्याल्लिङ्गस्यापि बलीयस्त्वादित्यर्थः । नन्वस्त्वात्मपदं पुरुषोत्तमपरम्, तथापि विवक्षितसर्वात्मभावबोधकस्यात्रादर्शनात् कथं न तद्भूयस्त्वबाध इत्यत आहुः तदेत्यादि । तथाच द्वितीयप्रश्नोत्तरे सर्वात्मभावलिङ्गस्य दर्शनान्न तद्बाध इत्यर्थः । एतेनावश्यकोपपत्तिरत्र वाक्यतात्पर्यनिर्णायिकेत्युक्तम् ॥ ४९ ॥

रश्मिः ।

त्यदादीनामुत्सर्गतः प्रधानपरामर्शित्वेन स पुरुषोत्तमः, न तु नारदः । अपृच्छदित्यत्र तु नारदः कर्ता । ननु स नारदो हि निश्चयेन श्रौतत्वादुत्तमः, मध्यमाधिकारित्वस्य श्रीभागवतीयत्वेन भगवन्मतत्वात् । श्रौतत्वाभावात् । अतः सर्वोत्तमत्वात् । सनत्कुमारोक्तप्रतिकूलरूपम्, अन्यत् समानं व्याख्यानमिति व्याख्यानं कुतो नादृतम्, अन्यथा स हि सर्वेभ्य उत्तम इति भिन्नं वाक्यं स्यादिति चेत् । न । पूर्वोक्तदोषाणामवर्जनीयत्वेन वाक्यभेदस्यादोषत्वात् । तल्लक्षितेति । प्रति लक्षणे 'लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनव' इति पाणिनिसूत्रात् । नारदलक्षितं रूपम् । तथा चेति । पूर्वोक्तप्रकारेण च प्रश्नद्वयम्, ततो 'भूयोऽस्ती'ति ज्ञानेन प्रश्नः अधिष्ठानप्रश्नश्च । वाक्यात् 'सोहं भगवो मन्त्रविदेवास्मि, नात्मवि'दिति वाक्यात् लिङ्गस्य ततो भूयस्त्वेन ज्ञातस्य ज्ञानविषयिणीच्छारूपस्य तदधिष्ठानज्ञानविषयिणीच्छारूपस्य च अपिपदेनात्मरूपनिरपेक्षरवस्य बलीयस्त्वात् । तद्भूयस्त्वबाधो लिङ्गभूयस्त्वबाधः । ननु वाक्यार्थजीवात्मरूपस्य प्रतीतस्य बाधाद्वाक्याप्रामाण्यापत्तिरिति चेत्, तत्राहुः एतेनेति । उपपादनादावश्यिका युक्तिः, पुरुषोत्तमपर आत्मशब्दो न स्यात्, वाक्यप्रश्नसामर्थ्यश्रुतयो न स्युरित्येवंरूपा वाक्यस्य तात्पर्यं तस्य पुरुषोत्तमे निर्णायिकेत्येतेन भाष्येणोक्तम् । वक्तुरिच्छा तु तात्पर्यम् । तस्य शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतुत्वम्, 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः । सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादय' इति काव्यप्रकाश आदिपदात् । यद्यप्यादिपदार्थोऽभिनयादयः, इदं च नाभिनयः । अभिनयादय इत्यत्रादिशब्देन हृदयनिहितहस्तो गृहीतः । 'यथा 'इतः स दैत्यः प्राप्तः श्रीनेत एवार्हति क्षय'मित्यत्रात्मनिर्देशो हृदयनिहितहस्तेन प्रतीयते । तथाप्यादिपदार्थत्वं तात्पर्यस्याप्यविरुद्धम् । जीवेऽभिधावृत्तिः, पुरुषोत्तमे तात्पर्यवृत्तिस्तस्या निर्णायिकेति वार्थः । परं वाकारोऽनादरे । तस्य वाक्यस्य सन्दिग्धत्वादिति वक्ष्यमाणभाष्यप्रकाशात् । सन्दिग्धेऽर्थे काव्यप्रकाशकारिकाप्रवृत्तेरुचितत्वात् ॥ ४९ ॥

नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते, किन्तु व्यापकत्वेन सर्वरूपत्वेन स्वभिन्नाधिकरणाभावादन्यत्राप्रतिष्ठितत्वमेवोच्यत इत्यत उत्तरं पठति ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥

भूमस्वरूपं श्रुत्वा 'स भगवः कस्मिन् प्रतिष्ठित' इति प्रश्ने 'स्वे महिम्नी'त्युत्तरम् । तदर्थस्तु स्वीयत्वेन वृते भक्ते यो महिमरूपः सर्वात्मभावस्तस्मिन्निति । स्वरूपात्मके महिम्नीति वा । भगवदात्मकत्वात् सर्वात्मभावस्य । तदितरस्य साक्षात्पुरुषोत्तमाप्रापकत्वादस्यैव तत्प्रापकत्वात् परमकाष्ठापन्नमहित्वरूपोऽयमेव भाव इति महिमशब्देनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यक् ज्ञातो

भाष्यप्रकाशः ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥ सूत्रमवतारयन्ति नन्वित्यादि । तथाच पूर्वमुपक्रमगतवाक्यबलेन प्रत्यवस्थाने तस्य वाक्यस्य सन्दिग्धार्थकत्वादुपसंहारगतत्वेऽप्यसन्दिग्धाभ्यां ततः प्रबलाभ्यां श्रुतिलिङ्गाभ्यामेतद्वाक्यार्थनिर्णयेनात्र ताभ्यामात्मपदस्य पुरुषोत्तमपरत्वेऽप्येतया द्वितीयप्रश्नश्रुत्या यत् सर्वात्मभावसमर्थनम्, तन्न युक्तम् । तदुत्तरश्रुतौ पुरुषोत्तमस्य स्वप्रतिष्ठताया एव सिद्ध्या भवदुक्तसर्वात्मभाववद्भक्तस्याधिकरणताया असिद्धौ सर्वात्मभावस्यात्र प्रतिपत्तुमशक्यत्वादित्याशङ्कायामिदं सूत्रं पठतीत्यर्थः । उक्ताशङ्कानिवारकं सौत्रं हेतुमुक्तश्रुतिविचारमुखेन व्याकुर्वन्ति भूमेत्यादि । यदुक्तमत्र सर्वात्मभावलिङ्गात्मको भावो नोच्यत इति । तन्न । यतोऽत्र भूमस्वरूपश्रवणानन्तरं तदाधारप्रश्ने सनत्कुमारेण 'स्वे महिम्नी'त्युत्तरमुक्तम् । तत्र स्वपदस्यात्मीयवाचकत्वे स्वीयत्वेन वृतो यो भक्तस्तन्निष्ठो यो महिमा सर्वात्मभावरूप उत्कर्षस्तस्मिन्नित्यर्थो भवति । यदि च स्वपदमात्मवाचकम्, तदा स्वरूपात्मके महिम्नीत्यर्थो भवति । स च महिमा सर्वात्मभाव एवेत्युभयथापि तस्य महिम्नो भगवत्स्वरूपात्मकत्वात्स्वपदं न विरुध्यते । नच तस्य स्वरूपात्मकत्वे कथं महिमरूपत्वमिति शङ्कनीयम् । सेतुत्ववदुपपत्तेः । तदितरस्य पुरुषोत्तमभिन्नस्य तत्प्रापकत्वाभावादस्य तदात्मकभावस्यैव तत्प्रापकत्वादयमेव सर्वोत्कृष्ट इत्ययमेव महिमपदेनोच्यते । स तु विप्रयोगभावोदये सत्येव सम्यक् परमत्वेन रूपेण व्यभिचारिभावैर्ज्ञातो भवति । ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः

रश्मिः ।

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ॥ ५० ॥ उत्तरेति । तस्य प्रश्नस्य उत्तरश्रुतौ 'स्वे महिम्नी'ति श्रुतौ । सौत्रमिति । अनुबन्धरूपम् । सर्वात्मेति । वृतपदसमभिव्याहारात्तदुत्तरश्रुत्युक्तलिङ्गपदार्थरूपसर्वात्मभावरूप इत्यर्थः । सर्वेति । 'तपसो वाप्यलिङ्गा'दिति श्रुतेः । तदितरस्येत्यादिभाष्यं विवराञ्चक्रुः न चेत्यादिना । तत्प्रापकत्वेति । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'ति 'भक्त्या जानाति चाव्यय'मिति भक्तिपरमात्मनोः स्वज्ञानसाधनत्वादैक्योक्तेः पुरुषोत्तमभिन्नस्य तत्प्रापकत्वाभावात् । प्रवेशसाधनत्वात् द्वयोरैक्यं वा । 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मिति वाक्यात् । भाष्ये साक्षात्पदं प्रत्यक्षे तुल्ये वा । 'साक्षात् प्रत्यक्षतुल्ययो'रिति विश्वात् । स त्विति भाष्यं विवरांबभूवुः स त्विति । परेति । ननु सर्वात्मभावत्वेन सर्वात्मभावः कुतो न ज्ञातो भवतीति चेत् । न । परो मीयते ज्ञायते तेनाधिष्ठानेनेति परमस्तत्त्वेना-

भवति व्यभिचारिभावैः। ते त्वनियतस्वभावा इति ज्ञापयितुं त्रिविधाः। 'स एवाधस्ता'दित्यादिना, 'आत्मैवेद१ँ सर्व'मित्यन्तेन निरूप्य, भूमप्रतिष्ठाधिकरणप्रश्ने, यदुत्तरितं 'स्वे महिम्नी'ति, तमेवानुबध्नाति, 'स वा एष' इत्यनेन, तच्छब्दस्य पूर्वप-

भाष्यप्रकाशः ।

तदादेशाहङ्कारादेशात्मादेशरूपास्तिस्रो विधास्तस्य भावस्य ज्ञापकाः प्रकारास्तांस्त्रीन् प्रकारान् 'स एवाधस्ता'दित्यारभ्य 'आत्मैवेदं सर्व'मित्यन्तेन निरूप्य, भूमप्रतिष्ठाप्रश्ने यदुत्तरितं 'स्वे महिम्नी'ति, तं महिमपदोक्तं भावमेवानुबध्नाति, 'स वा एष' इति तच्छब्दस्योक्तमहिमपरामर्शित्वात् तस्मिन् भक्ते 'एवं पश्य'न्नित्यादिना तत्कर्मकदर्शनादिकर्तृताबोधनेन तद्भाववैशिष्ट्यं बोधयँस्तमेव भावं महिमपदेऽनुषञ्जयति । तथाच, अनुबध्नातीत्यनुबन्धः पचाद्यच् । पूर्वं स्वपदेनार्थबलेन वा उक्तं भावमनुलक्षीकृत्य बध्नाति नियमयतीत्यनुबन्धः, 'स एष एवं पश्य'न्नितिवाक्यस्थः । स इति पूर्वपरामर्शः । आदिपदेन त्रिविधभावबोधकाः पश्यदादयो धर्माः । स च तदादयश्चेत्यनुबन्धादयः । द्वन्द्वः । तेभ्योऽनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्यः सर्वात्मभाव एव दृढीक्रियत इति

रश्मिः ।

धिष्ठानत्वेन ज्ञातो भवति, 'स्वे महिम्नी'ति श्रुतिसमाकलनवेलासत्त्वात् । अन्यत्र कालेपि श्रुतिसमाकलनजन्यसंस्कारोद्बोधे परमत्वेन न ज्ञातो भवति, अतो न सम्यक्, अधिष्ठानत्वेन, किन्तु सर्वात्मभावत्वेन, श्रुतिसन्दर्भाभावात् । तथा च 'महिम्नी'त्युक्ते सर्वात्मभावप्रतीतिर्यत्र, तत्र परमत्वेनाधिष्ठानत्वेन ज्ञानमहिम्नीत्यधिष्ठानसप्तम्याः । यत्र तु महिम्नीत्याद्यधिष्ठानप्रतीतिर्नास्ति, तत्र सर्वात्मभावत्वेन सर्वात्मभावः प्रतीयते । राजकीयपुरुष इत्यत्र राजकीयत्वेन पुरुषप्रतीतिवत् । **अनुबध्नातीति**। ननु तद्भावलिङ्गानुबन्धो दृश्यते, पूर्वं ह्यतीति भाष्येण, न तु सर्वात्मभावानुबन्ध इति चेत् । न । लिङ्गानुबन्धे तद्भावोऽनुबद्ध एव । लिङ्गेन सर्वात्मभावानुमानादित्याशयात् । अन्यथा महिमरूपः सर्वात्मभाव इति भाष्यविरोधः। 'यदुत्तरित 'स्वे महिम्नी'ति तमेवानुबध्नाती'ति भाष्यविरोधश्चेति । तच्छब्दस्येति भाष्यं विवरामासुः **स वा** इति । **दर्शनादीत्यादि** । 'पश्य'न्नित्यत्र कर्तरि लटः शतृप्रत्ययः, मन्वान इत्यत्र शानच् । विजानन्नित्यत्र शता । एवं दर्शनादिकर्तृता । सा च दर्शनाद्यनुकूलव्यापारवत्ता । दर्शनाद्याश्रयतेति नैयायिकाः । तस्या बोधनेनेत्यर्थः । तद्भाववैशिष्ट्य लिङ्गात्मकभाववैशिष्ट्यं बोधयन् तं लिङ्गात्मकं भावं महिमपदे सर्वात्मभाववाचकेऽनुषञ्जयति । षञ्ज सङ्गे भ्वादिः (प्रेरणा) णिजन्तः सर्वात्मभावस्य प्रतिपादकतासङ्गमनुपश्चाल्लिङ्गात्मको भावः सञ्जति तत्वात् । तर्हि स कीदृक् येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोतीति लिङ्गभूयस्त्वसूत्रभाष्यप्रकाशात् तं भावं 'स एवाधस्ता'दित्यादिश्रुतिरनुषञ्जयति, महिमपदवाच्यसर्वात्मभावव्याख्यात्री यतः । ननु प्रतिपादकतासङ्गो व्याख्यात्र्या श्रुत्या, न तु महिमपदेन, अतः कथं महिमपदेन श्रुतिरनुषञ्जयतीति चेत् । न । अर्थाभेदात् । यथा कलशपदार्थो हि कम्बुग्रीवादिमान् घटपदेपि सञ्जति, अर्थाभेदात् तं कलशपदमनुषञ्जयति । **पचेति** । 'नन्दिग्रहिपचादिभ्यो ल्युणि न्यच' इति सूत्रेण । **स्वपदेनेति** । 'स्वे महिम्नी'ति स्वपदेनार्थबलम्, तदितरेतिभाष्योपपादितं तेन वेत्यर्थः । **बध्नातीति** । 'स एवं पश्य'न्नित्यादिश्रुतिस्थं दर्शनादिकर्तारं श्रुतिः सैव बध्नातीत्यर्थः । **स चेति** । 'स एवाधस्ता'दित्यादिदर्शना'दिकर्ता तदादय आत्मादेशाहङ्कारादेशात्मादेशरूपास्तिस्रो विधाः । अतो वक्ष्यते **चतुर्भ्यो हेतुभ्य** इति । **दृढीक्रियते** इति । तदितरेत्यादिभाष्योपपादितो महिमरूपः सर्वात्मभाव एव श्रुत्यानुबन्धात् । ननु

१. करणक ।

भाष्यप्रकाशः ।

तस्य न बाध इति सूत्रे योजना । न बाध इति पूर्वसूत्रस्थमत्राप्यनुषज्यते । वस्तुतस्त्वत्र 'प्रज्ञान्तर-पृथक्त्ववद्'दिति दृष्टान्तबोधितं भावपृथक्त्वमेव साध्यम् । तथाच प्रज्ञान्तरस्य यथा पृथक्त्वमस्ति, तथास्य भावस्यापि पृथक्त्वम् । यदि हि 'स्वे महिम्नी'त्यत्रान्यत्राप्रतिष्ठितत्वादिकमभिप्रेतं स्यात्, न भावपृथक्त्वम्, तदानुबन्धादिकं न कुर्यात्, करोति च तत्, अतस्तथेत्यर्थः । पृथक्त्वप्रकार-श्चाग्रे भाष्य एव 'मुमुक्षुभक्तस्ये'त्यादिरूपे तद्विवरणे स्फुटः । एवं स्वोक्तं व्यवस्थाप्य परोक्तं

रश्मिः ।

न नूनं सर्वात्मभावानुबन्धः 'स एवाधस्ता'दित्यादिश्रुत्युक्तसर्वात्मभावलिङ्गभावरूपं यद्दर्शनादि तत्क-र्त्रनुबन्धादिति चेत् । न । नूनं सर्वात्मभावानुबन्धो लिङ्गेपि सर्वस्मिन्नात्मभावः सर्वात्मभावः इति व्युत्पत्तिनिरूपणात् । लिङ्गभूयस्त्वाधिकरणे भाष्यप्रकाशे 'तर्हि स कीदृक् येन तत्रैव प्रतिष्ठित इत्याका-ङ्क्षायां तं विवृणोति । 'स एवाधस्ता'दित्यादि'रूपग्रन्थाल्लिङ्गलिङ्गिनोरभेदोक्तेश्च । कर्त्रनुबन्धस्य भावाधीनबन्धाच्च । भाव लक्षीकृत्य कर्तुर्बन्धात् । अन्यथा बन्धादिभ्य इत्येव सूत्रयेत् । तथा च सर्वात्मभाववतोऽनुबन्धात् सर्वात्मभावबन्धात् महिमपदेन सर्वात्मभाव उच्यते इत्यनुबन्धहेतुना स भावो दृढीकृतः । ननु महिमशब्दस्य क शक्तिः, न तावज्जगति, 'एतावानस्य महिमे'ति श्रुतिनिरुक्तशक्तिः । 'गो अश्व महिमे'त्यादिना जगदेकदेशगवाश्वादिषु महिमपदशक्तिमनूद्य 'नाहमेवं ब्रवीमी'ति शक्तिनिषे-धात् । किन्तु 'महिमानमीश'मिति श्रुतेः शिवे शक्तिः, स तु 'ज्ञानेन भक्ते'ति श्रुतेः सर्वात्मभाववान् । भक्तेत्यत्र भक्तेः सर्वात्मभावरूपमुख्यभक्तिरूपत्वसम्भवात् । अत्रापि महिमपदशक्तावपि सर्वात्मभावस्या-प्रसिद्धेर्दर्शनाच्चेतिसूत्रे व्रजसीमन्तिन्य उदाहृताः । प्रह्वस्ते महिमपदस्य सामर्थ्ये शक्त्युक्तेः । श्रुतिपूद्धा-रकत्वरूपसामर्थ्यस्य महिमत्वात् । प्रकृत उद्धारकत्वस्य सर्वात्मभावरूपत्वात् । 'दर्शनाच्चे'ति सूत्रात् । अत्र महिमपदं वेदान्तविषयत्वेन योगाद्वर्तते । योगस्तावत् । 'महु वृद्धौ' भ्वादिरात्मनेपदी, 'मह पूजने' भ्वादिः परस्मैपदी, 'महु भासे' चुरादिः परस्मैपदी, मंहति वृद्धिं कुरुत इति महो भगवान् तस्य भावो वृद्धिर्जगद्रूपेति जगदेतावान् महिमा । मंहयति भासते यो भगवान्, स महः, तस्य भावो महिमा शिवो भासारूपो 'महिमानमीश'मिति श्रुत्युक्तः । महति पूजयति यः सत्याख्यो भगवान् स महः, तस्य भावो महिमा पूजनाख्या 'यत्र नान्यत् पश्यती'त्यादिश्रुत्युक्ता । तद्धितान्तः । इम निच् । टिलो पः सर्वत्र । नन्दीति सूत्रेणाच् सर्वत्र । उदित्त्वान्नुम्[1] । उदितो नुम्धातोः । ननु 'सत्य ज्ञान'मित्यादि-स्वरूपलक्षणे[2] सत्यनिष्ठा पूजा कथं स सर्वात्मभावरूपेति चेत् । न । भक्तेति श्रुतेः सत्याख्ये शिवादौ मुख्यभक्तिसर्वात्मभावरूपपूजाया युक्तत्वात् प्रकृतेऽन्यत्र तु यथावस्तुप्रपञ्चमित्येकेनानुबन्धरूपहेतुना स भावो दृढीकृतः । एवमात्मादेशाहङ्कारादेशात्मादेशैर्लिङ्गैः[3] सर्वात्मभावोऽनुमितिविषयीकृतो दृढीकृतः । भक्तः सर्वात्मभाववान् आत्मादेशादहङ्कारादेशादात्मादेशाच्च । स स स स जगति सकले पश्यन्ती विर-हिणीवदित्यत्र भक्तः सर्वात्मभाववानित्यनुमितिः । एव चतुर्भिर्हेतुभिर्दृढीकृतेन सर्वात्मभावेन पूजय-तीत्यत्र सर्वात्मभावाभिन्नं पूजनं करोति, 'प्रकृत्यादिभ्य उपसख्यान'मिति वार्तिकेन तृतीयाऽभेदे । हेतौ तृतीयायां तु सर्वात्मभावेन पूजां सत्कारं करोतीत्यर्थः । भक्तिवर्धिनीटीकायां श्रीगोकुलनाथजिद्भिः 'पूजया श्रवणादिभि'रित्यत्र पूजापदं 'पूजां दधुः सप्रणयावलोकै'रित्यत्रेव व्याकृतमिति । न चैवं महिमपदे क्लिष्टकल्पनेति वाच्यम् । मीमांसाशास्त्रस्य विचारशास्त्रत्वाद्विचारस्य चैवंविधत्वात् । **तस्य न बाध इति ।**

१ 'उदित्त्वान्नुमुदितोर्द्वयोर्धात्वो' इति मूलपाठ । २ इदं लक्षण समन्वयद्वितीयपादे विचारितम् । ३ लिङ्गा-त्मकभाव. ।

रामर्शित्वात्। एवं सति त्वदुक्तमन्यत्राप्रतिष्ठितत्वं चेदिह प्रतिपाद्यं स्यात्, तदोक्तरीत्यानुबन्धं न कुर्यात्, अहङ्कारादेशादिकं च न कुर्यात्, उक्तप्रश्नोत्तरं स्वान्यवस्त्वभावात् 'न क्वापी'त्येव वदेत्। तस्मादस्मदुक्त एव मार्गोऽनुसर्तव्यः। आदिपदात् त्रिविधा ये भावा उक्ताः, तेषामपि स्वरूपं 'एवं पश्यन्नेवं मन्वान एवं विजान'न्निति क्रमेण यन्निरूपितं तदुच्यते। पूर्वं स्मृतिविगाढभावेन तदितरास्फूर्त्या तमेव सर्वत्र पश्यति। एतदेवोक्तं 'एवं पश्य'न्नित्यनेन। ततः किञ्चिद्बाह्यानुसन्धानेऽहङ्कारादेशो भवति। स त्वहमेव सर्वतः स्वकृतिसामर्थ्येन तं प्रकटीकरिष्य इति मनुते।

भाष्यप्रकाशः।

दूषयन्ति एवं सतीत्यादि। एवं सतीति। अनुबन्धादिस्वरूपविचारेणोक्तरीत्या श्रुतेः सामञ्जस्ये सति। एवं सतीत्यस्य तस्मादित्यनेन सम्बन्धः। तथाचैवं श्रुतिसामञ्जस्ये सति तस्मात्। अनुबन्धकरणाहङ्कारादेशादिकरण'न क्वापी'त्यवदनरूपाद्धेतुत्रयात् तथेत्यर्थः। ननूक्तहेतुत्रयात् यद्यपि पूर्वपक्ष्यभिमतं बाध्यते, तथापि त्रिविधभावैः सिद्धान्त्यभिमतं कथं सिध्यतीत्याकाङ्क्षायामादिपदोक्तानां स्वरूपं व्याख्यातुं प्रतिजानते आदीत्यादि। तदुच्यत इति। तत् व्याख्यायते। व्याकुर्वन्ति पूर्वमित्यादि। एतदेवेति। एतादृशं दर्शनमेव। स त्विति। अहङ्कारादेशवाँस्तु।

रश्मिः।

अनुबन्धादिभ्य आत्मरत्यादि भवत्यतस्तस्य सर्वात्मभावस्य न बाध इत्यर्थः। ननु 'ततोऽतिदैन्येने'त्याद्विवक्ष्यमाणभाष्यादनुबन्धादिभ्य आत्मरत्यादि भवतीत्येव सूत्रमस्त्विति वाच्यम्। 'नन्वेतया श्रुत्या न सर्वात्मभावलिङ्गात्मको भाव उच्यते' इति प्रकृतसूत्राभासोक्तस्य कारणत्वात् सूत्रपठने। अतोऽनुबन्धादिभ्यः सर्वात्मभावलिङ्गात्मकभावस्य न बाध इति युक्तमेव। उक्तेति। कर्तृद्वारा सर्वात्मभावानुबन्धरीत्या सर्वात्मभावलिङ्गत्रयकथनरीत्या च श्रुतेः 'स्वे महिम्नी'त्यस्याः प्रतिपाद्यसामञ्जस्य इत्यर्थः। न चानुबन्धादिभ्योऽन्यत्राप्रतिष्ठितत्व सिध्यति। तस्यार्थस्य ज्ञानमार्गीयत्वात्। आत्मादेशादेरसम्भवाच्च। श्रुत्यादिबलीयस्त्वादिति सूत्रे ज्ञानप्रकारविशेषदूषणाच्च। भक्तिमार्गीयव्याख्याने तु 'व्यतिहार' इति सूत्रोक्तसञ्चारिरूपस्य सुखेन सर्वात्मभावलिङ्गत्वसम्भवाच्च। तथेति। अस्मदुक्तमार्गोऽनुसर्तव्यत्वेन प्रकारेणेत्यर्थः। अतोऽस्मदुक्तोऽस्माभिः 'तन्निर्धारणानियम' इत्यधिकरण उक्तः, कृत्यविषयोपि मार्गो भक्तिमतां भक्तिमार्गमनु पश्चात् सर्तव्यः प्राप्तु योग्यः। 'तयोरेव कृत्यक्तखलर्था' इति सूत्रेण उक्तमार्गोनुसर्यत इति वार्थः, कर्मणि तव्यस्वद्वा। भाष्य एवकारस्तु कर्ममार्गस्य हिरण्यगर्भातिरिक्तामोचकत्वेन ज्ञानमार्गस्याक्षरमात्रप्रापकत्वेन भक्तिमार्गस्यैव मार्गत्वात्। तदुक्तं तृतीयसुबोधिन्यां पञ्चविंशाध्याये सिद्धान्तान्तरनिरूपणोक्तिपुरस्कारेण चतुश्चत्वारिंशे श्लोके 'सर्वं शास्त्रार्थं निरूप्य परलोकार्थं यततां अस्मिन् लोके एतावानेव निःश्रेयसोदयः, तच्चेत् स्थिरीभवति, तदा कृतार्थता, तत्स्थिरीकरणार्थं भक्तिरेव, केनापि प्रकारेण भगवति स्थिरं मनः परमपुरुषार्थसाधकमिति योगसिद्धान्तः। तत्र भक्तिरेव स्थिरीकरणे हेतुरिति स्वसिद्धान्तानुसारेणापि भक्तिर्निरूपिता, भागवतानुसारेणापि। तस्माद्भक्तिः सर्ववादिसम्मतेति सैव कर्तव्ये'ति। इयं भक्तिमार्गस्य कृतिविषयस्य विषयीकुर्वाणा मुख्यभक्तिरूपसर्वात्मभावमपि सिद्धान्तविषयीकरोति। कैमुतिकन्यायेन 'इत्येकादशसर्वस्वं भगवान् स्वयमुक्तवा'निति सर्वनिर्णयोपान्त्ये उक्तं कृत्यविषयमपि। 'तस्मादन्यवचो मृषे'ति सर्वनिर्णयात्। अनुभवाच्च। एतादृशमिति। एवंपदादिति भावः। न तु ज्ञानमार्गीयाभेददर्शनम्, एवंपदेन पूर्वविमर्शात्। पूर्वत्र

करोति च तथा। अत एवान्वेषणगुणगाने कृते ताभिः। एतदेवोक्तं 'एवं मन्वान' इत्यनेन। ततो निरुपधिस्नेहविषयः पुरुषोत्तम आत्मशब्देनोच्यते इति तदादेशो भवति। तदा पूर्वकृतस्वसाधनवैफल्यज्ञानेनातिदैन्ययुक्तसहजस्नेहजविविधभाव-

---

भाष्यप्रकाशः

तथाचाहङ्कारादेशोक्तरीत्या स्वभाने स्वस्मिन् सामर्थ्यविशेषभानादहमेव सर्वैः प्रकारैः 'स्वसामर्थ्येन तं प्रकटीकरिष्य इति मनुत' इत्यादिकयानया फक्किकयाहङ्कारादेशफलमुक्तम्, प्रामाणिकत्वाय परिचायितं च। 'ततो निरुपधी'त्यादिना चात्मादेशभानफलमुक्तम्। एवं विधात्रयोक्तानां स्वरूपं

रश्मिः।

मम तत्स्वाम्युपरिष्टादित्यादिस्फूर्तौ षष्ठ्या भेदावगाहिन्या आक्षेपात्। 'अन्तरा भूतग्रामवत् स्वात्मन' इति सूत्रे भक्तानां भेदस्यादोषत्वोक्तेः। अत एवकारोपि। स्वभान इति। व्यापकत्वेन भाने। नन्वस्त्व-भिन्नानां भक्तानां व्यापकत्वम्, आधुनिकानामणूनां जीवानां तु व्यापकत्व'मानन्दादयः प्रधानस्ये'ति सूत्रविरुद्धमिति चेत्। न। सायुज्ये तदीयव्यापकत्वस्य जीवेष्वङ्गीकारात्। तमिति। व्यापकमपि। मनुत इति। 'मन्वान' इति श्रुतौ 'मनु अवबोधन' इत्यस्य तनोत्यादिगणस्थस्योपादानम्। न तु मन्यत इति दिवादिगणस्थस्य, 'मन ज्ञान' इत्यस्य नवा 'मानयत' इति चुरादिगणस्थ'मनि स्तम्भ' इत्यस्य मन्यमान इति मानयान इति चाप्रयोगात्। अवबोधत इत्यर्थः। भाष्ये भागवतमतेनाहुः करोति चेति। अहं करिष्य इत्यत्र। ब्रह्महृदे नीतानां मग्नानां ब्रह्मभूतानामहमः प्राकट्यस्य 'ततोऽह नामाभव'दिति पुरु-विधब्राह्मणाद्वक्तव्यतया 'करोति च तथे'त्युक्तम्। ननु श्रौतं 'मनुत' इत्येतावदेव भणतीत्यलं भागवताय करोतीत्यस्यैपदायेति चेत्, तत्राहुः अत एवेति। कृष्णोपनिषदि 'तस्मान्न भिन्ना एतास्ता आभि-र्भिन्नो न वै विभु'रित्यभिन्नत्वेन तच्छब्दाभिहिताभिः कृते फलप्रकरणे इति श्रौते ते, मनुत इति श्रौते पूरणीये इत्यर्थः। एतदेवेति। एवकारेण 'मन ज्ञाने' इत्यस्यानिटो मन्तव्य इत्यस्य युक्तिभिरनुचिन्तनरूपमननस्य व्यवच्छेदः। 'मनु अवबोधन' इति सेटस्तदर्थाभावात्। दर्शनसाधनत्वाच्च युक्तिभिरनुचिन्तनरूपमननस्यास्य प्रकृतमननस्य दर्शनानन्तरभावित्वाच्च। एवंपदाच्च। प्रकृते। फलमिति। 'अहमेवाधस्ता'दित्यादिस्फूर्ते'रहमेव सर्वैः प्रकारै'रित्यादिफक्किकयोक्तं फलं 'अत एवे'त्यादिभाष्येण परिचायितमित्यर्थः। तत इति। अन्वेषणस्य प्रकटीकरणार्थत्वेन गुणगानस्य दोषनाशार्थत्वेन दोषनाशानन्तरं 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इति वाक्योक्तन्यायान्निरुपधिस्नेहस्तद्विषयस्तु पुरुषोत्तमः। भक्तेः सर्वात्मभावत्वात्। 'इन्द्रियाणि जुहोती'तिश्रुतेः। न च तृतीयमार्गत्वमिति वाच्यम्। श्रुतीनां वैराग्यशमदमतितिक्षामुमुक्षुत्वानामवर्जनीयत्वात्। साधनचतुष्टयवतां भक्तानां तृतीयमार्गत्वं चिन्त्यम्। विरहकालेऽन्वेषणपूर्वकृतगुणगानसाधनानां भगवदप्राकट्ये वैफल्यं तस्य ज्ञानस्य दैन्यकारणत्वम्, न तु वैफल्यस्य, अतो ज्ञानपदम्। तेनातिदैन्यं कातरत्वं आर्तिरूपाधिकारिरूपं रसनिविष्टं स्नेहे विविधभावोत्पत्तौ कारण भवतीति स्नेहे तद्युक्तत्वमुक्तम्। सहजपदेनानुग्रहजन्यत्वसूचनात् स्नेहे पुष्टिभक्तित्वम्। साधनजन्यत्वे स्नेहस्य सहाविर्भावो न स्यात्। स्नेहस्य तु स्वभाव एव यद्विविधभावजनकत्वम्। अतिरिक्तत्वेऽत्र गौरवम्। एतेन भाष्येण 'विजान'न्नितिश्रुतौ विविधभावप्रादुर्भाव उक्तः। 'जनी प्रादुर्भाव' इति धातोः। 'ज्ञा अवबोधन', इत्यस्य रूपं विजानन्निति, तदा तु विविधभावविषयकज्ञानवत्त्वेन विविधभाववान् ज्ञानद्वारेति भाष्यार्थः। तत इति। इदमेवात्मादेशभानफलं

वान् भवति । तदेतदुक्तं 'एवं विजान'न्नित्यनेन । अत एवोपसर्ग उक्तः । ततोऽति-दैन्येनाविर्भावे सति या अवस्थाः, ता निरूपिता 'आत्मरति'रित्यादिना । अत्रात्म-शब्दाः पुरुषोत्तमवाचका ज्ञेयाः । अन्यथौपचारिकत्वं स्यात् । मुख्ये सम्भवति तस्या-युक्तत्वात् । ननु सर्वात्मभावस्यापि मुक्तौ पर्यवसानम्, उत नेति संशयनिरा-

भाष्यप्रकाशः ।

व्याख्यायाग्रिमग्रन्थं योजयन्ति ततोऽतिदैन्य इत्यादि ।

सूत्रांशमवतारयन्ति नन्वित्यादि । ननूक्तयुक्तिभिरत्र भवतु सर्वात्मभावः, तथाप्यत्र फलत्वेन सर्वग्रन्थिप्रविमोक्षस्यैवोक्तत्वात्तस्य च 'भिद्यते हृदयग्रन्थि'रिति श्रुत्यन्तरस्वारस्येन परावरदर्शनस्य यत्फलं तस्यैवात्र ग्राह्यत्वात्तस्य च 'तमेवं विद्वानमृत इह भवती'त्यादिश्रुत्यन्तरेषु मुक्तिरूपस्यैव सिद्धत्वादस्य भावस्यापि मुक्तावेव पर्यवसानमिति फलतो न कश्चिद्विशेषः । अथ, न, तदोक्तस्य फलवाक्यस्य विरोध इत्यस्यापि फलबलेन पूर्वज्ञानविशेषत्वमेवादर्तव्यमितिशङ्कानिरासाय दृष्टान्तमाहे-

रश्मिः ।

तदुक्तमित्यर्थः । अग्रिममिति । अनुबन्धादिभ्यः किं भवतीत्याकाङ्क्षायामात्मरत्यादि भवतीति सूत्रं योजयितुमग्रिममित्यादिः । तत इत्यादि । ननु 'भक्त्याहमेकया ग्राह्य' इति वाक्येन सर्वात्मभावस्य पुरुषोत्तमाविर्भावकारणत्वोक्तेरतिदैन्यस्याविर्भावकारणत्वं कथमिति चेत् । न । भक्तित्वेनेति वदामः । यतोत्र भाष्येऽतिदैन्यस्याविर्भावहेतुत्वोक्तिर्भक्त्यन्तःपातित्वेन भक्तित्वात् । अत एव भगवदाविर्भावे भक्तदुःखं 'भूमिर्माता तथा चान्ये दुःखभाजो हरिप्रिये'ति कारिकया हेतुत्वेनोक्तम् । सूत्रांशमिति । प्रसङ्गसङ्गत्या सूत्रांशेऽग्रेतनसूत्रेषु त्रिषु च फलं विचारयन्तः सूत्रांशमित्यर्थः । प्रदानवत्सूत्रे सर्वात्मभावसाधन लिङ्गभूयस्त्वादिसूत्रे प्रमाणप्रमेये विचार्य फलं विचारयितु सूत्रांशादारभ्य विचारः । चतुर्भिर्विचार एकादशस्कन्धसर्वस्वत्वात् सर्वात्मभावस्य । तथाचानुबन्धादिभ्य आत्मरत्यादि भवति, अतः सर्वात्मभावस्य न बाधः । आत्मरत्यादिना तज्जनकत्रिविधस्फूर्तेः सर्वात्मभावरत्यादिजनकत्रिविधस्फूर्त्या सर्वात्मभावस्यानुमानात् । पुष्टिमार्गीयात्मरत्यादिजनकस्फूर्तिवारणाय सर्वात्मभावरत्यादिजनकेति विशेषणम् । अथ नेति । न मुक्तौ पर्यवसानमपि त्वतिदैन्येनाविर्भावे सति या अवस्था आत्मरत्यादयस्ता एवेत्युत नेति भाष्यं व्याकृतम् । विरोध इति । सन्देग्धुर्वचः । अत-'स्ततः श्लोकैस्तद्भावस्वरूपमुक्त्वैतस्य मूलकारणमाहाहारशुद्धा'वित्यादिनेति भाष्यस्य न विरोधः । पूर्वज्ञानेति । पूर्वप्रपाठकोक्ताभेदज्ञानेत्यर्थः । शङ्केति । ननु शङ्का तर्कः संशयो विरुद्धकोट्यवगाहि ज्ञानमिति भाष्यस्थसंशयपदविवरण शङ्केत्यनुपपन्नमिति चेत् । न । एतादृशव्याख्याने शङ्कापदस्य संशयाविवरणत्वात् । संशयस्याथ नेत्यन्तग्रन्थे परिसमाप्तेः । दृष्टान्तमिति । मुक्त्यपर्यवसाने दृष्टान्तम् । ननु ह्यात्मरत्यादिजनकसर्वात्मभावलिङ्गात्मकभावे दृष्टान्तमित्यर्थः कुतो न कृत इति चेत् । न । सूत्राणामल्पाक्षरत्वात् । 'अल्पाक्षरमसन्दिग्ध'मित्यादिवाक्यात् । स्फुटं सर्वनिरूपणे त्वल्पाक्षरत्वं भज्येत । संशयपदात् । 'आत्मरतिः आत्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवती'ति विषयः सूचितः । संशयस्तु सर्वात्मभावस्य मुक्तौ पर्यवसानम्, उतात्मरत्यादावेव, तथा च 'स स्वराड् मुक्तो वा स्वेन रूपेण राजत' इति भजनानन्दवान् वा । स्वेन भगवता राजत इति । कर्तरि क्विप् । तत्र पूर्वपक्षः स्वराड् मुक्त एव, कुत इत्यत उक्तं भाष्यप्रकाशे तदेत्यादि । तदा संशयकाल उक्तस्याहारशुद्धावित्यस्य फलवाक्यस्य विरोध इत्यस्यापि फलबलेन पूर्वज्ञानशेषत्वमेवादर्तव्यमिति । सिद्धान्तस्तु, न मुक्तौ पर्यवसानम्, किन्तु भजनानन्द इत्यवान्तराधिकरणकम् । तदाहुः दृष्टान्तमिति ।

साय दृष्टान्तमाह प्रज्ञान्तरपृथक्त्ववदिति। मुमुक्षुभक्तस्य स्वेष्टदातृत्वेन भगवद्विषयिणी या प्रज्ञा, सा सर्वात्मभाववद्भक्तप्रज्ञातः प्रज्ञान्तरमित्युच्यते। तच्च कर्मज्ञानतदितरभक्तप्रज्ञाभ्यः पार्थक्येन तदिष्टमेव साधयति यथा, तथा सर्वात्मभाववतो भक्तस्य यत्प्रकारिका भगवद्विषयिणी प्रज्ञा, तमेव प्रकारं स भावः साधयति, नान्यमिति न मुक्तौ पर्यवसानमित्यर्थः। अत्र व्यासः स्वानुभवं प्रमाणत्वेनाह दृष्टश्चेति। उक्तभाववतो भक्तस्य प्रभुस्वरूपदर्शनाद्यतिरिक्तफलाभावोऽस्माभिरेव दृष्ट इत्यर्थः। एतादृशा अनेके दृष्टा इति नैकस्य नाम गृहीतम्। अत्र शब्दमपि प्रमाणमाह तदुक्तमिति। भगवतेति शेषः। श्रीभागवते दुर्वाससं प्रति 'अहं भक्तपराधीन' इत्युपक्रम्य, 'वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथे'ति। यो हि यद्वशीकृतः, स तदिच्छानुरूपमेव करोति, अतो न सायुज्यादिदानम्, किन्तु भजनानन्ददानमेव। तेषां मुक्त्यनिच्छा तु 'मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम्। नेच्छन्ति

भाष्यप्रकाशः।

त्यर्थः। दृष्टान्तं व्याकुर्वन्ति मुमुक्षुभक्तस्येत्यादि। तथाच अन्या प्रज्ञा प्रज्ञान्तरम्, तत्कृतं पृथक्त्वं प्रज्ञान्तरपृथक्त्वम्, षष्ठ्यर्थे वतिः। अतः प्रज्ञान्तरफलस्येवैतत्फलस्यापि पृथक्त्वमेवेति नैतस्य बाध इत्यर्थः। नच फलोक्तिविरोधः। दर्शनस्य प्रागेव जातत्वेन अविद्याकामकर्मजन्यहृदयग्रन्थिभेदस्य प्रागेव जातत्वादत्र ततोऽतिरिक्तस्यैव फलस्य सर्वेषां एकत्वपर्यन्ताशास्यत्वरूपाणां ग्रन्थीनां प्रकृष्टो विलक्षणो यो मोक्षः पुनस्तदनुद्भवरूपस्तस्याभिप्रेतत्वेनाविरोधात्। अग्रिमं शेषद्वयमवतारयन्ति अत्र व्यास इत्यादि। अत्र शब्दमित्यादि च। तादृशां मुक्तिपर्यन्तानिच्छां निगमयितुमाहुः तेषां मुक्त्यनिच्छेत्यादि। तथाच ज्ञानमार्गीयभगवद्दर्शने हृदयग्रन्थिभेदनं नानाविधवृत्त्यनुदयरूपम्,

रश्मिः।

प्रज्ञान्तरेति। अत्र पृथक्पदार्थः फलत्वेन गृहीतः। प्रज्ञान्तरकृतपृथक्पदार्थफलस्येवेत्यर्थः। न च प्रज्ञान्तरपृथक्त्वस्येवेति वक्तव्यमिति वाच्यम्। पृथक्फले तात्पर्यात्। कीदृशोऽद्भुतो घट इति वक्तव्ये कीदृशमद्भुतं घटत्वं येनेदृशो घट इति तात्पर्येण कीदृशमद्भुतं घटत्वमिति प्रयोगवत्। एतत्फलस्येति। सर्वात्मभावफलस्य। नैतस्येत्यत्र पूर्वसूत्रादनुवर्तितमत्राप्यनुषञ्जितम्। तेन प्रज्ञान्तरपृथक्त्ववन्न बाध इति वाक्यभेदः। वाक्यभेदस्य सूत्रेऽदोषत्वं अल्पाक्षरत्वसारवत्त्वाभ्याम्। भाष्ये। यत्प्रकारिका भजनानन्ददातृत्वप्रकारिका। तमेव भजनानन्ददातृत्वं भजनानन्द एव। तथा च भजनानन्दमेव। प्रकृते। फलेति। आहारशुद्धाविति श्रुत्युक्तफलोक्तीत्यर्थः। प्रागेवेति। 'मुक्तोपसृप्यव्यपदेशा'दिति व्याससूत्रात्तथा। तथा च पाठक्रममनादृत्यार्थक्रमेणाहारशुद्ध्यादिना मुक्तः सर्वात्मभाववानुपसर्पति भगवन्तमिति पाठक्रमानादरे हेतुरुक्तः। तथा च भाष्यं ततः श्लोकैरित्यादि लिङ्गभूयस्त्वसूत्रस्य। अत्रेति। भक्तिमार्ग इत्यर्थः। पुनरिति। 'भजते नैव तादृश' इति निबन्धादविद्यानुद्गमेन तथा। अपीति। प्राग्जातत्वाविरोधात्। न च पूर्वापरभावविरोधः। पाठक्रममनादृत्यार्थक्रमादरार्थं 'अग्निहोत्रं जुहोति यवागूं पचती'तिवत् पूर्वापराविरोधात्। अत्र व्यास इति। दृष्टः समाधिभाषोक्तसमाधौ। अनेके जैमिन्यौडुलोमिप्रभृतयः सूत्रप्रसिद्धा अस्माभिर्दृष्टा इत्यर्थो भाष्यस्य दृष्टानेकदृष्टपदानाम्। प्रमाणमिति भाष्यं नैयायिकप्रसिद्ध्या, अन्येषां श्रौतप्रामाण्यात। दर्शनेति। ज्ञानमार्गीयत्व-

सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम्। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जना' इत्यादिवाक्यसहस्रैर्निर्णीयते ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥

ननु 'नान्यत् पश्यती'त्यारभ्य सर्वस्य प्रपाठकस्य सर्वात्मभावनिरूपकत्वोक्तिरनुपपन्ना। अत एवात्मपदानां पुरुषोत्तमपरत्वोक्तिश्च। यतस्तस्य मुक्तावपि कामाभावः प्रतिपाद्यते। अत्र तु तस्य 'सर्वेषु लोकेषु कामचारो भवती'ति श्रुतिः पठ्यते। एवं सति न तन्निरूपणमत्रेति वा वाच्यम्, तद्भाववतोऽप्यन्यकामवत्त्वमिति वा। द्वितीयस्योक्तप्रमाणपराहतत्वेनाद्यपक्ष एवाश्रयणीय इति पूर्वपक्षं

भाष्यप्रकाशः।

अत्र तु सर्वग्रन्थीनां प्रविमोक्षो भगवद्विषयकनानावृत्त्युदयेपि एकत्वपर्यन्तानिच्छारूप इति दर्शनभेदात् फलभेदस्तत्क्रतुन्यायादप्युपपन्न इत्यर्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥ सूत्रमवतारयन्ति नन्वित्यादि। प्रतिपाद्यत इति। श्रीभागवते कपिलादिवाक्यैः प्रतिपाद्यते। अत्र त्विति। श्रौते सनत्कुमारवाक्ये तु। एवं सतीति। स्मृतिश्रुत्योर्विरोधे सति। उक्तप्रमाणपराह-

रश्मिः।

क्तिमार्गीयत्वधर्माभ्यां 'तस्मिन् दृष्टे परावरे' इति श्रुत्युक्तदर्शनभेदात् फलस्य हृदयग्रन्थिभेदस्य लिङ्गदेहभेदस्य भेदः। तत्क्रतुन्यायः 'सर्वत्र प्रसिद्धोपदेशा'धिकरणसिद्धः। तत्र क्रतुभेदात् फलभेदः। **भाष्ये। वाक्यसहस्रैरिति** 'सहस्राणी'ति श्रुतेर्बहुवचनं विंशत्याद्याः सदैकत्व इत्यन्यत्र। योजनातः सहस्राणीति लोके तृतीयस्कन्धे। तथा चैष सूत्रार्थः। अनुबन्धादिभ्यश्चतुर्भ्यो हेतुभ्योऽत्र चकारो लुप्तषष्ठीकोऽनुक्तसमुच्चये वर्तते। चस्यार्थस्यात्मरत्यादिजनकसर्वात्मभावलिङ्गात्मकभावस्य सूत्रानुक्तरूपस्य न बाधोऽस्ति। प्रज्ञान्तरपृथक्त्ववत् सर्वात्मभावफलस्यापि न बाधोऽस्ति। भजनानन्दो व्यासपादैर्दृष्टो भवति समाधिभाषायाम्। भगवतोक्तं चास्ति। अथ चतुर्णां वाक्यानां दण्डान्वयः। तदुक्तं दृष्टः प्रज्ञान्तरपृक्त्ववन्मुक्त्यपर्यवसानार्थस्तद्युक्तोऽनुबन्धादिभ्यश्चकारार्थांश आत्मरत्यादिस्तज्जनकसर्वात्मभावलिङ्गात्मकभावस्य न बाध इति। चादीनां वाचकत्वमपि **प्रस्थानरत्नाकरे**ऽस्ति। मुक्त्यपर्यवसानरूपोऽर्थोपि चकारार्थः ॥ ५० ॥

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५१ ॥ पूर्वपक्षं निरस्यन्तीति वक्ष्यमाणभाष्यत्रिसूत्राधिकरणसन्देहं वारयन्ति **सूत्रमिति**। त्रिसूत्रे अधिकरणे, सूत्रमिति वा। **श्रीति**। 'अकाम'इति श्रुत्या उपलक्षकः प्रकाशः। वाक्यानि तु 'सालोक्यसार्ष्टिसामीप्ये'त्यादि। 'मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः'। 'आत्मनो धर्ममदोग्धा निःकाम' इत्यर्थ इति श्रीधरी। 'सालोक्यसार्ष्टिसामीप्य'मिति। आदिपदेन 'मत्सेवया प्रतीतं चे'ति भगवद्वाक्यं सार्धम्। **स्मृतीति**। स्मृतिपदं श्रुतेरप्युपलक्षकम्। **उक्तस्मृतीति**। उक्तश्रुतिमुपलक्षयति। **उक्तानि** 'दर्शनाच्चे'तिसूत्रभाष्येण 'तदुक्त'मिति सूत्रांशेन चोक्तानि स्मृतिवाक्यानि तैः पराहतत्वम्, श्रीभागवतस्य वेदवेदान्तसारत्वात्। स्मृतीनां सर्वात्मभावप्रकरण उदाहृतत्वेन तद्विरुद्धश्रुत्यर्थः स्यात्, मन्त्रिकत्वद्योतनं वा

निरस्यति । नेति । तत्र. हेतुमाह सामान्यादप्युपलब्धेरिति । तत्समानधर्मयोगादपि तत्प्रयोगः श्रुतावुपलभ्यतेऽनेकशो यतः । प्रकृतेपि विविधानां लोकानां विविधसुखप्रधानत्वाद्भगवत्सम्बन्धिषु सर्वेषु सुखेषु कामचारो भवतीति श्रुतेरर्थो ज्ञेयः । ननु यथाश्रुत एवार्थोऽस्तु, तत्राह न हि लोकापत्तिरिति । सर्वात्मभाववत इति प्रकरणात् 'नान्यत् पश्यती'त्यादिधर्मविशिष्टस्यात्मनः प्राणादिसर्ववतो

भाष्यप्रकाशः ।

तत्त्वेनेति । उक्तस्मृतिवाक्यपराहतत्वेन । व्याकुर्वन्ति नेतीत्यादि । नेति । यदुक्तमत्र सर्वात्मभावो नोच्यत इति, तन्न युक्तमित्यर्थः । हेतुं विवृण्वन्ति तदित्यादि । अनेकश इति । यथा 'अजामेका'मित्यत्र, 'सृष्टीरुपदधाती'त्यादौ च । तथाच यत एवम्, अतः प्रकृते कामचारवाक्येपि विविधानां लोकानां विविधसुखप्रधानत्वात्तेन साधर्म्येण भगवत्सम्बन्धिषु पूर्वोक्तेषु रतिक्रीडादिषु सुखरूपेषु पदार्थेषु लोकपदप्रयोग इति 'तेषु कामचारो भवती'ति श्रुतेरर्थो ज्ञेयः, न नामादिलोकपरः । भगवत्सम्बन्धिनस्तु सर्वात्मभाववत इष्टा एव, तद्भिन्नास्तु मुक्तिपर्यन्तं नेष्टा इति नैतेनात्र सर्वात्मभावाभावः शक्यशङ्क इत्यर्थः । यथाश्रुतार्थस्याग्रहणे युक्तिबोधनाय दृष्टान्तं

रश्मिः ।

श्रुतिपराहतत्वम् । 'इतिहासपुराणैस्तु वेदं समुपबृंहये'दिति वाक्यात् । पूर्वपक्षमिति । इदं ध्वन्यते । 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति विषयवाक्ये । अत्र न सर्वात्मभावनिरूपणं तद्भाववतोऽप्यन्यकामवत्त्वं वेत्यत्र संशये च पूर्वपक्षमित्यर्थकः । यदुक्तमिति । 'न तन्निरूपणमत्रे'ति भाष्येण यदुक्तम् । ननु न सर्वात्मभावलिङ्गात्मको भाव उच्यते इत्यनुबन्धादिभ्य इति सूत्राभासेन यदुक्तमिति चेत् । न । तस्य सूत्रस्य निवृत्तत्वात् । तदिति । 'गौण्यसम्भवा'दिति सूत्रे गौण्यङ्गीकारादाहुः यथेति । अनेकश इत्यत्र शस् । बह्वीो ह्यनेकाः प्रवृत्तीर्ददाति यः प्रयोग इत्यर्थः । 'अजा'मित्यादिश्रुतिः कल्पनोदेशसूत्रे विचारिता प्रथमस्य चतुर्थपादे । सृष्टीरित्यादिश्रुतिः पूर्वतन्त्रे प्रथमस्य चतुर्थपादे । अजाशब्देनाद्या सृष्टिः कल्पनयोच्यते । 'यथा ह्यजा वर्करसहिता सवत्सा स्वामिहिता, तथेय'मिति । सृष्टिशब्दोपेता मन्त्रा यासामिष्टकानामुपधाने विद्यन्ते ता इष्टकाः सृष्टय इत्युच्यन्ते । सृष्टिमानास्तासुपधाने मन्त्रे इति विगृह्य तद्वानासामुपधान इति व्याकरणसूत्रसिद्धप्रक्रियया तन्निष्पादनात् । 'ब्रह्मासृज्यत', 'भूतान्यसृज्यन्ते'त्यादयः सृष्टिशब्दोपेता उपधानमन्त्राः । आदिना 'वाचो धेनुमुपासीते'ति, 'आदित्यो देवमधु' । द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायाम् । नेति । परमतेनोपनिषद्व्याख्यानेन सिद्धोऽर्थो नेत्यर्थः । 'लोकृ दर्शने विविधसुखज्ञानेष्वि'त्यर्थः । वेदान्ते योगरूढ्योर्योगादरणात् । न च योगादरे प्रकरणादात्मविषयकत्वेन लोकपदार्थदर्शनसिद्धेर्गौण्या किं प्रयोजनमिति शङ्क्यम् । वादिबुद्ध्यनुसारित्वादस्य सूत्रस्य । 'लोके शब्दार्थसम्बन्धो रूपं तेषां च यादृशम् । न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत् । ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः । तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचि'दिति पत्रावलम्बनात् । ननु 'छन्दोवत् सूत्राणि भवन्ती'ति महाभाष्यात् 'ये धातुशब्दाः' इति कारिकया योगमात्रमस्त्विति चेत् । न । सूत्रे लोकापत्तिदानेन लोकशब्दार्थौ योगरूढितः पूर्वकाण्डोक्तौ गृहीतौ, अनूदितौ वेत्यदोषात् । सर्वात्मभाववत इति भाष्यं प्रपञ्चयामासुः भगेत्यादि । सर्वात्मभाववत इति प्रकरणात् सम्बध्यते । तथाच सर्वात्मभाववतो लोकापत्तिर्नहीति योजना । 'भगवत्सेवोपयोगिदेहो वैकुण्ठादिष्वि'ति सेवाफलग्रन्थात् भगवत्सम्बन्धिनो लोकास्तु सर्वात्मभाववतः

लोकसम्बन्धो युक्तिसहोऽपि नेति ज्ञापनाय हिशब्दः। किञ्च। एतदग्रे, 'न पश्यो मृत्युं पश्यती'ति श्रुत्या यथा मृत्युनिषेधः क्रियते, तथा 'आत्मत एवेदꣳ सर्व'मिति श्रुत्यैवकारेणात्मातिरिक्तव्यवच्छेदः क्रियत इति मृत्युवल्लोकोपि न सम्बध्यत इत्याह मृत्युवदिति। तत्र रोगादीनामपि दर्शननिषेधे सत्यपि मृत्योरेव यन्निदर्शनमुक्तम्, तेन भक्तानां लोकान्तरसम्बन्धस्तत्तुल्य इति ज्ञाप्यते, अत एव 'नोत दुःख'मिति दुःखसामान्यनिषेधोऽग्रे कृतः॥ ५१॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥ ५२॥

अत्र हेत्वन्तरमाहास्मिन्नेव श्लोके, 'सर्वमाप्नोति सर्वश' इति परेण पादेन

भाष्यप्रकाशः।

व्याकुर्वन्ति किञ्चेत्यादि। अतिरिक्तव्यवच्छेद इति। प्रापञ्चिकसर्वव्यवच्छेदः। सूत्रे मृत्युवदिति षष्ठ्यर्थे वतिः। तथाच मृत्योरिव लोकानामप्यापत्तिर्नेत्यर्थः। अन्यद्विहायैतस्यैव कथनेन यत् सूच्यते, तत् तत्र गमकं चाहुः तत्रेत्यादि॥ ५१॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥ ५२॥ एतत्सूत्रप्रयोजनमाहुः अत्रेत्यादि। लोकापत्त्यभावरूपस्यार्थस्य श्राद्धत्वे 'न पश्य' इति श्लोकस्थं हेत्वन्तरमाहेत्यर्थः। तमेव हेतुं सूत्रव्याख्यानेन व्याकुर्वन्ति सर्वमित्यादि। एतच्छ्लोकस्थेन परेण तुरीयेण 'सर्वमाप्नोति सर्वश' इत्यनेन पादेन, शब्दस्य 'सर्वेषु लोकेषु कामचारो भवती'त्यस्य श्रुतिवाक्यस्य

रश्मिः।

षष्ठ्यन्तम्, इष्टा एव। भगवत्सम्बन्धिभिन्ना लोका मुक्तिपर्यन्तं यथा भवति, तथा नेष्टाः, निषेधात्। एतेन 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति वेदेन। अत्र यद्यपि 'लोका न लोका' इति श्रुतौ लोकानां निषेधः कृतः, तथापि भक्तमनोरथपूरकत्वेन सर्वात्मभाववद्भक्तेच्छा लोकनिरूपणे ज्ञेया। भक्तेच्छाभावे तु सर्वात्मभाववतो भगवत्सम्बन्धिनो भक्तेष्टा ज्ञेया लोकेतरे। प्रापञ्चिकेति। 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्चे'ति व्याससूत्रात्। तत्रेत्यादीति। अत एव लोकान्तरसम्बन्धाभावादेव दुःखस्य सामान्य नित्यमेकमनेकानुगतमात्मरूपं वा। 'एतꣳह वाव न तपती'ति श्रुतेः 'यत्र त्वस्य सर्वमात्मैवाभूत्, तत् केने'त्यादिश्रुतेश्च। आत्मलोके कर्माभावात्। 'ध्यानप्राप्ताच्युताश्लेषनिर्वृत्त्या क्षीणमङ्गला' इति वाक्यात्। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने'ति वाक्याच्च। दुःखस्याज्ञानजन्यत्वाच्च। ननु दुःखं न पश्यतीति वक्तव्ये दुःखतामित्यत्र वर्णागमः कुतो नाङ्गीकृत इति चेत्। न। दुःखसत्तामेव न पश्यतीत्यत्र तात्पर्येणैतावतोऽर्थस्य विवक्षितत्वाद्वर्णागमाभावात्। असङ्गतौ वर्णागमस्वीकारात्। तथा च तद्भाववतोप्येतत्कामवत्त्वमिति सिद्धान्तः॥ ५१॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥५२॥ परेण चतुर्थपादेन 'सर्वमाप्नोती'त्यनेनोपसंहृतत्वादर्थनिर्णायकेन। सर्वदातृवाचकेन 'सर्वश' इति पदेन वा शब्दस्य 'तस्य सर्वेषु लोकेषु कामचारो भवती'तिश्रुतिवाक्यस्य ताद्विध्यं तस्य 'आत्मत एवेदं सर्व'मित्यस्य विधता समानार्थकत्वमुपलभ्य यद्यपि पूर्वसूत्रात् प्रत्ययविपरिणामेनोपलब्धेरित्यस्य रूपमन्वेति, तथापि प्रथमोत्पत्त्यर्थं प्रतीयत इत्यध्याहार्यम्। चकारात् तस्मात् न लोकापत्तिरित्यनुवृत्त्यार्थः। पुनश्चकारोऽनुक्तसमुच्चय इत्यनुक्तोऽर्थो 'नन्वात्मत एवेदं सर्व'मिति वाक्येनैवैतदर्थलाभे पुनः 'सर्वेषु लोकेषु कामचारो

शब्दस्य श्रुतिवाक्यस्य 'आत्मत एवेद९ सर्वे'मिति यत् पूर्वं श्रुतिवाक्यं तद्विधतैव प्रतीयते इति न लोकसम्बन्धो वक्तुं शक्य इत्यर्थः । ननु 'आत्मत एवेद९ सर्वे'मिति वाक्येनैवैतदर्थलाभे पुनस्तदुक्तिर्नोचितेत्याशङ्कायां तत्र हेतुमाह। तुशब्दः शङ्कानिरासे। भूयस्त्वाद्धेतोः। उक्तेऽर्थे हेतूनां बाहुल्ये तद्दार्ढ्यं भवतीत्याशयेनोक्तार्थस्यैव श्लोकेनानुबन्धः कृत इत्यर्थः। अथवा। भूयः-पदमाधिक्यार्थकम्। तथाच स्वकृतसाधनसाधितफलापेक्षया स्वयमुद्यम्य भगवता साधितफले निरवधिरुत्कर्ष इति ज्ञापनाय पुनः श्लोकेन तथेत्यर्थः ॥ ५२ ॥

भाष्यप्रकाशः।

ताद्विध्यम्, 'आत्मन एवेद९ सर्वे'मित्येवं रूपं यत् श्लोकात् पूर्वं श्रुतिवाक्यं तद्विधता तत्समानार्थकत्वमेव प्रतीयते, एतस्य पद्यश्लोकस्य 'तदेष श्लोक' इत्यनेन पूर्वोक्तसर्वार्थसंग्राहकतयोक्तत्वात्, पूर्वं चात्मन एव सर्वस्य निगमितत्वात् सर्वैः प्रकारैरात्मन एव पूर्वोक्तं सर्वमाप्नोतीत्यर्थस्य सिद्धेर्न प्रापञ्चिकलोकसम्बन्धो वक्तुं शक्य इत्यर्थः। सूत्रशेषमवतार्य व्याकुर्वन्ति **तुशब्द इत्यादि** । **अनुबन्धः कृत इति**। अनु पूर्वोक्तं लक्ष्यीकृत्य बध्यते सम्बध्यत इत्यनुबन्धः स कृतः । समासव्यासधारणस्य लोके विदुषामिष्टत्वादनेन श्लोकेन कृत इत्यर्थः। उक्तरीत्या व्याख्याने अपुष्टार्थत्वमित्यरुच्यार्थान्तरमस्याहुः **अथवेत्यादि**। **तथेति**। अनुबन्धः ॥ ५२ ॥

रश्मिः।

भवती'त्यत्रोक्तिर्नोचितेति। तुरस्याः शङ्काया निरासः । कुतः । भूयस्त्वात्। हेतूनां भूयस्त्वात्। उक्तार्थस्य हेत्वन्तररूपस्यानुबन्धः कृत आधिक्याद्वानुबन्धः कृत इति सूत्रार्थः। **पादेनेति** । तेन **भाष्ये परेण पादेनेति** पाठः। **पद्येनेति** प्रामादिकः पाठः। **तदेष इति**। तत् पूर्वोक्तमर्थं सङ्ग्रहेण प्रतिपाद्यत्वेनाभिमुखीकृत्यैष श्लोको भवतीत्यर्थः। तदित्यव्ययम्। **सर्वैरिति**। **सर्वश** इत्यस्यार्थः। सर्वदातृभिः सर्वमाप्नोतीत्यर्थव्यक्तेः सर्वैः प्रकारैरिति पर्यवसितोऽर्थः । बहुभिः प्रकारैरित्यर्थः। 'बह्वल्पार्थेभ्य' इति शस्। **न प्रेति**। पूर्वसूत्रादनुवर्तितस्य न लोकापत्तिरित्यस्यार्थकथनम्। **बध्यत इति**। भावे प्रत्ययः। **अनुबन्ध इति**। भावे घञ्। ननु पूर्वं व्यासस्य विद्यमानत्वात् श्लोकोक्तसमासस्य किं प्रयोजनमिति चेत्, तत्राहुः **समासेति**। 'धर्मादिष्वनियम' इति समासशब्दस्य पूर्वनिपातः। **इष्टत्वादिति**। यथात्रैव 'साङ्गोऽध्येय' इति प्रारम्भे। **अपुष्टार्थत्वमिति**। ननु लिङ्गभूयस्त्वप्रतिज्ञानाल्लिङ्गभूयस्त्वसूत्र इति पुनरुक्तेऽर्थेऽप्यपुष्टत्वं नेति चेत्। न। अपुनरुक्तलिङ्गभूयस्त्वस्य सूत्राशयगोचरत्वात्। 'अनवद्य'मिति सूत्रलक्षणात्। **भाष्ये**। **स्वकृतेति**। मर्यादायामात्मसायुज्ये 'अचलत्वं चापेक्ष्ये'ति सूत्राभासोक्तभक्तेच्छा मार्यादिकसाधनयुक्ता स्वकृतं साधनं तत्साधितं फल'मात्मत एवेदं सर्वं'मिति श्रुत्युक्तमपि तस्यापेक्षया प्रदानवत्सूत्रोक्तदिशा स्वयमुद्यम्य वरवदास्यता भगवता साधितं फलं पद्यस्य सर्वात्मभावस्तस्मिन्नित्यर्थः। हेतावाधिक्यान्न पुनरुक्तिकृतमपुष्टत्वमिति भावः। **अनुबन्ध इति** प्रकारे वाल्। अनुबन्धत्वेन प्रकारेणानुबन्ध इत्यर्थः ॥ ५२ ॥

एक आत्मनः शरीरे भावात् ॥ ५३ ॥

उक्तेऽर्थे श्रुत्यन्तरसम्मतिमप्याह । एके शाखिनस्तैत्तिरीयाः, शरीरे भक्तशरीरे हृदयाकाश इति यावत्, तत्र आत्मनो भगवतो भावादाविर्भावात् तेन सह सर्वकामोपभोगं वदन्तीं श्रुतिं पठन्ति 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते'ति । अत्रोपक्रमे 'ब्रह्मविदाप्नोति पर'मिति श्रुतिरक्षरब्रह्मविदः परब्रह्मप्राप्तिं सामान्यत उक्त्वा, विशेषतः कथनार्थं 'तदेषाभ्युक्ते'तिवाक्यं तद्ब्रह्मप्रतिपाद्यत्वेनाभिमुखीकृत्यैषा वक्ष्यमाणा ऋक् परब्रह्मविद्भिरुक्तेत्युक्त्वैवमुक्तवती 'सत्यं ज्ञान'मिति । परब्रह्मस्वरूपमनुभवैकवेद्यम्, न शब्दादिभिर्वेद्यमिति ज्ञापनाय स्वयं तत्त्वप्रतिपादिकाप्यन्यमुखेनोक्तवती । अत्र ब्रह्मणा सह सर्वकामोपभोग उक्त इत्येतदेकवाक्यतायै 'सर्वेषु लोकेषु कामचारो भवती'ति श्रुतेरप्युक्त एवार्थो

भाष्यप्रकाशः ।

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ सूत्रप्रयोजनमुक्त्वा व्याकुर्वन्ति एके इत्यादि । भाष्यमत्र निगदव्याख्यातम् । एवमनेनाधिकरणेनाविहितभक्तिरूपस्य सर्वात्मभावस्य स्वरूपं तस्य सर्वेभ्यः साधनेभ्य उत्कृष्टत्वं तत्फलं च निर्धारितम् ।

शाङ्करे भास्करीये च भाष्ये इदं नवसूत्रमेकमधिकरणम् । तत्र चाग्निरहस्ये, 'नैव वा इदमग्रे सदासी'दित्यस्मिन् ब्राह्मणे मनोऽधिकृत्य, 'षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीनर्कान्म-

रश्मिः ।

एक आत्मनः शरीरे भावात् ॥ ५३ ॥ निगदेति । भक्तशरीर इति । ननु भक्तेति विशेषणं कुतो लब्धमिति चेत् । शृणु । 'ब्रह्मविदाप्नोति पर'मित्यत्र ब्रह्मविद्भक्त्या परमाप्नोतीति भाष्येऽर्थाद्भक्तलाभ इति । भक्तेर्ज्ञानव्यापारत्वात् । 'अकृश'मिति विशेषणं षोडशाधिकरण्या नोक्तं तथापि ज्ञेयम् । पूर्णसाधनत्वात् । तथा च सुबोधिनी—'अकृश'मिति ज्ञानम् । पूर्णत्वात् । अन्येषां परिच्छेदरूपत्वात् । अनेन पूर्णमेव ज्ञानं साधनमिती'ति । न चात्र नेदं विशेषणमिति वाच्यम् । प्रभासलीलायाम'प्यपाश्रिताभकाश्वत्थ'मिति विशेषणे पूर्वाधिकरणोपान्ते ऐश्वर्याविष्टस्य कर्तुमकर्तुमन्यथाकर्तुं समर्थत्वेनोपदेशकाभावादासुरव्यामोहलीलोपयोगात् । एवं निगदव्याख्यातमित्यर्थः । निर्धारितमिति । प्रमाण 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फल'मित्यधिकरणे । साधनं प्रदानवत्सूत्र उक्तमिति सर्वं शुभम् । एवेति । उक्तोऽर्थ एव, नान्यः, विकल्पापत्तेरित्यर्थः । विकल्पस्त्वेकवाक्यत्वाभाव इति भावः । नन्वग्निरहस्योक्तसम्पादिकाग्नीनां क्रियामयत्वं प्रकरणाद्भविष्यति, न ज्ञानमयत्वमिति चेत् । तत्राहुः शाङ्कर इत्यादि । श्रुत्यर्थस्तु—नैव वा इदमुत्पत्तेः पूर्वमासीत् । नाप्यसदित्युपक्रम्य मनसः प्रादुर्भावमुक्त्वा 'तन्मन आत्मानमैक्षते'त्यात्मेक्षणपूर्वकमग्नीनपश्यदिति मनोऽधिकृत्य आत्मनः स्वस्य सम्बन्धित्वेन, अग्नीन् किंभूतान् पुरुषायुष्ट्वेन कृप्तशतवर्षान्तरगतैः षट्त्रिंशत्सहस्रैरहोरात्रैरवच्छिन्नतया एकस्मिन्नहोरात्रे उत्पन्नसर्वमनोवृत्तिष्वहोरात्रगतैकत्वारोपेण मनोवृत्तीनामसंख्येयानामपि षट्त्रिंशत्सहस्रत्वम् । इष्टिकात्वेन च सम्पाद्यन्ते । 'षट्त्रिंशत्सहस्राणी'त्यादिना । मन एव स्ववृत्तिरूपान् अग्नीन् अर्कान् ऋक्पूजायां अर्च्यान् । अत एव मनोविकारान् । मनश्चितः मनसा चीयन्ते सम्पाद्यन्ते इति

---

१. उक्त्वा तामिति पाठः । २. शब्दादिभिर्वेद्यम् ।

भाष्यप्रकाशः ।

नोमयान्मनश्चित' इति यद्वाक्यं तद्विचार्य, तेषामग्नीनां न क्रियामयत्वम्, किन्तु विद्यामयत्वमेवेति सिद्धान्तितम् ।

रामानुजाचार्यमते त्विदमेकसूत्रम् । तत्र, तैत्तिरीयमहानारायणोपनिषत्स्थः 'सहस्रशीर्ष देव'मिति सर्वोऽनुवाको विषयवाक्यम् । तत्र किं पूर्वानुवाके 'दहरं विपाप'मिति यद्दहरोपासनं विहितम्, तद्विषयो निर्धार्यते, उत सर्ववेदान्तोदितपरविद्योपासनानां विषय इति संशये, दहरोपास्यविशेष एव निर्धार्यते प्रकरणात् । पूर्वस्मिन्ननुवाके 'दहरं विपापं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्य'मिति दहरविद्या प्रकृता । अस्मिंश्चानुवाके 'पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुख'मित्यादिना हृदयपुण्डरीकाभिधानम् । एतस्य नारायणानुवाकस्य दहरविद्योपास्यनिर्धारणार्थत्वमुपोद्बलयतीत्येवं प्राप्ते, उच्यते । लिङ्गभूयस्त्वादिति । अस्यानुवाकस्य निखिलपरविद्योपास्यविशेषनिर्धारणार्थत्वे बहूनि लिङ्गानि दृश्यन्ते । तथाहि । परविद्यासु अक्षरशिवशम्भुपरंब्रह्मपरंज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टमुपास्यं वस्त्विह तैरेव शब्दैरनूद्य, तस्य नारायणत्वं विधीयते, भूयसीषु विद्यासु श्रुतावनूद्य नारायणाभिधानभूयस्त्वं नारायण एव सर्वविद्यासूपास्यमस्थूलत्वादिविशेषितानन्दगुणकं परं ब्रह्मेति विशेषनिर्णये भूयो बहुतरं लिङ्गं भवति । लिङ्गशब्दश्चिह्नपर्यायः । चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः । तद्धि प्रकरणाद्बलीय इति पूर्वतन्त्रे सिद्धम् । यत्पुनः 'पद्मकोशप्रतीकाश'मित्यादिवचनमस्य दहरविद्याशेषत्वमुपोद्बलयतीत्युक्तम् । तन्न । लिङ्गात्मकेन बलीयसा प्रमाणेन सर्वविद्योपास्यनिर्धारणार्थत्वेऽवधृते सति दहरविद्यायामपि तस्यैव नारायणस्योपास्यत्वमित्यर्थकतया तद्वचनोपपत्तेः । नच 'सहस्रशीर्ष'मित्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासनासम्बन्धः शङ्कनीयः । तस्मिन् 'यदन्तस्तदुपासितव्य'मित्युपासिगतेन कृत्यप्रत्ययेन उपासिकर्मणोऽभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः । 'विश्वमेवेदं पुरुषः' 'तत्त्वं नारायणः पर' इत्यादिप्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वेदितव्या । 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वरा'डिति निर्देशैः सर्वस्मात् परो नारायण एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयत इत्युक्तम् ।

मम त्वत्रान्यदपि प्रतिभाति । सहस्रशीर्षादिषु त्रिषु मध्यममन्त्रे तुरीयपादे यत् 'उपजीवती'ति क्रियापदम्, तत्र कर्मत्वेन द्वितीयान्तपदान्यन्वयं प्राप्नुवन्ति, तन्मन्त्रारम्भे 'विश्वत' इत्यनेन यज्जगद्रूपं विश्वमुक्तम्, तदिदं विश्वमेव पुरुषः क्षरः परमं विश्वं नारायणं हरिमुपजीवतीत्येवं पदसम्बन्धे बाधाभावात् । एवमन्यान्यपि पदानि तत्रैव योजनीयानि । बाहुलकाश्र-

रश्मिः ।

मनश्चितस्तान् मनोऽपश्यदिति । **न क्रियेति** । अग्निचयनप्रकरणवत् क्रियामयत्वं तत् न, किन्तु प्रकरणाल्लिङ्गस्य बलीयस्त्वाद्विद्यामयत्वमित्यर्थः । लिङ्गभूयस्त्वादग्नीनां ज्ञानमयत्वं तल्लिङ्गं प्रकरणाद्बलीयः । तदपि 'श्रुतिलिङ्गवाक्यप्रकरणे'त्यादिजैमिनिसूत्रे उक्तमिति सूत्रार्थः । **पूर्वतन्त्र** इति । उक्तसूत्रे सिद्धम् । **द्वितीयेति** । कर्तुरुपासनाक्रिययेप्सिततमत्वात् । दहरविद्यायामभिहितकर्मणो द्वितीयानुपपत्तिमाहू रामानुजाचार्याः **तस्मिन्नित्यादि** । **द्वितीयेति** । 'सहस्रशीर्ष'मित्यादि । **प्रथमार्थे** इति ।

१. रामानुजभाष्येऽत्र क्वचित् क्वचित् पाठभेदः ।

भाष्यप्रकाशः ।

शापेक्षया व्यवहितान्वयपक्षस्य लघुत्वादिति । अग्रे तु तैरष्टसु सूत्रेषु शङ्कराचार्याद्युपन्यस्तैव विद्या विचारिता ।

तन्मतचोरः शैवस्तु, तद्वदेवैकसूत्रेऽस्मिन्नधिकरणे, महानारायणोपनिषत्स्थं 'सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रः सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु' इति मन्त्रमुदाहृत्य, तदग्रिमं 'कद्रुद्राये'ति मन्त्रं त्यक्त्वा, 'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतये उमापतये पशुपतये नमो नम' इति मन्त्रं चाग्र उदाहृत्य, अत्र किं सर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म पूर्वप्रकृते सवितृमण्डलविद्यामात्र उपास्यम्, उत सर्वासु परविद्यास्विति सन्देहे, प्रकरणाद्यप्राप्तिमुद्भाव्य, परविद्यालिङ्गसम्बन्धवाक्यभूयस्त्वात् सर्वासु परविद्यास्विति सिद्धान्तयित्वा, 'सर्वो वै रुद्र' इति वाक्ये 'सर्वं खल्विदं ब्रह्मे'ति शाण्डिल्यविद्योपास्यलिङ्गम्, 'पुरुषो वै रुद्र' इत्यत्र पुरुषसूक्तोपकोसलविद्याद्युपास्यलिङ्गम्, 'स'दित्यत्र सद्विद्योपास्यस्य, 'मह' इत्यत्र 'मह इति तद्ब्रह्म अङ्गान्यन्या देवता' इति व्याहृतिविद्योपास्यस्य, कद्रुद्रमन्त्रे 'शंतमꣳ हृदे'ति हृदयद्योतनाद्दहरविद्योपास्यस्य,' हिरण्यबाहव' इति हिरण्यरूपत्वं सवितृमण्डलोपास्यस्य, 'उमापतय' इति सर्वपरविद्योपास्यस्येत्यूचिवान् ।

तन्मन्दम् । आद्यायां परविद्यालक्षणाभावात् । 'अथ परा यया तदक्षरमधिगम्यत' इत्यक्षरप्रापकत्वस्य तद्गमकत्वस्य वा तल्लक्षणत्वात् । अस्यास्तु सर्वप्रतीकतया तत्क्रतुन्यायात् क्षरप्रापकत्वेनाक्षराप्रापकत्वात्, सर्वस्य ब्रह्मकारणकत्वमात्रभावनेनादृश्यत्वादिलक्षणकाक्षराज्ञापकत्वाच्च । द्वितीयेपि वाक्ये पुरुषशब्दस्य गौणत्वात्, 'भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने' इति विष्णुपुराणवाक्येन 'स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते । स्त्रीप्रायमितरत् सर्वं जगद्ब्रह्मपुरःसरम् । स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वैभवादपी'ति नारसिंहवाक्याभ्यां च पुरुषशब्दस्य भगवत्येव मुख्यवृत्तत्वेन तदभिमते शिवे तथात्वस्य बाधितत्वात् । अत एव तृतीयवाक्येपि 'सन्मह' इत्येकं पदम्, सतो महस्तेजः सन्मह इति चैकपद्ये तदर्थः, तेन तयोरपि पदयोः सद्विद्याव्या-

रश्मिः ।

'छन्दसि बहुल'मिति सूत्रात् । **तैरिति** । रामानुजैः । सूत्रार्थस्तु । पूर्वेण इष्टिकचिताग्निना विकल्प्यन्ते मनश्चितादयोऽग्नय इति तेषां विकल्पः प्रकरणात् क्रियाप्रकरणात् क्रिया क्रियारूपाश्च ते चितरूपा तामग्निचितादीनामपि क्रियामयक्रत्वनुप्रवेशेन क्रियामयत्वं मानसग्रहवदुपपद्यते, यथा द्वादशाहेपि वाक्ये दशमेऽहनि मानसग्रहस्य मनोनिष्पाद्यग्रहस्य उत्पादनस्तोत्रशस्त्रप्रत्याहरणभक्षणत्वेन विद्यारूपस्यापि क्रियामयक्रत्वङ्गतया क्रियारूपत्वम्, तथेहापीति । **शैव** इति । भगवानिति शेषः । **उमेति** । परब्रह्मत्वस्यात्र पर्यवसितेः । विष्णुसमानशीलव्यसनवत्त्वं **पर** इति । तदुत्कर्षासहन हृत्वा विष्णावुत्कर्षमाहुः **तदिति** । **आद्यायामिति** । श्रुतौ । **अस्यास्तु** 'सर्वो वै रुद्र' इत्यस्यास्तु सर्वेषां जगत्स्थपदार्थानां प्रतीकताङ्गता, 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग'दिति गीतातस्तयाङ्गस्य क्षरत्वेन तत्क्रतुन्यायो यादृशः क्रतुस्तादृशं फलमिति क्रतोः सेवायाः सर्वस्य रुद्रत्वेन भावनारूपायाः क्षरविषयतया तत्त्वात् । **सर्वस्येति** । क्षरस्य । **वाक्य** इति । 'पुरुष' इत्यादिश्रुत्यन्तर्गतं वाक्यं पदसमूहः । **साक्षादिति** । साक्षात्प्रत्यक्षतुल्ययोः । **वैभवात्** विभुरेव वैभवस्तस्मात् । भावप्रधानो निर्देशः । **अत** इति । मुख्यपुरुषमहिमत्वादेव । सतो ब्रह्मणो महस्तेजः । ऐकपद्य इति । [illegible]

मन्तव्यः ॥ ५३ ॥

इति तृतीयाध्याये तृतीयपादे सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ (३-३-१८.)

ननु 'ब्रह्मविदाप्नोति पर'मिति श्रुत्या अक्षरब्रह्मविदः परब्रह्मप्राप्तिरुच्यते। तत्रेतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयति, उत तन्निरपेक्षमिति भवति संशयः। अत्र श्रुतौ तन्मात्रोक्तेरितरनिरपेक्षमेव तत्तथेति पूर्वः पक्षः। सिद्धान्तस्त्वेवं सति ज्ञानमार्गीयाणामपि परप्राप्तिः स्यात्। सा त्वनेकप्रमाणबाधितेति पूर्वमवोचाम।

भाष्यप्रकाशः।

ह्रुतिविद्योपास्यलिङ्गत्वाभावात् । 'हिरण्यबाहव' इत्यस्य सवितृमण्डलोपास्यत्वगमकताप्यक्षिद्वित्वलिङ्गविरुद्धेत्यस्य 'अन्तस्तद्धर्मा'धिकरण एवास्माभिरुपपादितत्वात्। उमापतिपदस्य कस्यामपि निःसन्दिग्धायां परविद्यायामदर्शनाच्च। इदं यथा तथा मया ब्रह्मस्ताख्ये वाद उपपादितत्वान्नात्र विशिष्योच्यते। दहरविद्योपास्यत्वं तु क्रममुक्तौ प्राप्यविभूतिमध्येपि शिवस्य सत्त्वादनुमोदामह इति दिक् ॥ ५३ ॥ इति सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ पूर्वाधिकरणान्तिमसूत्रे तैत्तिरीयश्रुतिः सम्मतित्वेन प्रदर्शितेति प्रसङ्गात्तदर्थविचारायाधिकरणान्तरमारभत इत्याशयेन तद्विषयादिकं वदन्तस्तदवतारयन्ति ननु ब्रह्मेत्यादि। प्रकृते सहकार्यनुक्तिः केवलाक्षरविदां तदप्राप्तिदर्शनं च सन्देहबीजम्। पूर्वपक्षसिद्धान्तौ तु स्फुटौ। सा त्वनेकेत्यादि। ज्ञानमार्गीयाणां परप्राप्तिस्तु 'यमेवैष वृणुते' 'नायमात्मा बलहीनेन' 'भक्त्या मामभिजानाति' 'भक्त्याहमे-

रश्मिः।

पदार्थः। अक्षीति। छान्दोग्यस्थे 'यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति वेदे। अग्नीनां ज्ञानरूपत्वव्यवस्थापनम्, 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धसुबोधिन्युक्तश्रुत्याऽसन्दिग्धम् । प्रकरणस्याग्निश्रुतितत्पदसामर्थ्याभ्यां प्रकरणस्य नैर्बल्यान्नैर्बल्यम्। यद्वा। सूत्राणां न्यायरूपत्वेनाग्निरहस्येपि प्राप्तिः। न च भवन्नये यस्य भूयांसि लिङ्गानि तत्तच्छब्दवाच्यं यथा तत् वरणमेव बलीय इति, अन्यत्र तु तत् लिङ्गमेव बलीय इति तत्पदार्थाननुगम इति वाच्यम्। तत्पदार्थत्वेन वरणादीनां ग्रहणे तत्पदार्थत्वस्यानुगमात्। अन्यथा सूत्रेषु विश्वतोमुखत्वस्य लक्षणांशस्याव्याप्तेः।

माध्वास्तु। अनुव्याख्याने तु। तट्टीकायां न्यायसुधायाम्। 'विद्यैवे'ति सूत्रमुपन्यस्य यद्यपीदमधिकरणमनुबन्धादिभ्य इत्यतः पूर्वम्, तथाप्युपासनस्वरूपावगमे सत्येव तत्सार्थक्यसमर्थनस्यावसरः, नान्यथेति व्युत्क्रमेण व्याख्यानमित्युक्त्वोपपादित तथाहीत्यादिग्रन्थेन। ते 'अनुबन्धादिभ्य' इत्यादौ उपासनास्वरूपं 'विद्यैव तु निर्धारणा'दित्यादौ तत्सार्थक्यमुच्यते।

भिक्षुभाष्येपीदं द्रष्टव्यम्।

तत्र रामानुजाचार्यमतमपि न्यायसञ्चारेण गतार्थतां भजते। माध्वभिक्षुभाष्ये सम्यगालोच्य तदधिकरणार्थपर्यवसानमालोच्यम् ॥ ५३ ॥ इति सप्तदशं लिङ्गभूयस्त्वाधिकरणम् ॥ १७ ॥

व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४ ॥ प्रकृत इति । श्रुतौ। सन्देहबीजमिति। व्युत्क्रमेण सन्देहबीजम्। स्फुटाविति। ज्ञानमार्गीयाणामिति। साधना-

किञ्च । ज्ञानशेषभूतब्रह्मापेक्षया फलात्मकस्य परस्य मुख्यत्वात् 'तदेषाभ्युक्ते'ति श्रुतिस्तदेव प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगुक्तेत्याह । तेन तत्र ब्रह्मपदे पुरुषोत्तमपरे ज्ञायेते । तथाच । गुहायां यद्याविर्भूतं परमं व्योम पुरुषोत्तमगृहात्मकमक्षरात्मकं व्यापिवैकुण्ठं भवति, तदा तत्र भगवानाविर्भवतीति तत्प्राप्तिर्भवतीत्युच्यते 'यो वेद निहितं गुहायां परमे व्योम'न्नित्यनेन । तथाच । ज्ञानिनां गुहासु परमव्योम्नो व्यतिरेक एव, तत्र हेतुः, तद्भावाभावित्वादिति । 'यमेवैष वृणुत' इतिश्रुतेर्वरणाभावे भगवद्भावस्यासम्भवात्, ज्ञानिनां तथा वरणाभावाद्भगवद्विषयको भावो न भावीति तथेत्यर्थः । ननु ज्ञानविषयत्ववदाविर्भावोऽप्यस्तु, किञ्च, तदतिरिक्तमाविर्भावमपि न पश्याम इत्याशङ्कायामाह न तूपलब्धिवदिति । उपलब्धिर्ज्ञानम्, तद्वद्गुहायामाविर्भावो न भवतीत्यर्थः । यस्मै भक्ताय यल्लीलाविशिष्टं स्वस्वरूपमनुभावयिता प्रभुर्भवति, तद्गुहायां तल्लीलाश्रयभूतमक्षरस्वरूपं वैकुण्ठलोकवदाविर्भावयतीति नोक्तशङ्कालेशोऽपि । यत्र पुरुषोत्तमस्य

भाष्यप्रकाशः ।

कया ग्राह्य' इत्यादिप्रमाणबाधितेति इतः पूर्वाधिकरणेष्ववोचामेति नात्र सिद्धान्ते सन्देग्धव्यमित्यर्थः । ननु भवत्वेवम्, तथाप्ययमर्थः प्रकृतश्रुतेः सूत्राच्च कथं लभ्यत इत्याकाङ्क्षायां पूर्वं श्रुतेस्तल्लाभमाहुः किञ्चेत्यादि । तेन तत्रेति । तेनास्यामृचि । ज्ञायेते इति । आनन्दमयाधिकरणद्वितीयवर्णकस्थेन 'अथवा अक्षरे ब्रह्मण्यानन्दात्मके' इत्यादिव्याख्यानानन्तरेण ज्ञायेते । ऋचि 'परमं व्योमे'ति पदद्वयं ज्ञानशेषभूतब्रह्मपरमित्याशयेन ऋक्सिद्धमर्थमाहुः तथाचेत्यादि । उच्यत इति । अस्यां ऋच्युच्यते । तथाचास्यां श्रुतौ गुहायां परमव्योमनि परप्राप्तिरुक्ता, परमव्योमाविर्भावस्तु न ज्ञानमार्गीयगुहायाम्, अतः परमव्योमपदादत्र सोऽर्थो लभ्यत इत्यर्थः । सूत्रात्तद्विवृण्वन्ति तथाचेत्यादि । व्यतिरेक इति । अभावः । सूत्रशेषमवतारयन्ति ननु ज्ञानेत्यादि । ज्ञानविषयत्ववदिति । अक्षरस्य ज्ञानविषयत्ववत् । तदतिरिक्तमिति । ज्ञानविषयत्वातिरिक्तम् । व्याकुर्वन्ति उपलब्धिरित्यादि । अनाविर्भावे हेतुं स्फुटीकुर्वन्ति यस्मा इत्यादि । लोकवदिति । लोकयुक्तम् । तथाच ज्ञानमार्गीयान् प्रति तादृशतदनुभावनेच्छाया अभावान्न परमव्योमात्मकाक्षरस्वरूपस्याविर्भावः । स चाविर्भावो दर्शनविषयत्वयोग्यतारूपः, न तु ज्ञानविषयत्वमात्रम् । अतो भगवतस्तथेच्छाभावेन केवलाक्षरज्ञानिनो वरणात्मकसहकारिशून्यत्वान्न परप्राप्तिरिति ज्ञानिभक्तस्यापि वरणात्मकसहकारिसापेक्षमेव ज्ञानं परप्राप्तिजनकमिति सिद्धान्तो निर्विचिकित्स इत्यर्थः । ननु श्रुतावक्षरस्यादृश्यत्वादिगुणकत्वस्योक्तत्वात् समन्वयाध्याये

रश्मिः ।

न्तरभक्तेरपेक्षाभावोक्तेः । एवं सिद्धान्तः स्पष्ट इत्यर्थः । किञ्चेत्यादीति । ज्ञानशेषेति । 'ब्रह्मवि'दित्यत्र ज्ञानविशेषणीभूतं यद्ब्रह्म तदपेक्षया । ब्रह्मपदे इति । 'ब्रह्मवि'दित्यत्रत्याद्ब्रह्मपदादग्रेतने ब्रह्मपदे । सोऽर्थ इति । इतरसाधनसापेक्षं ब्रह्मज्ञानं परं प्रापयतीत्यर्थः । भाष्ये । तथेत्यर्थ इति । तद्भावाभावित्वादित्यर्थ इत्यर्थः । वैकुण्ठलोकोऽस्त्यस्मिन्निति वैकुण्ठलोकवत् । द्वितीयान्ताद्वतिर्नोक्त इत्याशयेनाहुः लोकयुक्तमिति । दर्शनविषयत्वेति । आविर्भावतिरोभाववादे स्फुटः । नन्विति । उपेक्षाज्ञानविषये आविर्भूतेनाविर्भावप्रसङ्गात्तथा । ननु श्रुताविति ।

१. पर ।

चाक्षुषत्वम्, तत्र ततोऽधःकक्षस्य तस्य तथात्वे का शङ्का नाम । एतदु[1]पपादितं पूर्वम्, विद्वन्मण्डने च । ननु ज्ञानिज्ञानविषयभक्तगुहाविर्भूताक्षरयोर्भेदोऽस्ति, न वा । नाद्यः । मानाभावादेकत्वेनैव सर्वत्रोक्तेः । न द्वितीयः । निरवयवस्य क्वचिल्लोकरूपत्वातद्रूपत्वाभ्यामेकत्वानुपपत्तेरिति चेत् । मैवम् । लोकरूपत्वस्य पश्चाद्भावित्वे हीयमनुपपत्तिः, न त्वेवम्, किन्त्वक्षरस्वरूपमेव तथेति श्रुतिराह । 'अम्भस्यपारे भुवनस्य मध्य' इत्युपक्रम्य 'तदेव भूतं तदु भाव्यमा इदं तदक्षरे परमे व्योमन् ।' एतदग्रे च, 'यमन्तःसमुद्रे कवयोऽवयन्ति यदक्षरे परमे प्रजा' इत्यादिरूपा । स्मृतिरपि 'परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात् सनातनः । यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् । यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' इत्यादि तु गीतासु । श्रीभागवतेपि 'दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता' इति दशमे । द्वितीये च 'तस्मै स्वलोकं भगवान् समाहितः सन्दर्शयामासे'त्युपक्रम्य, कालत्रिगुणमाया[2]दिसम्बन्धराहित्यमुक्त्वा, भगवत्पार्षदानुक्त्वा, विमानप्रमदा उक्त्वा, श्रीरुक्ता । तथाच श्रुतिस्मृत्येकवाक्यतायां तादृक्स्वरूपमेवाक्षरमिति निर्णयो भवति । एवं सति सच्चिदानन्दत्वदेशकालापरिच्छेदस्वयम्प्रकाशत्वगुणातीतत्वादिधर्मवत्त्वेनैव ज्ञानिनामक्षरविज्ञानम्, भक्तानामेव पुरुषोत्तमाधिष्ठानत्वेन तथेति ज्ञेयम् । 'मल्लानामशनि'रिति श्लोकोक्तरीत्या पुरुषोत्तमस्येव । प्रभुणा श्रे

भाष्यप्रकाशः ।

तथा निर्णीतत्वाच्च नेदं साधीय इति शङ्कायामाहुः यत्रेत्यादि । तथाच वरणेन पुरुषोत्तमस्वरूपस्य चाक्षुषत्वं वरणश्रुतौ 'भक्त्या त्वनन्यये'ति गीतास्मृतौ चोक्तम्, अक्षरस्यापि 'कश्चिद्धीर' इति श्रुतावुक्तम्, तच्च पुरुषोत्तमादधःकक्षम्, अतः साधनविशेषसम्पत्तौ कैमुतिकन्यायावतारात् सर्वादृश्यतायामपि दृश्यत्वे विरोधाभावान्न सन्देह इत्यर्थः । अत्राक्षरस्वरूपविचारेण चोदयति

रश्मिः ।

अक्षरधियामित्यधिकरणे 'एतद्वै तदक्षर'मित्यादिश्रुतावुक्तत्वात् । **समन्वये**ति । 'अक्षरमम्बरान्तधृते'रित्यत्र निर्णीतत्वात् । इदमिति । सहकारिसापेक्षं ज्ञानं परप्राप्तिजनकमिति साधीयः । **उक्त**मिति । 'प्रत्यगात्मानमैक्ष'दिति प्रत्यगात्मरूपाक्षरज्ञानमुक्तम् । **का शङ्का नामे**तिभाष्यविवरणं **कैमुतिके**ति । **भाष्ये** । **पूर्व**मिति । 'न तूपलब्धिव'दित्यत्र । **विद्वन्मण्डन** इति । 'अभेदादनुपाधित्वा'दित्यत्र सगुणत्वेनाभिमताभेदोपपादनात्तथा । **शब्दापेक्षये**ति । पूर्वपक्षत्वाद्बादरिमतमुक्तम्, तस्यार्थप्रधानत्वात् । भगवतो व्यासस्य शब्दप्राधान्यात् । **उत्ताने**ति । 'अम्भसी'त्यत्र लोकत्रयनिरूपणमिति न साङ्कर्यम् । **गीतास्वि**ति । तन्माहात्म्यं भागवतापेक्षया बहुवचनम् । **देशकाले**ति । परिच्छिन्नत्वं मध्यमपरिमाणवत्त्वम् । भक्तानां तु देशकालकृतपरिच्छेदो वर्तते । श्रीगोवर्धनदेशाद्यमुनादेशः परः, यमुनादेशाच्छ्रीगोवर्धनदेशोऽपरः । प्रातःकालीना लीला न मध्याह्ने इत्येवं कालकृतपरिच्छेदः । लीलासु मध्यमपरिमाणरूपपरिच्छेदः, 'एकं रूपं रसात् पृथ'गितिवत् । **तथे**तीति । अक्षरज्ञानम् । एकस्यानेकत्वे दृष्टान्तमाहुः **मल्लाना**मिति । पुरुषोत्तमस्यानेकत्वेन दर्श-

---

१. चोपपादितम् । २. मायासम्बन्धः ।

यथा विचारिताः सन्ति, ते तथा भवन्तीति तद्विचार एव सर्वेषामधिकाररूप इति 'कृतप्रयत्नापेक्षस्त्वि'त्यत्र निर्णीतम् ॥ ५४ ॥

अस्मिन्नर्थे कैमुतिकन्यायकथनार्थं निदर्शनत्वेनोत्तरं पठति ।

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥

यागे तत्तदृत्विङ्नियतकर्तव्यान्यन्वाधानादीन्यङ्गानि । तत्रावबद्धाः सर्व एवर्त्विजो यजमानेन । अवबन्धनं नाम 'अध्वर्युं त्वां वृणे,' 'होतारं त्वां वृणे,' 'उद्गातारं त्वां वृण' इत्यादिरूपं वरणमेव, अन्यथा सर्वकर्मविदुषां तत्कृतिपटूनामेकत्राधिकारः, नान्यत्रेति नियमो न स्यात् । तस्य तस्य तथा वरणे तु यजमानेच्छैव हेतुः । ते च तदा न सर्वासु शाखासु विहितान्यङ्गानि कर्तुं सर्वेऽपि शक्ताः, किन्तु यजमानवरणनियमिता एव तथा । तत्र हेतुमाह । हि यतः कारणात् प्रतिवेदं नियमितान्यङ्गानि, 'हौत्रमृचा, आध्वर्यवादि यजुषा, उद्गात्रं साम्ने'ति । तथाचालौकिके वैदिके कर्मणि जीवेच्छापि नियामिका भवति यत्र, तत्र किमु वाच्यं प्रतिरोमकूपं सावकाशममितब्रह्माण्डस्थितिमतस्तदीशितुरिच्छैव नियामिका तत्तत्साधनफलसम्पत्ताविति ॥ ५५ ॥

भाष्यप्रकाशः ।

नन्वित्यादि । तथाच शब्दापेक्षयार्थस्य बलिष्ठत्वादर्थस्वरूपविचारे पूर्वोक्तमनुपपन्नमित्यर्थः । तत्र समादधते मैवमित्यादि । निर्णीतत्यमित्यन्तेन । इयमिति । उक्तविकल्परूपा । न त्वेवमिति । न तु रूपभेदः । शेषमुत्तानार्थम् । तथाच स्वरूपस्योक्तरूपत्वाद्भगवदिच्छयाधिकारभेदेन तस्य तस्य तथा भानान्न काप्यनुपपत्तिरित्यर्थः ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ सूत्रमवतारयन्ति अस्मिन्नित्यादि । व्याकुर्वन्ति याग इत्यादि । इत्यादिरूपं वरणमिति । तत्तत्कर्मकर्तृतानियमनरूपं सम्भजनं विभाग इति यावत् । शेषं स्फुटम् । तथाचाक्षरस्य तत्सर्वरूपत्वेऽपि ज्ञानिषु तथानाविर्भावे भक्तहृदये च तथाविर्भावे उक्तरीत्या कैमुतिकन्यायाद्भगवतस्तेषां तेषां तादृक्तादृक्फलदित्सैव नियामिकेत्यर्थः ॥ ५५ ॥

रश्मिः ।

नमधिकारभेदात् । यथेति । 'कामाद्द्वेष्यो भयात् कंस' इति षडुपाधिभिर्भिन्नत्वेन विचारिताः । तद्विचार इति । भगवद्विचारः । सर्वेषामधीति । विषयतासम्बन्धेन तथा । भगवति तु विचारः समवायसम्बन्धेन । सिद्धमाहुः तथा चेति । स्वरूपस्येति । अक्षरस्वरूपस्य । भाष्योक्तरूपत्वात् । तस्य तस्येति । ज्ञानिनो भक्तस्य च । कापीति । क्वचिल्लोकरूपातद्रूपाभ्यामेकत्वानुपपत्तिरूपा भाष्योक्ता । उपासनादिविषयभगवद्धर्मरूपषोडशकला निवृत्ताः । अग्रेऽष्टाधिकरण्यां षड्धर्मा धर्मी समष्टिश्चेति संख्यातात्पर्यम् ॥ ५४ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ सम्भजनमिति । 'वृङ् संभक्ता'विति धातुपाठात् । शेषमिति । आध्वर्यवादीति । आदिना प्रतिप्रस्थातुः प्रतिप्रस्थात्रम् एवं स्फुटं शेषम् ॥ ५५ ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥

ननु पूर्वं कर्मज्ञाननिष्ठानामपि पुंसामग्रे भक्तिमार्गीयत्वं यत्र भवति, तत्र तथैव भगवद्वरणमिति हि सिद्धान्तः । ऋत्विजस्त्वेकस्मिन् याग एकत्र वृतस्य नापरत्रापि तथेति विरुद्धो दृष्टान्त इत्यरुच्या निदर्शनान्तरमाह । यथैक एव कश्चिन्मन्त्रो बहुषु कर्मसु सम्बध्यते, कश्चित् द्वयोः, कश्चिदेकत्रैव, तथैव विधा-

भाष्यप्रकाशः ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ सूत्रमवतारयन्ति **नन्वित्यादि** । **तथैव भगवद्वरणमिति** । तत्तदनन्तरमेतं भक्तिमार्गे प्रवेशयिष्यामीत्येवं विचारितत्वात्तत्तदनन्तरमेव भगवद्वरणम् । **ऋत्विज इति** षष्ठी । **नापरत्रापि तथेति** । नान्यकार्ये विनियोगः । सूत्रं व्याकुर्वन्ति **यथैक एवेत्यादि** । उदाहरणं त्वाद्यस्य 'देवस्य त्वा सवितुः प्रसव' इत्यादिरनुषङ्गमन्त्रः । द्वितीयस्य सूर्योपस्थाने मन्देहादिनिवारणे च गायत्रीमन्त्रः । तृतीयस्य 'तेजस्वी भूयास'मिति । एवमन्यदपि द्रष्टव्यम् । कर्मोदाहरणं ज्योतिष्टोमादि जयन्तीव्रतादि च द्रष्टव्यम् । कर्मोदाहरणमन्यदप्याहुः

रश्मिः ।

मन्त्रादिवद्वाऽविरोधः ॥ ५६ ॥ अनुषङ्गेति । उदाहरणमित्यनुषङ्गः । अनुषङ्गो वाक्यपरिसमाप्तिः । वाक्यस्य परिसमाप्तिर्येन । अनुषङ्गोपि मन्त्रभेदकः । अनुषज्यत इत्यनुषङ्गः । सम्बद्धमन्त्रः । 'देवस्य त्वा सवितुः प्रसव' इत्यसिदमादायेत्येकोऽनुषङ्गः । एवमितरावपि । यथाऽमृताभिषेके । भैषज्ये च 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।' **भैषज्येनेति** । **द्वितीयस्येति** । द्वयोः कर्मणोः सम्बद्धस्य । 'आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्य'न्नित्यत्र । **मन्देहेति** । आरणे सह वै पन्नायाम् । 'तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्रियाभिमन्त्रिताम्भसो अप ऊर्ध्वं विक्षिपन्ति । ता एता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणे दीपे प्रक्षिपन्ती'तिश्रुत्या स्पष्टं मन्देहादिनिवारणम् । मन्देहद्वीपे निवारणं मन्देहादिनिवारणम् । तस्मिन् । गायत्रीव गायत्री । आसत्येन रजसेति । स्थानसाम्यं सम्बन्धो लक्षणा । मन्त्रत्वमभियुक्तप्रसिद्ध्या । अत्यन्तत्वान्तमध्यमपुरुषान्तत्वाभावेपि । सूत्रादिभावार्थपादभाष्ये । **तृतीयस्येति** । एकत्र कर्मणि सम्बद्धस्य मन्त्रः 'तेजस्वी भूयास'मिति होमे उदाहरणम् । **अन्यदपीति** । 'इषे त्वोर्जेत्वे'ति । शाखाच्छेदनेऽनुमार्जने । 'इषे त्वे'ति शाखायां 'छिनत्त्यूर्जेत्वेत्यनुमार्ष्टि वे'ति कल्पसूत्रात् । तथा प्राणापानयोः प्रत्यगसने । 'प्राणमूर्ध्वमुन्नयत्यपानं प्रत्यगस्यती'ति काठकात् । **वेदार्थे** द्वितीयपर्याये । तथा क्षुत्पिपासाभिवृद्धिकर्त्र्यै शक्त्यै औषधिपालने विचारकारणभूतशक्त्यै च । 'इषे पीपिहि ऊर्जे पीपिही'त्यारणात् । 'हरिः ॐ'मिति च । बहुषु कर्मसु । द्वयोः कर्मणोः 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती'त्युदाहरणम् । यागे पापश्लोकश्रवणाभावे च कर्मणोः । पापश्लोकश्रवणाभावस्यापि कर्मत्वम् । कर्मान्तःपातात् । एकत्र कर्मणि 'कारीर्या यजेत वृष्टिकामः' इत्युदाहरणम् । वृष्टिकामोपि कर्म, 'कर्ता कर्म च करणं चे'ति गीतावाक्यात् । **आदिपदादिति** भाष्यविवरणं **कर्मोदाहरणमित्यादि** । **ज्योतिष्टोमादीति** । 'ज्योतिष्टोमोऽग्निष्टोमः' । इदं कर्म तत्रैकत्र कर्मणि एको ब्रह्मा कर्तृकर्मरूप उपयुज्यते । 'परमेष्ठिनो वा एष यज्ञोऽग्रे आसीद्यदग्निष्टोम इति, तेन स परमां काष्ठामगच्छ'दिति । 'कर्मणा ब्रह्मैवमुच्यत' इति सुबोधिनी । आदिशब्दार्थोऽग्रे वक्तव्यः । स्मार्तोदाहरणं **जयन्तीत्यादि** । जयन्तीव्रतं सेवाकर्मार्थं भगवदावेशार्थं च । आदिना प्रायश्चित्तं कर्म शुद्ध्यर्थम् । एकं पितृकृतं प्रायश्चित्तं कर्मानेकबालशुद्ध्यर्थम् ।

नात्, तथात्रापीत्यर्थः । आदिपदात् कर्मोच्यते । यत्र काम्येनैव नित्यकर्मनिर्वाहः, तत्र कामितार्थसाधकत्वे प्रत्यवायपरिहारेऽप्येकमेव तदुपयुज्यते । यथाच सर्वतोमुखेऽनेकहोतृप्रवरेऽध्वर्युप्रवरे च गृह्यमाणे 'देवाः पितर' इत्यादिना यजमानकर्तृकानुमन्त्रणमेकमेव सर्वत्र सम्बध्यते, तथैव विधेः, तथात्रापि तावद्विधं यदेकमेव वरणम्, तेन तत्तन्निष्ठानन्तरं भक्तिनिष्ठेति न दृष्टान्तविरोध इत्यर्थः ।

अथवा । ॐमित्युदाहृत्यैव मन्त्राणामुच्चारणान्मन्त्रादिरोङ्कारः । स[1] यथा ब्रह्मात्मकत्वेनैक एव सर्वमन्त्रेषु सम्बध्यते, तथा वरणमपीति तथेत्यर्थः । यद्यपीतरनिष्ठानन्तरभूतभक्तिनिष्ठावतोपि वरणं तथाभूतमेकमेवेति नोक्तदोषः, तथाप्युत्कृष्टमार्गे वृतस्य नीचकक्षापादनमनुचितमिति मत्वा पक्षान्तरमुक्तम् । वस्तुतस्तु साधनमर्यादया यत्र भक्तिर्दित्सिता, तत्र तथेति नानुपपत्तिः काचित् ॥५६॥

इति तृतीयाध्याये तृतीयपादे अष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

भाष्यप्रकाशः ।

यथाचेत्यादि । सर्वतोमुखः कश्चिद्यागविशेषः । तावद्विधमिति । क्रमिकतत्तत्प्रकारकम् ।

मन्त्रादिपदं तद्गुणसंविज्ञानबहुव्रीहिणा व्याख्याय षष्ठीसमासपक्षेण प्रकारान्तरमाहुः अथवेत्यादि । ननु पूर्वव्याख्याने को दोषो येन व्याख्यानान्तरमत्रोक्तमित्याकाङ्क्षायां तदुक्तमङ्गीकृत्य सम्भावितं दोषमाहुः यद्यपीत्यादि । तथाभूतमिति । यादृशं केवलभक्तिमार्गीयस्य तादृशम् । पक्षान्तरमिति । ॐकारनिदर्शनपक्षः । तथाच ब्रह्मात्मकत्वेनोत्कृष्टस्याप्योङ्कारस्य तत्तन्मन्त्रसाङ्गत्वाय तत्तत्सम्बन्धो न दोषावहः, तथा वृतस्यापि तत्सम्बन्धो मर्यादामार्गरक्षार्थत्वान्न दोषावह इत्यर्थः । युक्त्या समाधाय सिद्धान्तेन समाधानमाहुः वस्तुत इत्यादि । तथाच भगवदिच्छाविचारादेवानुपपत्तिपरिहारः, निदर्शनं तु वादिनिग्रहायेति सूत्रकाराशय इत्यर्थः ॥ ५६ ॥

इत्यष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

रश्मिः ।

आदिपदार्थमाहुः कर्मोदेति । अन्यदिति । बह्वर्थकमेकं कर्म । द्व्यर्थमेकं कर्म तु यत्र काम्येनैवेत्यादिभाष्येणोक्तम् । काम्येन पशुकामनया कृतेन । एवकारो भगवत्प्रेरणया कृतकर्मव्यवच्छेदकः । नित्यकर्माग्निहोत्रादि । कामितार्थः पश्वादिः । प्रत्यवायेति । 'धर्मेण पापमपनुदती'ति श्रुतेस्तथा । तदिति काम्यं कर्मेति भाष्यार्थः । तथैव विधेरिति । विधिस्तत्रैव । क्रमिकेति । क्रमप्राप्तो यो होतृत्वाध्वर्युत्वरूपः प्रकारः यस्मिन् वरणे सम्भजने तत् क्रमिकतत्तत्प्रकारकं वरणम् । भाष्ये । तत्तन्निष्ठेति । कर्मज्ञाननिष्ठानन्तरम् । प्रकृते । मन्त्रादीति । सौत्रम् । तद्गुणेति । मन्त्र आदिर्यस्य कर्मण इति तद्गुणसंविज्ञानो बहुव्रीहिः । प्रथमान्ताद्वृतिः । उपयुज्यत इत्येकक्रियान्वयेन विशेष्यान्वय्यन्वयित्वरूपतद्गुणसंविज्ञानबहुव्रीहिलक्षणसत्वात् । तेन तद्गुणसविज्ञानबहुव्रीहिणा । षष्ठीति । मन्त्रस्यादिः मन्त्रादिरोंकारः । प्रथमान्ताद्वृतिः । भाष्ये । तथेत्यर्थ इति । दृष्टान्ताविरोध इत्यर्थ इत्यर्थः । प्रकृते । दोषमिति । कर्मज्ञानसम्बन्धरूपम् । अनुचितमित्यन्तेन भाष्येणाहुः यद्यपीत्यादीति । नोक्तदोष इति । सम्भावितो दोषः । नन्वयं दोषो भाष्ये क्वोक्त इति चेत्, शृणु । यद्यपीत्यादिग्रन्थस्य दोषं हृदिकृत्वा तत्परिहाराय प्रवृत्तत्वादित्याक्षेप्यत्वेन व्यञ्जनावृत्त्योक्त इति जानीहि । ॐकारेति । निदर्शनं दृष्टान्तः । तत्सम्बन्धः कर्मज्ञानसम्बन्धः । वस्तुत इत्यादीति । तत्र तथेति । तत्र भक्ते तथा कर्मज्ञाननिष्ठानन्तरं भक्तिमार्गीयवरणमित्यर्थः । अनुपपत्तिरिति । कर्मज्ञानसम्बन्धः ॥ ५६ ॥ इत्यष्टादशं व्यतिरेकाधिकरणम् ॥ १८ ॥

1. अनेकत्र ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ (३-३-१९.)

ननु सुखस्वरूपजिज्ञासायां 'यो वै भूमा तत् सुख'मित्युक्तम्, भूमस्वरूपजिज्ञासायां 'यत्र नान्यत् पश्यती'त्यादिना तद्यन्निरूपितं तत्सर्वात्मभावस्वरूपमिति यदुक्तम्, तन्नोपपद्यते । भूम्नो हि सुखरूपतोच्यते । सर्वात्मभावे तु विरहभावे दुःसहदुःखानुभवः श्रूयते । तेन मोक्षसुखमेव 'यो वै भूमे'त्यादिनोच्यते । 'यो वै भूमा तदमृत'मिति वाक्याच्च । अग्रे च, 'स वा एष एवं पश्य'न्नित्याद्युक्त्वा, 'तस्य सर्वेषु लोकेषु कामचारो भवती'ति फलमुच्यते । तच्च मोक्षानन्तरमसम्भवि, अतः स भावो मोक्षो वात्रोच्यत इति संशयः ।

तत्र कामचारोक्तेर्मुक्तिपूर्वदशायां तन्माहात्म्यनिरूपणार्थत्वादमृतशब्दाच्च मुक्तिरेव भूमपदेनोच्यत इति पूर्वः पक्षः ।

तत्र भूमशब्देन स भाव एवोच्यत इति सिद्धान्तः । तत्र दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षणं भूमत्वमनुपपन्नमिति शङ्कां परिहरति । भूम्नः सर्वात्मभावस्य ज्यायस्त्वं सर्वस्मान्मन्तव्यम् । तत्रोक्तानुपपत्तिपरिहारार्थं दृष्टान्तमाह क्रतुवदिति । दर्शपूर्णमासप्रकरणे तैत्तिरीयके पठ्यते 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छ'दित्युपक्रम्य, 'य एवं विद्वान् दर्शपूर्णमासौ

भाष्यप्रकाशः ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ प्रासङ्गिकं विचार्य पुनः प्रकृतशेषमेव विचारयतीत्याशयेनाधिकरणमवतारयन्तः संशयं व्युत्पादयन्ति नन्वित्यादि । तद्यदिति । भूमस्वरूपम् । श्रूयते इति । पुराणवाक्येभ्यः श्रूयते । तेनेति । सुखस्य दुःखविलक्षणत्वेन । यो वै भूमा तदमृतमिति वाक्याच्चेति । इदमपि 'तन्नोपपद्यत' इत्यत्र 'मोक्षाङ्गीकारे' च हेत्वन्तरम् । तत्रानन्तरं दुःखसद्भावेन सुखस्यामृतत्वाभावात्, मोक्षे चानन्तरं दुःखाभावेन सुखस्यामृतत्वादिति । एवं मोक्षकोटिर्व्युत्पादिता । अग्रे चेत्यादिना असम्भवीत्यन्तेन सर्वात्मभावकोटिर्व्युत्पादनम् । अत उभयबीजसद्भावादेवं संशय इत्यर्थः ।

पूर्वपक्षमाहुः तत्रेत्यादि । कामचारोक्तेरिति षष्ठी ।

सिद्धान्तमाहुः तत्र भूमेत्यादि । सम्प्रसादाधिकरणे भूमशब्देन परमात्मनो निर्णीतत्वाल्लिङ्गभूयस्त्वाधिकरणे सर्वात्मभावस्यापि निर्णीतत्वादत्र भूमलक्षणवाक्ये भूमपदेन स भावः सर्वात्मभावसहित एव परमात्मोच्यते । यथा 'घटेन जलमाहरे'त्यादौ घटादिपदेन छिद्रेतरत्वादिसहितो घटादिः, तद्वदिति सिद्धान्त इत्यर्थः । एवं सिद्धान्तं सामान्यत उक्त्वा तं व्युत्पादयितुं सूत्रमवतारयन्ति तत्र दुःखेत्यादि । व्याकुर्वन्ति भूम्न इत्यादि । सर्वात्मभावस्येति । इदं षष्ठ्यर्थस्य विवरणम् । भूमसम्बन्धिनः सर्वात्मभावस्येत्यर्थः । अत्र लौकिकतन्निरासायैव कथनमिति बोध्यम् । तत्रेति । ज्यायस्त्वप्रतिज्ञायाम् । दर्शपूर्णमासप्रकरण इति । संहिताप्रथमाष्टकषष्ठ-

रश्मिः ।

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५७ ॥ प्रकृतेति । सर्वात्मभावशेष..
पुराणेति । भ्रमरगीतोक्तेभ्यः । श्रुतिवाक्यं तु 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति सामान्यम् । तत्रेति । सर्वात्मभावे । भाष्ये । उक्तानुपपत्तीति । दुःखदर्शनानुपपत्त्या सर्वाधिकत्वलक्षण-

यजते परमामेव काष्ठां गच्छती'ति । यथा व्रतादिदुःखात्मकत्वेपि परमकाष्ठालक्षणफलगमकत्वेन दर्शपूर्णमासयोः सर्वक्रतुभ्योऽधिकत्वं वक्तुं 'अग्र आसी'दिति स्तूयते, तथा दुःखहेतुत्वेप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमुच्यत इत्यन्येभ्यः सर्वेभ्यो ज्यायस्त्वं मन्तव्यमित्यर्थः । अत्रोपपत्तिमाह । तथाहि दर्शयति । श्रुतिस्तु 'स एवाधस्ता'दित्याद्युक्त्वा, 'अथाहङ्कारादेश' इत्याद्युक्त्वा, 'अथात्मादेश' इत्याद्युक्तवती, अग्रे चैतादृशस्य 'आत्मत एव प्राणाशास्मरादिसर्व'मिति च दर्शयति । एतत्सर्वात्मभाववत्येव सर्वमुपपद्यते, न तु मुक्तस्य । वृत्तिभेदाभावात् प्राणाद्यभावाच्च । जीवन्मुक्तिदशायां प्राचीनानामेव सत्त्वात्, 'आत्मतः प्राणा' इत्यादि न वदेत् ।

भाष्यप्रकाशः ।

प्रपाठकनवमानुवाके । अग्र आसीदिति । 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्' । उच्यत इति । भाविस्वरूपमादायोच्यते । तथाच परमकाष्ठाप्रापकत्वात्तथेत्यर्थः । ननु भाविस्वरूपमादायैवोच्यते, न विद्यमानं स्वरूपमादायेत्यत्र किं गमकमित्याकाङ्क्षायामाहुः अत्रोपपत्तीत्यारभ्य, न वदेदित्यन्तम् । तथाच भूमपदेन यदि मोक्षावस्थामभिप्रेयात्, तदैवं त्रिविधा वृत्तीर्न वदेत्, प्राणादीनां नामान्तानां तत्र सम्बन्धं च न वदेत्, तदानीं तदुभयाभावात्, अतस्तदन्यथानुपपत्त्या भूमलक्षणे सर्वात्मभावभाविस्वरूपमेवोच्यत इति सर्वात्मभावसहित एव भूमा, न तु मोक्षावस्था । नापि जीवन्मुक्तावस्थेति युक्तम् । तां चेदभिप्रेयात्, तदा 'आत्मतः प्राणा' इत्यादि न वदेत्, तस्यामवस्थायां प्रारब्धवशादेव पूर्वप्राणादीनां सत्तायाः सत्त्वात्, अतो द्विविधस्यापि मोक्षस्यात्रादातुमशक्यत्वात् सर्वात्मभावोत्र ग्राह्य इत्यर्थः ।

रश्मिः ।

भूमत्वानुपपत्तिपरिहारार्थम् । **प्रकृते** । **भावीति** । परमकाष्ठापन्नस्वरूपमादाय । **तथेत्यर्थ** इति । ज्यायस्त्वमित्यर्थ इत्यर्थः । **विद्यमानमिति** । दुःखरूपम् । **त्रिविधेति** । 'स एवाधस्ता'दित्युक्ता । अहङ्कारादेशरूपा । आत्मादेशरूपा च । एतच्च **प्राणाद्यभावाच्चेति** भाष्याग्रे **न वदेदित्यस्य** सम्बन्धं कृत्वा योजितं ज्ञेयम् । **जीवन्मुक्तीत्यादिभाष्ययोजना** **प्राणादीनामित्यादि** । **प्राचीनानामित्यस्य** विशेषणमपीदम् । च पुन'स्तस्य वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशे'त्यादि । मध्ये 'आत्मत आविर्भावतिरोभावा'विति । उपान्ते 'आत्मतो नामे'ति । अन्ते 'आत्मतो मन्त्राः, आत्मतः कर्माणि, आत्मत एवेदं सर्व'मिति । अत्र नामान्तानां तत्र जीवन्मुक्ते तथा । **तदानीमित्यादि** । सर्वात्मभावेन भावि फलं तस्य स्वरूपं तस्य काले इत्यर्थः । **तदुभयेति** । निःसम्बोधमोक्षजीवन्मोक्षोभयं तदभावात् । **तदन्यथेति** । प्राणादिनामान्तसम्बन्धस्य सर्वात्मभावभाविस्वरूपकल्पनं विनानुपपत्त्या । एवकारस्तु ब्रह्मवित्प्रपाठके आनन्दमयान्तानि रूपाण्युक्त्वा श्राव्यते । 'अथातोऽनुप्रश्नाः । उता विद्वानमुं लोकं प्रेत्य कश्चित् समश्नुते ।' 'सोऽकामयते'त्याद्युक्त्वा तत्र दशरसात्मकजगदित्युक्तम् । मध्ये 'रसो वै स' इत्युक्त्वा 'स य एवंवित् । अस्माल्लोकात् प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामती'त्याद्युक्त्वा 'एतमानन्दमयमात्मानमुपसंक्रामति, तदप्येष श्लोको भवति । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने'ति श्रुतेः । **तामिति** । मोक्षावस्थां जीवन्मुक्तावस्थां वा । **तस्यामिति** । जीवन्मुक्तावस्थायाम् । **न वक्तुं शक्यमिति**

यद्वा। ननु लोकेपि शृङ्गाररसभाववति पुंसि नार्यां च त्वदुक्तभावसम्बन्धि-व्यभिचारिभावाः श्रूयन्ते। सैव सर्वत्र, स एव सर्वत्रेति। एवं सति लौकिकसधर्म-वत्त्वान्न त्वदुक्तभावस्यालौकिकज्ञानादिभ्य आधिक्यं वक्तुं शक्यम्, अलौकिक-विषयत्वाल्लौकिकत्वमपि न तथेति भवति संशयः। तत्र मनुजत्वरिपुत्वादिज्ञानाना-मिव कामादिभावेन स्नेहभावस्यापि सम्भवान्नास्यालौकिकत्वमिति पूर्वः पक्षः।

सिद्धान्तस्त्वस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यम्। ननूक्तं लोक-साधारण्यं बाधकमिति शङ्कानिरासाय निदर्शनमाह क्रतुवदिति। यथा दर्शा-दिषु दोहनाधिश्रयणातञ्चनव्रीह्यवघातादिपुरोडाशभक्षणादीनां लौकिकक्रियातु-ल्यत्वेन दर्शनेपि न लौकिकत्वम्, लौकिकप्रमाणाप्राप्तत्वादलौकिकतत्प्राप्तत्वात्, तथोक्तप्रमाणरूपवरणलभ्यत्वेन श्रुत्युक्तत्वान्न लौकिकत्वमस्य भावस्येति दिक्।

वस्तुतस्तु ग्रामसिंहस्य सिंहस्वरूपत्वेपि न ताद्रूप्यं वक्तुं शक्यम्। तथा लौकिकपुंसि नार्यां वा तदाभासो रसशास्त्रे निरूप्यते, तद्दृष्टान्तेन भगवद्भावव-द्भक्तरीतिभावनार्थम्, न तु ऋषीणां लौकिके तात्पर्यं भवितुमर्हति। अत्रोपपत्ति-

---

भाष्यप्रकाशः।

एतस्यार्थस्य पूर्वाधिकरणस्थेन सामान्यसूत्रार्थविचारेणापि सिद्धप्रायत्वमित्यरुच्या वर्ण-कान्तरेण सूत्रं व्याकुर्वन्ति यद्वेत्यादि। श्रूयन्त इति। साहित्यग्रन्थेषु भरतसूत्रादौ चोच्यन्ते। अलौकिकज्ञानादिभ्य इति। लोकविलक्षणेभ्योऽक्षरज्ञानमुक्तिजीवन्मुक्तिभ्यः। न तथेति भवति संशय इति। न वक्तुं शक्य इति लौकिकसजातीयधर्मवत्त्वालौकिकविषयत्वाभ्यां हेतुभ्यां भवति संशय इत्यर्थः। पूर्वपक्षमाहुः तत्रेत्यादि। तत्रेति। भगवति। सिद्धान्तं वदन्तः सूत्रं व्याकुर्वन्ति सिद्धान्त इत्यादि। प्रतिज्ञायां हेतुं वक्तुं नन्वित्यादिना बाधकमाशङ्क्य दृष्टान्तं व्युत्पादयन्ति यथेत्यादि। उक्तप्रमाणरूपवरणलभ्यत्वेनेति। अलौकिकप्रमाण-रूपतल्लभ्यत्वेन। तथाच सर्वात्मभावो लौकिकसदृशत्वेपि न लौकिकः, अलौकिकप्रमाणप्राप्त-त्वात्, लौकिकप्रमाणाप्राप्तत्वाच्च, यागीयदोहनाधिश्रयणादिवत्, यन्नैवम्, तन्नैवम्, लौकिक-तद्वदिति हेतुसिद्ध्या न प्रतिज्ञायां दोष इत्यर्थः। एतादृशश्च सादृश्यदर्शनजाः शङ्का अविचा-रकस्यैवोद्यन्ति, न तु विचारकस्येत्याशयेनाहुः वस्तुत इत्यादि। तथाच विचारकस्तु लोकेपि तथा तद्भावं पश्यन्नैवं शङ्कत इत्यर्थः। ननु यदि न सादृश्येन ताद्रूप्यम्, तदा ऋषिभिर्भर-तादिभिरलौकिकभावधर्मसादृश्यं लौकिके रसे कुतो निरूप्यते, अतस्तद्दर्शनाद्विचारकस्यापि शङ्का तूदेत्येवेत्याकाङ्क्षायामृषीणां तथा तन्निरूपणस्य तात्पर्यमाहुः तथा लौकिकेत्यादि। भग-

रश्मिः।

तथेतीत्यस्यार्थः। सजातीयेति। सधर्मत्वादित्यस्यार्थः। तत्रेत्यादीति। कामादीति। आदिना भयादिपञ्चकम्। 'कामाद्द्वेष्य' इति वाक्योक्तम्। प्रतिज्ञायामिति। अस्य भावस्य लौकिकेभ्यो ज्यायस्त्वं मन्तव्यमित्यस्याम्। निरूप्यत इति। शास्त्रान्ते 'परमेण समाधिना' शास्त्रकरणोक्तेः। तथा तन्निरूपणस्येति। अलौकिकभावधर्मसादृश्येन लौकिकरसनिरूपणस्य।

माह तथाहीत्यादि । पूर्वोक्तभाववत आत्मनः प्राणादिकं सर्वं दर्शयति श्रुतिः 'तस्य ह वा एतस्यैवं पश्यत' इत्यादिना । इतः पूर्वमपि 'स वा एष एवं पश्य'न्नित्युपक्रम्य, 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति, सर्वेषु लोकेषु कामचारो भवती'ति श्रुतिश्च । न हि लोके एवं सम्भवति, आत्मपदानां भगवद्वाचकत्वादिति सर्वोत्तमविषयकभावस्यैव तथात्वं युक्तमिति चोपपत्तिर्हिशब्देन सूच्यते ॥ १७ ॥

इति तृतीयाध्याये तृतीयपादे एकोनविंशं भूम इत्यधिकरणम् ॥ १९ ॥

भाष्यप्रकाशः ।

वद्भाववद्भक्तरीति भावनार्थमिति । भगवति विगाढभाववान् यो भक्तस्तद्रीतिभावनार्थम् । ननु ऋषीणां तथैव तात्पर्यमित्यत्र किं गमकम्, अत आहुः नन्वित्यादि । तदुक्तं कामसूत्रसमाप्तौ वात्स्यायनेन 'तदेतद्ब्रह्मचर्येण परमेण समाधिना । विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः । रक्षन् धर्मार्थकामांस्त्रीन् सम्पश्यन् लोकवर्तिनीम् । अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रिय' इति । तथाच यदि लौकिके तात्पर्यं स्यात्, एतच्छास्त्रतत्त्वज्ञस्य जितेन्द्रियभवनरूपं फलं न वदेत् । एवं भरतोक्ते सङ्गीतशास्त्रेपि ज्ञातव्यम् । उपवेदत्वात् । अतः पूर्वोक्त एव निश्चयः । सूत्रशेषमवतारयन्ति अत्रेत्यादि । उक्तस्यार्थस्य प्रकृतश्रुत्यभिप्रेतत्वे उपपत्तिमाहेत्यर्थः । उपपत्त्यन्तरं बोधयितुं हिशब्दार्थमाहुः सर्वोत्तमेत्यादि । तथात्वमिति । सर्वसाधनज्यायस्त्वम् ।

अत्रान्ये, वैश्वानरविद्यामुदाहृत्य, किमिहोभयथाप्युपासनं स्यात् व्यस्तस्य समस्तस्य च, उत समस्तस्यैव वेति सन्देहे, व्यस्तस्यापि विहितत्वात् फलस्यापि कथनादुभयथेति प्राप्ते, समस्तस्यैव न्याय्यम् । आन्तमेकवाक्यत्वात् । यथा 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात' इत्यत्र । 'मूर्धा ते व्यपतिष्यन्मां नागमिष्य' इत्याद्यनर्थस्य व्यस्तोपासने दर्शितत्वाच्चेत्याहुः ।

रश्मिः ।

विगाढेति । षडुपाधिजन्यभाववान् । पूर्वोक्त इति । सर्वात्मभावविषयः । उक्तस्यैति । ससम्बोधमोक्षरूपस्य सर्वात्मभावस्य । प्रकृतश्रुतिः 'तस्य ह एवं पश्यत' इत्यादिः । भाष्ये । लोके एवमिति । इह लोके जीवन्मुक्तस्य सम्भवति । प्रकृते । सर्वोत्तमेत्यादीति । उपपत्तिरिति । युक्तमित्यस्य युक्तिरुपपत्तिस्तद्विषयमित्यर्थात् तद्विशेषणीभूतोपपत्तिः । सर्वात्मभावस्य भूमत्वेपि मुख्यभक्तित्वमादाय पादार्थसङ्गतिर्धर्मत्वादिति बोध्यम् । वैश्वानरेति । 'प्राचीनशाल औपमन्यव' इत्यस्यामाख्यायिकायां व्यस्तस्य समस्तस्य वैश्वानरस्योपासनं श्रूयते । व्यस्तोपासनं तावत्, 'औपमन्यव कं त्वमात्मानमुपास्स' इत्यादि । 'दिवमेव भगवो राजन्निति होवाच, एष वैश्वतेजा आत्मा वैश्वानरोऽयं त्वमात्मानमुपास्स' इत्यादि । तथा समस्तोपासनमपि । 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथ्व्येव पादा'वित्यादि । एवं वैश्वानरविद्याम् । फलस्येति । 'तस्मात् तव सुत प्रसुतमासुतं कुले दृश्यत' इति फलस्य । आन्तमिति । अन्तं 'तस्य ह वा एतस्ये'ति समस्तोपासनवाक्यम्, तदभिव्याप्य आन्तं एकवाक्यत्वसमस्तस्य वाक्यत्वं तस्मात् । 'तस्य ह वा' इत्यत्र तच्छब्देन व्यस्तपरामर्शं कृत्वा एतस्येत्यनेनोक्तसमस्तस्याभेदोक्तेः । यथा वैश्वानरमिति । प्रथमस्य द्वादशाधिकरणे चतुर्थपादे । 'वैश्वानरं द्वादशकपालं निर्वपेत्, पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाती'त्यादि इष्टिविधायके वाक्ये येय द्वादशसङ्ख्या तस्यामष्टत्वादिसङ्ख्यानामन्तर्भाव उक्त इत्यान्तमेकं वाक्यम् । मां नागमिष्य इति । मां प्रति विशेषं

नाना शब्दादिभेदात् ॥ ५८ ॥ (३-३-२०.)

पूर्वाधिकरणैः सर्वात्मभावस्वरूपादिनिर्णयं कृतवान्, अथ मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टमिति सर्वेषां समस्योपासना कार्या, उत पार्थक्येनेति विचारयति । अत्रोपास्याभेदेपि रूपभेदादेकत्रोपासकस्यान्यत्रानुपासनलक्षणाव-ज्ञासम्भवादस्या अप्यसिद्धिसम्भवादपि समस्यैव सा कार्येति प्राप्ते, सिद्धान्त-

भाष्यप्रकाशः ।

तन्नास्माकं रोचते । पूर्वकाण्डे उदवसानीयाख्ये कर्मणि 'अप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्ती'त्यादिना देवतायज्ञावरोधार्थं पूर्वं पञ्चकपालं विधाय, ततो 'गायत्रो वा अग्नि'रित्यादिना तद्दोषदर्शनेन दूषयित्वा 'अष्टाकपालमाग्नेयं पुरोडाशं पञ्चसङ्ख्याके याज्यानुवाक्ये चोपसंहारे विहिते' इति पूर्वविधानस्यानभिप्रेतत्वबुद्धेः शीघ्रमुदयेन न पूर्वप्रकारकरणशङ्कोदयः, तथात्रापि शङ्काया एव पराहत्यानुदयेन पूर्वपक्षानुदयादिति ॥ ५७ ॥ इत्येकोनविंशं भूम्न इत्यधिकरणम् ॥ १९ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥ सङ्गतिं बोधयन्तोऽधिकरणमवतारयन्ति पूर्वे-त्यादि । 'प्रदानव'दित्यादिभिः पूर्वाधिकरणैर्मुख्याधिकारिणामर्थे सर्वात्मभावस्वरूपस्य तदुत्क-र्षस्य तत्फलस्य तदधिकारिणां च निर्णयं कृतवान्, अथ तदनन्तरं पुराणोक्तानां मत्स्याद्युपा-सनानामपि नित्यानुमेयवेदमूलत्वादिदानीमपि केषाञ्चिद्वामनहयग्रीवाद्युपासकानां दर्शनात् ताद्द-शानामर्थे उपासनान्तरनिर्णयस्यावश्यकत्वात्[१], मत्स्यादिरूपाणां भगवदवतारत्वमविशिष्टम्, यथा सुतेजःप्रभृतीनां वैश्वानरावयवत्वमिति तेषां सर्वेषां समस्य भगवतैकीकृत्योपासना कार्या, उत सुतेजःप्रभृतीनां व्यस्तोपासने दोषश्रवणवदत्र दोषस्याश्रवणाद्व्यस्ततया कार्येति शङ्कायां प्रस-ङ्गाद्विचारयतीत्यर्थः । पूर्वपक्षमाहुः अत्रेत्यादि । अस्या अप्यसिद्धिसम्भवादिति । रूपा-

रश्मिः ।

प्रष्टुं न आगमिष्य इत्यर्थः । दोषेति । 'अग्निर्गायत्रः, अष्टाक्षरा गायत्री, तत्सम्बन्धी, अतः पञ्चकपालत्वं दोषः । तद्दर्शनेन । आग्नेयं पुरोडाशमिति । अग्ने तस्येति शेषः । पञ्चसङ्ख्याक इति । पञ्चकपाले । 'उपसंहारस्तस्मिन् विहिते' इति 'उदवसानीयाख्ये कर्मणी'त्यनेन पूर्वेणान्वयः । कर्मणि विहित इति । सतिसप्तमी । इतिः समाप्तौ । तत्समानाधिकरणः पूर्वविधानस्य पञ्चकपालसम्बन्धिनोऽनभिप्रेतत्वबुद्धेः शीघ्रमुदयः तेनेत्यर्थः । अत्रापीति । अधिकरणेपि ॥ ५७ ॥ इत्येकोनविंशं भूम्न इत्यधि-करणम् ॥ १९ ॥

नाना शब्दादिभेदात् ॥ ५८ ॥ सङ्गतिमिति । कृष्णावतारस्य 'समान एवं चाभेदा'-दित्यधिकरणे निरूपणात् मुख्याधिकारिणो वृताः, तेभ्यः सर्वात्मभावं ददातीति । सर्वात्मभावनिरूपणा-नन्तरं स्मृतावताराणां निरूपणं धर्मत्वात् । किं पुनर्ब्रह्माण्डान्तर्मायादूरीकरणे प्रकटे कृष्णेऽप्यवतार-व्यवहाराद्धर्मकत्वम् । इवार्थे कन् । अतो न पादार्थाव्याप्तिः । सर्वात्मभावस्वरूपस्य प्रदानवदेवाद्यधि-करणेषु, तदुत्कर्षस्य 'भूम्नः क्रतुव'दित्यधिकरणे, तत्फलस्य 'आत्मरतिरात्मक्रीड' इत्यादिभाष्येणात्रैवाधि-करणे तदधिकारिणां एतत्फलप्रेप्सूनामर्थात् प्राप्तानाम् । दोषेति । 'मूर्धा ते व्यपतिष्य'दित्याद्युक्तदोष-श्रवणवत् । अत्रेति । मत्स्यादिरूपाणां व्यस्तोपासने । प्रसङ्गादिति । स उक्तः । अत्रेत्यादीति । उपास्याभेदस्तु यथा रामो हास्यावतारः, वामनः कटिसूत्रावतारः, एवमलौकिकार्थत्वेनोपास्याभेदेपि ।

१ तद्व्यतिरिक्तानामर्थे उपासनान्तरनिर्णयस्यावश्यकत्वात् ।

माह। सर्वेष्ववतारेषु नानैवोपासना कार्या। तत्र हेतुः शब्दादिभेदादिति। तत्तत्स्वरूपवाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादित्यर्थः। एतेनैव मिथोविरुद्धानामाकारकर्मणामेकत्र भावनस्याशक्यत्वमयुक्तत्वं चेति भावः सूचितः ॥ ५८ ॥

इति तृतीयाध्याये तृतीयपादे विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

भाष्यप्रकाशः।

न्तरावज्ञारूपापराधकृतप्रतिबन्धेनासम्भवात्। तथाचात्र दोषाश्रवणेप्युक्तरीत्या दोषसम्भवान्न कार्येत्यर्थः। सिद्धान्तं बोधयितुं सूत्रं व्याकुर्वन्ति सर्वेष्वित्यादि। तदवज्ञादोषस्य कथं निवृत्तिरित्यत आहुः एतेनेत्यादि। एतेनैवेति। उपासनभेदस्थापनेनैव। अयुक्तमिति। विरुद्धत्वादयुक्तम्। तथाच शक्यस्य युक्तस्याकरणे ह्यपराधः, न त्वशक्यस्यायुक्तस्याकरणे। अतोऽनुपासनस्य तत्रापराधाप्रसञ्जकत्वेन प्रतिबन्धाभावान्नासिद्धिरित्यर्थः। एतेन यत् पूर्वं 'न भेदादिति चे'दितिसूत्रेऽधिकगुणोपसंहारौचित्यमुक्तम्, तत्प्रकारोत्र दर्शितः। तत्तद्रूपप्राधान्येन ब्रह्मोपासकस्याधिका अपि गुणा अविरुद्धाः एवोपसंहार्याः, न त्वन्येपीति। तस्मात्तेषां व्यस्तोपासनमेव कर्तव्यमिति सिद्धम्।

अन्ये तु, अत्र यासु यासु विद्यासु श्रुतिनानात्वेऽप्यर्थैक्याद्वेद्यैक्यम्, यथा 'मनोमयः प्राणशरीरः', 'कं ब्रह्म', 'सत्यकामः सत्यसङ्कल्प' इत्यादौ। यथा च, 'प्राणो वा व संवर्गः', 'प्राणो वा व ज्येष्ठः श्रेष्ठः', 'प्राणो ह पिता प्राणो माते'त्यादौ च। तत्र श्रुतिनानात्वस्य गुणान्तरपरत्वात्, विद्याभेदेन विद्यैक्याच्च, स्वपरशाखोक्तं गुणजातं विद्याकात्स्न्यार्थमुपसंहार्यमिति पूर्वपक्षे, शब्दादिभेदाद्विद्याभेदं सिद्धान्तयन्ति। पूर्वतन्त्रे शब्दान्तरादीनां कर्मभेदकत्वेन सिद्धत्वात्, प्रकृते च 'वेद' 'उपासीत' 'क्रतुं कुर्वीते'त्यादिशब्दभेदात्। आदिपदेन यथासम्भवं गुणादीनामपि भेदस्य सङ्ग्रहाच्च। नच शब्दभेदेपि 'यजति' 'जुहोती'त्यादिवत् 'वेदोपासीते'त्यादावर्थभेदाभावान्न भेद इति वाच्यम्। तथाप्येकस्मिन्नेव वेद्ये प्रतिप्रकरणमितरेतरव्यावृत्तगुणोपदेशरूपानुबन्धभेदेन तस्यां तस्यां विद्यायां तादृक्तादृग्गुणविशिष्टस्यैवोपास्यतया विद्याभेदोपपत्तेः। एवं स्थितेपि 'सर्ववेदान्तप्रत्यये'त्यादि द्रष्टव्यमिति चाहुः।

रश्मिः।

सुबोधिन्यां संनिवेशोऽवताराणां स्पष्टः। उक्तरीत्येति। अव्यवहितपूर्वोक्तरीत्या। तत्प्रकार इति। व्यस्तोपासनायामपराधाभावजनकत्वमवतारेऽधिकगुणोपसंहारो दर्शितः। किञ्च, अविरुद्धेत्यादिः प्रकारः। तेषामिति। मत्स्यादीनाम्। आभरणादिरूपत्वे तत्तद्वाचकशब्दानां मन्त्राणां चादिपदादाकारकर्मणां च भेदादेवकारः। शब्दान्तरेति। आदिनाभ्याससंज्ञे। वेद इति। अमः सुः। वेदम्। गुणादीनामिति। वेदत्वादिगुणाः। आदिना संज्ञारूपे। वेदोपासीतेति। वेदशब्दादमोडा। वेदमुपासीतेति। अर्थभेदेति। 'यज देवपूजासङ्गतिकरणदानेषु'। 'हु दानादनयोः'। अत्र दानरूपार्थभेदवत् 'वेदोपासनं कुर्वीत' 'क्रतुं कुर्वीते'त्यर्थभेदाभावात्। प्रतिकरणमिति। करणं करणं शब्दं शब्दम्। वीप्सायां प्रतिः। इतरेतरस्मिन् मनोमयादौ व्यावृत्ता ये गुणा मनोमयत्वादयः तेषामुपदेशरूपोऽनुबन्धः मुख्यानपायी तस्य भेदस्तेन। 'अनुबन्धः प्रकृत्यादेर्दोषोत्पादे विनश्वरे। मुख्यानपायिनि शिशौ प्रवृत्तस्यानवर्तन' इति विश्वः। स्थितेपीति। विद्याभेदे। सर्वेति। आविद्यकत्वाद्विशेषदर्शनेन

१. अयुक्तं प्रकाशे। २. रश्मौ प्रतिकरणम्।

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ (३-३-२१.)

पार्थक्येनोपासनानि कर्तव्यानीति स्थिते विचार्यते । किमग्निहोत्रदर्शपूर्णमासादिवदेषां समुच्चयः, उत फलविकल्प इति । तत्र विधिफलयोः समानत्वात् समुच्चय इति प्राप्ते, निर्णयमाह । उपासनानां विकल्प एव । तत्र हेतुः । अविशिष्टफलत्वात् । मुक्तिफलकत्वं हि सर्वेषामुपासनानामविशिष्टम् । एवं सत्येकेनैव तत्सिद्धावपरस्याप्रयोजकत्वादग्निहोत्रादिवन्नित्यताबोधकश्रुत्यभावात्तदर्थिनो विकल्प एव ॥ ५९ ॥

इति तृतीयाध्याये तृतीयपादे एकविंशं विकल्पाधिकरणम् ॥ २१ ॥

भाष्यप्रकाशः ।

तदसङ्गतम् । सर्ववेदान्तप्रत्ययसूत्रोक्तचोदनाद्यविशेषरूपहेत्वभावादेवोक्तस्थलेषु विद्याभेदस्य सिद्धत्वेनैतत्सूत्रारम्भवैयर्थ्यप्रसङ्गात् । नचोपसंहारनिवृत्त्यर्थत्वान्नानर्थक्यमित्यपि युक्तम् । ऐक्यहेत्वभावादेव सिद्धे विद्याभेदे उपसंहारप्राप्तेरेवाभावात् विद्यासूचकनानापदविरोधाच्चेति ॥ ५८ ॥ इति विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ अधिकरणमवतारयन्ति पार्थक्येनेत्यादि । विचार्यत इति । उपोद्घातसङ्गत्या विचार्यते । संशयमाहुः किमित्यादि । तथाच विधिसामान्यात् क्रमेण कार्याणीत्येवं समुच्चयः, उत फलतौल्याद्विकल्प इत्यर्थः । पूर्वपक्षमाहुः तत्रेत्यादि । विधिः फलं च सर्वत्र तुल्यम् । यथाग्निहोत्रादीनाम् । तथा सति यदेव न क्रियते, तत्फलाभावेन न्यूनतापत्तेर्विकल्पस्य प्राप्तप्रामाण्यपरित्यागादिदोषवत्तया तदादरे तत्संसर्गाच्च समुच्चय एव ज्यायानित्यर्थः । सिद्धान्तमाहुः उपासनानामित्यादि । तथाचाग्निहोत्रादितौल्यस्याभावाच्चित्रोद्भिदादितौल्यस्य सत्त्वाद्विकल्पस्यादुष्टत्वेन स्वर्गादिवद्विश्रमायानिवृत्तिरूपायां तत्तदवतारसायुज्यरूपायां

रश्मिः ।

द्र(ष्ट)व्यम् । सर्ववेदान्तेति । चोदनाविशेषदर्शनात् तथा । नानेति । उपसंहारे वेद्यैक्येन विद्यैक्ये तथा । अत्र चकारेण हेत्वन्तरं सूचितम् । स हेतुः । उपसंहारोऽर्थाभेदादिति । यथा कथञ्चित् समस्तोपासना ॥ ५८ ॥ इति विंशं नानाशब्दादिभेदादित्यधिकरणम् ॥ २० ॥

विकल्पोऽविशिष्टफलत्वात् ॥५९॥ उपोद्घातेति । प्रकृतं पार्थक्येनोपासनं तत्सिद्ध्यर्था फलविकल्पचिन्ता उपोद्घातः स सङ्गतिः तया । किमित्यादीति । अग्निहोत्रेति । अग्निहोत्रादिमतो दर्शपूर्णमासाधिकारात् समुच्चयः । विधीति । पञ्चमस्कन्धे 'ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम' इतीत्यत्र 'अस्त्वि'ति विधेः कूर्माद्यवतारभक्तिविधिभ्यः सामान्यात्। क्रमेणेति । 'मत्स्यकूर्मवराहे'त्यादि पाठक्रमेण । फलतौल्यादिति । सामान्यतो विश्वजिन्न्यायेन मुक्तिः फलं तस्य तौल्यात् । सर्वत्रेति । मत्स्याद्यवतारभक्तिषु । यथाग्नीति । 'अग्निहोत्रं जुहुयात्' 'दशपूर्णमासाभ्यां यजेते'त्यादयो विधयः । प्रत्यवायपरिहारः फलम् । प्राप्तप्रामाण्येति । 'विकल्पोऽष्टदोषदुष्ट' इति पूर्वतन्त्रे परिसंख्याविधावस्ति । तदादर इति । विकल्पादरेऽष्टदोषसंसर्गाच्चेत्यर्थः । समुच्चय इति । पाठक्रमेण समुच्चयः । चित्रोद्भिदादीति । पूर्वतन्त्रप्रसिद्धम् । 'उद्भिदा यजेत पशुकामः' अन्यत्र 'चित्रया यजेत पशुकाम' इति प्रथमस्य चतुर्थपादे । स्वर्गादिवदिति । आदिना वृष्टिः ।

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ६० ॥ (३-३-२२.)

येषु तूपासनेषु भिन्नानि भिन्नानि फलान्युच्यन्ते, तत्र त्वनेकफलार्थिनस्तत्तत्फलकोपासनानि समुच्चीयेरन्, अविशिष्टफलत्वाभावात् । यत्र त्वेकस्यैवोपासनस्य स्वकामितानेकफलत्वं श्रूयते, तत्र तथैव चेदुपासनं करोति, तदा न समुच्चीयेरन्नपि । स्वकामितेष्वेकतरस्य तदन्यफलवैशिष्ट्येनाविशिष्टफलत्वाभावादिति पूर्वहेत्वभावादितिश्लिष्टप्रयोगाभिप्रायेणोक्तमिति ज्ञेयम् ।

अथवा । कामैक्ये नियतफलकानि तानि न समुच्चीयेरन् । अत्र हेतुः स्पष्टः ॥६०॥

इति तृतीयाध्याये तृतीयपादे द्वाविंशं काम्याधिकरणम् ॥ २२ ॥

भाष्यप्रकाशः ।

च मुक्तौ विशेषाभावेन च फलस्याविशिष्टत्वात् समुच्चये अप्रयोजकत्वदोषापत्तेश्च विकल्प एव ज्यायानित्यर्थः । एतेनैव ब्रह्मप्राप्तिफलानां सद्विद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्याऽक्षरविद्यादीनां एकफलानां प्राणादिविद्यानां च विकल्पोऽवगन्तव्य इत्यपि बोधितम् । अत्र सर्वेऽप्येवमेवाहुः ॥ ५९ ॥ इत्येकविंशं विकल्पाधिकरणम् ॥ २१ ॥

काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात् ॥ ६० ॥ 'अविशिष्टफलत्वा'दित्यस्य विकल्पहेतोः प्रत्युदाहरणमिदम् । एवं मुक्तिफलिका उपासना विचार्य, काम्यासु पक्षद्वयस्य सम्भवात् ताः पृथक् विचारयतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्तस्तत्र तत्तत्फलानां काम्यत्वादुपासनानां समुच्चयपक्षं व्याकुर्वन्ति येष्वित्यादि । येषु, 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति', 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत' इत्यादिषु तथेत्यर्थः । एवं समुच्चयपक्षं व्याख्याय 'न वा' इति पदाभ्यामुक्तमसमुच्चयपक्षं व्याकुर्वन्ति यत्र त्वित्यादि । श्रूयते इति । यथा भार्गव्यां विद्यायां 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्ये'ति श्रूयते । तत्र तथैव चेत् । तदुक्तस्वकामितसकलफलसाधकतया चेत्तदुपासनं करोति, तदा तत्फलकान्यन्यानि 'तत्प्रतिष्ठेत्युपासीत' 'तन्मह इत्युपासीते'त्यादीनि तत्तद्गुणकान्युपासनानि न समुच्चीयेरन्नपि । अत्रापि हेतुः पूर्वहेत्वभावादिति । तं विवृण्वन्ति स्वकामितेष्वित्यादि । स्वकामितफलेष्वेकतरस्य फलस्य तदन्यफलवैशिष्ट्येन अविशिष्टफलत्वाभावादिति । तथाच समुच्चये अविशिष्टफलत्वाभा-

रश्मिः ।

नित्यानां प्रत्यवायपरिहारः, ज्योतिष्टोमस्य स्वर्गः । कारीर्या वृष्टिः । तद्वदुपासनानां न, किन्तु मुक्तिफलकत्वं अविशिष्टत्वं सर्वासूपासनासु तस्मात् । अप्रयोजकत्वमपरोपासनायाः, अतोऽप्रयोजकत्वदोषापत्तेः ॥५९॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ विकल्पहेतोरिति । पूर्वसूत्रोक्तस्य । **प्रत्युदेति** । नित्येषु कर्मसु विकल्प उक्तः । काम्येषु समुच्चय उच्यते । तत्र विधिफलयोः समानत्वहेतुः, अपरस्याप्रयोजकत्वदोषापादकत्वान्नादतः । तत्राविशिष्टमुक्तिमात्रफलत्वात् । अत्र काम्येषु तु विशिष्टस्य मुक्तिमात्रस्य फलस्याभावरूपात् पूर्वहेत्वभावरूपहेतोः प्रतिकूलमुदाहरणम् । विधिफलयोः समानत्वेऽपरस्याप्रयोजकत्वम्, विधिफलयोरसमानत्वेऽपरस्य प्रयोजकत्वम्, परन्तु कामनानियतमिति । **तत्रेति** । काम्येषु । **समुच्चयेति** । यथा सेवायां न पुत्रेण नापि पशुना कार्यम्, किन्तु समुच्चितेन पुत्रादिना, अतः समुच्चयपक्षम् । **स य इति** । सः यः इतिच्छेदः । **इत्यादीति** ।

---

१ फलकत्वम् । २ फलप्राप्तिफलानाम् ।

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ (३-३-२३.)

प्रधानेषु निर्णयमुक्त्वाङ्गेषु तमाह। एकार्थसाधकानामुपासनानां भेदेनाङ्गभेदेऽप्येकतरोपासने फलैक्यादङ्गानि तत्र समुच्चीयेरन्न वेति संशये, निर्णयमाह। उपासनाङ्गानां तदेवाश्रयः, तथाच यदङ्गं यदुपासनाश्रितम्, तत्रैवास्य भाव इत्यर्थः ॥६१॥

भाष्यप्रकाशः।

वोऽनेकफलत्वात्, समुच्चयाभावे त्वविशिष्टफलत्वाभावस्तत्फलस्यान्यफलविशिष्टत्वादिति भेदेपि 'पूर्वहेत्वभावा'दिति यत्सूत्र उक्तम्, तत्तथेत्यर्थः। अत्र व्याख्यानक्लेशात् पक्षान्तरमाहुः अथवेत्यादि। कामैक्ये इति। एकमात्रविषयत्वेन तदैक्ये। अत्र हेतुः स्पष्ट इति। अस्मिन् पक्षे तेषां फलभेदेन विशिष्टफलतया अविशिष्टफलत्वाभावरूपः पूर्वहेत्वभावः स्फुट इत्यर्थः।

अत्रापि मध्वाचार्यभिक्षुव्यतिरिक्तानां सर्वेषामैकमत्यम्। अस्माकं त्वेतावान् विशेषः। अत्र सूत्रे काम्यपदादुद्गीथाद्युपासना अपि संग्रहीतुं शक्यन्ते। तास्वपि 'यदेव विद्यया करोती'त्यादिभिः फलश्रवणात्। कामपदाभावेपि रात्रिसत्रन्यायेन काम्यत्वस्य शक्यत्वादिति ॥ ६० ॥ इति द्वाविंशं काम्याधिकरणम् ॥ २२ ॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ कर्माङ्गत्वेपि स्वव्यापारेण फलसाधने उपासनान्तरानपेक्षत्वात् प्रधानानामुद्गीथाद्युपासनानामपि काम्यत्वेन यथाकामं समुच्चयविकल्पयोः पूर्वसूत्रेणैव सिद्धत्वादत्र विषयान्तरं बोधयन्तोऽधिकरणमवतारयन्ति प्रधानेत्यादि। अन्यानपेक्षतया स्वव्यापारद्वारा फलजनकानि प्रधानानि, तेषु समुच्चयादिनिर्णयमुक्त्वा, अन्यापेक्षतया तथा फलजनकेष्वङ्गेषु निर्णयमाहेत्यर्थः। ननु किं प्रयोजनं येन पृथगारम्भ इत्यत आहुः एकार्थेत्यादि। एकोऽर्थः एकं फलम्, तत्साधकानामनेकेषामुपासनानां रूपादिभेदेन भेदेपि तेषां मध्य एकतरोपासनेऽन्येषामस्य च फलैक्यात् तत्फलार्थं यान्यङ्गानि तत्र तत्रोक्तानि, तान्येकस्मि-

रश्मिः।

अन्यत्र द्रष्टव्यानि। तथेत्यर्थ इति। भिन्नानि भिन्नानि फलान्युच्यन्त इत्यर्थः। भाष्ये। अविशिष्टेति। सूत्रे पूर्वहेत्वभावादित्युक्तम्, अत एवेति चोक्तम्। 'अत एव प्राण' इत्यतिदेशाधिकरणवत्। अतोऽस्य प्रयोगस्याभिप्रायवर्णनं श्लिष्टप्रयोगत्वात् करिष्यन्ति। प्रकृते। असमुच्चयेति। 'न वा समुच्चीयेर'न्निति योजनासिद्धं पक्षम्। तदुक्तेति। यथा 'अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं पर'मित्यत्र तीव्रभक्तियोगः। तत्र नान्यकर्मसमुच्चयः। तत्तथेति। श्लिष्टप्रयोगाभिप्रायेणोक्तमित्यर्थः ॥ ६० ॥ इत्येकविंशं विकल्पाधिकरणम् ॥२१॥

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ उपासनेति। अवयव्यतिरिक्तोपासनान्तरानपेक्षत्वात् अवयविनश्चावयवमात्रत्वादवयव्यनङ्गीकारेण। काम्यत्वेनेति। 'आपयिता ह वै कामानां भवति, य एतदेवं विद्वानक्षरमुद्गीथमुपास्त' इति श्रुतेस्तथा। फलसम्बन्धित्वं प्रधानत्वमङ्गेष्वपीति प्रधानलक्षणान्तरमाहुः अन्यानपेक्षेति। एकतरेति। महाभाष्यप्रयोगाद्बहूनां निर्धारणे डतरच्।

---

१. तस्य। २. श्रीपुरुषोत्तमैर्भाष्यप्रकाशस्यान्तिमशोधे 'काम्यास्तु' इति सूत्रं पृथगधिकरणत्वेन निर्दिष्टम्। अतस्तदनुसारेण 'काम्यास्तु' इत्यादि द्वाविंशमधिकरणं भवति। श्रीकृष्णचन्द्रैः श्रीगोपेश्वरैश्च 'काम्यास्तु' इति पृथगधिकरणत्वेन न निर्दिष्टम्। तैश्च तस्यैकविंशे विकल्पाधिकरणेऽन्तर्भाव. कृतः। श्रीपुरुषोत्तमैरपि पूर्वमेवमेव निर्दिष्टम्। वेदान्ताधिकरणमालायां त्वस्मिन् पादे पञ्चविंशत्यधिकरणानि, भावप्रकाशिकावृत्तौ चतुर्विंशत्यधिकरणानि। अतः प्रकाशे पञ्चविंशत्यधिकरणानि, रश्मौ च चतुर्विंशतिरित्यस्माभिस्तथैव योजितमिति।

अत्र हेतुमाह ।

शिष्टेश्च ॥ ६२ ॥

तत्तदुपासनं तत्तदङ्गविशिष्टमेव वेदे शिष्यत इति तथेत्यर्थः । चकारादति रिक्तकरणे प्रायश्चित्तोक्तिरपि बाधिकेति सूच्यते ॥ ६२ ॥

इति तृतीयाध्याये तृतीयपादे त्रयोविंशमङ्गेषु यथाश्रयभावाधिकरणम् ॥ २३ ॥

भाष्यप्रकाशः

नुपासने समुचीयेरन्नवेति संशये, उपसंहारसूत्रेऽर्थाभेदपदस्य फलाभेदवाचकत्वे फलैक्यात् समुच्चय प्राप्तौ, वक्ष्यमाणहेतुभ्यां निर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्ति उपासनाङ्गानामित्यादि । तदेवेति उपासनमेव । तथाच आश्रयमनतिक्रम्य यथाश्रयम्, भावः सत्ता, यथाश्रयं भावो यथाश्रयभाव इति सूत्रयोजना । उदाहरणं तु छान्दोग्ये 'मनो हिङ्कारो वाक्प्रस्ताव' इत्यादिभिर्दशभिर्वाक्यैर्गा यत्र-रथन्तर-वामदेव्य-बृहत्-वैरूप-वैराज-शक्वर्य-रैवत्य-यज्ञायज्ञीय राजननामग्रहणपूर्वकं विहितानि दश सामोपासनानि, तेषु ह्येकमेकमसाधारणं फलमुक्त्वा, तदुत्तरं 'सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्ये'ति सर्वोपासनेषु साधारणं फलमुक्त्वा, क्रमेण 'महामनाः स्यात् तद्व्रतम्, न प्रत्यङ्ङग्निमाचामेन्न ष्ठीवेत् तद्व्रतम्,' एवं 'न काञ्चन परिहरेत्', 'न तपन्तं निन्देत्, न वर्षन्तं निन्देत्', 'नर्तून्निन्देत्', 'न पशून्निन्देत्', 'संवत्सरमज्ञो नाश्नीयात्', 'ब्राह्मणान्न निन्देत्' इति तत्तदुपासनाङ्गभूतानि व्रतान्युक्तानि । तथाच तस्य व्रतस्य तत्तदुपासन एव सम्बन्धः, नान्यत्रेति बोध्यम् । एवञ्जातीयमन्यदपि । न्यायस्य साधारणत्वात् । यथा भार्गव्या आनन्दवि-द्यया अङ्गभूतेषु त्रिष्वन्नप्रतिष्ठितत्वोपासनेषु प्रतिष्ठादीनां फलानामैक्यं तत्तदुपासनाङ्गभूतानां 'अन्नं न निन्द्यात् तद्व्रतम्, अन्नं न परिचक्षीत तद्व्रतम्, अन्नं बहु कुर्वीत तद्व्रत'मिति तत्तद्व्रतानां भेद इति ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥ अत्र भाष्यं स्फुटम् ॥ ६२ ॥ **इति त्रयोविंशमङ्गेषु यथाश्रय-भावाधिकरणम्** ॥ २३ ॥

रश्मिः ।

वक्ष्यमाणेति । शिष्टिप्रायश्चित्तोक्तिभ्याम् । **उपासन**मिति । अवयवि । **यथाश्रय**मित्यव्ययीभावः । ततः कर्मधारयः । **भाष्ये** । **तत्रैवास्ये**ति । उपासनेऽस्याङ्गस्य भावः सत्तेत्यर्थः । **प्रकृते** । **सर्वमायु-रि**ति । शतवर्षं आयुः । ज्योक् । टीकायां स्पष्टम् । अग्रेपि । **आनन्दे**ति । आनन्दब्रह्मज्ञानानन्तरं 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिते'त्यानन्दविद्या तस्याः । **अङ्गे**ति । अङ्गभूतत्वं प्रतिष्ठान्नव-त्वानन्नादत्वादीनामानन्दविद्याफलानां 'पुनरन्नं न निन्द्यात्, तद्व्रत'मित्युपक्रम्योक्तेः साङ्गविद्यायाः पूर्वो-क्तफलवत्त्वात् । 'एवमन्नं न परिचक्षीत तद्व्रत'मित्यत्र, 'अन्नं बहु कुर्वीत तद्व्रत'मित्यत्र चेत्येवमङ्गभूतेषु त्रिषु । **अन्ने**ति । 'अन्नं न निन्द्यात् तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तम् । तथा 'अन्नं न परिचक्षीत तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तम् । तथैव 'अन्नं बहु कुर्वीत तद्व्रत'मित्यत्र 'स य एतदन्नमन्ने प्रतिष्ठितं वेदे'त्युक्तमित्यन्नप्रतिष्ठितत्वोपासनानि तेषु । **तत्तदुपासने**ति । अन्नप्रतिष्ठितत्वोपासनाङ्गभूतानाम् ॥ ६१ ॥

शिष्टेश्च ॥ ६२ ॥ उदाहरणं द्रष्टव्यम् । **प्रायश्चित्ते**ति । यथा 'आश्विनं धूम्रललाममालभेत, यो दुर्ब्राह्मणः सोमं पिपासे'दिति । अत्र सर्वे षट्सूत्रमधिकरणमङ्गीकुर्वन्ति, तदग्रे स्पष्टी-भविष्यति ॥ ६२ ॥ **इति द्वाविंशं यथाश्रयभावाधिकरणम्** ॥ २२ ॥

समाहारात् ॥ ६३ ॥ (३-३-२४.)

कर्ममार्गीयोपासने निर्णयमुक्त्वा ज्ञानमार्गीयोपासने तमाह । अथर्वोपनिषत्सु नृसिंहोपासनादिषु मत्स्यकूर्मादिरूपत्वेनापि स्तुतिः श्रूयते । श्रीभागवते च, 'नमस्ते रघुवर्याये'त्यादिरूपा स्तुतिर्व्रजनाथे । एवं सति रूपभेदेपि भगवदवतारस्याविशिष्टत्वादेकस्मिन् रूपे रूपान्तरसमाहारो दृश्यत इति सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥

ऐश्वर्यवीर्यादिगुणानां सर्वेष्ववतारेषु साधारण्यं श्रूयते । तेन धर्मिधर्माणामैक्यात् पूर्वोक्तं साध्वित्यर्थः ॥ ६४ ॥

इति तृतीयाध्याये तृतीयपादे चतुर्विंशं समाहाराधिकरणम् ॥ २४ ॥

भाष्यप्रकाशः ।

समाहारात् ॥ ६३ ॥ सूत्रप्रयोजनमाहुः कर्ममार्गीयेत्यादि । कर्माङ्गतया कर्ममार्गीयेषु सामाद्युपासनेषु अङ्गनिर्णयमुक्त्वा, ज्ञानाङ्गतया ज्ञानमार्गीयेषु तेष्वङ्गनिर्णयमाहेत्यर्थः । सूत्रं व्याकुर्वन्तो विषयमाहुः अथर्वेत्यादि । अत्र मत्स्यकूर्मादिपदात् पूर्वं ब्रह्मविष्ण्वादीतिपदस्य त्रुटिर्बोध्या । तथाच नृसिंहोपासनायां 'यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै वै नमो नम' इति, श्रीरामोपासनायां च 'यो वै रामचन्द्रः स भगवान् ये च मत्स्यकूर्माद्यवतारास्तस्मै वै नमो नम' इत्येवं विभागेन स्तुतिः श्रूयत इत्यर्थः । द्वितीयं पौराणोदाहरणम् । एवं विषय उक्तः । तत्र तत्सर्वरूपत्वेनोपासना कार्या, उत तेषां रूपाणां विरुद्धधर्मवत्त्वात् तथा न कार्येति संशये, शब्दादिभेदेन नानोपासनस्य पूर्वमुक्तत्वात् सर्वरूपत्वेनोपासने च तद्विरोधान्न कार्येति प्राप्तम् । तत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति एवं सतीत्यादि । अत्र 'अङ्गेषु यथाश्रयभाव' इत्यनुवर्तते । समाहार इति । एकीभावः । तथाच ज्ञानमार्गीयोपासनाङ्गेष्वपि यथाश्रयभावे सति, 'रूपभेदेपी'त्यादिनोक्तरीत्या समाहारदर्शनात् तथेत्यर्थः । एतदेवाभिप्रेत्य 'भेदान्नेति चे'दिति सूत्रे 'उपासनाविषयेष्वि'त्यादिनावतारेष्वपि सर्वगुणोपसंहारोचित्यमुक्तम् ॥ ६३ ॥

अत्र हेत्वन्तरं सूत्रान्तरेणाह ।

गुणसाधारण्यश्रुतेश्च ॥ ६४ ॥ अत्र चकारोऽधिकरणपूर्णत्वद्योतकः । शेषं प्रकटार्थम् । तथाच भगवत्त्वप्राधान्योपासने एवं सर्वरूपत्वेनोपासनं कार्यम्, तत्तद्रूपप्राधान्येनोपासने तथा न कार्यमिति विभागान्न कोपि विरोध इत्यर्थः ॥६४॥ इति चतुर्विंशं समाहाराधिकरणम् ॥२४॥

रश्मिः ।

समाहारात् ॥ ६३ ॥ पूर्वकाण्डव्यवच्छेदेन वेदान्तपरिच्छिन्नकर्ममार्गीयोपासन इत्यर्थं मत्वाहुः कर्माङ्गतयेति । 'यदेव विद्यये'ति श्रुतिविषयेषु सामोपनिषदुक्तोपासनेषु पूर्वाधिकरणे निर्णयमुक्त्वा, आदिना यजुः 'तमेतं वेदानुवचनेने'ति श्रुत्याहुः ज्ञानाङ्गतयेति । मत्स्यकूर्मश्रुत्यभावं नृसिंहोपासनेऽदृष्ट्वाहुः अत्र मत्स्येति । तथाचेति । त्रुटौ पूरितत्वे च । आदिना रामोपासनेत्याशयेनाहुः श्रीरामेति । नृसिंहोपासना आदिर्यासां रामोपासनादीनां ता नृसिंहोपासनादयः तासु । अत्रातद्गुणसंविज्ञाने नृसिंहोपासनानन्वयः श्रूयत इत्यनेनेत्याशयः । अनन्वयापेक्षायां तु न त्रुटेः प्रयोजनम् । यथाश्रयभाव इति । यथाश्रयभावो व्याकृतः । तथेत्यर्थ इति । सर्वरूपत्वेनैकत्रोपासनमपि साध्वित्यर्थः ॥ ६३ ॥

गुणसाधारण्यश्रुतेश्च ॥६४॥ तत्तद्रूपेति । मत्स्यत्वादिरूपप्राधान्ये तु । मत्स्य इति प्रतीतिः, न तु मत्स्यो भगवानिति प्रतीतिरिति भावः ॥६४॥ इति त्रयोविंशं समाहाराधिकरणम् ॥२३॥

---

१ अवतारत्वस्य ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ (३-३-२५.)

नन्वेवमुपासनं नित्यम्, उत वैकल्पिकमिति संशये, उक्तरीत्या नित्यत्वे प्राप्ते, तन्निषेधमाह नेति । किन्तु वा, विकल्प एवैवमुपासन ऐच्छिकः, तत्र हेतुमाह सहभावाश्रुतेरिति । नियमतस्तेषां रूपाणां सहभावश्रवणं चेत् स्यात्, तदा स्यात्तथोपासनस्य नित्यता, न त्वेवम्, अतो विकल्प एवेत्यर्थः ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

योपि रूपान्तरसमाहारपूर्वकमुपास्ते, सोप्येकं रूपमुपास्यत्वेन मत्वा तत्तथोपास्त इति फलं तस्यैकस्यैव रूपस्य दर्शनं भवति, न तु सर्वेषाम्, इतोपि हेतोर्विकल्प एवेत्यर्थः । एतद्दृष्टान्तेन यस्मिन् रूपे यादृग्धर्मवत्त्वं श्रूयते, तादृग्धर्मविशिष्टमेवैकं रूपमुपास्यमिति व्यासहृदयमिति ज्ञायते । उपासनानिर्णयान्ते दर्शनात्मकहेतूक्त्या सर्वोपासनानां भगवत्साक्षात्कारः फलमिति ध्वन्यते । माहात्म्यज्ञापनार्थं परं सर्वावताररूपत्वं यथार्थमेव कैश्चिज्ज्ञाप्यते । यथार्थत्वात्त-

---

भाष्यप्रकाशः ।

न वा तत्सहभावाश्रुतेः ॥६५॥ अधिकरणमवतारयन्ति नन्वित्यादि । सर्वरूपत्वेनैकावतारोपासनं नित्यं अग्निहोत्रदर्शपूर्णमासादिवत् क्रमेण समुच्चेतव्यम्, उतैकमेव यावज्जीवं कर्तव्यमित्येवं वैकल्पिकमिति संशये, उक्तरीत्या सर्वेषां सर्वरूपत्वेनैश्वर्यादिगुणसाधारण्येन च क्रमिकसमुच्चये प्राप्ते, तस्य समुच्चयस्य निषेधमाहेत्यर्थः । व्याकुर्वन्ति नेतीत्यादि । चेत्स्यादिति । 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'त्यादिवच्चेत् स्यात् । शेषं स्फुटम् । एतमेव विकल्पमभिसन्धाय स्वाध्यायसूत्रे सवदृष्टान्तव्याख्यानोत्तरं 'प्रकृतेपी'त्यादिना तत्तद्रूपे तत्तदसाधारणधर्मोपसंहारो व्यवस्थापितः ॥६५

दर्शनाच ॥ ६६ ॥ पूर्वसूत्रात्तत्पदमत्रानुवर्तत इत्याशयेन सूत्रं व्यकुर्वन्ति योपीत्यादि । तत्तथोपास्त इति । तत् एकमवताररूपं सर्वरूपवत्तयोपास्ते । एतद्दृष्टान्तेनेति । दर्शनदृष्टान्तेन । एतेन पूर्वाधिकरणोक्तपक्षस्य गौणता सूचिता । तथा दर्शनाभावादिति । सर्वनिरूपणान्ते एवं कथनस्य तात्पर्यमाहुः उपासनेत्यादि । ननु यद्येकस्यैव रूपस्य दर्शनम्, तदा सर्वरूपोपसंहारबोधनस्य किं प्रयोजनम्, अत आहुः माहात्म्येत्यादि । कैश्चिदिति । स्मृतिपुराणादिवाक्यैः । तदपीति । सर्वरूपोपसंहरणम् । तथाचैकरूपदर्शनेपि सर्वरूपोपसंहारोऽप्येकदेशिनां न दुष्ट इति भावः ।

अन्ये तु इदं षट्सूत्रमेवाधिकरणमङ्गीकृत्य, कर्माङ्गभूतेषूद्गीथादिषु य आश्रिता वेदत्रयविहिताः प्रत्ययास्ते समुच्चीयेरन्, उत यथाकामं स्युरिति संशये, प्रत्ययाश्रयभूताः स्तोत्रादयो

रश्मिः ।

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥ स्पष्टम् ॥ ६५ ॥

दर्शनाच ॥ ६६ ॥ सर्वरूपवत्तयेति । रामस्य हासरूपत्वं वामनस्य कटिभूषणरूपत्वमित्येवमादिप्रकारेण । भाष्ये । न तु सर्वेषामिति । रामादीनां हासादिरूपत्वादिति भावः । उपासनेत्यादीति । भगवदिति । चित्तशुद्धिद्वारेति ज्ञेयम् । माहात्म्येति । महात्मनो व्यापकस्य भावो मत्स्यादिः 'अरूपव'त्सूत्रसिद्धमाहात्म्यं तस्य ज्ञापनार्थम् कर्माङ्गेति । 'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या । दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेने'ति पूर्वमीमांसाकारिका । प्रत्यया ज्ञानानि अङ्गविषया बोध्याः । प्रत्ययेति । प्रत्ययाश्रयाः ज्ञानविषयाः स्तोत्राद्यर्थाः ।

दप्यविरोधीति ज्ञेयम् ॥ ६६ ॥

इति तृतीयाध्याये तृतीयपादे पञ्चविंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् २५

इति श्रीवेदव्यासमतवर्तिश्रीमद्वल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥ ३ ॥

भाष्यप्रकाशः ।

यथा समुच्चीयन्ते, एवं तदाश्रिताः प्रत्यया अपि । तत्रानुशिष्टत्वादिभ्यो हेतुभ्यः समुच्चीयेरन्निति पूर्वपक्षे, सहभावाश्रवणादिहेतुभ्यां यथाकामं स्युरिति सिद्धान्तयन्ति ।

तन्नास्माकं रोचते । यथाकामसूत्रोक्तहेतुनैव तादृशनिर्णयसम्भवेनैतद्वैयर्थ्यात् । गुणसाधारण्यसूत्रे पूर्वपक्षसमाप्त्या शिष्टिसूत्रस्थचकारवैयर्थ्यापत्तेश्चेति । तस्मात् पूर्वोक्तमेव युक्तमिति दिक् ।

अत्रायं संग्रहः । 'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतेः सर्वस्य वेदस्य ब्रह्मविद्यात्वम्, 'इतिहासपुराणं च वेदानां पञ्चमं वेद'मितिश्रुतेर्वेदपदेन तयोरपि सङ्ग्रहात्तयोरपि तथात्वम् । 'द्वे विद्ये वेदितव्ये' इत्याद्याथर्वणश्रुतेर्ऋग्वेदादिरूपा अपरा, अक्षराधिगमिका परेति फलतो विभागः । परास्वपि 'ब्रह्मविदाप्नोति परम्', 'अक्षरात् परतः पर' इति श्रुतेः पुरुषोत्तमस्य तत आधिक्ये तद्विद्यानां विषयफलयोर्बलादक्षरविद्यातोऽप्याधिक्यम् । परास्वपरासु च तत्तद्वेदोक्तासु सर्ववेदान्तप्रत्ययसूत्रोक्तहेतुना फलसंयोगरूपचोदनानामविशिष्टत्वे विद्यैक्यनिर्णयः । तन्मध्ये अन्यतरस्याभावे तु विद्याभेदः । गुणोपसंहारस्तु प्रायशो रूपैक्यात् प्रयोजनैक्याद्वा, क्वचित्त्वर्थवादतौल्यादपि । स च स्वाध्यायसूत्रोक्तैर्निरूपणप्रकारभेदाधिकारिभेदसम्बन्धिभेदैः 'योऽन्यथा सन्त'मिति वाक्योक्तदोषापत्त्या च कासुचिदात्मविद्यासु बाध्यते, कर्मणि तु पूर्वोक्तैस्त्रिभिर्न्यूनातिरिक्तप्रायश्चित्तश्रवणाच्च बाध्यते । तदभावे तु भवति । परविद्या अपरविद्याश्च फलैक्ये

रश्मिः ।

वाचकत्वेनाङ्गत्वादित्वेन समुच्चीयन्ते । तदाश्रिताः कर्माङ्गभूतविषयाः प्रत्ययाः । **अनुशिष्टेति** । अग्रिमसूत्रोक्तेभ्यः । **सहभावेति** । 'नवे'ति 'दर्शना'दिति सूत्रोक्ताभ्याम् । **चकारेति** । सूत्रार्थस्तु शिष्टिः शासनं विधानमित्यर्थः । यथाङ्गानां प्रतिवेदं विधान तथा तथा तदाश्रितोपास्तीनां विधानाविशेषाच्चाङ्गवत् समुच्चयनियम इति । एवं निरर्थकश्चकारवैयर्थ्यापत्तेरित्यर्थः ॥ **इति चतुर्विंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम्** ॥ २४ ॥

'सर्ववेदान्तप्रत्यय'सूत्रार्थपुरःसरमाहुः **सर्वे वेदा** इत्यादि । **तथात्वमिति** । वेदत्वम् । **फलत** इति । कर्मज्ञानाक्षरज्ञाने फले ताभ्याम् । ननु 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तम'मिति पुरुषोत्तमस्येदमित्थतया ज्ञानविषयेऽधोक्षजे कथं विद्येत्यतः प्रसङ्गादाहुः **परास्विति** । तथा च देशकृतपरत्वसम्बन्धेन यैः कैश्चिद्धर्मैरनधोक्षजस्यापि विद्येति भावः । **विषयेति** । विषयः पुरुषोत्तमः, परप्राप्तिः फलं तयोर्बलात् । 'सर्ववेदान्तप्रत्यये'त्यत्र सर्वपदं मुख्यवृत्तमित्याहुः **परास्विति** । **अपरास्विति** । धर्मकर्मरूपासु । **फलेति** । फल संयोगश्च रूपं च चोदना च तासाम् । **तन्मध्य** इति । तेषां मध्ये । **अन्यतरस्येति** । तरप् महाभाष्यात् । 'उपसंहारोऽर्थभेदा'दिति सूत्रार्थसङ्ग्रहः **गुणोपेति** । **स चेति** । गुणोपसंहारः । **त्रिभिरिति** । उक्तहेतुभिः । **बाध्यत** इति । उपसंहारो बाध्यते । **भवतीत्युपसंहारः** । 'विकल्पोऽविशिष्टफलत्वा'दित्यस्यार्थसङ्ग्रहः । **परविद्या** इति । 'काम्यास्त्वि'त्यस्य सङ्ग्रहः

भाष्यप्रकाशः ।

विकल्पन्ते, फलभेदे तु यथाकामं समुच्चीयन्ते, क्वचिदेकस्योपासनस्य स्वकामितानेकफलत्वे विकल्पन्ते च । कर्ममार्गीयविद्याङ्गानि तु बहूनां विद्यानां फलैक्येपि यथाश्रयं तत्रैव व्यवतिष्ठन्ते, ज्ञानमार्गीयविद्याङ्गानि तु यथाश्रयं क्वचित् समाह्रियन्ते, क्वचित्तु यथाश्रयं व्यवतिष्ठन्ते । अवतारोपासनं च यथाकाममेव भवति, सर्वासां परविद्यानामुपास्यरूपसाक्षात्कारः फलमिति च ॥ ६६ ॥

इति पञ्चविंशं न वा तत्सहभावाश्रुतेरित्यधिकरणम् ॥ २५ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ ३ ॥

रश्मिः ।

फलभेद इति । **क्वचिदेकस्येति** । यथा 'अकामः सर्वकामो वे'त्यत्र । 'अङ्गेषु यथाश्रयभाव' इत्यस्यार्थसङ्ग्रहः **कर्ममार्गीये**त्यादिः । 'यथाश्रय'मिति सूत्रव्याख्याने व्याख्यातम् । **तत्रैव** अवयविन्येव । 'समाहार'सूत्रार्थसङ्ग्रहः **ज्ञानमार्गीये**ति । 'गुणसाधारण्ये'त्यादिसूत्रार्थसङ्ग्रहः **अवतारे**ति । 'दर्शनाच्चे'ति सूत्रार्थसङ्ग्रहः **सर्वासा**मित्यादि ।

इति श्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण सम्पूर्णवेत्रा विठ्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता कृते भाष्यप्रकाशस्य तृतीयाध्यायस्य रश्मौ तृतीयाध्यायस्य तृतीयः पादः सम्पूर्णतामगमत् ॥ ३ ॥ ३ ॥

इति श्रीमत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्रेषु तृतीय उपनिषदां बोधकताप्रकारनिरूपके साधनाध्याये गुणोपसंहारो नाम तृतीयः पादः ॥ ३ ॥ ३ ॥

प्रास्ताविकम् ।

भाष्यप्रकाश-रश्मि-परिबृंहित-श्रीमदणुभाष्यस्य तृतीयाध्यायस्याद्यपादद्वयस्य प्राकट्यानन्तरं यत्किमपि समुपलब्ध तन्निवेदनमावश्यकम् । आंग्लभाषायां यद्यप्येतत् सविस्तरं निरूपितम्, तथापि तद्भाषानभिज्ञानां प्रमोदाय सङ्क्षेपेणात्रानूद्यते । श्रीमन्नाथद्वाराधीशश्रीमद्गोस्वामिकुलतिलकश्रीमद्गोवर्धनलालजिमहाराजचरणानां तत्सूनुलालबावाश्रीदामोदरलालचरणानां परमोदारानुग्रहेण श्रीमत्प्रभुचरणश्रीमद्विठ्ठलेश्वराणां निजश्रीहस्ताक्षरलिखितस्य श्रीमदणुभाष्यस्य चतुर्थाध्यायस्य तृतीयाध्यायस्य चतुर्थपादस्यान्तिमपत्रत्रयस्य 'अनुष्ठेय'मिति सूत्रस्य वर्णकान्तरस्य च दर्शनसौभाग्यं सम्प्राप्तम् । तद्भागस्य श्रीमदणुभाष्यस्य पाठादि तदाधारेणैव योजयिष्यते । श्रीमत्प्रभुचरणश्रीहस्ताक्षरप्रतिकृतिमपि यथावकाशं प्रकटीकरिष्यामः । एतेनाणुभाष्यस्यान्तिमसार्धाध्यायस्य प्रणेतृत्वं श्रीमत्प्रभुचरणानामेवेति तन्मूलपुस्तकदर्शनेन सुष्ठु निश्चीयते । श्रीमदणुभाष्यस्यायं विभागः श्रीमत्प्रभुचरणैः श्रीगोकुल एव तत्र निवासाङ्गीकृत्यनन्तरं प्रणीत इत्यपि निर्णीतमस्माभिरांग्लटिप्पणे । कारणानि च सविस्तरं तत्रैव दर्शितानि ।

भाष्यप्रकाशश्च श्रीमत्पुरुषोत्तमानां श्रीहस्ताक्षरलिखितान्तिमशोधयुक्तो 'गुजराती' मुद्रणालयाधिपतिसन्मान्य 'नटवरलाल इच्छाराम देसाइ' इत्यस्य सौहार्देन प्राप्तः । एतेन प्रकाशमुद्रणमपि विदुषां हृदये सन्तोषं जनयिष्यतीति । अत्राप्यधिकजिज्ञासुभिरन्यत्रास्मिन्नेव पुस्तके द्रष्टव्यमिति ।

एतत्पादभाष्यस्य पाठादियोजनेऽस्माभिः श्रीमत्प्रभुचरणपौत्राणां श्रीमद्गिरिधनपितृचरणानां श्रीकल्याणरायाणां पुस्तकस्योपयोगः कृतः । श्रीकङ्करपल्लीस्थश्रीमद्द्वारकाधीश्वरप्रभोर्मन्दिरस्थप्राचीनचित्रसङ्ग्रहात् श्रीमत्पुरुषोत्तमानां प्राचीनं चित्रं श्रीमन्मातृचरणश्रीमद्गोस्वामिनीश्रीसौन्दर्यवतीनां निःसीमानुग्रहेणोपलब्धम् । तत्तादृशमेव सम्पाद्य 'श्रेष्ठिवर-वैष्णव-लालजीभाई' इत्येतेषां सम्मत्यात्र निवेशितमिति ।

श्रीपुरुषोत्तमचरणानां गुरुश्रीकृष्णचन्द्रचरणानामेतद्भाष्यविभागविवरणमस्माभिस्तन्मूलपुस्तकाधारेण संशोध्य परिशिष्टे निवेशितम् । एतन्मूलपुस्तकमस्माभिः 'परलोकनिवासित्रिपाठिमनःसुखरामसूनुविद्वद्वरतनसुखरामभाई'सकाशात् सम्प्राप्तम् । एतदखिलं विवरणं ग्रन्थप्रणेतॄणां श्रीहस्ताक्षरेष्वेव लिखितमिति तद्दर्शनेनास्माकं स्फुरति । एतदखिलं विवरणं श्रीपुरुषोत्तमैर्निजकृतौ प्रायः समग्रमेव समावेशितं दृश्यते । एते श्रीकृष्णचन्द्राः श्रीमत्प्रभुचरणानां तृतीयलालश्रीबालकृष्णानां द्वितीयसूनुश्रीव्रजनाथानां सूनवः संवत् १६५५ श्रावण-कृष्ण-सप्तम्यां प्रादुर्भूताः । निखिलोपलब्धब्रह्मसूत्रभाष्यसमीक्षापूर्वकमणुभाष्यमर्मोद्घाटनपद्धतिर्यास्माभिर्भाष्यप्रकाशे दृश्यते, सा पद्धतिः श्रीपुरुषोत्तमैः श्रीकृष्णचन्द्राणामेव प्रेरणया कृपया चोपलब्धेति प्रतिभाति । तृतीयाध्यायस्य तृतीयपादभाष्यप्रकाशस्यात्र मुद्रितपरिशिष्टेन सम्वादनेनास्मदभिप्रायः स्फुटिष्यतीति । साम्प्रदायिकविद्वत्सु प्रार्थनीयमिदं यच्छास्त्ररीत्या श्रीमदणुभाष्यस्यावगाहनं भवतामभीष्टं चेत्, एतेषां श्रीकृष्णचन्द्राणां श्रीमदणुभाष्यस्य प्राचीनतमैतद्विवरणस्यान्वेषणं कर्तव्यमिति । सम्प्रदाये तेषां तच्छिष्यश्रीपुरुषोत्तमानां च वंशस्योत्सन्नत्वात् नामावशेषा एव ते जाता इति विचिन्त्य चेतो दुनोत्यस्माकम् । कस्मिन् वर्षे तेषां प्रादुर्भावो जात इत्यपि सम्प्रदायवंशवृक्षे प्रायो न दृश्यते । निर्भयरामः सम्प्रदायकल्पद्रुमे 'इमे शास्त्रवित्तमा' इति वर्णयति । 'मद्रपुरनिवासिवैष्णवश्रेष्ठिवर-दि-ब-गोविन्ददास'सकाशादुपलब्धात् प्राचीनपुस्तकतस्तज्जन्मसमयोस्माभिर्ज्ञातः । एतेषां गोस्वामिनां पण्डितमुकुटमणीनामैतिह्यं सम्प्रदायगौरवमभिलषद्भिरवश्यमन्वेषणीयमिति विज्ञप्तिः ।

श्रीमदाचार्यश्रीमद्वल्लभाधीश्वर-
प्राकट्यमहोत्सव. ।
चैत्र-कृष्ण-११-१९८३ ।

मूलचन्द्र तेलीवाला ।

श्रीकृष्णाय नमः।

परिशिष्टम् ।

गुणोपसंहारपादभाष्यविवरणम्[1] ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ तृतीयपादं व्याचिख्यासवः सङ्गतिबोधनाय पूर्वपादार्थमनुवदन्तः प्रस्तूयमानार्थमाहुः **पूर्वपादेत्यादि । विचार्यन्त** इति । धर्माः सर्वे सर्वत्र सन्ति, क्वचिदेव वा केचन सन्ति, केचन न सन्ति, सर्वत्रैव न सन्त्यौपाधिका वा सन्तीति सन्देहे विचार्यन्त इत्यर्थः । नन्वत्र सर्वैरेकदेशिभिर्विद्याभेदाभेदविचार एवाद्रियते, तत्कुतो धर्मा विचार्यन्त इत्युच्यत इति चेत् । उच्यते । आचार्यस्य ब्रह्मनिरूपणार्थमेव मुख्यतया प्रवृत्तत्वेन ब्रह्मशेषतयैव विद्याविचारस्यौचित्यात्पूर्वपादसङ्गतिसौकर्यात् पक्षवाचकविज्ञानोपासनादिपदाध्याहारापेक्षया पूर्वपादान्तपरामृष्टब्रह्मानुषङ्गस्यैव ज्यायस्त्वात्सर्ववेदान्तप्रत्ययमित्येकवचनस्यापि स्वारस्यात् विद्याविचारादर्तृभिरपि तद्भेदाभेदयोर्विषयभेदाभेदाभ्यामेव समर्थनेन तद्विचारस्यापि विषयविचारैकशरणत्वेन तत्सिद्धान्तितविद्यैक्यस्यैवमपि सिद्धेश्चेति बुध्यस्व । ननु सिद्धे विग्रहे धर्माः सिद्धप्राया एवेति पुनः किमिति विचार्यन्त इत्यत आहुः **ते** चेदित्यादि **भिन्ना** इत्यन्तम् । अतो विचार्यन्त इत्यर्थः । एवं सङ्गतिं प्रदर्श्य मतान्तरोक्तविषयस्यापि प्रस्तुतरीतिकविचारेण निर्णयसिद्धिबोधनाय तत्साधारणं विषयद्वयं पूर्वमाहुः **यथे**त्यादि । एतदाद्युदाहरणानां विभूतिविषयकत्वाद्विचारस्यैतादृग्विषयमात्रपरताव्यावर्तनायोदाहरणान्तरमाहुः **अपरं** चेत्यादि । एवं विषयं निर्दिश्य पूर्वपक्षाकारं विवेक्तुं पूर्वं मतान्तरीयाकारं वदन्तस्तेनाशङ्कान्तरमुत्थापयन्ति **तथा** चेत्यादि । अत्र दृष्टान्तोदाहरणं त्वामिक्षाधिकरणम् । तत्र हि 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिन'-वाक्ये तप्तदुग्धनिष्पन्नघनविरलद्रव्यद्वयरूपक एको यागो यागद्वयं वेति सन्देहे, द्रव्यदेवताविशिष्टयागान्तरविधौ गौरवप्रसङ्गादपूर्वान्तरकल्पनाप्रसङ्गाच्च न यागद्वयविधिः, किन्तु पूर्वस्मिन्नेव यागे वाजिनं गुणो विधीयते, वाजिभ्य इत्यनेन च वाजोन्नमामिक्षा तद्येषामस्तीति व्युत्पत्त्या पूर्वोक्ता विश्वेदेवा एवोपलक्ष्यन्त इति पूर्वपक्षः, तत्रोत्पत्तिशिष्टामिक्षा द्रव्यावरुद्धे याग उत्पन्नशिष्टं वाजिनं गुणत्वेन प्रवेशं न लभते निर्बलत्वात्, ततश्च तत् द्रव्यं स्वसम्बन्धियागं पूर्वस्माद्भिनत्ति, वाजिपदं चाश्वे रूढत्वान्न योगेन विश्वान् देवानुपलक्षयिष्यति, तथा सति विध्यपूर्वान्तरकल्पनयोः प्रामाणिकत्वात्तत्कृतं गौरवं न दोषायेति द्रव्यदेवताभेदाद्यागभेद इति स्थितम् । तथा प्रकृते पञ्चाग्नयः षडग्नय इत्यादि । श्रीकृष्णः श्रीरामो नृकेसरीत्यादीतरपरिच्छेदकरूपभेदाद्वेद्यभेदः । किंच यथा कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नेतर इति धर्मभेदः, तथात्र शिरोव्रतमाथर्वणिकानामेव नेतरेषामिति धर्मभेदः । विभूतिभेदश्च क्वचिद्रामस्वरूपं विभूतिमध्ये गण्यत इतरत्र वासुदेवस्वरूपम्, एवं मुरलीधरत्वं धनुर्धरत्वं चेति धर्माणामावापोद्वापौ । किञ्च दृष्टादृष्टफलभेदोपि । यथा राममन्त्राणां सर्वकामदत्वं मोक्षः । श्रीकृष्णस्मरणस्य भगवद्विषयककामजननं तन्मन्त्रस्यानायासतो भगवत्पदप्राप्तिरिति, रूपभेदेन धर्मभेदेन फलसंयोगभेदेन च वेद्यभेदप्राप्तौ दोषान्तरमापतितम्, तेन मतान्तरोक्त-

---

१. इदमखिलं विवरणं श्रीपुरुषोत्तमचरणैः स्वकृतप्रकाशे प्रायः शब्दश उद्धृत्य समावेशितम् । श्रीपुरुषोत्तमगुरुभिः श्रीमद्गोस्वामिश्रीकृष्णचन्द्रचरणानामियं कृतिरित्यस्मत्प्रत्यय. ।

पूर्वपक्षसमाधानाभ्यां धर्मभेदप्रमादितदोषो नापैतीति कश्चिदधिक आकारो वक्तव्य इत्यर्थः। अत्रोपासनाविषयाणामद्वैतत्वं सिद्धान्तत्वेनाभिमन्यमानः कश्चिदेकदेशी पूर्वोक्ताशङ्कामप्रयोजकां मनसि कृत्वा चोदयति नन्वित्यादि। तद्दूषयन्ति नैवमित्यादि। **समन्वयविरोधापत्तेरिति**। आचार्येण हि समन्वयः श्रुतीनां ब्रह्मनिरूपकत्वेन प्रतिपादितः, न तु तासामौपाधिकनिरूपकत्वेनातस्तथेत्यर्थः। अथ ग्रहिलतया तथैव प्रतिपादित इत्युक्तौ युक्त्यन्तरमाहुः तासामित्यादि। ननु तासां यथाकथंचिद्ब्रह्मप्रतिपत्त्यर्थत्वान्न हानिरित्यत आहुः श्रुतेरित्यादि। अन्यथा सतोऽन्यथा कथनात्तथेत्यर्थः। अथ विषभोजनवद्वदतीति न प्रतारकत्वमित्यत एतन्न्यायस्याप्रवृत्तिं सूचयन्ति **अपरं** चेत्यादि। **नत्तदुपासनामिति**। अन्यथा ज्ञानरूपामित्यर्थः। तथा च न विषभोजनवदेषोक्तिरिति भावः। एतद्दार्ढ्याय युक्त्यन्तरमाहुः स्पष्टेत्यादि। तथा च यदि त्वदुक्तं व्यासोऽभिप्रेयात्, स्पष्टार्थानि रामादिपदान्यपि देवतावाचकानि ब्रह्मवाचकानि वेति सन्दिह्य तन्निर्णयमपि कुर्यादतस्तदभावान्न तथेत्यर्थः। एवमेकदेशिमतं निरस्य सर्वासां ब्रह्मनिरूपकत्वमेव व्यासाभिप्रेतमित्याशयेन सिद्धं पूर्वपक्षस्वरूपमाहुः **एवं च सतीत्यादि**। सर्वासां ब्रह्मनिरूपकत्वे सति धर्मभेदकृतधर्मिभेदाद्ब्रह्मानेकत्वापत्त्या 'नेह नानास्ती'त्यादिश्रुतिविरोधस्तासामौपाधिकपरत्वे बहूनां वाक्यानां ब्रह्मविद्यात्वहानिरित्ययमेव पूर्वपक्षाकार इत्यर्थः। अत्र सूत्रावयवमुपन्यस्य समादधते **अभिधीयत** इत्यादि। ननु नायं प्रतिज्ञार्थः। तथाहि। पूर्वकाण्डे यज्ञस्यानन्तरूपनिरूपणं यथा भगवन्मूर्तित्वसिद्ध्यर्थम्, तथा ब्रह्मनिरूपणाय प्रवृत्ते उत्तरकाण्डेऽनेकरूपनिरूपणप्रयोजनालाभाद्यथाकथंचित्प्रतिपत्त्यर्थत्वस्य सिद्धान्तिनानङ्गीकारादनन्तरूपश्रुतेरसङ्कुचितवृत्तित्वेन निरूपणस्याशक्यत्वाच्चेत्याशङ्कायामाहुः **ब्रह्मण** इत्यादि। तथा च 'फलमत उपपत्ते'रित्यत्र ब्रह्मणः फलदातृत्वस्य निश्चितत्वात्तत्तत्फलसाधकोपासनार्थं तत्तन्निरूपणमित्ययमेव प्रतिज्ञार्थ इत्यर्थः। ननूपासनार्थमेकमनेकरूपेण निरूप्यत इति कथमवगन्तव्यमित्यत आहुः **तत्र हेतुमिति**। तथाच सूत्रोक्तहेतोरवगन्तव्यमित्यर्थः। कथमित्याकाङ्क्षायां तमनूद्य विवृण्वन्ति **चोदनेत्यादि**। तथा च ब्रह्मत्वेनोपासनाविधानात्तथावसीयते, तेन यथाग्निहोत्रे द्रव्यभेदे उपांशुयाजे देवताभेदेपि एकदेशस्यैव भेदान्न यागभेदस्तथात्रापि किंचिद्रूपधर्मभेदान्न वेद्यभूतब्रह्मभेद इत्येवमित्यर्थः। ननु शाखान्तराधिकरणे केवलानां रूपादीनां व्यभिचारित्वं हृदिकृत्य 'एकं वा संयोगरूपचोदनाऽऽख्याऽविशेषा'दिति सूत्रेण संयोगादिहेतुचतुष्कसमुदायं हेतूकृत्याभेदः साधित इति प्रकृत एकेन हेतुना कथं सिद्धिरित्यत आहुः आदीत्यादि। तथा चात्रापि संयोगरूपचोदनात्मकहेतुत्रयसत्त्वादेकदेशरीतिकोदाहरणे आख्या अपि सत्त्वेनोक्तचतुष्कस्यापि सत्त्वान्न दोष इत्यर्थः। ब्रह्म सर्ववेदान्तप्रत्ययमेकं चोदनाद्यविशेषात्, यत्र चोदनाद्यविशेषस्तत्र प्रतिपाद्याभेदः। सर्वशाखाप्रत्ययज्योतिष्टोमवदित्यनुमानमत्र सिद्धम्।

तत्र दोषमाशङ्क्य सूत्रकारः समाधत्ते इत्याशयेन सूत्रं पठन्ति **भेदादित्यादि**। **उक्तहेत्वसिद्धिमिति**। धर्मभेदकृतमिथोभेदादिपदसंगृहीतरूपाभेदस्य पक्षे ब्रह्मण्यभावेन चोदनाद्यविशेषादित्यस्य हेतोः स्वरूपासिद्धिमित्यर्थः। **तथा च ब्रह्मधर्मत्वेत्यादि**, यथा षोडशिग्रहणाग्रहणयोः स्वरूपभेदेप्यतिरात्रधर्मत्वेनाभेदस्तथा तत्तद्धर्मवैशिष्ट्यावैशिष्ट्ययोर्ब्रह्मधर्मत्वेन तथात्वात् त्वदुक्तहेतोरेव स्वरूपासिद्धिरित्यर्थः, भेदेन हेतुना सिद्धान्तहेतुं दूषयता त्वया प्रतिवाक्यं प्रतिपाद्यं ब्रह्म भिन्नं धर्मभेदाद्यत्र धर्मभेदस्तत्र प्रतिपाद्यभेद आमिक्षावाजिनयागवदित्यनुमानं लक्षितम्। तत्र त्वदुक्तहेतोरतिरात्रदृष्टान्तेन व्याप्यत्वासिद्धिरित्यपि बोध्यम्। नन्वेवं ब्रह्मैक्यमत्राचार्यः किमित्याग्रहेण निरूपयतीत्याकाङ्क्षायामुपसंहारसूत्रविचारेण तदाशयमाहुः **एवं सतीत्यादि**। **तत्रेति**, न्यूनगुणके रूपे। **उचित इति**,

कर्मणि द्वयोरेकदा कर्तुमशक्यत्वात्पर्यायभेदेन विकल्पस्यापि प्रसक्तिः, प्रकृते तु तदपि नेत्यत उचित इत्यर्थः । नन्विदं सूत्रकारेण नोक्तमित्याशङ्कायामाहुः इति भाव इति । पूर्वसूत्रोक्तहेतोरत्र शोधनादग्रे कथनाच्च तथाशयो लभ्यत इत्यर्थः । उपसंहारपदार्थश्च सामान्यतः प्रसक्तस्य विशेषे नियमनमित्यग्रिमसूत्रे स्फुटीभविष्यति । तच्चात्र तेषां तेषां गुणानां तत्रतत्र सत्त्वेन ज्ञानरूपमित्यग्रे वाच्यं 'न वा विशेषादि'ति सूत्रे । नन्वेवं सति यत्र ब्रह्मत्वेनोपासनं विधीयते तत्र तद्वाक्यनिर्णयो भवति, यत्र पुनर्ब्रह्मत्वेनोपासनं न विधीयते यथा प्राणसंवादे पञ्चाग्निविद्यायां च, तत्र ब्रह्मत्वेनोपासनाभावेनैक्याभावात्कथं निर्णय इत्याशङ्कायां तत्रापि न्यायस्यास्य तौल्यादेतेनैव निर्णय इति हृदिकृत्य कंचिद्विशेषमाहुः अत्रेत्यादि । ओमित्येतदक्षरमिति, ॐकाराक्षरमित्यर्थः । तथा च विभूत्युपासनान्यायस्तत्रापि बोध्य इत्यर्थः । अत्राचार्येणोपासनामात्रनिर्णयो न क्रियतेपि तु साधनमात्रस्य, तथा सति भक्तिमार्गस्यापि व्यवस्था वक्तव्यैवेत्याशयेनाहुः भक्तीत्यादि । अग्र इति, 'न वा प्रकरणभेदा'दिति सूत्रे । ननु भक्तेरप्रस्तुतत्वात्तद्व्यवस्थाकथनमनुपपन्नमिति चेत् । न । उपासनाया अपि तथात्वात् । न च तस्याः श्रौतत्वादस्ति प्रस्ताव इति वाच्यम् । तुल्यत्वात् । गोपालतापनीये इति 'सकलं परब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवती'ति व्यानाद्भिन्नतया तस्या अपि विधानात् । 'भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनैवामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्य'मिति लक्षणभेदाच्च । न च यच्छब्दोपबन्धादयमनुवाद एव न विधिरिति वाच्यम् । 'यदाग्नेयोऽष्टाकपाल' इत्यादिवददोषात् । न च कर्तृसामानाधिकरण्यान्नेदं साम्प्रतमिति वाच्यम् । तथापि समाप्तौ 'कृष्ण एव परो देवस्तं ध्यायेत्तं रसेत्तं भजे'दिति दर्शनेनादोषात् एकस्मिन्नेव प्रकरणे सृष्टिकर्तृत्वादिना माहात्म्यस्य आत्मत्वेन निरुपाधिप्रियत्वस्य च बोधनात् श्रुतीनां भक्तावेव तात्पर्यावसायाच्च । नन्वत्र विहितभक्तिमार्गीया व्यवस्था वाच्या अविहितभक्तिमार्गीया वेति चेत् । उभयोरपीति ब्रूमः । किं मानमिति चेत् । श्रीभागवते श्रीनन्दादीनां फलकथनात्तद्बलेनाविहितभक्तेरपि प्रामाणिकत्वसिद्धौ तद्व्यवस्थाया अपि मन्दमध्यमयोरर्थे आवश्यकत्वात् । अतो नात्र चोद्यावसर इति दिक् ॥

ननु सूत्रकारेणेदं कुत्रोक्तमिति चेत् । अग्रिमसूत्रेऽधिकारस्य नियामकत्वं वदता सूचितमिति जानीहि ।

अग्रिमसूत्रमवतारयन्ति नन्वित्यादि । तथा च शिष्टाचारविरोधात्पूर्वत्र साधितोपासनाद्यैक्यचिन्तावैयर्थ्यं प्राप्ते प्रतिवदतीत्यर्थः । सूत्रस्थस्य तथात्वेनेत्यस्यार्थमाहुः स एकमित्यादि बोधयतीत्यन्तम् । यत एवं बोधयत्यतो हेतोः स्वाध्यायस्य वेदस्य तथात्वेन नानास्वरूपकैककर्मबोधकत्वेनेत्यर्थः । तत्प्रयुक्त इति नियमविशेषणम् । तथा च बोधनप्रकारमर्यादाबलात्तावत्कर्मकरणनियम इत्यर्थः । अत्र बीजमाहुः तावद्भिरित्यादि । स्वाध्यायस्य तथात्वेनेत्यस्य हेतोर्यज्ञानां भगवन्मूर्तितासाधकत्वेन चारितार्थ्यादनेन हेतुना दोषापरिहारं मन्वानः सूत्रकृद्धेत्वन्तराणि समुच्चिनोतीत्याशयेनाहुः नन्वित्यादि । उक्तहेतुप्रयुक्ते नियमे शिष्टाचारबीजभूतां सम्मतिमाहुः अत एवेत्यादि । अत एव, तत्तच्छाखावाक्यतत्तदधिकारन्यूनाधिकप्रायश्चित्तानां नियामकत्वादेव । परशाखोक्तमिति, यथा 'कुच्छुटोसीत्यश्मानमादत्ते कुटरुरसीति वे'त्यश्मादानमन्त्रो येषां कल्पे विकल्पितस्तैरेव तत्र पठ्यते, नेतरैः । विकल्पे तूभयस्याशास्त्रार्थत्वमिति, यत्कल्प एव विनियोगविधिर्नास्ति तेषां तादृशस्थले इच्छया करणे धर्माभासपरधर्मत्वापत्त्या तथेत्यर्थः । अतोपीति, कल्पोक्तनियमबलादपि । नियम्यन्त इति, लिङ्गान्नियम्यन्ते । एवं सूत्रं व्याख्याय उपासनाया अपि समाचारत्वेन सङ्ग्रहात्तमेव नियमं तत्राप्याहुः प्रकृतेपीत्यादि । तथा सतीति, तद्बोधकप्रमाणमननुरुध्य रूपान्तरासाधारणधर्मोपसंहारेऽङ्गीकृते

सति । तथा चैवं भावने सवदृष्टान्तबोधिता लिङ्गस्य नियामकता भज्येतातस्तथा न भावनीयमित्यर्थः । अत्र वादी लैङ्गिकनियमस्याप्रयोजकत्वं शङ्कते **नन्वित्यादि** । तत्र समादधते **सत्यमित्यादि** । **तत्रेति**, आक्षेपे । **कार्येति**, मूलरूपोपासकेन कार्या । **इति ज्ञेयं परमिति** । मत्स्यावताराणामेव तत्त्वविधानदर्शनात्तथेत्यर्थः । ननु श्रुत्या त्वेतावद्बोध्यत इति सत्यम्, तथापि मूलरूपत्वाविशेषस्योपसंहारहेतोर्विद्यमानत्वादुपसंहारे किं बाधकमित्यत आहुः **तत्रेत्यादि** । **उक्तमेवेति** । लैङ्गिकनियमरूपं यत्कर्मण्युक्तं तदेव, अन्यथा तत्राप्यतिप्रसङ्गः स्यादिति भावः । ननु पूर्वसूत्रोक्तहेतुना सर्वत्र सर्वगुणोपसंहारप्राप्तौ समाचारसूत्रे निरूपणप्रकारभेदाधिकारभेदप्रायश्चित्तश्रवणासाधारणलिङ्गानां नियामकत्वमादृतम्, तेन तत्तच्छाखिभिस्तत्तदधिकारिभिस्तत्तल्लिङ्गनियताः स्वाधिकारानुसारेण स्वशाखोक्ता गुणा भावनीया इति सिद्धम् । तथा सति प्राणाद्युपासनायां शाखान्तरोक्तगुणोपसंहारो न स्यादित्यत आहुः **प्राणादीत्यादि** । न च निरूपणप्रकारभेदरूपं बाधकं दृश्यत एवेति वाच्यम्, तस्य मन्दमत्यनुग्रहार्थत्वेन बाधकत्वाभावात् । शाखाविभागात् पूर्वमिच्छयैवाधिकारमनुसृत्यर्षिभिः करणात् । आचार्येण मन्दमतेस्तावतैव फलसिद्धिबोधनार्थमेव तदुपन्यासात् । हेत्वन्तरकथनेन तथानिश्चयात् । तेनैकशाखाध्येतुस्तावतैव सिद्धिर्द्व्याद्यध्येतुस्तूपसंहारेणोपासनापौष्कल्यात्फलशैघ्र्यमिति फलति, तदेतदभिसन्धायोक्तं **न किंचिद्बाधकमिति** । लैङ्गिकनियमसमर्थनाय मत्स्यकूर्मादिरूपेणायमेव सर्वकर्म कृतवानिति यदुक्तं तत्र चोदयति **नन्वित्यादि** । तत्र समादधते **नैवमित्यादि** । धर्मिग्राहकमानतः सिद्धिं दृष्टान्तेनोपपादयन्ति **यथेत्यादि** । नियतपदार्थवादिमते भावभिन्नस्य निषेधमुखप्रतीतिगोचरस्यैकस्यैव पदार्थस्य तादृशप्रतीतिबलेन तावद्रूपत्वं स्वीक्रियते, न तु निरूपकभेदमादाय स्वरूपनानात्वम्, तद्वदत्र ब्रह्मण औपनिषदत्वात्तद्वाक्यबलेन तथेत्यर्थः । एवमुपपत्तिपरिहाराय श्रुतिरूपप्रमाणेन भगवतोनन्तरूपत्वं साधितम् । अतः परं श्रुतार्थापत्तिश्रुतिभ्यामनन्तधर्मवत्त्वं साधयितुं पूर्वं श्रुतितात्पर्यमनूद्य वादिनमनुयुञ्जन्ति **अपरं चेत्यादि** । तदाशयमनूद्य दूषयन्ति **उपेत्यादि** । **वदाम इति**, तवानिष्टापत्तिं वदामः । **न वदेदिति** ग्रहणकोक्तमवदनं व्याकुर्वन्ति **तथाहीत्यादि** । **तस्येति**, ब्रह्मज्ञानस्य । एकजातीयत्वे हेतुः । **घटवत्स्वस्येत्यादि** । **निरूपयेदिति**, ब्रह्मविज्ञानफलं निरूपयेत् । **अपि वा वदेदिति**, अशेषगुणज्ञानाभावे फलाभावापत्त्या वदेदित्यर्थः । आशयान्तरमनुवदन्ति । **न चेत्यादि** । उपासनानाममात्रोक्तौ प्रकाराज्ञानादुपासनाया असिद्धेस्तथेत्यर्थः । तद्दूषयन्ति **परेत्यादि** । तथा चैवमाशयकल्पनपक्षे प्रकारोक्तिवैयर्थ्यं तदवस्थमित्यर्थः । तर्हि कस्तदाशय इत्याकाङ्क्षायां मन्दाधिकारिणामपि तावतैव फलसिद्ध्यर्थं वदतीत्याशयं हृदिकृत्य तेन विवक्षितं साधयन्ति **तस्मादित्यादि** । **तस्मादिति**, त्वदुक्ताशयस्यानुपपन्नत्वात्, **एतेनेति**, उक्तार्थापत्त्याधिकारव्यवस्थापनेन । उक्तोपष्टम्भाय श्रुतिमुपन्यस्यन्ति **तदुक्तमित्यादि** । स्वाभाविकीति विशेषणतात्पर्यकथनेनैकदेशिमते निरस्ते अनन्तधर्मवत्त्वं ब्रह्मणि वास्तवमिति सिद्धम् । तथा सति यस्य रूपस्य ये असाधारणा धर्मास्ते तस्मिन्नेव रूपे नियता इत्याक्षेपलभ्यत्वाभावान्नान्यत्रोपसंहर्तुं शक्या इत्यर्थः । एवं लैङ्गिकनियमं समर्थयित्वा स्वोक्तसूत्रव्याख्यानं दृढीकर्तुं मतान्तरीयमेतत्सूत्रव्याख्यानमप्यसमञ्जसमिति बोधनाय तमनुवदन्ति **केचिदित्यादि** । अयं मतान्तरग्रन्थः शाखान्तराधिकरणस्थस्य 'विद्यायां धर्मशास्त्र'मिति सूत्रीयशाबरभाष्यस्य छायामनुसरति, तत्र हि 'कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नेतरे, तथैकेऽग्निमधीयाना उपाध्यायस्योदकुम्भमाहरन्ति नेतरे, तथैकेश्वमेधमधीयाना अश्वस्य घासमाहरन्ति नेतर' इति धर्मभेदात्कर्मभेद आशङ्किते, **विद्यायां धर्मशास्त्रमिति** सूत्रेण विद्या वेदनमध्ययनमिति यावत्, तस्यायं धर्मो, न तु कर्मण स्तेनान्यधर्मस्या-

न्याभेदकत्वात्कर्मभेदः परिहृत इति स्थितम् । तेन प्रामाणिकः, परन्तु सूत्रकाराशयविरुद्ध इति बोधनाय दूषयन्ति **स चिन्त्यत** इत्यादिना । चिन्ताहेतुमाहुः **न ही**त्यादि । हि यतो हेतोः । अस्य शिरोव्रतस्य विद्याधर्मत्वं विद्याभेदकं न भवति, उक्तन्यायेन चोदनाद्यविशेषरूपेणान्यत्रापि तथात्वेन सर्वविद्याधर्मत्वस्य सिद्ध्या तदभेदकत्वात्, तथा चास्य भेदकत्वमापाद्य ततोन्यधर्मसाधनेन तदसाधकत्वं काकदन्तविचारन्यायमनुसरतीत्युपेक्ष्य इत्यर्थः । इवपदं प्रकारस्य प्रामाणिकत्वबोधनार्थम् । प्रामाणिकत्वेनोपेक्ष्यत्वमसहमानश्चोदयति **नन्वि**त्यादि । तत्रोपेक्ष्यत्वे बीजभूतामनुपपत्तिं बोधयन्ति **सूत्रस्ये**त्यादि । **तत्तात्पर्यकल्पने**ति, शिरोव्रतोपदेशतात्पर्यकल्पना । ननु मुख्यार्थबाधः फलमुखो न दोषायेत्यतो दूषणान्तरमाहुः **किञ्चे**त्यादि । तथा च भवता हि विधैकत्वसाधकत्वेनेदं सूत्रं व्याख्यातम्, तथा सति शिरोव्रतस्य प्रकृतग्रन्थविशेषसंयोगेनासङ्कीर्णत्वेपि पूर्वसूत्रोक्तहेतोर्दृढत्वे सम्पन्ने 'तेषामेवैतां ब्रह्मविद्यां वदेते'त्यत्र यथैतच्छब्दस्तथा सर्वत्र धर्मकथन एतच्छब्दादर्शनेन तद्धर्मोपसंहारस्य प्राप्तावसरत्वादुक्ताशङ्काया अनिवृत्तिस्तस्मादस्य सूत्रस्योक्तरीत्योपसंहारनियमबोधकतयैव व्याख्यानमुचितम्, एवं च नियमविशेषस्यैवोपसंहारपदार्थत्वात्तल्लक्षणस्यापि सौत्रत्वसिद्धिरिति गुणोपि । तस्मान्मतान्तरीयव्याख्यानमुपेक्ष्यमेवेत्यर्थः ।

एवं मतान्तरनिरासेनैतत्सूत्रार्थं निष्कृष्य पुनः सिंहावलोकनेन स्थूणाखननवत्पूर्वसूत्रार्थं दृढीकर्तुं चिन्तान्तरमारभन्ते **नन्वि**त्यादि । **पूर्वोक्तरीत्ये**ति, अनन्तरूपत्वसमर्थनरीत्या । शेषग्रन्थस्तु निगदव्याख्यातः । तथा च निर्धारासम्भवे धर्माणां मायिकत्वमेव शरणीकरणीयम् । तथा सति स्वरूपपराणामेतच्चिन्ताया अनुपयोगात्पूर्वोक्तशङ्काया अनिवृत्तावप्यदोष इति मतान्तरीयव्याख्यानं साध्वेवेति भावः । तत्र तन्निर्धारणचिन्तासार्थक्याय समादधते **अभिधीयत** इति । तत्र पूर्वं निरवयवत्वेपि यथावतारेष्वंशत्वं प्रकारं बोधयितुं रामानुजादिमतस्याप्येकदेशत्वं बोधयन्तोशं च प्रयोजकं वदन्ति **सत्त्वमि**त्यादि । अत्र वाक्ये सत्त्वविशेषणाभ्यां प्रियापदविशुद्धपदाभ्यां सत्त्वस्य प्राकृतत्वं व्यावर्त्यते । 'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षक'मिति, 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुये'ति वाक्याभ्यां तस्या गुणानामप्रियत्वेन तस्या अविशुद्धत्वेन च बोधनाय तद्गुणस्य सत्त्वस्य प्रियत्वशुद्धत्वयोरशक्यवचनात् । न चाप्रसिद्ध्या नैवमिति शङ्क्यम्, 'सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रय' इति द्वितीयस्कन्धे त्रयाणां भगवद्गुणत्वोक्तेस्तत्र तेषां सिद्धत्वात् । 'कार्पासे न हि सूत्रं तदेव पुनः पौर्वापर्यमापद्यमानं सूत्रतामापद्यत इति भगवान्निर्गुणस्ते गुणा' इति तत्र विवरणात्तदेतदुक्तं **भगवद्धर्मरूप एव कश्चनास्ती**ति । एतमेव रामानुजमते शुद्धसत्त्वं नाम रजस्तमोमिश्रप्राकृतसत्त्वविलक्षणसत्वगुणाश्रयो द्रव्यविशेष इत्याहुः 'स्वसत्ताभासकं द्रव्यं त्रिगुणात्तद्विलक्षण'मिति प्रमाणं चाहुः । सिद्धान्ते तु प्राकृतानामिव तस्यापि द्रव्यत्वस्याविरुद्धत्वात्तत्रैव विश्राम्यत इति विशेषः । एवं प्रयोजकमुक्त्वा तेन सिद्धमंशस्वरूपमाहुः **यादृशेने**त्यादि । अतो निरवयवत्वांशत्वबोधकप्रमाणयोर्न विरोध इत्यर्थः । अतः परं श्रैष्ठ्यबोधनाय मूलस्वरूपं विवृण्वन्ति **यत्राधिष्ठाने**त्यादि । प्रादुर्भूतस्य पूर्णत्वे गमकमाहुः **अत एवे**त्यादि । **तेने**ति, जृम्भाव्यादानदामोदरलीलासु व्यापकत्वं प्रदर्शयितुस्तथात्वेनेत्यर्थः । **एवमि**ति, सत्त्वस्याधिष्ठानत्वे । **सर्वत्रे**ति, अवतारादौ । विभूतिस्वरूपमाहुः **मन्त्रे**त्यादि । **तत्त्वमि**ति, विभूतिरूपत्वम् । **तत्र तत्रे**ति, नानाविधलौकिकशरीरेषु । एवं रूपत्रयविभागस्याप्रयोजकत्वं मन्यमानश्चोदयति **नन्वि**ति । न्यायसिद्धत्वाद्विभूतिरूपं तथास्तु, अवताररूपमूलरूपे तु न तथा, वदतो व्याघातादित्यर्थः । समादधते **नैवमि**ति । **तच्चे**ति, स्वतोनन्तरूपत्वे प्रमाणं च । आदिपदेन 'क्षयन्तमस्य रजसः पराक' इत्यादीनां

सङ्ग्रहः । एवं सत्त्वाधिष्ठानतदनधिष्ठानयोः स्थिरीकरणेन तथा प्राकट्यमपि स्थिरमेवेति रूपविभागोपि स्थिर इति साधयित्वा तादृक्प्राकट्यप्रयोजकं तत्प्रयोजनं चाहुः प्राकट्यं हीत्यादि । प्राकट्यमपि तथेति, अत्रापि बीजं 'ये यथा मां प्रपद्यन्त' इति प्रतिज्ञावाक्यं बोध्यम् । एतेनैवेति, प्राकट्यप्रकारव्यवस्थापनेनैव । एवं विभागमुपपाद्य सिद्धमाहुः एतेनेत्याद्यध्यवसीयत इत्यन्तम् । मथुराद्वारकादिस्थानां प्रायशः सोपाधिकत्वेऽहवत्त्वात्तदर्थं प्राकट्यविनियोगे वैरूप्यापत्तिं हृदिकृत्योक्तमानुषङ्गिकत्वादिति । व्यूहविशेषं द्वारीकृत्य तत्करणेन तेषां तद्दानात्तथेत्यर्थः । एतदेव रूपमिति, सत्त्वाव्यवहितं श्रीकृष्णस्वरूपम् । इदमिति, अधिष्ठानाव्यवधानम् । तथेति, विषयः । तथा च यदि निर्विशेषं ब्रह्म स्यात्तदा तथा स्यादपि, तत्तु प्रागेव निरस्तम्, तथा सति विरुद्धधर्माधारस्यैवं स्वरूपनिर्धारसिद्धेर्धर्माणाममायिकत्वेन वास्तवत्वात्तदुपसंहारचिन्ताया अप्युपयुक्तत्वादुक्तशङ्का निवर्तनीयैवेत्यतो मतान्तरीयव्याख्यानमुपेक्ष्यमेवेति भावः । एवं स्वरूपधर्मादिकं निर्द्धार्यानया चिन्तया सिद्धं गुणान्तरमाहुः एवं सन्तीत्यादि । गुणभेदस्याप्रयोजकत्वादिति, विद्यागुणभेदस्य वेद्यभेदाप्रयोजकत्वात् । निःप्रत्यूहमिति, निर्विशेषवादिमते धर्माणामुपाधिनिष्ठत्वादुपाधीनां भिन्नत्वादुपास्यानां रूपाणां चाब्रह्मत्वात्तेन रूपेण वेद्यैकत्वं सविघ्नम्, अत्र तु ब्रह्मणः सर्वरूपत्वात्प्राञ्जलमतस्तथेत्यर्थः ।

तेन वेद्यैक्यादेव विद्यैक्यमित्येतमेवार्थं सूत्रकारोभिप्रैतीति ज्ञापयन्तं सूत्रमेवाग्रिमं पठित्वा व्याकुर्वन्ति दर्शयति चेत्यादि । इत्यादिनेत्यादिपदेन रामानुजभाष्यमायावादिभाष्याद्युपन्यस्तश्रुतीनां संग्रहः । तथा च श्रुतिरपि वेद्यैकत्वेन विद्यैकत्वं दर्शयति, न तु स्वतः, दोषं च ब्रह्मभेददर्शने, अतोपि निःप्रत्यूहं ब्रह्मणः सर्ववेदान्तप्रत्ययत्वमित्यर्थः । एतेन श्रीरामादिविद्यानां ब्रह्मविद्यात्वेनैक्यम् विभूतिविद्यानां तु प्राणादिरूपतत्तद्विभूतिविद्यात्वेनैक्यमिति सिद्धम् ॥ १ ॥

अतः परं यदर्थमिदमैक्यं विवेचितं तत्प्रयोजनमुपसंहारसूत्र उच्यत इत्यन्य एकदेशिनो वदन्ति, तथा सत्युपसंहारहेतोरैक्यस्य पूर्वं सिद्धत्वादस्मिन् सूत्र उपसंहारस्तस्मादित्येव वक्तव्यं पदान्तराणां प्रयोजनाभावेन वैयर्थ्यादिति न सोर्थः, किन्तु श्रुतितात्पर्यबोधनाय पूर्वसूत्रोक्तनियमसमर्थनायोपसंहारप्रयोजकज्ञापनाय चैत्र सूत्रप्रणयनमित्याशयेनाहुः नन्वित्यादि । पूर्वसूत्रोक्तरीत्येति, लैङ्गिकनियमेनेत्यर्थः । क्वचिदिति, रूपविशेषे । उक्तावताररूपत्वस्य श्रीराम इति, ब्रह्मधर्मस्य ब्रह्मरूपविशेषे । एवमग्रे रूपान्तरधर्मस्य रूपान्तर इति बोध्यम् । इत्याशङ्क्येति । इति अतो हेतोर्लिङ्गस्य नियामकत्वं यत्पूर्वसूत्र उक्तं तदसार्वत्रिकत्वाद्व्यभिचारीत्ययुक्तमित्याशङ्क्येत्यर्थः । पदार्थस्येति, अभिधेयस्य । 'इति रामपदेनासौ परं ब्रह्माभिधीयते', 'तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इति श्रुतिः । तथा च परब्रह्मत्वे श्रुतेस्तात्पर्यं न तु रूपान्तरत्वे, यदि तथाभिप्रेयान्नोपसंहरेदित्यर्थः । अर्थाभेदपदकृत्यमुक्त्वा शेषाणां वक्तुमाहुः नन्वित्यादि । विधिशेषशब्दे बहुव्रीहिः । पूर्वं चोप्यर्थे । समानेपीति, अर्थाभेदे समानेपि । तथा च तस्य मत्स्यादिरूपत्वमेवोपसंहृतम्, न तु तद्धर्मवत्त्वम्, तेन तेषां तद्रूपधर्मलैङ्गिकनियमबाधो नेत्यर्थः । नन्वयमर्थस्तूपसंहारार्थाभेदादित्यनेनैव सिद्ध इति शेषवैयर्थ्यं दुर्वारमित्यतः पक्षान्तरमाहुः यद्वेति । मत्वर्थीयो वतुप्रत्यय इति, वदिति प्रत्ययो योत्र सूत्रे स मत्वर्थीयः । सर्वे सर्वपदादेशा इत्यभिप्रेत्यैवमुक्तम् । अस्मिन् पक्षे विधिशेष इत्यत्र षष्ठीतत्पुरुषः । अस्य यागस्येति चातुर्मास्यप्रथमपर्वणो वैश्वदेवयागस्य । इत्याशासीतेति, वैश्वदेवाख्यपर्वणः संवत्सराभिमान्यग्निप्राप्तिहेतुत्वात्तद्यागकाले तदीयसूक्तवाकमध्ये संवत्सरीणामिति मन्त्र सूक्तवाकाशीःपु

होता आशासीतेत्यर्थः । शेषं प्रकटार्थम् । **उक्तरीतिरि**ति, अर्थवादबलात्फलान्तरसाधकत्वम् । तथा च यो मां स्मृत्वा निष्कामः सकामो भवति, यो ध्यायति सोऽमृतो भवतीत्युभयविधार्थवादबलाद्भगवत्स्मरणे उभयफलसाधकत्वमुपसंहरणीयमित्यर्थः । अस्मिन्पक्षे चकारार्थो नोक्त इति, तमाहुः **प्राणादी**त्यादि । **तदादय** इति, बाधका भावादयः । अयमर्थः पूर्वसूत्रेणैव सिद्ध एवेति पुनःसंग्रहे बीजं न पश्याम इत्यत आहुः **वस्तुत** इति, पूर्वसमुच्चयार्थ इति, अर्थाभेदादित्यस्य समुच्चयार्थः । अत्रापि चकारवैयर्थ्यमाशङ्क्य तत्तात्पर्यमाहुः **शाखे**त्यादि । अतो न वैयर्थ्यमित्यर्थः । एवं चाधिकारः प्रायश्चित्तादिरूपबाधकार्थाभेदार्थवादविशेषैर्नियतो गुणोपसंहार इति सिद्धम् ।

पूर्वसूत्र उपसंहारप्रयोजको हेतुरर्थाभेदरूप उक्तस्तं समर्थयितुमिदं सूत्रद्वयमित्याशयेन सूत्रमुपन्यस्य सूत्रं व्याकुर्वन्ति **अन्यथात्वमि**त्यादि । **उक्तन्याये**नेति, अर्थभेदादित्यनेन अब्रह्मत्वं स्यादिति, तथा चास्मिपन्क्षे उपसंहारस्यैवासिद्धिरिति भावः । **इति भाव** इति, तथा च शब्दबलकृतनिर्णयस्योभयत्रापि तुल्यत्वेन सिद्धो ब्रह्मत्वेनाभेद इति नोपसंहारासिद्धिरित्यर्थः । पूर्वसूत्रांशाशङ्कितमन्यथासूत्रे प्रकारान्तरेण परिहरतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति **न वे**त्यादि । विकल्पेनेत्यस्यैव त्वस्मिन् विवरणं **पूर्वोक्ता**दित्यादि । **नवे**ति, तथा च अन्यथा त्वप्रकरणभेदाद्वा नेति सूत्रयोजना । विषयवाक्यं तु तैत्तिरीयसंहिताषष्ठकाण्डद्वितीयाध्यायस्थम् । एवं च प्रकरणभेदेन तत्तदुपयोगिगुणकथनात्तत्र तावतैवार्थसिद्धेरेकरसत्वाग्राह्यत्वाद्यनपायाच्च नाब्रह्मत्वमित्यर्थः फलति । एवं सूत्रद्वयेनोपसंहारसूत्रोक्तो हेतुः समर्थितः । अतः परमस्मिन्नेतत्सूत्रव्याख्याने वक्ष्यमाणाशङ्कानिवृत्तिर्न भवतीत्यरुच्या प्रकारान्तरेण व्याचक्षते **अथवे**त्यादि । **पूर्वसूत्रे**णेति, उपसंहारसूत्रेण । **इत्यत्रे**त्यादि, इति हेतोः अत्रास्मिन् सूत्रे गुणोपसंहारस्य तथात्वमाहेत्यर्थः । **तदेतदुच्यत** इति, एकान्तिभक्तस्वभावतः प्राप्तोऽनुपसंहार एवानूद्यत इत्यर्थः । **एवं प्रकृतेपी**ति, एकान्तिभक्तोपलभ्यमानगुणेभ्य इतरेषां सत्वेप्युपसंहारो नेत्यर्थः । अस्मिन् सूत्रेऽधिकारभेदादुपसंहारो व्यवस्थापितस्तां व्यवस्थामग्रिमसूत्रे हेत्वन्तरेण दूषयित्वा तस्मिन् हेतौ दोषप्रदर्शनेन तां पुनर्द्रढयतीत्याशयेनाग्रिमसूत्रं पठन्ति **संज्ञात इत्यादि** । नन्वधिकारस्यान्तरत्वेपि प्रमाणेष्वगणनान्न बलीयस्त्वमित्यत आहुः **संज्ञैकत्वस्ये**त्यादि । **प्रमितभेदेष्वि**ति, छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीते'त्युद्गीथावयवं प्रणवं प्रस्तुत्य रसतमादिगुणोपव्याख्यानपूर्वकं देवासुराः संयेतिरे'त्यादिना अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिर इत्युद्गीथावयवप्रणवविषयमुपासनमुच्यते, वाजसनेयके तु 'हन्तासुरान्यज्ञ उद्गीथेनात्ययामे'ति कृत्स्नमुद्गीथं प्रस्तुत्य 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेती'त्यादिना कृत्स्नोद्गीथविषयमुच्यते, तेन प्रकरणभेदे विषयभेदाभ्यामुपासनभेदः प्रमीयत इति तथेत्यर्थः । न च नैर्बल्यमधिकारस्य, प्रकरणान्तःपातित्वेन समाख्यापेक्षया प्रबलत्वात् । एवं पूर्वसूत्रद्वितीयवर्णकेनानेन सूत्रेण चेत्येवं सूत्रद्वयेन समाचारसूत्रे याधिकारस्योपसंहारनियामकतोक्ता सा प्रपञ्चिता । पूर्वसूत्राभ्यामपि तदुपयोग्येवोक्तमिति । **चतुःसूत्री** तस्यैव शेष इति बोधितम् ॥ २ ॥

अतः परमधिकरणान्तरेण पुनर्धर्मानेव विचारयतीत्याशयेन सूत्रं पठन्ति **व्याप्तेरित्यादि** । ननु विरुद्धगुणाशङ्कितमब्रह्मत्वं पूर्वं परिहृतमेवेति किमनेनाधिकरणेन विचार्यत इत्याकाङ्क्षायां तद्विषयादिकमाहुः **बाल्ये**ति, **तथा सती**ति, प्राकृतत्व इति । **तत्रोक्त**मिति, श्रुत्युक्तम् । **सर्व**मिति, उपास्यरूपेषु साधितब्रह्मत्वं तत्त्वेनोपासनादिश्रुतिविरोधपरिहारश्चेत्यर्थः । सिद्धान्तग्रन्थस्तु निगदव्याख्यातः । **क्रमे**णेत्यादि । सर्वरसश्रुत्याक्षेपलभ्येन क्रमेण 'तस्यैष आत्मा विवृणुते तनुं

स्वा'मिति श्रुतिलभ्येन वृतेष्वःवरणात्मकयोगमायापसारणेन तथात्वात्सर्वमवस्थाप्रतीत्यादिकमुपपन्नमाक्षेपलभ्यत्वाच्छ्रौतमिति ब्रह्मणस्तादृशत्वान्न काप्यसामञ्जस्यमिति भावः ।

अन्ये तु । अन्यथात्वादिसूत्रत्रयात्मकमधिकरणान्तरं कल्पयन्ति । तत्रोद्गीथविद्यां विषयीकृत्यान्यथात्वसूत्रे मुख्यप्राणस्योपास्यत्वाङ्गीकारेणैक्यप्रतिज्ञासाधकहेतुना विद्यैक्यं पूर्वपक्षीकृत्य नवेत्यादिसूत्राभ्यामुद्गीथावयवप्रणवकृत्स्नोद्गीथयोर्वेद्ययोर्भिन्नत्वं संज्ञायाः साधारणत्वं च प्रदर्श्य, विद्याभेदं सिद्धान्तयन्ति। ततो व्याप्तिसूत्रेऽप्यधिकरणान्तरम्। 'तत्रोमित्येतदक्षरमुद्गीथमुपासीते'ति सामानाधिकरण्ये प्रतीयमानेऽध्यासापवादैकत्वविशेषपक्षाः सम्भवन्ति । तत्राध्यासपक्षे लक्षणाप्रसङ्गादपवादपक्षे फलाभावप्रसङ्गात्पर्यायताविरहेणैकत्वस्याप्यभावात्परिशिष्टो विशेषणपक्षः सिद्ध्यति । व्यावर्तकं हि विशेषणं यथा नीलं यदुत्पलं तदानयेति, तथोद्गीथो य ॐकारस्तमुपासीतेति सर्ववेदव्यापिन ॐकारस्य ग्रहणप्रसङ्गे उद्गातृविषयस्य समर्पणमिति । तत्र भेदस्योच्चारणगतत्वेनोत्पलानामिवौङ्कारस्य नानात्वाभावात्प्रत्यनुवाकर्गुपक्रमसमाख्यादिष्विव सामभक्तावुद्गीथावयवत्वेनापि सर्ववेदव्यापिनस्तस्यैव सत्वादुद्गीथपदेन कस्य व्यावृत्तिरिति निर्वचनाशक्त्या सामञ्जस्यासम्भवात्सूत्रविरोधः स्फुटति । एतदपेक्षया ये सूत्रचतुष्टयात्मकमधिकरणं वदन्तोऽनेनापि विद्यानानात्वं साधयन्ति, त एव युक्तं वदन्ति ।

प्रकृतमनुसरामः । एवमवस्थास्वरूपनिरूपणेनासामञ्जस्यं परिहृत्य तासां तथा स्वरूपाङ्गीकारे प्राप्तदोषस्य परिहारायोत्तरं पठन्तीत्याशयेनाहुः **नन्वित्यादि** । **तत्तद्भक्तविशिष्टा** इति, तत्तद्भावक्रीडोपयोगिभक्तविशिष्टाः । **श्रूयत** इति । कृष्णोपनिषदि देवप्रार्थितदानोत्तरं 'यो नन्दः परमानन्दो यशोदा मुक्तिगेहिनी'त्यादिना श्रीनन्दादिवृन्दापर्यन्तानां स्वरूपश्रावणात् 'सोऽवतीर्णो महीतले', 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सहे'ति तैः सह क्रीडाश्रावणाच्च तथेत्यर्थः । तथा सति यो दोषस्तमाहुः **तथा चेत्यादि** । **नित्यत्वेनेति**, ब्रह्मधर्मत्वाविशेषान्नित्यत्वेन । **एवं सतीति**, पूर्वलीलाभक्तयोर्नित्यत्वेन तल्लीलावैशिष्ट्यस्यापि नित्यत्वे सति । **भिन्नत्वं स्यादिति**, एकस्यैकदाऽनेकलीलासम्बन्धस्याशक्यवचनत्वात्तथात्वं स्यात् । **अनुभवेत्यादि**, अनुभवो लीलाख्यानाम्, तदावेदकमानमुक्तश्रुतिः । **भिन्नत्वं** तदुभयविरुद्धम्, तथा च लीलानित्यत्वे भक्तभेदप्रसङ्गो भक्ताभेदे च लीलानित्यत्वभङ्ग इत्युभयतःपाशारज्जुरित्यर्थः । एतत्परिहाराय सूत्रं पठित्वा व्याचक्षते **लीलेत्यादि** । **ब्रह्मणा सहाभेदादिति**, 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै प्रभु'रिति कृष्णोपनिषन्मन्त्रे अभेदश्रावणात्तथेत्यर्थः । नन्वस्तु ब्रह्माभेदो भक्तस्वरूपस्य, परं लीलायाः कथं नित्यत्वसिद्धिरित्याकाङ्क्षायां तदर्थमभेदप्रकारं व्याकुर्वन्ति **अत्रेत्यादि** । तत्तादात्म्यं रसस्येति, अनेन प्रपञ्चस्य यद्ब्रह्मतादात्म्यं तस्मादिदं विलक्षणमिति बोधितम् । तथा च सच्चिदानन्दात्मकमपि ब्रह्म यदा भक्तहृदयेष्वाविर्भवति, तदा स्वस्य रसत्वं रसशास्त्रोक्तप्रनाड्या प्रकटयतीति श्रुत्यक्तलीलाप्रकारान्यथानुपपत्त्याऽवसीयते, सोप्याविर्भावप्रकारस्तेन प्रकारेण मायापसारणहेतुक इति ते स्वज्ञानानुसारेण तत्तत्कालिकत्वं लीलानां मन्यन्त इति न लीलास्वरूपनित्यत्वभङ्गः । इयं कल्पना श्रुतार्थापत्तिसिद्धेति सर्वाभेदो निःप्रत्यूहः लीलानित्यभङ्गात्मकविघ्नरहित इत्यर्थः । करुणादीनां त्वनुक्रियमाणानामेव रसत्वमिति न काप्यनुपपत्तिः । अत्र किंचिदाशङ्क्य परिहरन्ति **नन्वित्यादि** । **सामञ्जस्यादित्यन्तम्** । **प्रादुर्भाव** इति, विचार्यमाण इति शेषः । प्रकटार्थमन्यत् ।

अभेदे प्राप्तस्य दोषस्य परिहारायाग्रिमं सूत्रमित्याशयेनाहुः **नन्वित्यादि** । **नियमादिति**, अयं नियम आकाशपरिमाणे आत्मचेतनायां च स्फुटः ॥ ३ ॥

एवं त्रिसूत्र्या भक्तिप्रकरणीया ब्रह्मधर्मा विचारिताः । अतः *परमुपासनामार्गे भक्तिमार्गे च तदुपसंहारानुपसंहारौ चिन्तयतीत्याशयेन सूत्रं पठन्ति ।

प्रियेत्यादि । प्रमेयपरस्य प्रमाणमनुसृत्य भक्तिमार्गे प्रवृत्तस्य प्रियशिरस्त्वादयो भावनीया न वेति संशयं हृदिकृत्य तन्निवृत्तये पूर्वपक्षं परिहरतीत्याशयेनाहुः **नन्वित्यादि** । **अत्रापीति**, भक्तिमार्गे । **चित्तशुद्धीत्यादि** । अत्र सूत्रार्थ एवं व्याकृतो बोध्यः । **भेदे**, चित्तशुद्धितारतम्ये सति, हि यस्माद्धेतोः उपचयापचयौ प्रमोदमोदरूपावानन्दोपचयापचयौ स्वबुद्ध्या भासेते इति शेषः । न तु तारतम्याभावे, अतः प्रियशिरस्त्वाद्यप्राप्तिस्तदनुपसंहार इति । यद्वा, यतो भेदे ब्रह्मणः सकाशाद्भेदे तौ लीलास्थानां तु ब्रह्माभेदस्य पूर्वमुक्तत्वाच्चित्ते तारतम्याभावेन नोपचयापचयभानं सम्भवतीति तदनुसारिणः स्वरूपपरस्य न तदुपसंहार इत्यर्थः । अस्मिन् वर्णके उपासनामार्गीयनिर्णयो नोक्त इति, वक्ष्यमाणा शङ्का चैवं नापैतीति मनसिकृत्य पक्षान्तरमाहुः **अथवेत्यादि** । **अयुक्तत्वादिति**, लिङ्गस्य नियामकत्वेनायुक्तत्वात् । **तद्रूपस्येति** । पक्षिरूपस्य । **पुरुषरूप** इति, अथर्वणोपनिषदुक्तपुरुषरूपः । **तथात्व** इति, आनन्दमयत्वे । **देशभेदेनेति**, दक्षिणोत्तरपार्श्वस्थत्वेन । **पक्षेपीति**, अपिः समुच्चयार्थः । **तत्रेति** । ब्रह्मणि । **न त्वदुक्तरूपत्वमिति**, नोपचयापचयरूपत्वम् । **निरूपितमिति**, 'पुरश्चक्र' इति श्रुतिविचारे निरूपितम् । तथा च तत्रालौकिकशरीरे भक्तानां देहादिस्थित्यर्थमन्नमयादिरूपस्तत्र तत्र प्रविशतीत्युक्तम्, तेन जीवे पक्षिरूपेण प्रविशतोऽवयवा भिन्ना एव, ते जीवस्य यथाधिकारं प्रियादिरूपेण भासन्ते, न तु तेषां तथात्वं नित्यत्वादतो दोषाभावादुपासनामार्गेऽत उपसंहार्याः, भक्तिमार्गे तद्भानाभावात्तन्मार्गीयैर्नोपसंहार्या इति पूर्वोक्ताधिकारनियता वर्णकद्वयसिद्धा व्यवस्था । यत्तु, कोशधर्मानेतान्ब्रह्मधर्मत्वेन परिकल्प्य न्यायमात्रमाचार्येण दर्शितमिति वदन्ति, तदप्येतेन परास्तं ज्ञेयम् । आनन्दमयाधिकरणे तत्प्रपञ्चनाच्च । पौनरुक्त्यपरिहारायाहुः **यद्यपीत्यादि** । **इयमिति**, अब्रह्मधर्मत्वविषयिणी ।

अत्र वर्णकद्वयेन या व्यवस्थोक्ता, सैवाग्रे सूत्रत्रयेण दृढीक्रियत इत्याशयेन पूर्वत्र हेतुं विवरीतुं सूत्रमवतारयन्ति **नन्वित्यादि** । सूत्रयोजना तु पूर्वसूत्रस्थाप्राप्तिशब्दात् नञमपसार्य धातुं कृत्यप्रत्ययान्तं कृत्वा प्राप्यपदेन कार्या । तस्यैवार्थ उपसंहार्या इति । नन्वयमर्थ उपसंहारसूत्र एव सिद्ध इति पुनः किमित्युच्यत इत्याकाङ्क्षायां कश्चिद्विशेषमाहुः **तत्रेत्यादि** । तथा चाविरोधबोधनाय पुनः प्रपञ्च इत्यपुनरुक्तिरित्यर्थः । अनेन सूत्रेण ब्रह्मत्वेनोपासने लिङ्गं न नियामकमिति निगमितम् ।

उत्तरत्र हेतुं विवरीतुमग्रिमसूत्रमवतारयन्ति **अथेत्यादि** । सूत्रयोजना तु इतरपदाप्राप्यपदानुषङ्गेन बोध्या । ननु प्रयोजनाभावेप्यधिकस्याधिकं फलमिति तदुपसंहारे को दोष इत्यत आहुः **अन्येषामनुपसंहार** इत्यादि । **अविवक्षितत्वादिति** । तथा चाविवक्षितसङ्ग्रह एव दोष इत्यर्थः । **तत्रेति**, अविवक्षितत्वे । तथा 'चानन्द आत्मे'त्यात्मशब्दो मध्यं वदन्नथानन्दपदसामानाधिकरण्यात्प्रियादीनां स्वरूपमेव संगृह्णाति, न त्वाकारमपीति पक्षादयो न विवक्षिता इत्यर्थः । नन्वाकारपूरणार्थः पठित आत्मशब्द आकारे तात्पर्यरहित इत्यत्र किं मानम्, तथात्वे वा तन्निरूपणस्य किं प्रयोजनमतमाहुः **अग्र** इत्यादि । तथा चोक्तानन्दमयविवरणे तस्य रसात्मकत्वश्रावणेन च तथावगम्यत इत्यर्थः । तेन सिद्धमन्यत्फलद्वयमाहुः **एतेनेत्यादि** ज्ञेयमित्येतेन । **केचित्तु** द्विसूत्रमाध्यानाधिकर(णं)भिन्नं परिकल्प्य, 'इन्द्रियेभ्यः परा ह्यर्था' इत्यादि 'सा काष्ठा सा परा गति'रित्यन्ते विषयवाक्येऽर्थादीनां ततस्ततः परत्वप्रतिपादने प्रयोजनात्सा काष्ठेत्यादिना पुरुषविषयका-

दरप्रदर्शनाच्च तस्यैव परत्वं प्रतिपाद्यत इति सिद्धान्तयित्वा, आध्यानशब्द आध्यानपूर्वकसम्यग्दर्शनार्थत्वेन विवृतः । तन्न । आध्यानपदे लक्षणापेक्षया विषयवाक्यान्तरोपन्यासस्यैव ज्यायस्त्वात् । अस्मिन्सूत्रे साध्यानिर्देशेन प्रियशिरस्त्वाधिकरणशेषत्वस्य स्फुटत्वात् । विषयवाक्येप्यर्थादौ परत्वप्रतिपादनस्य तद्बलिष्ठताबोधनार्थत्वेन सप्रयोजनकत्वात् । अन्यथा तत्त्यागनिग्रहाद्यनास्थाया'मिन्द्रियैर्विषयाकृष्टै'रिति स्मृत्युक्तप्रणाड्या तैः प्रबलानर्थप्रसङ्गात् । ज्ञाते तु तत्तन्नियामकतया तत्तत्परत्वे तत्त्यागनिग्रहादिभिः पुरुषनिष्ठपरत्वप्रतिपत्तिसौकर्यमिति तदर्थमिदं नानावाक्यघटितं महावाक्यं तत्तत्परत्वप्रतिपादनपूर्वकपुरुषपरत्वप्रतिपादनपरं तद्विरोधाच्चेति दिक् ॥ ४ ॥

एवं चतुःसूत्रेणानेनाधिकरणेनोपसंहारो व्यवस्थापितः । अतः परं तत्प्रसङ्गेनानन्दमयाधिकरणशेषमेव चिन्तयतीत्याशयेन सूत्रं पठित्वाधिकरणं रचयन्ति **आत्मेत्यादि । तथा सतीति**, एष इत्यनेन पूर्वस्यान्नमयस्यात्मा परामृश्यते, ह्यभिमानी च लोके जीवो दृश्यत इति जीवत्वे सतीत्यर्थः । ननु तस्मिन्प्रकरणे शारीर आत्मेतिवदन्तर आत्मेत्यप्यात्मग्रहणमस्तीति कथमस्यैव ग्रहणं विनिगम्यत इत्यतः पक्षान्तरमाहुः **अथवेत्यादि । य** इति, प्राणमयादिः । तथा च तयापि अन्तरात्मत्वमानन्दमय एव समाप्यते, तेन निर्व्याज आत्मा स एवेति 'शारीर आत्मे'त्यत्रापि स एव परामृश्यत इति मास्तु विनिगमना, तथापि नोक्तार्थव्याहतिरित्यर्थः । अग्रिमसूत्रार्थस्तु स्फुट एव ॥ ५ ॥

एतस्यैव दार्ढ्यायाग्रिमं पठतीत्याशयेन सूत्रं पठित्वाधिकरणमारचयन्ति **कार्येति । पूर्वोक्त** इति, अन्नजन्यः । **पूर्वस्येत्यादि** । अयमर्थः । अन्नमयश्लोके अन्नस्य ब्रह्मत्वेनोपासनाय यदि ब्रह्मधर्माः स्तुत्यर्थमुच्येरंस्तदा 'अन्नाद्वा' इत्यादिना पूर्वमुक्त्वा ततः 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत' इति सफलमुपासनमात्रं वदेन्न तु पुनरपि 'अन्न ँ हि भूतानां ज्येष्ठ'मित्यादिना भूतजनकत्ववर्द्धकाभ्यां धर्माभ्यां भूतव्याप्तिबाधकमतति सततं व्याप्नोतीत्यन्नमिति निर्वचनं सूचयेन्ना'प्यद्यते च भूतानि तस्मादन्नं तदुच्यत' इति च निरुच्यात्, प्रयोजनाभावात्, उपासनायाः पूर्वस्तुत्यैव सिद्धेः । एवं सत्यपि यदेवं निर्वक्ति, तेन कार्यरूपादन्नादेतं व्यवच्छिनत्ति, प्रपाठकान्तरेपि तस्मिन्ब्रह्मत्वविज्ञानं ब्रह्मात्मकतपोरूपसाधनेन वक्ति, न तु यथाकथञ्चित्, तेनान्नस्य पूर्वविलक्षणत्वमवश्यं वक्तव्यम्, 'विश्वभृद्वैनामैषा तनूर्भगवतो विष्णोर्यदिदमन्न'मिति 'स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं चे'ति श्रुत्यन्तरे भगवत्तनुत्वव्यापकत्वादिश्रावणाच्च, एवं सिद्धे वैलक्षण्ये 'स वा एष पुरुषोऽन्नरसमय' इत्यत्र तदेतच्छब्दाभ्यां वक्ष्यमाणपरामर्श एव युक्तो न प्रकृतस्य निरुक्तलिङ्गाभ्यासादिविरोधात् । तदेतदुक्तम् । **न वा तदपीत्यादि । एवमेवेति** । तपोरूपसाधनस्येत्यर्थः । तेन सिद्धमाहुः **अत एवेत्यादि** । कार्यपुरुषवैलक्षण्येनाध्यात्मिकत्वादेवेत्यर्थः । एवं पूर्वाधिकरणेनानेन वर्णकेन चानन्दमयविद्यायामात्मपदं परब्रह्मपरमित्यापाततो मायावादिनो निरासायान्नमयादिपुरुषास्तद्विभूतय इति तेषां विभूतिरूपेणोपासनाय च तद्विद्याशेषो विचारितः । अस्मिन् पक्ष एकसूत्रमेवेदमधिकरणम् । अतःपरमुपासनबोधके श्रुत्यन्तरेप्यात्मशब्दः परब्रह्मपर एवेति बोधयितुं प्रकारान्तरेणैतद्व्याकुर्वन्ति **अथवेत्यादि । वाजसनेयिशाखाया**मिति, तस्यां बृहदारण्यके पुरुषविधब्राह्मणे । **अन्यत्रेति**, मैत्रेयीब्राह्मणे । **अपूर्व**मिति, पुत्राद्यभिमानिदशायां वेद्यात्प्रतीचो भिन्नम् । तदेव विवृण्वन्ति **पूर्वं त्वित्यादिना** । ननु प्राणनादिकथनात्प्रत्यगात्मातिरिक्त आत्मा कथं निश्चेय इत्यत आहुः **लोके हीत्यादि । अत एवेति**, जीवभिन्नत्वादेव । लिङ्गान्तरमाहुः **अत एवेति** । जीवभिन्नत्वेनेश्वरत्वादेव । **एतेनेति**, प्राणनादिकार्याख्यानेनेश्वरो हि तथा स्यादिति तत्तद्रूपव्याख्यानेन चेत्यर्थः । अधिकरणप्रयोजनमाहुः **तेनेत्यादि । उपसंहर्तव्या** इति, अवतीर्णे स्वरूपेऽनुसन्धेया इत्यर्थः । अग्रिमसूत्रस्यैतच्छेषत्वं बोध-

यितुमवतारयन्ति **नन्वित्यादि**। तथा च तरुकुसुमयोरिव स्वगतद्वैतमापततीति तत्परिहारायोत्तरं पठतीत्यर्थः। ननु भिन्नप्रकारकप्रतीतौ विद्यमानायां कथमभेदसिद्धिरित्यत आहुः **अत्रेत्यादि**। **स** इति, औपनिषदः पुरुषः। **स चेति**, व्यवहारश्च। न च तस्य व्यवहारस्याप्रामाणिकत्वं शक्यशङ्कम्। वरणकृतस्वतनुविवरणैकसाध्यत्वात्। पूर्वपादे 'प्रकाशवच्चावैयर्थ्या'दित्यादिसूत्रद्वये तदुपपादनात्। तदेतत् हृदिकृत्याहुः **एवं सतीत्यादि**। अत्र लौकिकयुक्तेः कौण्ठ्यमेव श्रुत्याशयगोचर इत्याशयेनाहुः **एवंविध** इत्यादि। सिद्धमाहुः **एतेनेति**, ईश्वरस्य तथात्वश्रावणेनेत्यर्थः। इमामेव श्रुतिं हृदि (कृत्य) प्रकारान्तरेण सूत्रं योजयन्ति **एवं सत्याविरित्यादि**। अस्यां श्रुतावुक्तस्येश्वरत्वस्य साहजिकत्वेन तादृगाकारस्य सार्वदिकत्वे सति तथेत्यर्थः। अत्र च 'विश्वतश्चक्षु'रित्यादिश्रुतयोऽनुसन्धेयाः। पूर्वं चोप्यर्थे उक्त इत्यस्मिन्पक्षेऽर्थान्तरमाहुः **चकार** इत्यादि। **साक्षादाविर्भूत** इति। सत्वाद्यधिष्ठानमनपेक्षस्वरूपेणाविर्भूत इत्यर्थः॥ ६॥

एवमवतारोपासनादौ गुणोपसंहारं विचार्यविशेषे तं विचारयतीत्याशयेनाग्रिमाधिकरणमवतारयन्ति **अथेत्यादि**। श्वेताश्वतरोपनिषदि 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ, तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन' इति गुरुभक्तेर्देवभक्तिवदतिदिष्टत्वात्, 'योन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'ति स्मृतावाचार्यचैत्यस्य वपुष्ट्वकथनेन तत्र भगवदावेशस्योक्तत्वात् लोकोद्दिधीर्षया तत्राविशति, तथा गोपालतापनीये मथुरासमीपस्थवनस्थिता द्वादशमूर्तीरुक्त्वा 'ता हि ये यजन्ति ते मृत्युं तरन्ति मुक्तिं लभन्त' इत्यादिफलमुक्त्वाऽग्रे 'मथुरामण्डले यस्तु जम्बूद्वीपे स्थितोपि वा, योर्चयेत्प्रतिमां मां च स मे प्रियतरो भुवि, तस्यामधिष्ठितः कृष्णरूपः पूज्यस्त्वया सदे'त्यादिभिः प्रतिमां लक्ष्यीकृत्य स्वपूजनं सर्वेषामुक्तम्, प्रतिमायामधिष्ठानकथनेन स्वावेशश्चोक्तः। तदेतदुक्तं 'कार्यचिकीर्षया जीवे स्वयमाविशतीति जीव इत्युपलक्षणम्'। **विकल्पेनेति**, मार्गभेदव्यवस्थितविकल्पेनेत्यर्थः। प्रतिमासङ्ग्रहार्थमाहुः **तत्त्वेन व्यपदेशादिति**। **अत्रैवं ज्ञेयमिति**, उपासनामार्गे व्यवस्थितस्य पक्षस्य बीजं वक्ष्यमाणप्रकाराभ्यां बोध्यमित्यर्थः। प्रकारद्वयेप्यभिसन्धिमात्रं नोपसंहारप्रयोजकं किन्त्वावेश इत्याहुः **तत्रेत्यादि**। न च गुरौ भक्तिरेवोक्ता न तूपासनेति तद्व्यवस्था न सङ्गतेति शङ्क्यम्। तैत्तिरीये 'वेदमनूच्याचार्योन्तेवासिनमनुशास्ती'त्युपक्रम्य 'यान्यस्माक९ सुचरितानि, तानि त्वयोपास्यानी'ति गुरुसुचरितोपासनस्योक्तत्वात्, न चोपासनपदं कर्तव्यार्थकम्। 'यान्यनवद्यानि कर्माणि, तानि सेवितव्यानी'ति पूर्वमुक्तत्वात्तेनैव सिद्धेः। 'एवं गुरूपासनयाशितेने'त्येकादशस्कन्धे स्मरणाच्चेति दिक्। निषेधपक्षो भक्तिमार्गीय इति बोधयितुं द्वितीयसूत्रमवतारयन्ति **यस्त्वित्यादि**। **भक्तिमार्गीय** इति, प्रेमोत्कर्षात्तथेत्यर्थः। नन्वेवं तस्य विस्मृतभगवत्कत्वे उपसंहारप्राप्तेरेवाभावान्निषेधार्थस्य नञोसङ्गतिरित्यत आहुः **भगवदवतारेत्यादि**। तथा च प्रियशिरस्त्वसूत्रे या अप्राप्तिरुक्ता, तामत्रान्यधर्मविषयिणीमनुवदतीति नासङ्गतिर्नञ इत्यर्थः। अयमेवाशय इत्यत्र गमकं वदन्त उत्तरसूत्रमवतारयन्ति **अपि चेत्यादि**॥

तृतीयसूत्रमवतारयन्ति **नन्वित्यादि**। **तत्सम्भारकस्येति**, वीर्यसम्भारकत्वस्य। **उपसंहारं करिष्यतीति**, 'तं यथा यथोपासत' इति श्रुतौ स्वाभिसंहितरूपेणैवावनस्योक्तत्वात्स्वैहिकपारलौकिकार्थमुपसंहारं करिष्यतीत्यर्थः। **तत्रैवोक्तमिति**, भजनरसास्वादने एतदपेक्षया विशेषादिति पूर्वसूत्र एवोक्तमित्यर्थः। अयमेव सूत्रकाराशय इत्यत्र गमकमाहुः **विषयेत्यादि**। तथा च विनाप्युपसंहारं तल्लौकिकालौकिकसम्पादनादलौकिकानुभावप्रदर्शनाच्च नोपसंहारशङ्कात्रेति पूर्ववदत्रापि भक्तस्वभावस्यै-

वानुवादः। श्रुतेरनारभ्याधीतत्वेन भक्तहृद्याविष्टभगवद्धर्मकत्वाभावात्पूर्वोक्तो व्यासाशयो न निश्चेतुं शक्यत इति विषयवाक्यं तात्पर्यकथनपूर्वकं तमुद्धाटयन्ति **अन्यच्चेत्यादि**। तथा च तुरीयपादेनाविर्भूतब्रह्मविषयकत्वे श्रुतेर्निश्चिते यद्द्वयोरेवानुपसंहारकथनं तेन तथेत्यर्थः॥ ७॥

एवमनारभ्याधीतानां धर्माणां भक्तिमार्गेऽनुपसंहारमुक्त्वा उत्तमाधिकारिभिरशेषगुणपूर्णं परब्रह्मैवोपास्यं न तु विभूतिरूपमिति बोधयितुमुपासनामार्गेपि विशेषेणुपसंहारं वदतीत्याशयेन सूत्रं पठित्वाधिकरणं रचयन्ति **पुरुषेत्यादि**। **अत्र हीति**, पुरुषविद्यायाम्। अनेकत्वोपलक्षणतात्पर्यमाहुः **तेनेत्यादि**। **तत्रेति**, अन्नमयाद्युपासनाप्रकरणे। **स इति**, अन्नमयादिः। वैलक्ष्यण्यान्तरमाहुः **किञ्चेत्यादि**। **तथात्वेनेति**, मूलभूतब्रह्मत्वेन। एतदधिकरणसिद्धमर्थमाहुः **तेनेत्यादि**। एतेनेदं बोधितं व्यासचरणानां परब्रह्मपरत्वभवन एव तात्पर्यादस्माभिरेवमधिकरणानि व्याख्यायन्ते। उत्तमाधिकारिणां तावतैवार्थसिद्धेः। इतरैस्तु साधारणाधिकारिणामर्थे उच्यन्ते। न हि शत्रुजयः षोडशवर्षशतजीवनं श्रीकीर्त्यादिकमुत्तमस्याभिलषितं भवति। तेन नात्र (चोद्य)चोद्यावसर इति॥ ८॥

अग्रिमाधिकरणमवतारयन्ति **अथेत्यादि**। कुतो न वाच्यमित्यत आहुः **न हीत्यादि**। **उपासनार्थमितरेषां** पाप्मवेधः सन्नुच्यत उतासन्नुच्यते, यद्याद्यः पक्षस्तदा न संशयापायः। यदि द्वितीयस्तदोक्तदोषापत्तिरित्यर्थः। नन्वर्थवादाधिकरणे विधेयस्तावकत्वेनार्थवादानां प्रामाण्यं पूर्वतन्त्रे व्यवस्थापितम्, 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु'रिति, एवं च यथाकथञ्चन स्तुत्याप्युपासनरुचिसिद्धेर्नाप्रामाण्यमिति चेत्तत्राहुः **एकत्रेत्यादि**। स्तुत्यंशे असन्तमर्थं वदतीति निश्चिनुयात्तदा विचारकस्य विध्यंशेपि तथात्वसन्देहोद्भवे तत्र प्रवृत्तिव्याघातेन विधेः प्रवर्तकत्वसिद्धान्तो व्याहन्येत, वैयर्थ्यं च वेदस्य स्यात्, न च मध्वादिविद्यासु कल्पनोपदेशस्य व्यासपादैरङ्गीकारादत्रापि तथास्त्विति वाच्यम्। भूतार्थकप्रयोगविरोधापत्तेः। मध्वादिविद्यास्वपि 'तस्य द्यौरेव तिरश्चीनवꣳशोन्तरिक्षमपूर्वम्' इत्याद्युद्देश्यं रूपविशिष्टस्यैव रूपान्तरविधानदर्शनेन तावन्मात्रस्यैव काल्पनिकत्वात्। अन्यथा तत्रापि 'ता एता ऋच एतमृग्वेदमभ्यतप'न्नित्यादिबाधापत्तेः। न चार्थवादेषु सर्वत्र यथाश्रुतार्थग्रहण 'आदित्यो यूपः यजमानः प्रस्तरः। गो अश्वा एव पशवोऽन्ये त्वपशव' इत्यादिगौणीव्युच्छेद इति वाच्यम्। तत्र प्रत्यक्षविरोधेन गौणीस्वीकारात्तदनुच्छेदात्। असति प्रमाणान्तरविरोधे तद्दृष्टान्तेनान्यत्र तथा वक्तुमशक्यत्वात्, तथासति 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती'त्यादावार्थवादिकफलस्याप्यनङ्गीकारापत्तेः। तस्माद्यत्र प्रमाणान्तरविरोधस्तत्रैव कल्पनोपदेशाद्धिः, नान्यत्रेति निश्चयः। तदेतद्धृदिकृत्वाहुः **साक्षादित्यादि**। पूर्वतन्त्रविचारेणैवं परम्पराक्रियार्थत्वमुक्त्वा उत्तरकाण्डविचारेण साक्षात्क्रियार्थत्वमेवेत्याहुः **वस्तुत इत्यादि**। **य एवं वेदेति**। **वाक्यैरिति**, 'एतद्वै छन्दसां वीर्यमाश्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारो य एवं वेद स वीर्यैरेव छन्दोभिरर्चति, इन्द्रस्य वा एषा यज्ञिया तनूर्यद्यज्ञस्तामेव तद्यजन्ति य एवं वेदोपैनं यज्ञो नमती'त्या(दि)जातीयैर्ज्ञानफलबोधकवाक्यैरित्यर्थः। **तमेवेति** हेतुमेव। तर्ह्यासन्यस्य कथं ब्रह्माभेद इत्यत आहुः **आसन्यस्त्वित्यादि**। अर्थशब्दस्यार्थान्तरग्रहणेप्ययमर्थः सिध्यतीत्याशयेन पक्षान्तरमाहुः **अथवेत्यादि**। **उक्तमानैरिति**, उपास्यत्वादिलिङ्गैः॥ ९॥

अग्रिमाधिकरणमवतारयन्ति **एवमित्यादि**। **तत्रेति**, भगवत्सम्बन्धे। **पठ्यत इति**, मुण्डके पठ्यते। एतत्पूर्वार्द्धं तु 'यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनि'मिति। **इति योजनेति**, अनेन परममुत्कृष्टं साम्यं समत्वमद्वैतलक्षणं उपैति, अवगच्छतीति योजना निरस्ता। अद्वैतस्य वैषम्याभावरूपत्वेन लक्षणाग्रासात्, साम्यस्य द्वयधर्मत्वेन तदभावरूपतायां श्रुतिविरोधप्रसङ्गाच

तदपेक्षया पदावृत्त्यार्थान्तरग्रहणस्यैवौचित्यात् । हानाविति । सूत्रे तुशब्देन श्रुत्यन्तरे समाम्नातिकनिर्धारात्र साम्यपदं लक्षणयाऽद्वैतपरमितिपक्षो निरस्यते, तथा चेह साम्यशब्दो नाद्वैतपरः, किन्तु हानौ ओहाक् त्यागे । ब्रह्मणा सृष्टीच्छया स्वरूपात्यागे विभागस्य पूर्वस्थितित्यागात्मकत्वादविभागे इति यावत्, तस्यां सत्यां ये धर्मास्तिरोहितास्ते परमोपायने आविर्भूतास्तत्प्रयुक्तसाम्यपरः । तत्र हेतुः उपायनेत्यादि । दृष्टान्तः कुशेत्यादि । 'कुशाछन्दःस्तुत्युपगानवत्' प्रस्तोतृस्थानिकुशाछन्दःस्तुत्युपगानसाधनभकारवदिति योजना । हानिशब्देनोच्यत इति, त्यागात्मकत्वात्क्षयात्मकत्वाद्धानिशब्देन इत्यर्थः । तदैवेति, ब्रह्मसम्बन्ध एव । अत्राभेदबोधनादिति । जीवे ब्रह्माभेदबोधनात् । तदुक्तपदसूचितमर्थान्तरमाहुः अपि चेत्यादि । ब्रह्मधर्म्मवदिति, अत्र तत्सूचनवदित्यर्थः । उपसंहारप्रकरणे धर्मानन्दविचारस्यासङ्गतत्वान्नायमधिकरणार्थ इत्याशङ्कायामाहुः यथेत्यादि । तथा चोपसंहारतादर्थ्यात्तत्साङ्गिकमेतन्निरूपणम्, फलविचारे उपयोक्ष्यमाणत्वाच्च प्रसङ्ग इत्ययमेवाधिकरणार्थ इत्यर्थः । यत्तु उपायनशब्दस्य हानशब्दशेषत्वं कैश्चिद्व्याख्यातम् । तच्चिन्त्यम् । आथर्वणिकश्रुतोपायनशब्दस्य फलबोधकत्वेन हानशेषत्वाभावेन, तस्य विषयवाक्यत्वाभावप्रसञ्जकत्वात् । 'तदा विद्वान् पुण्यपापे विधूये'त्येतावन्मात्रस्यैव विषयवाक्यत्वेप्याथर्वणताण्डिकौषीतकिश्रुतिषु कम्पनार्थकविधूननशब्देन हान्यर्थालाभात्तस्य हानशेषतायाः क्लिष्टत्वात् । यदप्यस्योपायनवादस्य स्तुत्यर्थत्वादन्यदीयपुण्यपापयोः कथमन्यत्र प्राप्तिरित्यत्र नाभिनिवेशः कार्य इत्युक्तम् । तदपि न रोचिष्णु । 'राज्ञि चामात्यजा दोषाः पत्नीदोषाश्च भर्तरी'त्यादिस्मृतावभिमानमात्रेण दोषसंक्रमकथनात्, भारतादौ यमस्य माण्डव्यशापप्रसङ्गे बालकृतपापस्य जनकत्वोपाधिना पितृसङ्क्रान्तिस्मरणाद्विश्वामित्रपुण्येन त्रिशङ्कोः स्वर्गप्राप्तिस्मरणाच्चात्रापि तथा सम्भवेन स्तुतिमात्रत्वाङ्गीकारस्याप्रयोजकत्वात् । 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे, ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे'त्यादिश्रुतिस्मृतिभिर्ज्ञानस्य कर्मनाशकत्ववद्विद्याविशेषस्यान्यत्र कर्मसंक्रामकत्वेपि बाधकाभावात् । ननु सुकृतदुष्कृतयोः कर्तृसामानाधिकरण्यस्यैव सर्वत्र दर्शनात्साक्षादन्यस्मिन् सम्भवो न शक्यवचन इति चेत् । न । 'राज्ञि चामात्ये'त्याद्युक्तस्मृतिविरोधापरिहारात् । न च तत्र न साक्षात्संक्रमोऽपि तु फलस्य तत्र सम्बन्धात्तत्र तदुपचर्यत इति वाच्यम् । हेतुव्यधिकरणस्य फलस्यैवाशक्यवचनत्वात् । वाक्यबलात्तु सुकृतदुःकृताङ्गीकारस्यापि शक्यकल्पनत्वात् । न च तत्राद्रव्यत्वं बाधकमिति वाच्यम् । गन्धवदुपपत्तेः । अवयवगमनस्य युक्तिविरुद्धत्वात् । सूत्रकृताप्यनङ्गीकाराच्च । तस्मात्पूर्वोक्त एव प्रकारः साधीयानिति दिक् ॥ १० ॥

प्रसङ्गाद्भक्तिपूर्वदशां विचारयतीत्याशयेन सूत्रं पठन्ति सम्पराय इत्यादि । साम्पराय इति पाठे स्वार्थेण् बोध्यः । ननु सम्परायशब्दः परलोकवाचकत्वेन प्रसिद्धस्तत्कथं भक्तिपूर्वदशाविचारोत्रेतीत्याशङ्कायां सूत्रे तर्त्तव्याभावपदात्तथेति हृदिकृत्य तर्त्तव्यलिङ्ग विषयवाक्यमुपन्यस्यन्ति वाजेत्यादि । इदं वाक्यं शारीरब्राह्मणस्थम्, तत्र पूर्वं 'मनसैवानुद्रष्टव्य'मित्यनेन तद्दर्शनसाधनमुक्त्वा 'विरजः परं आकाशा'दित्यादिना विरजत्ववशित्वेशानत्वादीन् धर्मान् बोधयित्वा ततोऽनिरुक्तत्वाय 'नेति नेती'त्यनेनैतावन्मात्रत्वं निषिध्य, 'अगृह्यो नहि गृह्यते अशीर्यो नहि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथते' इत्यनेन लौकिकप्रमाणाग्राह्यत्वमनाशित्वमसङ्गत्वं षिञ् बन्धने अबद्धत्वेन निर्दुःखत्वं चोक्त्वा तेन जडजीवविलक्षणं ब्रह्मस्वरूपं बोधयित्वा ब्रह्मण एतादृशत्वात्तद्विदपि साध्वसाधुकर्मरहित इति बोधयितुं पठ्यते 'अतः पापमकरवमतः कल्याणमकरवमित्युभे ह्येष एते तरत्यमृतः साध्वसाधुनी'ति, अत इदमभिसन्धाय पापमकरवं कृतवानस्मि अत इदमभिसन्धाय कल्याणं पुण्यं कृतवानस्मि इति

एवमभिसन्धिपूर्वकं कृते एते **उभे** साध्वसाधुनी हि निश्चयेन एष उक्तरीतिकब्रह्मवित् तरति अतिक्रामति अभिभवति अमृतः जीवन्नेव, नैनं कृताकृते तपतः एनं ब्रह्मविदं निन्दितकरणं च कल्याणाकरणं च न पश्चात्तापं जनयतः । नास्य केनचन कर्मणा लोको मीयते अस्य प्राप्तव्यो ब्रह्मलोकः केनापि नापयाति, प्राप्तव्यं प्राप्नोत्येवेत्यर्थः । तदेतदृचाभ्युक्तम् । ब्राह्मणोक्तोर्थो वक्ष्यमाणया ऋचाप्युक्त इत्यर्थः । ऋचमाह, 'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान्, तस्यैव स्यात् पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेने'ति । **एष** इति ब्राह्मणोक्तः । तं पूर्वोक्तरूपमात्मानं विदित्वा तस्यैवात्मनः पदवित् स्यात्, पदं चरणं स्थानं च, 'तद्धाम परमं मम'ेति वाक्यादक्षरवित्स्यात्, ततः पापेन लिप्तो न भवतीत्येवमक्षरब्रह्मविदो माहात्म्यमुत्कर्षमुक्त्वा, पठ्यते तत्साधनमुच्यते तस्मादित्यादिना, यस्मादेवं ज्ञातुर्माहात्म्यं तस्मादेवं शास्त्रतो ज्ञेयस्वरूपवित् शान्तो दान्तः निगृहीतान्तर्बहिःकरण उपरतो निवृत्तसर्वेहस्तितिक्षुर्दुःखसहिष्णुः श्रद्धाचित्त आस्तिक्यबुद्धिमानात्मन्येवात्मानं पश्येत्स्वात्मनि शरीरे पूर्वोक्तमात्मानमक्षरं पश्येत् । अर्हे कृत्यतृचश्चेति लिङ् । दर्शनार्ह इत्यर्थः । एवं दर्शनार्हतामुक्त्वा स्वस्य द्रष्टृत्वनिश्चयार्थं द्रष्टृलिङ्गानि वदति, सर्वमेनं पश्यतीत्यादिना, स्वाज्ञानार्थं लिङ्गान्युक्त्वा परज्ञानार्थमाह, विपापो विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेदेति । यदुक्तप्रकारकब्रह्मद्रष्टा स विपापादिलिङ्गैर्निश्चेय इत्यर्थः । एतस्य वाक्यस्य निष्कृष्टमर्थमाहुः **अत्रे**त्यादि । तत्तव्यलिङ्गां श्रुतिमुक्त्वा तदभावलिङ्गामाहुः **अथर्वणे**त्यादि । आदिपदेन तदुपबृंहणपुराणसङ्ग्रहः । अतः परं यदंशे संशयस्तं बोधयितुं पूर्वविचारितमंशं पूर्वमाहुः **अत**दित्यादि । अधिकारिभेदेन साधनभेदो वेद्यधर्मभेदश्चेत्येतत्पुरा 'न वा प्रकरणभेदा'दिति सूत्र एवोक्तेति तदंशे सन्देहाभावात्सात्र पुनर्नोच्यत इत्यर्थः । सन्दिग्धांशं विवरीतुमाहुः **एतावा**नित्यादि । एवं सति मुक्तिकारणत्वसाम्याद्भक्तिज्ञानयोस्तौल्ये स्तीति । व्याकुर्वन्ति **सम्पराय** इत्यादि । सम्परायशब्दस्य प्रसिद्धार्थग्रहणे भक्तिमार्गस्य बोधकस्याध्याहारापत्तिरिति तमर्थं विहाय यौगिकार्थं गृहीतुं पक्षान्तरमाहुः **अथवे**त्यादि । अत्र द्वेधा व्याख्यानेन पुरुषोत्तमज्ञानप्राप्त्योः साधनं भक्तिमार्ग एवेति बोधितम् । **तस्मा**दिति, ज्ञानमार्गात् । **एवं कथन**मिति, यौगिकपदेन कथनम् । भक्तेरेव पुरुषोत्तमज्ञानसाधनत्वं न ज्ञानस्येत्यत्र गीतावाक्यं प्रमाणत्वेनाहुः **ब्रह्मभूतस्ये**त्यादि । **तथे**ति, भक्तेर्ज्ञानमार्गादुत्कृष्टत्वम् । तत्र तत्तव्याभावे प्रमाणमाहुः **एवं सती**त्यादि । ननु सूत्र इदं कुतो लभ्यते इत्याकाङ्क्षायामाहुः **उक्ते**त्यादि । तेन भवितव्यलिङ्गाः कौषीतक्यादिश्रुतीरुपन्यस्य यत्सूत्रं व्याख्यायते तच्चिन्त्यमिति बोधितम् । उत्तरसूत्रमवतारयन्ति **ननु भक्ती**त्यादि । व्याख्यानं तु स्फुटार्थम् । तेन पापतरणं न सन्निपततीति सिद्धम् ॥ ११ ॥

एवमनेनाधिकरणेन ज्ञानापेक्षया भक्तेरुत्कर्षः साधितः । अतः परं 'तमेव विदित्वे'ति श्रुतौ साधनान्तरनिषेधश्रावणाद्भक्तेर्ज्ञानकारणत्वेन मोक्षकारणत्वं न तु साक्षादिति शङ्कामपाकर्तुमधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **गते**रित्यादि । संशयं विवरीतुं विषयवाक्यान्याहुः **नन्वि**त्यादिना । **इत्युच्यत** इति, तथा च ज्ञानभक्त्योः समुच्चयो विकल्पो वेत्येकः संशयः । संशयान्तरमाहुः **किञ्चे**त्यादिना । **उभयत्रे**ति, उक्तश्रुतौ स्मृतौ च । तथा च नात्र स्मृतिविरोधकृतः संशय इत्यर्थः । तत्र तमेव संशयाकारं स्थापयितुं तद्दूषकहेतुकथनमुखेन संशयानपायमाहुः **विषये**त्यादि । तथा चैकतरज्ञानवतो मोक्षाभावप्रसक्त्या तद्बोधकश्रुत्यादिबाधप्रसक्तेरित्यर्थः । **समुच्चय** इति, ज्ञानभक्तिसमुच्चयः । विरोधाभावदूषणमुखेन संशयान्तरमाहुः **पूर्व**मित्यादि । पुनः संशयान्तरमाहुः **अपरं** चेत्यादि । **तत्साधनत्वे**ति ज्ञानसाधनत्वेत्यर्थः । पूर्वपक्षमाहुः **तथा** चेत्यादि । ननु ज्ञानस्य पुष्टिमर्यादाभे-

देनैव फलवत्त्वमिति कथं बोध्यमित्यतस्तदाशयमाहुः **अत्रेत्यादि**। **सृष्टिपूर्वकाल** इत्यादि, कार्यमात्रं प्रति भगवदिच्छायाः कारणत्वेनेच्छायाश्च नित्यत्वेन तदैव तथेत्यर्थः। **तत्रेत्यादि**। विचारशरीरप्रविष्टोन्नयनकारणाकाङ्क्षया उक्तरीत्या ज्ञानभक्तिवरणज्ञानाभावरमणादिबुद्धीनां शास्त्रे कथनेन मुक्तिसाधनाननुगमे शास्त्रद्वारा मुमुक्षोः प्रवृत्तये हेतुरनुगमहेतुरवश्यं वाच्य इत्यर्थः। उभयोर्मर्यादापुष्ट्योः स्वरूपमुक्त्वा व्यवस्थामाहुः **तथा चेत्यादि**। **सर्वं सुस्थमिति**। उदितानुदितहोमिवदधिकारिभेदाद्व्यवस्थितमित्यर्थः। एतेनैव पूर्वं ज्ञानमार्गीयज्ञानवतः पश्चाद्भक्तिमार्गीयज्ञानवतो लयस्थानानिश्चयोपि परिहृतो बोध्यः। क्रमेणाङ्गीकृतस्याक्षरे लयोत्तरं तत उद्धृत्य पुरुषोत्तमलयस्य शक्यवचनत्वात्। 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृता' इत्यत्राक्षरे लीनानां तत उद्धारस्य कथनात्। एतेनैव स्मृत्योरपि विरोधः परिहृत इति बोधयन्ति **अत एवेति**। मार्गभेदेन व्यवस्थासौकर्यादेवेत्यर्थः। **तथेत्यर्थ** इति, मुक्तिसाधने मुमुक्षोः प्रवृत्तिप्रतिरोध इत्यर्थः। अत्रेदं बोध्यम्। ब्रह्मबोधकेषु वेदान्तवाक्येषु सृष्टिकर्तृत्वप्रशासितृत्वादिकमात्माभेदश्च प्रतिपाद्यते, ज्ञानस्य मोक्षसाधनत्वं वरणेनात्मविवरणं च। तत्र प्रकरणभेदादेवं ज्ञायते, केवलेन माहात्म्यसहितात्माभेदज्ञानेनाक्षरप्राप्तिर्वरणसहितेन त्वात्मस्वरूपदर्शनस्य विचारितत्वात्सुदृढस्नेहरूपायां भक्तौ पुरुषोत्तमप्राप्तिरिति, न च वरणमश्रुतमपि तत्रोपसंहार्यमिति वाच्यम्। विद्याधर्मत्वाभावात्। 'नायमात्मा प्रवचनेन लभ्य' इत्यादिना वरणश्रुतौ साधनालभ्यत्वश्रावणस्य श्रवणादिविधिविरुद्धत्वेनोपसंहारस्याशक्यत्वाच्च। एवं साधनभेदेन ज्ञानविषयफलयोर्भेदसिद्धौ पूर्वोक्तोन्निनीषा श्रुतिसिद्धविचारशरीरे श्रौतसाधनतदभावतद्विरुद्धकामादीनामपि प्रवेशेन वरणेपि प्रकारभेदसिद्धौ तस्य पुराणोक्तोपबृंहणैर्विशेषावगतिं हृदिकृत्य सूत्रकृता इदमधिकरणं प्रणीतमिति पुराणस्थविरोधपरिहारचिन्तनमत्र कृतम्, न तु मुख्यतया तेषां विषयवाक्यत्वमिति वैदिकंमन्यबहिर्मुखबोधनाय वर्त्म, वस्तुतस्तु 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मिति वाक्याद्वेदत्वमेव, 'इतिहासपुराणं पञ्चमो वेद' इति श्रुतेश्च, तेन तद्वाक्यत्वेनापि विषयवाक्यत्वमिति। प्रकृतमनुसरामः। एतस्याधिकरणस्य पूर्वाधिकरणोत्थशङ्कानिरासरूपं प्रयोजनान्तरमाहुः **एतेनेत्यादि**। **नन्विति**, पूर्वाधिकरणे सर्वपापक्षये भक्तिरुदेतीत्युक्तं तत्रेदमाशङ्क्यत इत्यर्थः। **न साधीयानिति**, तथा च पापं विना भगवति कापथ्यासम्भवात्तथेत्यर्थः। एतेन सम्परायाधिकरणसिद्धान्त आक्षिप्तो ज्ञेयः। तमप्यत्र मार्गभेदेन समादधते **तथा हीत्यादि**। **वक्तुं शक्यमित्यन्तम्**, तथा च पूर्वाधिकरणसिद्धः सिद्धान्तो मर्यादामार्गविषयः। सत्यपि पापे भक्त्युदयस्तु पुष्टिमार्गे तेन न चोद्यावकाशः। नापि श्रवणादिदर्शनात्तेषां पापनाशनाय क्रियमाणत्वं शङ्क्यम्। तेषां फलमध्यपातित्वात्। नचैवं सति पश्चात्पापसत्तायां तदर्थं यत्नान्तरकृतिवैयग्र्यादिकं शङ्क्यम्, भगवतैव तन्नाशादिसम्भवेन सर्वसौस्थ्यादित्यर्थः। भगवतैव तत्पापनाशे प्रमाणमाहुः **तदुक्तमित्यादिना**। एतद्व्याख्याने, **तद्दुःखदमित्यत्र तदिति** भिन्नं पदम्। ननु तर्ह्याधुनिकविकर्मणः का गतिरित्यपेक्षायामाहुः **उक्तेत्यादि**। मत्तो भूतं न तु मया कृतमितिवद्वेति, अकामतः कृतमबुद्धिपूर्वकं च कृतम्। तथा च सांसर्गिकं वा अकामादबुद्धिपूर्वं कृतं चेत्यर्थः। तृतीयमकृतमप्यज्ञानात्मकमन्यदाहुः **त्यक्तेत्यादि**। एतादृशस्थले तस्य पापमेव न, किन्तु भगवदिच्छैव तादृशी सन्मार्गस्थापनार्थेत्याशयेनाहुः **वक्तेत्यादि**। किन्तु बहुना, भक्तहृदयस्थः स्वभक्तभक्तस्यापि दूरीकरोतीत्याशयः सर्वपदेनोच्यत इत्याहुः **कदाचिदित्यादि**। सिद्धमाहुः **अत्रेत्यादि**। **अत्रेति**, पुष्टिमार्गे। अत्रेदं सिद्धम्। मर्यादाभक्तिमार्गे तत्त्वव्याभावात् ज्ञानमार्गेत उत्कर्षः। पुष्टिभक्तिमार्गे तु क्वचित्पापसत्त्वेपि भगवता तन्नाशात्कृपाविशेषादुत्कर्ष इति॥ १२॥

अग्रिमाधिकरणमपि भक्ततारतम्यबोधनद्वारा वरणश्रुतिविचारस्य प्रपञ्च इत्याशयेन सूत्रं पठन्ति **उपपन्न** इत्यादि । अत्र पूर्वाधिकरणसिद्धपुष्टिभक्त्युत्कर्षासहिष्णुमर्यादाभक्तरूपपूर्वपक्षवादिमुखेन विषयवाक्यं संशयं च वदन्तः सूत्रं व्याकुर्वन्ति **नन्वि**त्यादि। तत्र मुक्तेस्तदनपेक्षत्वस्य श्रौत(त्व)बोधनायाह **तदुक्त**मिति । कुत्रेत्याकाङ्क्षायामाह **अष्टादशार्णे**त्यादि । भक्तिरहस्यभजनमिति। भक्तिशब्दाच्छान्दसः सोर्लुक् । रहस्यभजनमित्यस्यैव विवरणं **तदिहे**त्यादि । **अमुष्य** वस्तुत एतदीयस्यात्मनो जीवस्येहामुत्रोपाधिनैराश्येनैव ऐहिकसुखमुक्तिपर्यन्तामुष्मिकसुखविषयकेप्साराहित्येनैव कल्पनं तदीयत्वसमर्थनं अन्तर्बहिःसेवया तद्दृढीकरणमित्यर्थः । अयं पाठः शाखान्तरीयः। उक्तवाक्यद्वयस्य तात्पर्यं विचार्यत्वेनाह **एतदत्र विचार्यत** इति । कथमित्याकाङ्क्षायामाह **मन्त्रे**त्यादि। **अत एवे**ति, स्वरूपस्य फलत्वादेव। **इति संशय** इति, उक्तहेतुभ्यामुभयसाम्यमेव युक्तमिति पूर्वपक्षगर्भे संशय इत्यर्थः। ननु पुरुषोत्तमे सायुज्येपि सौत्रहेतोः सत्त्वात्कथं रहस्यभजनकर्तुराधिक्यसिद्धिरित्यत आहुः **यद्यपी**त्यादि । अयमेवार्थः सूत्रकारानुशयगोचर इत्याहुः **अत एवे**ति। उक्तस्यार्थस्याभिप्रेतत्वादेव। तथा च रहस्यभजनकर्त्ता उप समीपे पन्नो गत इति हेतोरुपपन्न इत्यर्थः। रहस्यभजनकृत उपपन्नताया विषयवाक्यादेव लाभादर्थस्य गोप्यत्वाच्च न वारद्वयं तत्प्रयोगः। चतुर्विधमुक्तव्यावृत्त्यर्थं तादृशस्य सिद्धं स्वरूपमाहुः **तेने**त्यादि। एतदेवोहापोहेन द्रढयन्ति **न चे**त्यादि। इतोप्युत्कटभक्तसूचनाय पक्षान्तरमाहुः **अथवे**त्यादि।एवं परमा भक्तिकाष्ठा सूचिता। तेन फलभक्तौ मुक्तिर्न सन्निपतीति सिद्धम् ॥ १३ ॥

अतःपरं भक्तिसाध्यायां मुक्तौ सर्वा भक्तयः सन्निपतन्ति न वेति विचारयितुमधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **अनियम** इत्यादि। विषयवाक्यपाठः शाखान्तरस्थः। सर्वाङ्गे-मनोनिवेदनं धारयतिपदार्थः । रसति, कीर्त्तयति जपतीत्यर्थः। **भजति**, शरीरादिना सेवते। ध्यायते, एकदेशं लीलां वा चिन्तयति । **प्रेमति**, स्निह्यति युधिष्ठिरादिवत्। उपदिशति, भगवन्तं मन्त्रद्वारा बोधयति कथयति वा । **आचरति**, भगवद्धर्मानिति शेषः । प्रत्येकपक्षे लोकविरोधमाशङ्क्य परिहरन्ति **नन्वि**त्यादि । **एवमेवाहे**ति, प्रत्येकपक्षमेवाहेत्यर्थः। एवमनेन वर्णकेन प्रत्येकपक्षं व्याख्याय समुच्चये लोकन्यायेन फलशैघ्र्यं बोधयितुं वर्णकान्तरमाहुः **एतेने**त्यादि । **श्लिष्ट** इति, अनियम इत्यनेन एकमेव कर्त्तव्यं न द्वयं त्रयमित्यस्याप्यनियमस्य सङ्ग्रहात्तथेत्यर्थः ॥ १४ ॥

पूर्वोक्तानां भगवद्धर्माणां फलव्यभिचारं परिहर्तुं प्रसङ्गादधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **याव**दिति। मुक्तो भवति न वेति विचार्यत इति। मुक्तिं प्राप्नोति न वा, यदि प्राप्नोति, तदा भक्तित्वं न मुक्तिजनकतावच्छेदकं, यदि न प्राप्नोति तदा भगवद्धर्मत्वमपि न तथा, तथा चाद्ये पूर्वोक्तश्रुतिविरोधो द्वितीये भगवद्धर्माणां प्रतिबन्धकत्वप्रसङ्ग इत्यतो विचार्यत इत्यर्थः। अत्र भगवद्धर्माणां वरणहेतुकत्वात्तैरपि मुक्तिरित्येकः पूर्वपक्षवादी, विहितत्वाभावान्नेत्यपरस्तत्रोभयत्र युक्तिसद्भावात्सन्देह एव पर्यवस्यतीत्याशयेनाहुः **तत्रे**त्यादि। सिद्धान्तमाहुः **यस्मिन्नि**त्यादि। **तत्सम्पत्ता**विति, कार्यसम्पत्तौ। **तथैव विचारितत्वा**दिति, अधिकारसमाप्त्यनन्तरमेव भक्तेः फलोन्मुखत्वस्य विचारितत्वात्। तथा च सामग्र्यभावेन विलम्ब इति न भगवद्धर्माणां मुक्तिप्रतिबन्धकत्वं न वा भक्तित्वस्य मुक्तिजनकतावच्छेदकत्वहानिरित्यर्थः। अधिकारिणां मुक्तिश्च न ब्रह्मणा सहैव नियता, किन्त्वधिकारसमाप्तौ नियतेति बोधयितुं ब्रह्मणा सहेति वाक्यविषयमाहुः **यच्चे**त्यादि। अनेनाधिकरणेन 'भक्ताधिकारिणां मुक्तिरन्यथा प्रकृतौ लयः। पुनः सृष्टौ तथैश्वर्यं कर्मिणां पुनरागति'रिति सर्वोपि विषयः सूचितो बोध्यः। अत्र भक्तपदं ज्ञानिनामप्युपलक्षकम् ॥ १५ ॥

मुक्तिस्वरूपविचारायाग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति **अक्षरे**त्यादि । विषयसंशयौ पूर्वपक्षकुक्षावेव निक्षिप्याहुः **नन्वि**त्यादि । **मुक्तौ च तदसम्भवा**दिति, 'भूयश्चान्ते विश्वमायानिवृत्ति'रिति श्रुत्या वैजात्यासम्भवात् । श्रुत्योर्विरोधे स्मृतेर्निर्णायकत्वमभिप्रेत्याहुः **भक्त्ये**त्यादि । **भक्तौ ज्ञानस्यापि सम्भवा**दिति, ज्ञानकारणत्वबोधकश्रुतेः सावधारणत्वाद्भक्तिकारणत्वबोधिकायां तदभावादुक्तार्थस्य गीतास्मृत्योपबृंहितत्वाच्चेत्यर्थः । तथा च 'गतेरर्थवत्त्व'मित्यधिकरणे मर्यादामार्गे ज्ञानस्य मुक्तिसाधनतायाः प्रतिपादनाद्भक्तेः परम्परया कारणतामादाय भक्तिकारणतावाक्यानि समर्थनीयानीति भावः । **आहे**ति, विषयभेदव्यवस्थया मुक्तौ वैजात्यं वारयन्ज्ञानस्य परम्परया कारणत्वमाहेत्यर्थः । तदुपपादयन्ति **तुः पूर्वपक्षनिरास** इत्यादिना, भक्तिः परम्परया कारणमिति शङ्कैव न कार्येत्यर्थः । तत्र हेतुं व्याकर्तुं श्रुतितात्पर्यं विशदयन्ति **वाजे**त्यादि । तथा च श्रुतावक्षरज्ञानस्य फलद्वयकथनादियं शङ्का न कार्येत्यर्थः । ननु तावता सा कथं निवर्तत इत्यत आहुः **भक्त्ये**त्यादि । तथा च भक्तेरक्षरज्ञानाजनकत्वाद्यतो न परम्परितत्वमतस्तथेत्यर्थः । नन्वेवं सति कारणवैजात्यान्मुक्तौ वैजात्ये श्रुतिर्विरुद्ध्येतेत्यत आहुः **किञ्चे**त्यादि । **तस्ये**ति, ब्रह्मभावस्य । **पूर्वकक्षाविश्रान्त**मिति, तेन 'ब्रह्म वेद ब्रह्मैव भवती'त्यादितत्फलवाक्यानामपि तत्रैव विश्रान्तिर्न तु पुरुषोत्तमप्राप्तिपर्यन्तत्वम्, तेनाक्षरप्राप्तेर्मुक्तित्वं यदुच्यते, तदक्षरस्य पुरुषोत्तमाविनाभावेन तत्सामीप्यादुच्यते, न तावता परमुक्तित्वम्, तेनावधारणमपि पुनरावृत्त्यभावेन मृत्य्वतिक्रमेण कैवल्येनाक्षरप्राप्तेः ब्रह्मभावात्मकत्वेन चोपपद्यमानं न विरुध्यते । ननु यद्यक्षरप्राप्तेर्न परमुक्तित्वं तज्ज्ञानं च पूर्वकक्षाविश्रान्तम्, तर्हि तैत्तिरीयश्रुतौ मुक्तिसाधनत्वेन कथं तदुच्यत इति चेत्तत्राहुः **एवं सती**त्यादि । पुरुषोत्तमसम्बन्धिसम्बन्धे मुक्तिरिति सामान्यमिति । श्रवणादीनामिवाक्षरस्यापि पुरुषोत्तमसम्बन्धित्वात् तथेत्यर्थः । **यद्वा** । यथा भक्तस्य पुरुषोत्तमसम्बन्धित्वं तथा पुरुषोत्तमधाम्नोऽक्षरस्यापीति भक्तभक्तिवदक्षरधीरपि परम्परया मुक्तिसाधनं तेनैवं सामान्यमित्यर्थः । तद्भावं व्याकुर्वन्त एव हेतू योजयन्ति **मर्यादे**त्यादि । ननु भवत्वेवं पुरुषोत्तमप्राप्तेर्मुक्तित्वम्, परन्तु पूर्वोक्तश्रुत्योर्विरोधस्तु परिहार्य इत्याशयेन सूत्रोक्तं दृष्टान्तं व्याकर्तुमवतारयन्ति **नन्वि**त्यादि । **हेतुम्**, भगवदिच्छारूपम् । तथा चोपसदे यथा यजमानस्नेहेन यज्ञयशःप्रापणेच्छया तानूनप्त्रप्रथमावमर्शनं तथा भगवत्कृपया स्वप्रापणेच्छया भक्तिसहितमक्षरवेदनमिति तया तथेत्यर्थः । सूत्रोक्तां सम्मतिं व्याख्यातुमवतारयन्ति **नन्वि**त्यादि । एतानि वाक्यान्यष्टमाध्यायस्थानि । **वैलक्षण्य**मिति, साधनसौकर्यं स्वप्राप्तिरूपफलोत्कर्षं च । अत्राक्षरस्वरूपकथने तस्य परमगतित्वं स्वधामत्वं चोक्त्वा परस्य यद्भक्त्येकलभ्यत्वं वक्ष्यति तदक्षरादुत्तमत्वेन वाक्यान्तरे सिद्धे स्वस्मिन्नेव परत्वविश्रान्तेः स्वस्यैव वक्ष्यति । बाधकाभावे तच्छब्देन सन्निहितपरामर्शाच्च । तदेतदुक्तं **स्वस्य वक्तु**मिति । **एतेने**ति, 'क्षरः सर्वाणि भूतानी'ति वाक्यान्तरसिद्धं भूतग्रामं व्यक्तकोटौ निवेश्य ततः परत्वकथनेनेत्यर्थः । **य**मित्यादि । भूतग्रामपदेन जडान् गृहीत्वा अक्षरपदेन जीवग्रहण एतौ दोषौ प्रसज्येयातामित्यर्थः । **स्फुटमन्यत्** । उक्तस्यार्थस्य श्रौतत्वं बोधयितुं तैत्तिरीयश्रुत्यर्थं प्रकाशयन्तः सामान्यतद्भावाभ्यामित्यस्यार्थान्तरं सङ्गृह्णन्ति **किञ्चे**त्यादिना । अग्रिममन्त्रे लोकाक्षरस्य वक्ष्यमाणत्वादत्रत्यस्य तस्यार्थमाहुः **अत्रे**त्यादि । एतमुपष्टम्भन्ति **अत एवे**त्यादि । द्वितीयमन्त्रस्थाक्षरपदस्यार्थं लिङ्गबलेन लोकात्म(कत्व)माहुः **यदि**त्यादि । यदर्थमिदं निरूपितं तदाहुः **एवं सती**त्यादि । अत्र भट्टभास्करशङ्कररामानुजभाष्येषु पूर्वोक्तवाजसनेयकाथर्वणोक्ताक्षरवाक्यद्वयमेव विषयवाक्यत्वेनोदाहृत्य किञ्चैषां विशेषणनिषेधवतीनां सर्वत्र प्राप्तिरुत व्यवस्थेति संशये. यथायथं प्रकरणावरोधात्, श्रुति-

[illegible], [illegible]रूपस्य - विद्यान्तररूपत्वे प्रमाणाभावान्निषेधरूपाणां गुणानामानन्दादिवत्स्व-[illegible]भावाचेति हेतुभिर्नान्यत्र प्राप्तिरिति पूर्वपक्षः । सिद्धान्तस्तु, यथायथम्, [illegible] निषेधनिराकरणरूपस्य ब्रह्मबोधनप्रकारस्य, सामान्यात्, तस्य प्रतिपाद्यस्य ब्रह्मणः [illegible]त्वात्सर्वत्रावरोध इति भट्टभास्करशङ्करमते । ते'नानन्दादयः प्रधानस्ये'त्यत्र विधिमुखो [illegible] निषेधमुख इति तस्यैवायं प्रपञ्चः । तेनैतदधिकरणं नात्यन्तावश्यकम् । रामानुजभाष्ये तु, [illegible] ब्रह्मणः समानत्वात्, अस्थूलत्वादीनां तत्प्रतीतौ भावात् अन्तर्भावात् । अयमर्थः । केवला-[illegible] [illegible]त्मनि विद्यमानत्वेन तेषामसाधारणाकारेण ब्रह्मोपस्थापकत्वाभावादसाधारणाकारनिश्चयार्थं [illegible]कृताज्ञानस्यावश्यकत्वेन चिदचिदात्मकप्रपञ्चवैलक्षण्यबोधनमावश्यकम् । तत्रास्थूलत्वादिना [illegible]लक्षण्यं प्रशासनेन चिद्वैलक्षण्यं च वाजसनेयके उच्यते, एवमाथर्वणेपि अदृश्यत्वादिकथनान्निर-[illegible]सर्वज्ञत्वादिना ज्ञेयम् । तथा चास्थूलत्वादिविशेषितज्ञानानन्दाद्याकारस्य ब्रह्मणोनुसन्धेय-[illegible]त्वादीनामानन्दादिवदस्ति ब्रह्मप्रतीतावन्तर्भाव इति तासामस्थूलत्वादिबुद्धीनां सर्वत्रावरोध [illegible] सिद्धान्तः । तेनेदमधिकरणं तत्सहकारित्वादत्यन्तावश्यकमिति तदपेक्षयेदं मतं युक्तम् । ननु [illegible]नां का गतिरित्याकाङ्क्षायां गुणानां प्रधानावर्तित्वे दृष्टान्तं तत्र प्रमाणं चाहोपसद्-[illegible] यथा चतूरात्रे जामदग्न्याहीने पुरोडाशिनीषूपसत्सूपसद्गुणभूतः सामवेदपठितोप्यग्निर्वै [illegible] पुरोडाशप्रदानमन्त्रो विनियोगविधेर्याजुषत्वेन यजुर्वेदिनाध्वर्युणा याजुर्वेदिकेनोपांशु-[illegible] न तूद्गात्रा सामगेन सामस्वरेणोच्चैस्त्वेन तद्वत् । तदुक्तं पूर्वकाण्डे शेषलक्षणे । 'गुणमुख्य-[illegible]तदर्थत्वान्मुख्येन वेदसंयोग' इति । अर्थस्तु, गुणमुख्ययोर्व्यतिक्रमे विरोधे सति तदर्थत्वात् [illegible]तदर्थत्वात्प्रधानार्थत्वात् मुख्येन याजुर्वेदिकेन विनियोगविधिना वेदसंयोगो ग्राह्य [illegible]भाष्यत्रयेपि समानम् । शाबरे भाष्ये त्वत्रान्यदुदाहृतम् । तथाहि । अस्याधानं यजुर्वेद-[illegible] 'य एवं विद्वानग्निमाधत्त' इति, तदङ्गत्वेन यजुर्वेद एव गानं च विहितं 'य एवं विद्वान्वारवन्तीयं [illegible], यज्ञायज्ञीयं गायति । वामदेव्यं गायती'ति । एतानि सामानि च सामवेद उत्पन्नानि । अतः केन स्वरेण पठनीयानीति सन्देहे उत्पत्तिविधेर्विनियोगविध्यधीनतया यजुर्वेदस्वरो ग्राह्य इति । एवं चात्र विचारे क्रियमाणे पूर्वोक्तमतद्वयं न रुचिरम् । अक्षरस्य धीरित्यत्राक्षरस्येति षष्ठ्यां अक्षरस्य [illegible]निषेधस्य सम्बन्धितया निवेशेन गौरवात् प्रशासनादेरसङ्ग्रहाच्च पूर्वोक्तानावश्यकत्वदोषाच्च । [illegible]तयाभावादुक्तम् ॥ १६ ॥

अक्षरानन्दपुरुषोत्तमानन्दयोस्तरतमभावस्य बोधनायाग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति इयदामननादिति । अत्राक्षरपुरुषोत्तमानन्दयोस्तारतम्यमस्ति न वेति संशयः । अविशेषान्नास्तीति पूर्वपक्षश्च ज्ञेयः । **आनन्दमयत्वेने**त्यादि । आनन्दमये उपसङ्क्रममुक्त्वाऽऽनन्दमयं लक्षीकृत्य 'यतो वाचो निवर्तन्त' इति श्लोकेन वाङ्मनसागोचरत्वकथनात्पूर्वाधिकरणे पुरुषोत्तमानन्दस्याधिक्यनिर्धारण-मित्यर्थः । ननु 'यतो वाच' इति श्लोको मनोमये कदाचनेति पाठभेदेन पठ्यते, ब्रह्मोपनिषदि चैतदुत्तरा-र्धे मानन्दमेतज्जीवस्य यज्ज्ञात्वाऽमृतमश्नुत' इति पठ्यतेऽतो नैतेन पुरुषोत्तमानन्दाधिक्यसिद्धिरिति चेत । न । मनोमयस्य यजुःशिरस्त्वादिना वेदात्मकत्वनिश्चायनाद्वेदस्य च शब्दब्रह्मात्मकस्य 'सर्वे वेदा यत्पदमामनन्ती'तिश्रुत्या ब्रह्मबोधकत्वेन ब्रह्मणः वेदात्मकान्मनोमयादवाङ्मनसगोचरमानन्दं विद्वान् कदाचन न बिभेतीत्येवं पुरुषोत्तमानन्दज्ञानसाधनत्वेन मनोमयश्लोकार्थस्य बोद्धव्यत्वात् । ब्रह्मोपनिषद्यपि ज्ञेयत्वेन तस्य जीवसम्बन्धित्वबोधनस्याभिप्रेतत्वात्, 'यज्ज्ञात्वाऽमृतमश्नुत' इति तुरीय-पादेन तथा निश्चयात् । अतो न चोद्यावसर इति दिक् ॥ १७ ॥

सिद्धेषु ज्ञानसाधनेषु वृत्तिरात्मनो ब्रह्माभेदसाक्षात्कारात्मिका भवतीति 'ब्रह्म वेद ब्रह्मैव भवती'त्यत्र श्रुतम्। सा भक्तावपि सिद्धायां 'भक्त्या मामभिजानाती'त्यभिज्ञावाक्यावेदिते ज्ञाने निवेशं लभते नवेत्येतद्विचारायाधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्तो विचारयन्ति **अन्तरेत्यादि**। **भक्तिमार्गे** इति, फलभक्तिमार्गे। **सर्वान्तरत्वा**दित्यादि, 'अन्योन्तर आत्मा आनन्दमयः पृथिव्यां तिष्ठ'न्नित्यारभ्य 'य आत्मनि तिष्ठन्नात्मनोन्तर' इत्यादौ परमात्मा सर्वान्तरत्वेन श्रावितः, स च यदन्तस्तिष्ठति तमन्तरयति वह्निरिवायोगोलकम्। तथा सति श्रौतेन येन केनापि साधनेन तस्मिन्नभिज्ञायमाने स्वात्मनस्तद्व्याप्तत्वेन भेदास्फुरणात् स्वात्मत्वेनास्य तज्ज्ञानमदण्डवारितमतस्तद्भवतीत्यर्थः। **तथात्वेपी**त्यादि। सर्वान्तरतयैतदात्मनस्तदविभक्तत्वेपि 'सर्वस्य वशी'त्यादिश्रुत्युक्तसर्वेश्वरत्वादिधर्माणामेवोत्कटभक्त्या स्फुरणादेतत्पुरस्कृतमेव ज्ञानं भवति, न तु स्वात्मत्वप्रकारकमित्यर्थः। नन्वभिज्ञाने सर्वांशज्ञानदर्शनात्तदंशाज्ञाने हेतुं न पश्याम इत्याकाङ्क्षायामाहुः **अत्र तथे**त्यादि। **विपरी**ते, स्वात्मत्वेन ज्ञाने। एतदेव व्याकुर्वन्ति **पूर्वस्मिन्नि**त्यादि। **स** इति, भजनानन्दः। **न सम्पाद्यत** इति, क्रीडार्थो मुख्यो भक्तिमार्गः क्रीडा च भेदादेव सिध्यतीति 'स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छ'दित्यादिश्रुतिभ्योऽवसीयतेऽभेदश्च तद्व्यवधायक इति तथेत्यर्थः। **अन्यथाभावा**दिति, अभेदज्ञानस्य विलायकस्वभावत्वेन तद्वतो विलयादित्यर्थः। नन्वस्तु तस्यां तथात्वं तथापि न सम्पादयतीति कथमवगन्तव्यमित्यत आहुः **तत्सम्पादनस्ये**त्यादि। **अलौकिक** इति, साक्षात्सम्बन्धस्य हेये लौकिकशरीरे असम्भवात्तथेत्यर्थः। **तथे**ति, चिकीर्षितलीलाप्रतिबन्धकत्वगेवास्य हीनत्वं तस्मादिदं न सम्भवतीत्यर्थः। प्रतिबन्धकस्यासम्भवो ज्ञानमार्गे तुल्य इति तद्दृष्टान्तेन तं बोधयितुं दृष्टान्तं प्रकारान्तरेणाहुः **अथवे**त्यादि। आत्मत्वेन ज्ञानाभावस्यायुक्तत्वमाशङ्क्य परिहरतीत्याशयेन सूत्रं पठन्ति **अन्यथे**त्यादि। **नन्वि**त्यादि। 'उपपन्न' इति सूत्रे दासीदाससुहृद्भेदेन त्रिविधा लीलामध्यपातिभक्ता उक्तास्तत्र 'नोद्धवोण्वपि मन्न्यून' इति वाक्यादत्यन्तरङ्गः आदिपदेन व्रजस्थास्तेपि 'रामेण सार्द्धं मथुरां प्रणीत' इत्यादिना विगाढभावा उक्ता इति तेष्वपि चेत्साक्षात्सन्देशद्वारा चोपदेशस्तदेतरेषु किं वाच्यम्, किञ्च, तेषु चेदुपदेशो विफलस्तदाऽपार्थकार्यकर्तृत्वाज्जीवतुल्यत्वापत्तिरिति तस्य तत्र फलमवश्यमभ्युपेयम्, तथा सति पूर्वोक्तमिति सूत्रांशेनाशङ्क्य परिहरतीत्यर्थः। परिहारं व्याकुर्वन्ति **नहीत्यारभ्येत्यर्थ** इत्यन्तम्। तथा चोक्तरीत्या फलान्तरसत्त्वेनावैफल्ये सति न जीवतुल्यत्वापत्तिर्नापि ज्ञानमार्गोत्कर्ष इत्यर्थः। ननूक्तरीत्या भजनानन्दप्रतिबन्धाभाव एव, न ब्रह्माभेदानुभव इत्यत्र किं गमकमित्याकाङ्क्षायामाहुः **अन्यथे**त्यादि। **ज्ञेय**मिति, कुरुक्षेत्रप्रसङ्गस्थोत्कण्ठावाक्यैर्ज्ञेयमित्यर्थः। अयमेव सूत्रकाराशय इति ज्ञापनायाहुः **अत्रे**त्यादि।

उपदेशान्तरपदमिति, दृष्टान्तकोटिप्रविष्टं तत्पदम्। **तस्याभावा**दिति, अभेदोपदेशस्य दार्ष्टान्तिकत्वेन दृष्टान्ते प्रवेशाभावादित्यर्थः। सिद्धमाहुः **एतेने**त्यादि। मार्गभेदेन प्रकारभेदेन चैकस्यैवात्मोपदेशस्य दृष्टान्तदार्ष्टान्तिकभावेनोक्तार्थसिद्धौ सम्भवत्यां किमित्युपदेशान्तरं ग्राह्यमित्याशयेन पक्षान्तरमाहुः **अथवे**त्यादि। **क्रियत** इति, मैत्रेयीब्राह्मणादौ क्रियते। **अत्रे**ति, भक्तिमार्गे। **बोध्यत** इति, आत्मोपदेशेन बोध्यते। गतार्थत्वमाशङ्क्य परिहरन्ति **यद्यपी**त्यादि। **एतावते**ति, आत्मबोधनमात्रेण। **आयाती**ति, फलत्वेन नायातीत्यर्थः। निदर्शनस्य पूर्वमेवोक्तत्वात्सिद्धमाहुः **अग्र** इति। तथाच यत्र किञ्चित्कार्यार्थं विप्रयोगतापसहनमावश्यकं तत्रैवं प्रभुः करोति, न तु सर्वत्र, अतः पूर्वोक्तं **सारमुपपन्न**मित्यर्थः। एवं करणस्य प्रासङ्गिकं फलमाहुः **तेने**त्यादि।

अत्रोद्धवादिषूपदेशस्य स्मार्तत्वं न शङ्कनीयम् । 'विधिश्च प्रतिषेधश्चे'त्यादिप्रश्नेन, 'मां विधत्तेभिधत्ते मा'मित्याद्युत्तरेण च श्रौतत्वस्य स्फुटीकरणेन श्रुतिभिरेवोपदेशनिश्चयात् । शूद्रादीनां श्रवणाधिकारायैव व्यासपादैः स्वश्लोकैरुक्तत्वात् । 'सर्ववेदेतिहासानां सारं सारं समुद्धृत'मिति वाक्यात् । एवं सन्देशेपि 'एतदन्तः समाम्नाय' इति वाक्यात् ज्ञेयम्, तेन न चोद्यावकाशः ॥ १८ ॥

ननु यद्यभेददर्शनस्य भक्तिफलत्वं न स्यात्तदा लीलास्थानां स्वस्मिन् ब्रह्माभेदो न स्फुरेत्, दृश्यते च स इति पूर्वाधिकरणसिद्धान्तोऽयुक्त इति शङ्कायामुत्तरमधिकरणमित्याशयेन सूत्रं पठन्ति **व्यतिहार** इत्यादि । एतरेय इव तैत्तिरीये आवृत्त्यभावात्कथं व्यतिह्वारलाभ इत्यत आहुः **अत्रे**त्यादि । व्यतिहारेणाभेदबुद्धौ तात्पर्यं श्रुतेरिति वदतां तेन तदसिद्धिं बोधयन्तो दूषयन्ति **अपरं चे**त्यादि । शेषं तूत्तानार्थम् ॥ १९ ॥

फलमुखेन भक्त्युत्कर्षं साधयित्वा साधनमुखेन तं साधयितुमग्रिममधिकरणमित्याशयेन सूत्रं पठन्ति **सैव ही**ति । शेषमतिरोहितार्थम् ॥ २० ॥

ननु भक्तेः कथमेवमसहायशूरत्वमित्याकाङ्क्षायां तत्र हेतुं बोधयितुं कैमुतिकेन स्वरूपत उत्कर्षं च बोधयितुमग्रिमाधिकरणं प्रणयतीत्याशयेन सूत्रं पठन्ति **कामा**दीति । तदेतद्विशदयन्ति **पूर्वसूत्र** इत्यादि । सूत्रं व्याकर्तुं तदुपयोगित्वेन भक्तिविभागं विभाजकोपाधिस्वरूपं च पूर्वमाहुः **भक्ति**रित्यादि । **अन्यत** इति, शास्त्रव्यतिरिक्तात्स्वभावादितः । **इतरत्रे**त्यस्यार्थः कामाद्युपाधिजस्नेहरूपायामिति । **इत्यर्थ** इति, इत्येषोर्थः शेषभूत इत्यर्थः । कथमेवमित्याकाङ्क्षायां तत्र प्रयोजकमाहुः **भगवती**त्यादि । **भवती**त्यन्तम् । सूत्रशेषं व्याकुर्वन्ति **तत्रे**त्यादि । तेषु तथा प्रयोगप्राचुर्यादिति । **यथा पञ्चायतन**पूजेति । **एतेने**ति । कामादीनां गृहादीनां च मुक्तिसाधकत्वकथनेन । **इति ज्ञापनाये**ति, तेन विहिताविहितोभयरूपापि संगृहीतेति भावः । **इतरे** तु । 'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तर आकाश' इत्युपक्रम्य 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इति छान्दोग्ये आम्नायते । 'स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु, य एषोन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी'त्यादि वाजसनेयके आम्नायते । तयोरैकविध्यं न वा परस्परगुणोपसंहारो न वेति सन्देहद्वये, कामादीति सूत्रेणैकविध्यमुपसंहारश्च सिद्धान्तीक्रियते। कामादीत्यत्र, कामपदं देवदत्तो दत्तः सत्यभामा भामेतिवन्नामैकदेशरूपम् । तेन सत्यकामाद्या वाजसनेयके वशित्वाद्याश्छान्दोग्य उपसंहार्याः । हृदयस्यायतनस्य वेद्यस्येश्वरस्य लोकासम्भेदप्रयोजनसेतुत्वरूपेश्वरधर्मस्यापि समानत्वाद्विद्यैक्यं परस्परोपसंहारश्चेत्याहुः । तच्चिन्त्यम् । सत्यकामादिपदानां नामत्वाभावेन दृष्टान्तवैषम्यात् । आयतनादीनां केषाञ्चिदेव समानत्वे विद्यैक्याङ्गीकारे 'चोदनाद्यविशेषा'दित्यस्य व्यभिचारित्वप्रसक्तेश्च ॥ २१ ॥

एवमधिकरणत्रयेण सात्त्विकानां वृतानां ज्ञानासक्तिनिवारणाय ज्ञानमार्गाद्भक्तिमार्गस्य फलतः साधनतः स्वरूपतः सम्बन्धतश्चोत्कर्षः प्रतिपादितः । अतः परं ये वृता राजसास्तेषां ज्ञाने रुच्यभावेपि कर्मणि रुचेर्विद्यमानत्वात्तन्निर्णयायाधिकरणान्तरमारभत इत्याशयेन सूत्रं पठन्ति **आदरादलोप** इति । संशयादिकमाहुः **नन्वि**त्यादि । **इतरत्रे**ति, भगवद्धर्मेषु । **ब्रह्मयज्ञप्रकरण** इति, आरण्यके स्वाध्यायब्राह्मणे । 'ओमिति प्रतिपद्यते एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाभ्युक्त'मिति प्रणवाक्षरं प्रतिपद्यते पञ्चमो लकारः । ब्रह्मयज्ञेन यक्ष्यमाणः पूर्वमुच्चारयेत्, कुत इत्याकाङ्क्षायामाह । एतद्वै यजुस्त्रयीं विद्यां प्रति अयं यजूरूपः प्रणवमन्त्रस्त्रयीं विद्यां लक्षीकृत्य प्रति-

निधिरूपो यतोस्ति, तच्चाथर्वणे स्फुटम्, तस्य वै प्रणवस्य पूर्वामात्राऋश्विन्यकारः स ऋग्भिर्ऋग्वेदोथ द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेद इति सायनभाष्ये। वस्तुतस्तु गोपथब्राह्मणे इन्द्रप्रजापतिसंवादे प्रजापतिना वेदत्रये एकाक्षरोथर्ववेदे मात्राभिर्युक्त इति व्यवस्थापितम्, तैत्तिरीये बृहन्नारायणे 'ओमित्येकाक्षरं ब्रह्मे'ति श्रावितं च। तेनात्रामात्र एव। न चैवं त्रयीप्रतिनिधित्वविरोधः। द्वादशे स्कन्धे, 'सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति बीजत्वबोधनाद्यथा पुस्तकलिखनोत्तरं तन्मूलपुस्तके प्रतिपुस्तके व्यवहारस्तथा त्रयीमूलत्वात्प्रतित्वमेकादशे 'वेदः प्रणव एवाग्र' इति कृतयुगे तन्मात्रवेदबोधनाच्च तदा सर्वं कार्यं प्रणवेनैवेति तस्य त्रयीप्रतिनिधित्वं वा। **एषा वागिति**, सर्ववाग्बीजत्वात्सर्ववाग्रूपम्। तथाच छन्दोगा आमनन्ति, 'तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृणान्येवमोंकारेण सर्वा वाक् सन्तृणेति'। 'अश्वत्थादिपत्रे दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवस्तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि तद्वदोंकारेण सर्वा वाग्व्याप्ते'तिभाष्ये। एतत्परममक्षरम्, 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं पर'मिति काठकश्रुतेः। **तदेतदृचाभ्युक्तम्**, तदेतत्परंब्रह्मरूपं प्रणवाक्षरं वक्ष्यमाणर्चा स्पष्टमुक्तमित्यर्थः। ऋचं व्याकुर्वन्ति **अत्रेत्यादि**। 'यो वेद निहितं गुहायां परमे व्योम'न्नित्यत्राक्षरे परस्थितेर्व्याख्यातत्वा'त्तद्धाम परमं ममे'ति वाक्याच्चाहुः **वर्तमान**मिति, प्रतिपाद्यत्वेन स्वरूपेण च वर्तमानम्। **लोकवेदप्रसिद्ध**मिति, यस्मिन् परब्रह्मणि देवा अग्न्यादयोवयवरूपा अध्युपरि निषेदुः स्थितवन्त इति श्रुतिपुराणयोर्दृश्यते, 'अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति च गीतावाक्यं तेन तथेत्यर्थः। **ऋचेति**, ऋचपदं वेदमात्रोपलक्षकम्। **अन्वये निदर्शन**मिति, अन्वयव्यभिचारे निदर्शनं श्रुतिराहेत्यर्थः। शेषं प्रकटार्थम्। प्रणवार्थभूतभगवज्ज्ञानस्यावश्यकत्वं तदज्ञानेऽध्ययनादिनैष्फल्यं बोधयन्त्यानयर्चा भगवज्ज्ञानसाधनीभूतायां वरणसाध्यायां भक्तावादरो दर्शितः। एवं श्रुत्यन्तरे साधनभक्तावप्यादरः श्राव्यत इत्याशयेनाहुः ऋगित्यादि। **अर्थस्तु**, हे स्तोतारो मदुत्कर्षवर्णनपराः। इयं वेदानामुक्तिः। पूर्व्यं सर्वकारणकारणरूपम्, तं लोकवेदप्रसिद्धं पुरुषोत्तमम्, यथाविदः भवन्तो यथावद्विदन्ति तत्स्वरूपमिति तथाभूताः ऋतस्य सूनृतवाणीरूपस्य वेदस्य गर्भं अन्तर्निहितम्, **जनुषा**, स्वस्य सम्पूर्णजन्मना, यावज्जीवमिति यावत्, पिपर्तन पूर्तियुक्तं सन्तुष्टं कुरुत सन्तोषयत, अत्र यथावित्त्वोक्त्या पूर्णज्ञानानां देहेन्द्रियप्राणान्तःकरणजीवविनियोगं भगवत्तोषार्थं दर्शयति श्रुतिरित्यादरो भगवद्धर्मेषु श्रुतेः स्फुटति। भगवत्तोषाभावे किमपि न सिद्ध्यतीत्याशयेन पूर्वोक्तकरणशक्त्यभावेनुकल्पमाह। आसमन्तात् अस्य परमपुरुषस्य नाम जानन्तः अखण्डशब्दब्रह्मरूपत्वेन जानन्तः विवक्तन विशेषेण वदत, नामस्वरूपं वित्त्वा तदेव कीर्तयत, अनुकल्पेन कथं सन्तोष इत्यतो नामस्वरूपमाह **चिदिति**, चित्स्वरूपं उपलक्षणमेतत्, सच्चिदानन्दात्मकम्। तथा च नाम्नो ज्ञानरूपत्वेन तद्द्वारा भगवतोपि ज्ञानं भविष्यति, तेन तोषोपि भविष्यतीत्यर्थः। नामस्वरूपस्याप्यज्ञाने तदुपायमाह गुरूपसत्तिरूपम्। हे विष्णो ते त्वत्सम्बन्धिनं महस्तेजोरूपम्। समभिव्याहारात्त्वत्तेजोरूपं सुमतिम्, निर्दोषपूर्णगुणत्वेन भगवन्तं जानन्तं सुबुद्धिं भक्तमिति यावत्तं भजामहे, तथा चान्यो भजतु मा वा वयं तु भजामहे इति श्रुतयः स्वकृतिं दर्शयन्ति। अनेन तदुपायेप्यादरो दर्शितस्तेन भगवद्धर्माणामत्यादृतत्वं बोधितम्। **तेनेति**, कथनेन। **तथेति**, प्रत्यवायः।

अग्रिमसूत्रमवतारयन्ति **नन्वित्यादि**। **श्रुतेरिति**, प्रत्यवायश्रवणस्यैवं तात्पर्यकत्व इत्यर्थः। **तयोर्युगपदित्यादि**। दाशतयीश्रुतौ यथाविद इति स्तोतृविशेषणाद्विधेयस्य करणे ज्ञानस्याधिकारप्रयोजकत्वं लभ्यते तेन ज्ञानोत्तरं करणमायाति। कर्माणि तु 'तमेतं वेदानुवचनेन ब्राह्मणा

विविदिषन्ति यज्ञेन दानेन तपसा श्रद्धयाऽनाशकेने'ति श्रुतेर्विविदिषायामेवोपक्षीणानि ज्ञानसम्पादनेपि नालं भवितुमर्हन्तीति दूरतरापास्तं कर्मप्राधान्यम् । एवं सति ज्ञानोत्तरं यत्र कथञ्चिद्वर्णाश्रमा भगवद्धर्माश्च युगपत्प्राप्तास्तत्र प्रबलदुर्बलभावस्य प्रत्यवायादिबोधकवाक्यैर्वैपरीत्ये भाते तदपवादायादरः प्रकाश्यते ततश्च भगवद्धर्माणां बाधाभावः सिध्यति ततश्च इतरेषामादराभावेपि प्रत्यवायश्रवणवैय्यर्थ्यपरिहाराय तेषां गौणकाले करणमद्धीधानवव्यवस्थाप्यतेऽतो न तेषां कर्माङ्गत्वमित्यर्थः ॥ २२ ॥

ननु यद्येवं तर्हि गौणमुख्यन्यायेन तेषां कर्मणामप्रयोजकत्वात्परमहंसेष्विव भक्तेष्वपि प्राप्तिरेव न सम्भवतीति व्यर्थोयं विचार इत्याकाङ्क्षायामग्रिमाधिकरणं पाक्षिकप्राप्तिं हृदिकृत्य तत्प्रयोजन-बोधनाय प्रणयतीत्याशयेन सूत्रं पठन्ति **तन्निर्धारणेत्यादि** । **एतादृशस्येति**, वक्ष्यमाणश्रुत्या सर्वदानन्दानुभवकर्तुः, **श्रूयत** इति, तापनीयेऽतिथिपूजारूपो गृहस्थधर्मो गान्धर्वीप्रभृतीनाम्, पूर्वकाण्डे च 'प्रह्लादो ह वै कायाधव' इत्यादिना प्रह्लादस्य श्रूयते इत्यर्थः । चकारात्स्मृतिसङ्ग्रहः । **उभयविधानामिति** । मर्यादायां पुष्टौ चाङ्गीकृतानां भक्तानां सिद्धमिति । तथा चैवं कर्मप्रसक्ते-र्विद्यमानत्वान्न पूर्वाधिकरणोक्तविचारवैयर्थ्यमित्यर्थः । ननु निर्धारणानियमात्कर्म कर्तव्यमिति यदुक्तम्, तन्न युज्यते, 'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सये'त्युपक्रम्य 'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम्, न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिद' इत्याधिकारिभेदेन व्यवस्थापनात्तावतैव फलसिद्धेः कथनाच्च भक्तियोगात्मकभगवद्धर्मैकारणमात्र एव भगवदिच्छाया निर्धारयितुं शक्यत्वादि-तरकरणस्य वैयर्थ्याच्चेत्याशङ्कायां नैवमिच्छा निर्धारयितुं शक्येत्याशयेन सूत्रशेषं व्याकर्तुमवतारयन्ति **तत्रेत्यादि** । **अत्रेति**, पूर्वोक्तरीतिकाशङ्कायाम् । स्फुटमन्यत् ॥ ॥

पूर्वाधिकरणे आदरात् भगवद्धर्माबाधस्य व्यवस्थापनेनैवानादृतानां गौणकालिकता प्राप्ता, प्रत्यवायश्रवणाधिकारिभेदाभ्यां च तदबाधबाधाविति नास्याधिकरणस्यावश्यकतेति हृदिकृत्य पक्षान्त-रमाहुः **अथवेत्यादि** । **आवश्यकत्वमुक्तमिति**, तथा सति ते विहितभक्त्यन्तःपातितया सिद्धा इत्यर्थः । किं तेनेत्यत आहुः **सर्वेत्यादि** । **असम्भवादिति**, तद्भावस्वभावेनासम्भवात् । **किं फलमिति**, श्रौतस्य फलस्य विहितसाधनसाध्यत्वात्तेषामकरणे किं फलमित्यर्थः । **तदिति**, मुख्यं फलम् । **तस्मिन्नित्यादि भवतीत्यन्तम्** । तथा च तद्दृष्टिपदं भगवत्सङ्गमाभिलाषौत्कट्येन तदेकज्ञानवत्परमित्यर्थः । **एतेनेति**, तन्निर्धारणानियमपदेन । **शेषं स्फुटम्** । एवमेतैः प्रथमान्तपदैः फलपूर्वावस्था मुख्यमनिर्वाच्यफलमानुषङ्गिकफलं चेति त्रयमुक्तं भवति । इदं कया सङ्गत्योक्तमित्या-काङ्क्षायामाहुः **प्रासङ्गिकमिति** । सूत्रपदेनानधिकरणत्वमुक्तम् ॥ २३ ॥

एवं राजसानामन्यासक्तिवारणायाधिकरणद्वयप्रणीतं मुख्यभक्त्यभिलाषोपजननाय च तत्फलमत्र प्रदर्शितम् । अतःपरं मुख्यभक्तिः केन भवतीत्याकाङ्क्षायामधिकरणान्तरं वदतीत्याशयेन सूत्रं पठन्ति **प्रदानवदेव तदुक्तमिति** । **साधनत्वेनेत्यादि** । सर्वात्मभावकरणकशरणप्राप्तिसाधनत्वेन रूपेण सर्वात्मभावस्य स्वकृतिसाध्यत्वं स्यादित्यर्थः । **तन्निवृत्तेरिति**, शत्र्वादिनिवृत्तेः । कथमस्य वाक्यो-क्तार्थस्य प्रदानतुल्यतेत्याकाङ्क्षायां तदुपपादयन्ति **प्रकृतेपीत्यादि** । **तदिति**, उक्तविधं शरणगमनम् । नन्वेवं स्वकृत्यसाध्यत्वे प्रदानत्वमेवास्य सिद्ध्यति, न तु तत्तुल्यत्वमित्याकाङ्क्षायामाहुः **भक्तस्येत्यादि** । नन्वेमपि शरणागतेरेव स्वकृत्यसाध्यत्वं सिद्ध्यति, न तु सर्वात्मभावस्येत्यतो वाक्यस्य योजनान्तर-माहुः **अथवेत्यादि** । शरणपदं मामित्यस्य विशेषणं तथा सति सर्वात्मभावस्यैव प्रदानतुल्यत्वं

निराबाधत्वमित्यर्थः । अस्मिन् पक्षे विचारस्य स्मार्तत्वमेव पुरःस्फूर्तिमारोहतीत्यतः पक्षान्तरमाहुः **यद्वेत्यादि । तत्तथैवेति**, परमात्मनो लभ्यत्वं वरणजन्यसर्वात्मभावसाध्यमेव, तेन सर्वात्मभावो वरणैकलभ्यो न त्वितरसाधनसाध्य इत्यर्थः । एतेन सर्वात्मभावसाधनकत्वप्राप्तिबोधकं पूर्ववाक्यं वरणलभ्यत्वबोधकश्रुत्यर्थनिर्णायकमिति न तस्य पक्षस्य स्मार्तविचारत्वमिति बोधितम् । ननु पूर्वोक्तवाक्ये अकुतोभयसाधनतया शरणागतेः सर्वात्मभावपूर्वकस्वप्राप्तेर्वोपदेशः । अकुतोभयं च मुक्तिरेवाक्षरप्राप्तिरूपा, 'अभयं वै जनक प्राप्तोसी'त्यादिश्रुत्या तथा निश्चयात् । एवं सति सर्वात्मभावस्य मुक्तिसाधनत्वमेव सिद्ध्यति, न पुरुषोत्तमप्राप्तिसाधनत्वम्, पुरुषोत्तमप्राप्तेः साधनकोटिप्रवेशेन तदपेक्षया मुक्तेरेवोत्कर्षश्च सिद्ध्यतीति पूर्वोक्तं सर्वं द्रविडमण्डकन्यायमनुसरतीत्याशङ्कायामकुतोभयपदतात्पर्यमाहुः **भगवदुक्ते**त्यादि । तथा चास्याः श्रुतेः 'रसो वै स' इत्यादिना रसरूपताप्रतिपादनोत्तरमानन्दमीमांसया ब्रह्मानन्दस्य गणितानन्दत्वसमर्पणोत्तरमुक्तत्वादस्या उक्त एवार्थो निश्चीयते, भगवद्वाक्ये'प्यथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखे'ति तादृशेतिगोप्यकथनं प्रतिज्ञाय 'केवलेन हि भावेन गोप्यो गावः खगा मृगाः । येन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसे'ति भावेन बहूनां प्राप्तिमुक्त्वा, को भाव इत्याकाङ्क्षायां 'रामेण सार्द्धं मथुरां प्रणीत' इत्यादिश्लोकचतुष्टयेन विगाढभावात्मकं तत्स्वरूपं स्वरूपज्ञानाभावेपि तेन भावेनैव परब्रह्मरूपस्य प्राप्तिमुक्त्वा, 'तस्मा'दित्यादिवाक्यद्वयेन सर्वात्मसाधनकस्वप्राप्त्यकुतोभयप्राप्ती उच्येते, तेनोक्तश्रुत्युक्तरसात्मकब्रह्मानुभवोत्तरकालीनतैवाकुतोभयस्य स्फुटतीति न पूर्वोक्तार्थो द्रविडमण्डकमित्यर्थः ॥ २४ ॥

एवमनेनाधिकरणेन सर्वात्मभावरूपाया मुख्यभक्तेर्वरणैकलभ्यत्वं निर्द्धारितम्, तत्र वरणश्रुतौ परमात्मनो वरणैकलभ्यत्वमुच्यते, न सर्वात्मभावस्येत्याकाङ्क्षायां तत्स्वरूपं वक्तुं तस्य वरणैकलभ्यत्वं च पुनर्दृढीकर्तुमधिकरणान्तरं प्रणयतीत्याशयेन सूत्रं पठन्ति **लिङ्गे**त्यादि ।

प्रतिबन्धकाभावस्येत्यादि । एतेन पूर्वाधिकरणसिद्धान्त आक्षिप्तः । वरदानमपि हि तपआदिसाधनैस्तोषे सति भवतीति सर्वत्र प्रसिद्धम्, तथा सति प्रतिबन्धकनिवृत्तेरागतैव कारणतेति वरणैकलभ्यत्वं न साधीय इति । सिद्धान्तं व्याख्यातुं लिङ्गभूयस्त्वबोधिकां श्रुतिं प्रदर्शयन्तस्तदर्थं प्रकटयन्ति **सामोपनिषत्स्वि**त्यादिना । प्रसिद्धस्थलनिर्देशो विप्रतिपत्तिनिरासाय, स च संवादः 'अधीहि भगव इति होपससाद सनत्कुमारं नारद' इत्यारभ्यान्तं ज्ञेयः । तत्र अधीहीत्यन्तर्भावितण्यर्थः । **अध्यापय** । 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणे'रितीङो ण्यतात्परस्मैपदम् । तादर्थ्येपि तेन पदव्यत्ययः । अत्र सर्वात्मभावस्य वरणैकलभ्यत्वं बोधयितुमतिदुरापत्वमुपपादयन्त'स्तं होवाचे'ति सनत्कुमारवाक्यस्य तात्पर्यमाहुः **प्रथमत** इत्यादि । 'उपसीदेती'त्यस्य 'तं होवाचे'ति श्रौतेन पदेनान्वयः । 'यद्वेत्थ तेन मोपसीद ततस्ते ऊर्ध्वं वक्ष्यामीति होवाच', यत्त्वं जानासि तत्प्रकथनेन मदुपसन्नो भव स्वाधीतं वद ततोतिरिक्तं तुभ्यं कथयिष्यामीत्युक्तवान् । **विद्यान्त**मिति । 'वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्या'मिति, वेदानां वेदो व्याकरणम् । पित्र्यं श्राद्धकल्पः । राशिर्गणितम् । दैवमुत्पातज्ञानम् । निधिर्महाकालादिनिधिशास्त्रम् । वाकोवाक्यं तर्कशास्त्रम् । एकायनं नीतिशास्त्रम् । देवविद्या निरुक्तम् । ब्रह्मविद्या शिक्षाकल्पच्छन्दश्चितयः । भूतविद्या भूततन्त्रम् । क्षत्रविद्या धनुर्वेदः । नक्षत्रविद्या ज्योतिषम् । सर्पविद्या गारुडम् । देवजनविद्या गन्धर्वोक्तयुक्तिनृत्यगीतवाद्यशिल्पादिविज्ञानानि । एतद्भगवोऽध्येमि ।

एतत्पूर्वोक्तं हे भगवन् अध्येमि स्मरामि । सोऽहं भगवो मन्त्रविदेवास्मि । शब्दार्थविदस्मि, परोक्षशाब्दानुभवमात्रं मेस्तीति स्वाधिकारमुक्तवान् । तर्हि किमवशिष्टमित्याकाङ्क्षायां 'नात्मवि'दित्यादि 'तारयत्वि'त्यन्तमाह । तथा चाप्तवाक्यप्रामाण्याच्छोकेन लिङ्गेन स्वस्यानात्मवित्त्वमनुमाय तज्ज्ञानेन शोकं तर्तुमुपसन्नोस्मीति नारदाशयः । तदा शोकतारणाय नारदेन विज्ञापितः सनत्कुमारः 'यद्वै किं चाध्यगीष्ठा नामैवैतन्नाम वा ऋग्वेद' इत्यादिना नारदोक्तानां सर्वेषां नामत्वबोधनपूर्वकं नाम्नो ब्रह्मत्वेनोपासनमुपदिश्य, 'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवती'ति तत्फलं शोकतारणायोक्तवान्, तदा नारदः केवलनामत्वेनोपासने उक्तफलाभावं ब्रह्मत्वेनोपासने उक्तं फलं तदपि यावन्नाम्नो गतमित्यनेन नामगतिपरिच्छिन्नमिति विमृश्य तेन शोकातरणं निश्चित्य ततोधिकं जिज्ञासमानोऽ'स्ति भगवो नाम्नो भूय' इति पप्रच्छ, इदं भूयःपदं न बाहुल्यार्थकमपि तूत्कर्षार्थकमित्याशयेनाहुः **भूय** इत्यादि । आधिक्यमुत्कर्षः । तत्र 'नाम्नो वाव भूयोस्ती'त्युत्तरिते'तन्मे भगवान्ब्रवीत्वि'ति विज्ञापयामास । तदा सनत्कुमारो 'वाग्वा नाम्नो भूयसी'त्यादिना नामरूपविज्ञापकत्वरूपं तन्माहात्म्यमुक्त्वा वाचो ब्रह्मत्वेनोपासनं तत्फलं च पूर्ववदुवाच । एवमग्रेपि । **तत्र मन** इति मननव्यापारविशिष्टमन्तःकरणम्, मननव्यापारश्च विचारात्मकः । एवं सङ्कल्पोपि कर्तव्याकर्तव्ययोर्विषयविभागेन समर्थनरूपस्तादृशान्तःकरणस्यैव वृत्तिविशेषः । चित्तं चेतयितृत्वं प्राप्तकालानुसन्धानवत्त्वम्, अतीतानागतविषयप्रयोजननिरूपणसामर्थ्यं च । ध्यानं शास्त्रोक्तदेवतालम्बनो विजातीयानन्तरितः प्रत्ययसन्तान एकाग्रतापरपर्यायः । विज्ञानं शास्त्रार्थविषयकं विशिष्टज्ञानम् । बलमन्नभक्षणजनितं मनसो विज्ञेयविभावनसामर्थ्यम् । अन्नमापस्तेज आकाशः प्रसिद्धाः । **स्मरः** स्मरणमप्रयत्नश्चित्तव्यापारः । **आशा** अप्राप्तवस्त्वाकाङ्क्षा, **तृष्णा** कामाद्यपरपर्याया, **प्राणः** सूत्रं आसन्यः सर्वसङ्घातनियामकः । एतस्य दर्शनमननविज्ञानैः सत्येनातिवादित्वं फलमुक्तं 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती'ति, न तु पूर्वोक्तोपासनानामिवोपास्यगतिपरिच्छिन्नम् । अतिवादित्वं च पूर्वोक्तनामाद्यतितवादित्वं एतदतिरिक्तनिकर्षवादित्वमिति यावत् । तत्र 'नापह्नुवीते'त्यनेन सङ्कोचवारणादुत्कर्ष उक्तोतिवादित्वे पूर्वोक्तोपासनाफलानामिवोपास्यगतिपरिच्छिन्नत्वं नोक्तमिति प्राण एवात्मेति भ्रमो नारदस्य मा भूदित्येतदर्थमाह, 'एष तु वा अतिवदति यः सत्येनातिवदती'ति । एवमुक्ते नारदेन प्राणस्य तत्त्वं न प्राणः, किन्तु सत्यमित्यवगतम्, ततः 'सोऽहं भगवः सत्येनातिवदानी'ति स्वाभिप्राये निवेदितेप्यपृष्टस्यावक्तव्यत्वात्तस्य प्रश्नकरणायाह 'सत्यं त्वेव विजिज्ञासितव्य'मिति । तदा 'सत्यं भगवो विजिज्ञास' इति प्रश्ने 'यदा वै विजानात्यथ सत्यं वदती'त्यादिना तत्कारणत्वेन विज्ञानं विज्ञानकारणत्वेन मतिमित्येवं श्रद्धानिष्ठाकृतिसुखान्तानुक्तवान् । अत्र षट्सु प्रश्नोत्तरयोर्वैयधिकरण्यम्, सत्यादिविषयकायां जिज्ञासायां तत्कारणानां कथनात् । ततः सुखस्वरूपजिज्ञासायां 'यो वै भूमा तत्सुख'मित्यादिना भूमानं सुखत्वेनोक्तवान्, तेन ज्ञायतेऽत्रोक्तानां सत्यादीनां कारणभूतभूमाभिन्नत्वं तज्ज्ञानगम्यत्वं च, 'प्राणा वै सत्यं तेषामेष सत्यम्, नित्यं विज्ञानमानन्दं ब्रह्मे'त्यादौ तथा सिद्धत्वात् सन्दंशपतितत्वान्मत्यादयोप्येवं ज्ञेयाः । ततो भूमस्वरूपजिज्ञासायां 'यत्र नान्यत्पश्यती'त्यादिना यस्मिन् रसरूपे ज्ञाते इतरविषकयदर्शनश्रवणविज्ञानाभावः स भूमेति भूमस्वरूपमुक्तवान्, सुखस्यान्तरेवाभिव्यक्तेर्भूमरूपस्यापि तस्य तत्रैवाभिव्यक्त्याऽऽनन्दत्वान्तर्वर्तित्वाभ्यां रसरूपत्वेन भूम्नः सर्वात्मभावरूपत्वं सिद्ध्यति, तदेतद्धृदिकृत्याहुः **एतेनेत्यादि** । एतादृशत्वं लौकिकेपि रसे भवतीति तद्वारणायाल्पे सुखं निराकृतं 'नाल्पे सुखमस्ती'ति, तत्राल्पे कथं न सुखमित्याकाङ्क्षायामल्पस्वरूपकथनपूर्वकं भूम्नोल्पस्य च यथायथममृतत्वं मर्त्यत्वं चाह 'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्य'मिति । तथा च शोकपर्यवसानान्नाल्पे सुखमित्यर्थः ।

अत्र भूम्नोऽमृतत्वकथनात्कालापरिच्छिन्नत्वं बोधितम्। तथा सत्युत्पत्तियोगात्स्थितिस्तस्य जिज्ञासेत्यतो नारदः पृच्छति 'स भगवः कस्मिन् प्रतिष्ठित' इति, तत्रोत्तरमाह 'स्वे महिम्नि यदि वा न महिम्नी'ति, अत्र पक्षद्वयकथनान्नारदस्य पुनः सन्देहो भविष्यतीत्याशङ्क्य निषेधवाक्यं व्याकरोति 'गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमी'ति, गोअश्वादिरूपे महिम्नि न प्रतिष्ठित इत्येवमहं ब्रवीमीत्यर्थः। तर्हि स को वा महिमा यत्र प्रतिष्ठित इत्याकाङ्क्षायां 'अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति ब्रवीमीति होवाचे'ति श्रुतिराह। गोअश्वादिभ्योऽन्यो यो महिमा स्वे भक्ते य उत्कर्षरूपो भावस्तस्मिन्प्रतिष्ठित इत्यर्थः। (तेनेदं सर्वात्मभावरूपं भूमाख्यं सुखमत्यन्तैकान्तभक्त एवेति निश्चीयते।) ततः स कीदृक् महिमा येन तत्रैव प्रतिष्ठित इत्याकाङ्क्षायां तं विवृणोति 'स, एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमित्यथात अहङ्कारादेश' इत्यादि। तथा च यस्य सर्वत्र तद्भानं सर्वस्मिंश्च तदभेदभानं इति एवंप्रकारेण अथ एवंभानोत्तरं अतः अस्मात् भानादहङ्कारादेश एव भगवत्प्रतिरूढतया स्वस्मिन् भूमत्वप्रतिसन्धाने स्वस्यैव पूर्ववत्सर्वत्र भानं सर्वस्मिन् स्वाभेदभानं च तादृशो यः तस्मिन् प्रतिष्ठित इत्यर्थः। एतेन स्वे आत्मीये परमैकान्तिकभक्ते महिम्नि तन्निष्ठे भावे स्वविभूतिरूपे प्रतिष्ठितो नेतरत्रेति भावो बोधितः। तर्ह्यात्मादेश इत्यादिकं किमित्युच्यत इत्यत आहुः **तत्र विरहभावे**त्यादि। **एतेषा**मिति, विरहभावकृततत्तत्स्फूर्तिरूपाणां ज्ञानानाम्। तथा च पूर्वोक्तभाववद्भक्तस्वरूपनिश्चायनार्थमेवेदमप्युच्यत इत्यर्थः। अत्राहङ्कारादेशात्मादेशयोः कथनाद्वामदेववत् ज्ञानिभावस्यैव विभूतिरूपत्वमिहाभिसंहितं न तु भक्तभावस्येति शङ्का भविष्यतीति ज्ञानिनः सकाशाद्विवेक्तुमाह 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द' इति। उक्तप्रकारकदर्शनमननविज्ञानवानुक्तप्रकारकरत्यादिरूपसंयोगभाववान् भवति, न तु शुष्काद्वैती वाकर्मा कूटस्थवद्वा भवतीति भक्त एवायं बोद्धव्य इत्यर्थः। एवं तत्स्वरूपं निष्कृष्य पूर्वं शोकपारतारणार्थं चोदितत्वात्तत्तारणोपायत्वमेतस्यैव भावस्य नेतरस्येति बोधयन्नुक्तप्रकारकभक्तस्य फलमाह 'स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवती'ति। सः भूमात्मरत्यादिमान् स्वस्मिन् भूम्न्यात्मन्येव राजमानो भवति, तस्य नामाद्याशापर्यन्तलोकेषु स्वातन्त्र्यं भवति, ततः सर्वप्राप्त्या शोकपारतीर्णो भवतीत्यर्थः। एवं शोकतारणोपायमुपदिश्य उपायान्तरं निराकर्तुमन्यथा ज्ञानवतो निन्दति 'अथ येऽन्यथातो विदुरन्यराजानस्ते-क्षय्यलोका भवन्ती'त्यादि। अन्यस्मिन् भूमातिरिक्ते राजमाना भवन्तीत्यर्थः। नन्वत्र जीवन्मुक्त एव वक्तव्यः, 'सर्वेषु लोकेषु कामचारो भवती'ति गतिस्थित्योर्बोधनात्। नतु भक्तः। तादृशस्य भक्तस्य पूर्वोक्तरीतिकविरहभावे दशमावस्थाया एव सम्भवेन गतेः सुतरां बाधितत्वादित्याकाङ्क्षायामाहुः **ततः संयोगे**त्याद्युक्त**वा**नित्यन्तम्। ततः पूर्वोक्तसर्वात्मभावोत्तरं संयोगभावे असतीति पदच्छेदः। श्लोकार्थमाहुः **तत** इत्यादि। **श्लोकार्थ**स्तु, पश्य उक्तदर्शनवान् मृत्युरोगौ दुःखभावं न कस्यापि पश्यति, उतेति पादपूरणे पक्षान्तरे वा। दुःखतां दुःखसत्तामेव न पश्यति तथा च मृत्युरोगयोः (का)वार्तेत्यर्थः। दर्शनविषयमाह **सर्व**मिति, सर्वं भूमात्मकमेव पश्यतीत्यर्थः। फलमाह 'सर्वशः सर्वमाप्नोती'ति। तथा सति न पुनः शोक इत्यर्थः। प्राप्तौ प्रकारमाह 'स एकधे'त्यादिना। सः भूमा पश्यार्थमेवं प्राणादिरूपो भवति, तेन सर्वं पश्यः प्राप्नोति, पश्यो वैवं भूत्वा भूम्नः सर्वं प्राप्नोतीत्यर्थः। स एकधेति श्लोकेन 'आत्मत आविर्भावतिरोभावा'विति श्रुत्युक्तयोस्तयोः प्रकार आविर्भावमुखेन विवृतः। एवं फलपर्यन्तं भावस्वरूपमुक्तम्, तेनापि भक्त एवात्रोच्यत इति दृढीकृतम्। अयमुपदेशो न यस्मै कस्मैचिद्विदुषे कर्तव्योऽपि तु उत्तमाधिकारिणे एवेति बोधनाय श्रुतिराह 'तस्मै मृदि-

तकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमार' इति । सनत्कुमारस्य कृपालुतामाह 'तं स्कन्द इत्याचक्षत' इति । स वरदानेन शिवस्य पुत्रोपि जातस्तेन तथेत्यर्थः । अतःपरं परं सूत्रं व्याकर्तुमाहुः **स चेत्यादि** । **स** इति भगवान् प्राणपोषकः । **स** इति, सर्वात्मभावः । **तथेति**, अत्यनुग्रहप्रकारेण । **तंचेति**, वरणं चेत्यर्थः । नन्वात्मादेशे 'आत्मैवेदं सर्व'मिति सर्वस्यात्मत्वभानं श्रावितं तथा सति स्वास्मन्यपि तदभेदो भास्यत्येव, भाते च तस्मिन् पूर्वोक्तरूपः सर्वात्मभावस्तेन प्रतिभन्त्स्यते, न हि स्वात्मत्वेन ज्ञाते ब्रह्मणि विरहभावो वक्तुं शक्यो विरोधादिति हृदिकृत्याहुः **ज्ञानमार्गीयेत्यादि** । **उपपादितमिति**, फलदित्सया पूर्वमेव सत्वात्तत्प्रतिबन्धकं भगवता न क्रियते एवेतीदमपि न क्रियत इत्येवं विविच्योक्तमित्यर्थः ।

पूर्वोक्तमर्थं दृढीकर्तुं सूत्रद्वयेन शङ्कत इत्याशयेन सूत्रं पठन्ति **पूर्वेति** । **निरूपित इति**, ऐतदात्म्येति महावाक्ये निरूपित इत्यर्थः । **उत्तरमिति**, सनत्कुमारोक्तं प्रत्युत्तरम् । **बाह्यं तदिति**, बाह्यपूजनम् । द्वितीयं पठन्ति **अतिदेशाच्चेति** । **तत्पूर्वमिति**, पदद्वयमिदम् । **तत् जगत् पूर्वं** पूर्वप्रपाठके इत्यर्थः । **अनूद्येत्यादि** । 'यद्वै किं चाध्यगीष्ठा' इत्यनेनानूद्य नामात्मकब्रह्मत्वं तत्रातिदिश्यते, यथा कौण्डपायिनां सत्रे 'मासमग्निहोत्रं जुहोती'त्यग्निहोत्रनाम्ना प्राकृताग्निहोत्रधर्मा अतिदिश्यन्ते तथात्र तेषु नामत्वविधानेन नामात्मकब्रह्मणि प्रतीतं ब्रह्मत्वमृगादावतिदिश्यत इत्यर्थः । **इत इति**, ब्रह्मधर्मातिदेशेनर्गादीनां ब्रह्माभेदबोधनादित्यर्थः ।

एवं सूत्रद्वयेनाशङ्क्याग्रिमेण परिहरतीत्याशयेन सूत्रमाहुः **विद्यैवेत्यादि** । ननु विद्याशब्दो ज्ञानसामान्ये प्रसिद्धः सर्वात्मभावरूपे विशेषे कथं नियन्तुं शक्यत इत्याकाङ्क्षायां तदुपपादयितुं वरणादिश्रुत्येकवाक्यतया प्रकृतश्रुतितात्पर्यमाहुः **अत्रेत्यादि** । तदुद्घाटयितुं वरणश्रुतिं व्याकुर्वन्ति **नायमित्यादि** । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा'मिति तु मुण्डकश्रुतिः । **अत एवेति**, पुरुषोत्तमस्य वृणुतात्मात्मत्वादेव । तस्यैष आत्मा सन्नर्थात्तं स्वां तनुं वृणुत इत्यन्वयो बोध्यः । ननु माध्यन्दिनानामन्तर्यामिब्राह्मणे 'यस्यात्मा शरीर'मिति सामान्यत आत्ममात्रस्य शरीरत्वेन श्रावणात्कथं वृतस्यैतत्तनुरूपत्वमित्याकाङ्क्षायामाहुः **तद्वरणेत्यादि** । तथा च तत्र यद्यपि शरीरत्व-मात्मनः श्रावितं तथापि 'य आत्मानमन्तरो यमयती'ति नियन्तव्यत्वायैव साधारण्येन श्रावितं न तु स्वकीयत्वकथनपूर्वकम् । अतः शरीरत्वसाधारण्येपि यं स्वीयत्वेनालोचितवान् तमेव वृणुत इत्यर्थः । विवृणुत(इति)पाठेप्ययमेवार्थः । ननु विवृणुत इति पाठेऽयमर्थो न स्फुटति, विवरणपदस्य प्रकाशार्थ-त्वात् । तथा च यं वृणुते तस्य स्वां तनुं पश्यतीत्येवार्थो युक्त इति चेत्, सत्यम्, तथापि सर्वेषां जीवानां तुल्यत्वाद्वरणीये कश्चिद्विशेषो वाच्य एव । स यदि साधनकृतो विवक्षितस्तदा पूर्वार्धासङ्गतिः । यदि साधनाभावकृतस्तदा पामरपशुकीटमात्रे तदापत्तिः । अतोन्यथानुपपत्त्याऽऽलोचनकृत एव वाच्यः । सोपि ज्ञानिभक्तयोः साधारणश्चेद्भावभेदात्तनुपदवैयर्थ्यापत्तिश्च, स्वं विवृणुत इत्येतावतैव चारितार्थ्यात् । अतस्तनुपदानुरोधात्साकारस्यैव प्रकाशो वक्तव्यः । स तु प्रायो भक्तानामेव । यत्तु, 'यमेवैष वृणुते तेन लभ्य' इत्यस्य यः प्रार्थयते तेन प्रार्थने लभ्य आत्मकामनयैवात्मा ज्ञेय' इति व्याख्यातं कैश्चित् । तत्र व्याख्येयविरोधः स्फुट एव । किञ्च । गीतायां 'एवं सततयुक्ता ये' इत्यर्जुनप्रश्ने भगवता 'मय्यावेश्य मनो ये मा'मिति तथैवोत्तरदानात्, 'ज्ञानी त्वात्मैव मे मत'मिति भजनमुपक्रम्यैव तस्या-त्मत्वकथनात्, शुष्कज्ञान्यपेक्षया योगिन उत्कर्षमुक्त्वा ततोपि भक्तोत्कर्षस्यैव 'तपस्विभ्योधिक' इति

सन्दर्भे कथनात्, भक्तस्यैव प्रियत्वकथनाच्चोक्त एवार्थः । अतस्तस्मिन्नपि पक्षे तनुप्रकाशलिङ्गेन भक्तस्यैव वरणविषयत्वं निश्चीयते, तथा सति स्वीयत्वं तेष्वेव सिद्धमिति पूर्वोक्तप्रकारेऽपि न कश्चिद्दोष इति हृदि-कृत्योक्तार्थदार्ढ्याय श्रुत्यन्तरमाहुः अत एवेत्यादि । तथा च यदि लाभपदार्थः प्रकाशात्मक एव स्यात्तदास्यामृचि प्राप्तिपदार्थः कामभोगरूपो नोच्येत, अतो न पूर्वोक्तेऽर्थे विप्रतिपत्तव्यमित्यर्थः । एतच्छ्रुतौ विप्रतिपत्तिश्चेत्तदा पूर्वग्रन्थमवलोक्य निरसनीयेत्याशयेनाहुः एतदित्यादि । नन्वियं श्रुतिः काठके मुण्डके चास्ति । तत्र काठके 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्पश्यसि तद्वदे'ति प्रश्ने । 'सर्वे वेदा यत्पदमामनन्ती'त्यादिना 'एतद्ध्येवाक्षरं ब्रह्मे'ति प्रकृत्य 'नायमात्मे'ति पठितम् । मुण्डकेऽपि 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्य'मित्यक्षरमेवोपक्रान्तम्, एवं सति पुरुषोत्तमप्रसङ्गस्य कुत्राप्यदर्शनात्कथमत्रैवं व्याख्यायत इति चेत् । अनवधाय वदसि । काठके सर्ववेदवेद्यत्वं परस्यैवोच्यते, तच्च वाच्यवाचकाभेदविवक्षया प्रणवे वक्तुमक्षरपदेन प्रणवं परामृश्य तत्र ब्रह्मत्वमुपासनासाधनत्वाय विधीयते मन्त्रद्वयेन, ततो 'न जायते न म्रियते वे'ति मन्त्रद्वयेनोपासकस्वरूपमुक्त्वा 'अणोरणीयान्महतो महीया'नित्यादिमन्त्रत्रयेण तस्य परस्यात्मनो विरुद्धधर्माश्रयत्वादिकमुक्त्वा तस्य ज्ञानं कथमित्याकाङ्क्षायां 'नायमात्मे'ति पठ्यतेऽतो नात्र तद्गन्धः । मुण्डकेऽपि, प्रथमे 'यत्तदद्रेश्यमग्राह्य'मित्यादिना सर्वकारणत्वेन प्रस्तुतं द्वितीयेऽपि 'सुदीप्तात्पावकाद्विस्फुलिङ्गा' इति मन्त्रेण तस्मात्सजातीयविजातीयसृष्टिमुक्त्वा 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रोऽक्षरात्परतरः पर' इति मन्त्रे पूर्वोक्तादक्षरात्परतः परोतिरिक्त उक्तः । तृतीयेऽपि 'द्वासुपर्णे'त्यनेनान्तर्यामितया तमेव परामृश्य ततो 'जुष्टं यदा पश्यत्यन्यमीश'मित्यादिना तद्दर्शनफलमुक्त्वा, ततो 'ज्ञानप्रसादेने'त्यनेन निष्कलज्ञानात्तद्दर्शनमुक्त्वा ततो ज्ञानप्रसादेऽपि न स्वसामर्थ्येन पश्यति किन्तु तत्कृतसामर्थ्येनैवेत्याशयेन 'नायमात्मे'त्यादिकं पठ्यते, तेनोभयत्रापि पुरुषोत्तम एव प्रकृत इत्यनवद्यम् । एतदेव गीतायामुपबृंहितम् । **द्वाविमौ पुरुषौ लोक** इत्यारभ्य **प्रथितः पुरुषोत्तम** इत्यन्तेन । तस्मान्नात्र शङ्कालेशः । तदेतदभिसन्धायोक्तं **एतच्चे**त्यादि । आनन्दमयाधिकरणेऽक्षरादुत्तमस्य रसरूपस्यैव परशब्देन निश्चितत्वात्परमव्योमपदेन निश्चितत्वादन्नमयादीनां तद्विभूतित्वेन निश्चितत्वाद्वरणेनैव तत्प्राप्तेश्चोक्तत्वात्तथेत्यर्थः । ननु तथापि तेषु तेषु भक्तेषु वरणमप्यनेकविधमिति कथं रसमार्गीयमेवात्र ग्रहीतुं शक्यत इत्याकाङ्क्षायामाहुः **किञ्चे**त्यादि । तथा चाग्रिमश्रुत्या तथावसीयत इत्यर्थः । श्रुतिस्तु मुण्डके, 'नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गा'दिति । ननु श्रुतौ बलशब्दो वर्तते न भक्तिशब्द इति कथं तन्निश्चय इत्याकाङ्क्षायां बलशब्दस्य भक्तिवाचकत्वमुपपादयन्ति **बलकार्य**मित्यादिना । **उच्यत** इति, परोक्षवादेनोच्यते । ननु बलशब्दः शरीरसामर्थ्ये प्रसिद्धस्तत्परित्यज्य कथं भक्तिपर इत्यत आहुः **अन्यथे**त्यादि । तथाच पूर्ववाक्योक्तार्थानुपपत्त्या बलसदृशमनोव्यापाररूपभक्तिलक्षकत्वेनाद्रियत इत्यर्थः । ननु पूर्ववाक्ये प्रवचनादीनामेव निषेधो नत्वितरेषामिति नानुपपत्तिरित्यत आहुः **वरणे**त्यादि । तथा च उत्तरार्धे एवकारेण वरणस्यैव हेतुतानिश्चायनात् प्रवचनादीनां जीवबलकृतयावत्साधनोपलक्षकत्वे अनुपपत्तेः सिद्धौ प्रमाणासहायस्य शारीरबलस्य सुतरां ग्रहीतुमशक्यत्वादस्मिंश्च वाक्ये बलाभावनिषेधमुखेन बलस्य हेतुताबोधनाल्लौकिकप्रामाणिकबलाभ्यामतिरिक्तमेव बलमत्र बलपदेन ग्राह्यं तच्चोक्तरीत्या भक्तिरेवेत्यतः सैव गृह्यते, वस्तुतस्तु 'बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्, या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवले' त्यादौ प्रभुवशीकारकसामर्थ्येऽपि बलपदप्रयोगदर्शनात्सामर्थ्ये एव शक्तं बलपदं प्रकरणादिना तद्विशेषे पर्यवस्यति, तेन न कोऽपि शङ्कालेश इति भावः । श्रुतौ बलपदेन भक्तिमुक्त्वाग्रेण च

'प्रमादा'दित्यादि यदुच्यते, तेन भक्तस्याप्यप्रमादः सलिङ्गं तपश्च सहकारित्वेनोच्यते, तत्राप्रमादो भगवदिच्छानुरूपाचरणादिः । सलिङ्गं तपः सर्वात्मभावसहितो विरहभावो ज्ञेयः । उत्तरार्धं व्याकुर्वन्ति **एतादृशस्ये**त्यादि । **तद्धृदय** इति, श्रौतस्य षष्ठ्यन्ततत्पदस्य तात्पर्यकथनायेदम् । एवं श्रुतिद्वयार्थं निश्चित्य सौत्रस्य विद्यापदस्य सर्वात्मभावबोधकत्वमुपपादयितुं विषयवाक्यतात्पर्यं पूर्वसङ्गतिं च विशदीकुर्वन्ति **प्रकृत** इत्यादि । **ब्रह्माभेदबोधनेने**ति, अक्षराभेदबोधनेन । **तत्रे**ति, सनत्कुमार-नारदयोर्भक्तयोः संवादे । **तद्धेत्वसिद्धि**रिति, पूर्वपक्षनिरूपितप्रकरणैक्यरूपस्य हेतोरसिद्धिरित्यर्थः । एवं प्रकरणे भिन्ने सत्यतिदेशोऽप्यकिञ्चित्कर एव, नह्यतिदेशमात्रेण तदवान्तरभेदत्वसिद्धिः क्वापि सिद्धा । निर्धारणं दर्शयन्ति **सुखं त्वि**त्यादि । पूर्वत्र 'सदेव सौम्ये'ति सद्रूपं आत्मानं प्रकृत्य तदभेदज्ञानमुपदिष्टम् । इह तु निरवध्यानन्दरूपं जिज्ञास्यत्वेन निर्धारयतीति विषयभेदान्न पूर्वं ज्ञानं किन्तु मुख्या सर्वात्मभावरूपैव विद्योच्यत इत्यर्थः । ननु भूमात्र जिज्ञास्यत्वेनोच्यते, तावता सर्वात्मभावः कथं सिध्यतीत्याकाङ्क्षायां भूमलक्षणवाक्ये सिध्यतीत्याशयेनाहुः **भूम्न** इत्यादि । ननु सर्वात्मभाववतां लीलोपयोगिपदार्थदर्शनं दृश्यते, भूमलक्षणे तु तदितरदर्शनं निषिध्यत इति भूमलक्षणे सर्वात्मभावो नोच्यत इत्याकाङ्क्षायामाहुः **तथा सती**त्यादि । निरासप्रकारमाहुः **तैरि**त्यादि । तथा च तद्दर्शनं प्रभुकृतं न भक्तकृतमतो भक्तेषु न सर्वात्मभावसम्भवाभाव इत्यर्थः ।

इममेवार्थमग्रिमसूत्रे स्फुटीकरोतीत्याशयेन सूत्रं पठित्वा व्याचक्षते **दर्शनाच्चे**त्यादि । पुनरा-शङ्क्य सूत्रान्तरमवतारयन्ति **नन्वि**त्यादि । **तमाद्ये**ति । पूर्वतन्त्रे असंजातविरोधत्वेनोक्तक्रम-प्राबल्यस्य स्थापितत्वात्तदनुरोधेनैवोपसंहारगताः शब्दा नेया इत्यर्थः । **आत्मपदाना**मिति, 'अथात आत्मादेश' इत्यारभ्य पठितानां तेषाम् । **वाक्यभेद** इति, अर्थैकत्वाभावात्स इत्यर्थः । सूत्रं पठित्वा समादधते **श्रुत्यादी**ति । श्रुतिं दर्शयन्ति **प्रकृत** इत्यादि । न केवलमुदासीनतया ज्ञायमानः शोकं तारयति, अपि तु लभ्यमानः, अन्यथा 'आत्मलाभान्न परं विद्यत' इति श्रुत्यन्तरात्तदलाभे परमफलाभावाच्छोको नापेयात् । लाभश्च न ज्ञानमात्रं किन्तु स्वाधीनतापुरस्कृतमाकाङ्क्षापूर्त्या विलक्षणानन्दजनकं ज्ञानम् । स च लाभो वरणाधीन इति शोकतारणश्रुतिसार्थक्यसम्पा-दिका वरणश्रुतिरेव बलीयसी । आदिपदसूचितं हेत्वन्तरं दर्शयितुं **अपरं चे**त्यादि विभ-जन्ति **सही**त्यादि । **सनत्कुमारोक्तरूप**मिति, सनत्कुमारोक्ते वाक्ये रूपे किं नामादिरूपं लक्षीकृत्येत्यर्थः । तथा चैतेन प्रश्नद्वयेनाप्युपक्रमगतमात्मपदं पुरुषोत्तमपरमेवेत्यर्थः । नन्वेवमात्मपदस्य पुरुषोत्तमपरत्वेपि सर्वात्मभावलिङ्गस्याभावात्तस्य कथं सिद्धिरित्यत आहुः **तदे**त्यादि । तथा च द्वितीये प्रश्नोत्तरे सर्वात्मभावलिङ्गदर्शनादेव सिद्धिरित्यर्थः । एतेनावश्यकोपपत्तिरप्येतत्तात्पर्यनिर्णायकेत्युक्तम् । उक्तमर्थं दृढीकर्तुमाशङ्क्य सूत्रान्तरमवतारयन्ति **नन्वेतये**त्यादि । **अनुबन्धादिभ्यः प्रज्ञान्तर-पृथक्त्ववद्दृष्टश्च तदुक्त**मिति, अत्र न बाध इत्यनुषज्यते । तथा चानुबन्धादिभ्यो हेतुभ्यः सर्वात्मभावलिङ्गात्मकभावस्य निश्चायनात्तद्बाधोऽत्र न वक्तुं शक्य इत्यर्थः । इममर्थं व्याकर्तुं पूर्वं श्रुतिं व्याचक्षाणा आहुः **भूमे**त्यादि । तथा च यदि तथाभिप्रेया'त्स्व' इत्येकमेव पदं वदेत्, 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति च न व्याकुर्यादतस्तथेत्यर्थः । नन्वत्र 'स्वे महिम्नी'ति कथनोत्तरं 'यदि वा न महिम्नी'त्याशङ्क्य 'गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानी'त्यनेन महिमस्वरूपं निरूप्य, 'नाहमेवं ब्रवीमी'त्यनेन तत्र भूमप्रतिष्ठां निषिध्य 'ब्रवीमीति हे'त्यनेन स्वस्मिन् प्रतिष्ठां निगमयित्वा पूर्वोक्तमहिमनि प्रतिष्ठानिषेधे हेतुरुच्यते 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति, एवं सति

'स्वे महिम्नी'त्यस्य स्वस्वरूपे व्यापक इत्यर्थः सेत्स्यतीत्यस्वरसमुद्भाव्य • पक्षान्तरमाहुः **स्वरूपात्मके महिम्नीति वेति**। अनेनापि प्रकारेण व्याख्याने तत्प्राप्तिरित्यर्थः। तथात्वं व्याकुर्वते **भगवदित्यादि**। सर्वभावस्य रसात्मकत्वाद्भगवदभेदः प्रागेव विवृत इति महिमरूपत्वं विवृण्वन्ति **तदितरेत्यादि**। तथा च भावस्याधिकरणसापेक्षत्वादर्थादेव तत्प्राप्तिरिति सोपि पक्षो न दुष्ट इत्यर्थः। एवं सर्वात्मभाव एवात्रोच्यत इति व्याख्याय पूर्वोक्तशङ्कामपाकर्तुं सर्वात्मभावलिङ्गानि स्फुटीकुर्वन्तः सूत्रस्थं हेतुं व्याकुर्वन्ति **सत्त्वित्यादि**। **त्रिविधा** इति द्वितीया निरूप्येत्यनेनान्वेति। **तमेवानुबध्नाति**, वृतभक्तं वृतभक्तनिष्ठं भावमेव वा गोचरयतीत्यर्थः। तत्र हेतुः। **तच्छब्देस्यत्यादि**। 'स वा एष' इत्यनेन पुरुष उच्यते, 'एवं पश्य'न्नित्यादिना दर्शनमननादिकर्तृताबोधनेन भाववैशिष्ट्यं च स्फोर्यंत इति पूर्वोक्तानुबन्धदर्शनात्तादृशभक्तनिष्ठसर्वात्मभावरूप एव महिमा तत्राभिप्रेत इत्यर्थः। **एवं सतीति** भिन्नं वाक्यम्। उक्तरूपे महिम्नि विद्यमान एव श्रुतिसङ्गतिरित्यर्थः। लिङ्गं व्याकर्तुमादिपदार्थमाहुः **आदिपदादित्यादि**। तत्स्वरूपं विवृण्वन्ति **पूर्वमित्यादिना**। **स्फुटमग्रे**। ननूक्तयुक्तिभिरत्र भवतु सर्वात्मभावस्तथाप्यत्र फलत्वेन सर्वग्रन्थिमोक्षस्यैवोक्तत्वात्तस्य च 'भिद्यते हृदयग्रन्थि'रिति श्रुत्यन्तरस्वारस्येन परावरदर्शनफलरूपस्यैव ग्राह्यत्वात्तस्य च 'तमेवंविद्वानमृत इह भवती'त्यादिश्रुत्यन्तरे मुक्तिरूपत्वेनैवोक्तत्वादस्यापि मुक्तावेव यदि पर्यवसानं तदा फलतो न कश्चिद्विशेषः। अथ न, तदा प्रकृते फलोक्तिविरोध इत्यस्यापि फलबलेन पूर्वविकल्पत्वमेवेत्याशङ्कां हृदिकृत्वा सूत्रांशमवतारयन्ति **ननु सर्वेत्यादि**। **प्रज्ञान्तरपृथक्त्ववदिति**, प्रज्ञानन्तरकृतं पृथक्त्वं प्रज्ञान्तरपृथक्त्वं तद्वत् न बाध इत्यन्वयः। एतमेवार्थं व्याकुर्वन्ति **मुमुक्षुभक्तेत्यादि**। शेषं प्रकटार्थम्। **दृष्टश्च तदुक्तमित्यत्रापि** न बाध इत्यन्वयो बोध्यः। एवं च दर्शनान्तरे हृदयग्रन्थिभेदनं नानाविधवृत्त्यनुत्पत्तिरूपम्, अत्र तु सर्वग्रन्थीनां प्रविमोक्षो नानाचित्त्युदयेपि तासामबन्धकत्वरूपमिति दर्शनभेदात्फलभेदस्तत्क्रतुन्यायादप्युपपन्न इति भावः।

लिङ्गविरोधपरिहारायाग्रिमं पठतीत्याशयेन सूत्रं पठन्ति **न सामान्यादिति**। विरोधं व्युत्पादयन्ति **नन्वित्यादि**। **प्रतिपाद्यत** इति। 'सालोक्यसार्ष्टी'ति वाक्ये उच्यते। **एवं सतीति**, श्रुतिस्मृत्योर्विरोधे सतीत्यर्थः। उक्तप्रमाणं सालोक्यम्। **अनेकश** इति, 'आदित्यो यूपः यजमानः प्रस्तरः स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुष' इत्यादावित्यर्थः। **प्रकरणादिति**, लभ्यत इति शेषः। **अत एवेति**, लोकान्तरस्य मृत्युतुल्यत्वादेवेत्यर्थः।

परेणेति सूत्रे॥ श्रुतिवाक्यपदेन, 'न पश्य' इति श्लोको बोध्यः। **अनुबन्ध** इति, अनु-पश्चाद्बध्यते सम्बध्यत इत्यनुबन्धः। उक्तार्थे अपुष्टार्थत्वं विभाव्यार्थान्तरमाहुः **अथवेत्यादि**।

अग्रिमसूत्रभाष्यं तु प्रकटार्थम्। अन्ये त्वेतत्सूत्रमग्रिमाधिकरणे योजयन्ति। तदग्रे विचारणीयम्॥ २५॥

एवमनेनाधिकरणेनाविहितभक्तिरूपसर्वात्मभावस्वरूपं तस्य सर्वसाधनोत्कृष्टत्वं तत्फलं च निर्धारितम्। अतःपरम्।

---

१. एतावदेवोपलब्धमिति।

EDITOR'S NOTE.

After the publication of the first two Pādas of the Adhyāya III of the Anu Bhāshya with Bhashya-Prakās'a and Ras'mi, we have been fortunate in the further acquisition of manuscripts by the Grace of Lord Krishna. In the introduction to Pāda I we stated that the Bhāshya Prakās'a the original of which in the author's own hand is in our possession missed the final revision made by the author himself, and the additional portions found in some copies of the Prakās'a were of the authorship of S'rī Purushottamajī himself even though not found in the original manuscript. This inference was based merely on our familiarity with the style of Purushottamaji, which was apparent in those passages. Our diffidence was the more because the learned author of Ras'mi had not chosen to write his commentary on those passages Gopes'varaji has based his Ras'mi on the original manuscript of Prakās'a which came in his possession through his father Gokulotsavaji who was adopted in the Purushottamaji's house by Mahārani Vahuji at Surat. Gopes'varaji would seem to look upon the passages of Prakās'a not found in the above original with an eye of suspicion, and we find him in the Pāda III throwing doubt on those passages of Prakās'a on the ground of their not being found in the original in his possession. In his Ras'mi also he omits commenting on those passages. This decision of Gopes'varaji was rather unfortunate. As will be presently seen these passages of Prakās'a are Purushottamaji's own, and Gopes'varaji's omission to comment on them has increased our difficulties in approaching those passages for a thorough understanding.

It was rather a happy coincidence that in basing the text of the Prakās'a for our edition we did not follow Gopes'varaji's view. We always felt that those additional passages of the Prakās'a, though not found in the original, were of the authorship of Purushottamaji. Our surmise was that Purushottamaji's original must have been got copied fair, and a final revision on the same must have been made by Purushottamaji himself. Thus these additional passages were due to a final revision and as such ought to be included in the authentic text of the Prakās'a. Hence we have acted accordingly from the very beginning. Our conjecture as to the final revision has happily turned out to be true. Through the kindness of Mr. Natavaralal Iccharam Desai B. A. of the famous Gujarati Press we have been able to secure that very copy of the Prakās'a in which Purushottamaji has made additions and revisions in his own hand and which are not found in the original wholly written in his own hand. Except these additions and revisions the rest of this manuscript is written in neat handwriting by a scribe. This neatly written portion contains the whole of Purushottamaji's Prakās'a original, while the additions and revisions seem to have been made by Purushottamaji himself in his own hand when he finally revised his Bhashya-Prakās'a. The text of the Prakās'a of the present Pāda is based on the original so far as its text was common with the above-mentioned fair copy and for portions not found in the above-mentioned original, it is based on the

additions in Purushottamaji's hand in the fair copy. Thus the whole text of the Prakās'a is based on the most authentic basis. The same lines will be followed in the edition of the subsequent portions

Another thing to note is this. The last Adhyāya and a half, though the authorship of the same is attributed to Vallabhacharya, is actually from the pen of Vitthales'vara, his second son. Scholars like Krishnachandraji and Purushottamaji have mentioned this fact in their works Vritti and Prakās'a respectively III. 2-34. B S. The Sāmpradayika Gatha also states that the last two Adhyāyas of Anu-Bhashya were composed by Vitthales'vara under the directions of his father. But we did not learn from the above the materials on which their suggestion was based. The statement of Purushottamaji that the second Varnaka of the Anandamayādhikarana and the Anu-Bhāshya from III. 2-33 was Vitthales'vara's, appeared to be perfectly correct from the style and views expressed there in. Any one familiar with the language of Vallabhacharya could without doubt say that the passage 'क्वचित् गोकुल' etc in III. 3-1 was not of the authorship of Vallabhacharya. This difficulty has been now solved beyond any doubt. In search of MSS of the missing portions of Ras'mi, we again went on a tour to Nathadwara. Through very great kindness of H. H. Tiket S'ri Govardhanalalji Maharaja and his son Lalbava Saheb S'ri Damodaralalji we got access to the original MSS. carefully preserved there. To our great delight and satisfaction we found an almost complete Manuscript of the Anu-Bhāshya Adhyāya IV and three last pages of Adhyāya III Pāda IV and second interpretation of III, 4-19. 'अनुष्ठेयं' in the handwriting of Vitthales'vara himself This unexpected discovery of the original Manuscript of the Anu-Bhāshya has been fruitful of many far-reaching results. It has put beyond the shadow of doubt the authorship of the last two Adhyāyas of the Anu-Bhashya. Purushottamaji's statement in Prakās'a III. 2-24 'इत आरभ्य प्रभुणामिति' is based on a firm and reliable basis. He, it seems, had access to the above original of the Anu-Bhashya. On the leaves of this original MSS there are fine paper-slips. On these paper-slips there are remarks pointing out the portions of the Anu-Bhāshya to which those pages belonged. These remarks, it appears to us, are in Purushottamaji's own handwriting. This fact has led us to prefer Prakās'a's readings of the Anu-Bhāshya in preference to others. This original Manuscript with all its additions and revisions taken into consideration proves beyond doubt that Vitthales'vara is the author of the last Adhyāya and a half of Anu-Bhāshya, though the 'इतिश्री' in the name of Vallabhacharya in Vitthales'vara's own hand would suggest that he himself desired to allow the public to know that Vallabhacharya was also the author of the same. The ambiguous verse 'भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे । निवेदिता तेन तुष्टा भवन्तु मयि ते सदा' is consistent both with the authorship of Vallabhacharya and Vitthales'vara. In one case we have to understand the word Acharya as referring to Badarayana and in the other to Vallabhacharya. This fact explains the references to Vitthales'vara's Vidvanmandana and Bhakti-Hansa in this portion of the Anu-Bhāshya. References to the Adhyāyas III and IV in Subodhini and Nibandha would go to show that Vallabhacharya himself wrote complete Bhashyas in both the Mimānsās. But it seems Vittha-

les'vara got Vallabhacharya's Bhashya on the Brahma-Sūtras upto III-2-33. It seems this was the only portion in his possession when he composed his Vidvan-mandana. It was at a late stage, after he adopted Gokula near Muttra as his permanent residence, and when he seems to have lost all hopes of securing a complete manuscript of his father's Brahma-Sūtra-Bhashya, that he undertook to complete the Bhashya fragment of his father on the Brahma-Sūtras. In order to distinguish this Bhashya from that of his father, he seems to have named it Anu-Bhāshya. In Subodhini Vallabhacharya does not refer to his commentary on Brahma-Sūtra as *Anu* Bhashya, but only as *Bhashya* without the word Anu. The absence of any pungent expressions, which we find in the Vidvanmandana, against opponents in the Anu-Bhāshya portion of Vitthales'vara would clearly show that the portion of the Anu-Bhāshya by Vitthales'vara is the work of his mature age.

We express our heartfelt obligations to H. H. S'rī Govardhanalalji Maharaja of Nathadwara and his son S'rī Damodaralalji for allowing us the use of the said original manuscript of the Anu-Bhāshya, and for giving us photographs of some of its pages. In due course photo-blocks of the same will be ready, when the Vaishṇava public will be in a position to know Vitthales'vara's handwriting.

A picture of Purushottamaji is placed in this volume. The original was obtained by us from S'rī Dwarkanathaji's Mandira at Kankroli in Mewar, through the kindness of H. H. S'rīmad Goswamini S'rī Saundaryavati Vahuji, the mother of S'rī Vraja Bhushanaji, the present occupant of the seat. We also thank Seth Lalji Naranji J. P. for having given his consent on behalf of the trustees for defraying the cost of getting the blocks made and printed.

One of the manuscripts utilised in basing the text of this Pāda-Bhashya has turned out to be of S'rī Kalyānarayaji, the father of the Great S'rī Harirayaji. This Kalyanarayaji is the first grandson of Vitthales'vara. We beg to draw the attention of the scholars of the Sampradāya as well as others to the Paris'ishta printed here. It is almost a complete commentary on the Gunopasanhāra Pāda of the Anu-Bhashya It was made available to us by the late Mr. Tansukhram M. Tripathi B. A., the veteran scholar of Gujarat On a comparison of the same with the Prakās'a, we find that almost the whole of it is incorporated in the Prakās'a. It seems possible from the style of expression and method of writing that Purushottamaji owes much to this. Its style resembles that of Krishnachandraji's Vritti. If so, the comparative method of exposition followed by him in Prakās'a owes its origin to the genius of Krishṇachandraji. This Krishnachandraji was born on the 7th day of Dark half of S'ravaṇa 1655 Samvat. He was the guru of Purushottamaji both in name and fact. It is possible that Krishṇachandraji wrote his commentary from the very beginning, and the same is incorporated in the Prakās'a as here. We request scholars to make a search for the same. If found, it will be the oldest commentary on the Anu-Bhāshya. The copy of the Guṇopasanhāra-Pāda-Vivarana printed in the Paris'ishta seems to be the original in Krishnachandraji's own hand.

Bombay,
27-4-27.

M. T. Telivala.

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १- ०-०
२	निरोधलक्षणम् । षड्विवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु १- ०-०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः । गुर्जरानुवादसमेतश्च ।	रु १- ०-०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १- ०-०
५	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु २- ०-०
६	सिद्धान्तमुक्तावली । अष्टविवृतिसमेता । गुर्जरानुवादसमेता च ।	रु. १- ०-०
७	सिद्धान्तरहस्यम् । एकादशविवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १- ०-०
८	पुष्टिप्रवाहमर्यादा चतुर्विवरणसमेता ।	रु. १- ०-०
९	नवरत्नम्-पञ्चविवृतिसमेतम् । गुर्जरभाषानुवादसमेतं च ।	रु १- ०-०
१०	श्रीसुबोधिनी । दशम-पूर्वार्ध-तामस-फलप्रकरणम् ।	रु ३- ०-०
११	श्रीसुबोधिनी । दशम-उत्तरार्ध-राजस-साधनप्रकरणम् ।	रु २- ०-०
१२	श्रीसुबोधिनी दशमोत्तरार्धराजसफलप्रकरणम् ।	रु. २- ०-०
१३	श्रीसुबोधिनी दशमोत्तरार्धसात्विकप्रमेयप्रकरणम् ।	रु. २- ०-०
१४	श्रीमती टिप्पणी । श्रीमद्विट्ठलेश्वरप्रणीता ।	रु २- ०-०
१५	रासपञ्चाध्यायीप्रकाशः । श्रीपीताम्बरप्रणीतः ।	रु. १- ०-०
१६	दशमतामसफलप्रकरणयोजना । श्रीलालूभट्टकृता ।	रु ०- ८-०
१७	भागवतार्थनिबन्धः । प्रकाशावरणभङ्गसमेतः । आद्यस्कन्धद्वयम् ।	रु १- ०-०
१८-२१	भावप्रकाशिका । ब्रह्मसूत्रवृत्तिः श्रीकृष्णचन्द्रकृता ।	रु. २- ४-०
२२	प्रथमस्कन्धसुबोधिनीप्रकाशः श्रीपुरुषोत्तमप्रणीतः ।	रु. १- ०-०
२३	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १- ०-०
२४	पत्रावलम्बनम् । श्रीपुरुषोत्तमकृतविवृतिसमेतम् ।	रु. ०- ६-०
२५	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१२-०
२६	त्रिविधनामावली । टीकासमेता ।	रु. १- ४-०
२७	तैत्तिरीयोपनिषद्भाष्यम् । श्रीजयगोपालभट्टकृतम् । गुर्जरानुवादयुतम् ।	रु. १- ०-०
२८	श्रीमधुराष्टकम् । षड्विवरणसमेतम् ।	अमूल्यम् ।
२९	प्रेमामृतम् । श्रीविट्ठलेश्वरकृतविवृतिसमेतम् । परिवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् ।	रु ०- ८-०
३०	शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् । गुर्जरानुवादसमेतम् ।	रु २- ८-०
३१	रसाब्धिमहाकाव्यम् । श्रीदेवकीनन्दनकृतम् ।	रु १- ०-०
३२	मनोदूतम्-हंसदूतं च । गुर्जरानुवादसमेतम् ।	रु ०- ८-०
३३	श्रुतिरहस्यम्-सप्रकाशम्-गुर्जरानुवादसमेतम् ।	रु. १- ०-०
३४-३६	श्रीमदणुभाष्य-प्रकाश-रश्मि । तृतीयाध्यायस्य पादाः १-२-३ ।	रु. १- ०-०
३७	गद्यटीकाः ।	अमूल्यम् ।
38	Discuss how far S'ankarâcharya truly represents the view of the author of the Brahma-Sûtras	Rs 1- 0-0

पंडित गट्टूलालजीनी पाठशाला, केथिड्रल्स्ट्रीट मूलेश्वर, मुंबई.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya sagar' Press, 26 28, Kolbhat Lane, Bombay

Published by Mulchandra Tulsidas Telivala B A, LL B, Vakil, High Court, Chandawadi, C. P. Tank Road, Girgaon, Bombay.